कर.म.
१

॥श्रीगणेशायनमः॥ श्रीमहाकालीवाडेश्वरायनमः॥ श्रीकालकामपरशरामायनमः॥ श्रीगुरुभ्योनमः॥ ॐ
श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यैनमः॥ निर्विघ्नमस्तु॥ वंदेकरींद्रवदनंसकलामरेंद्रवंद्यानतंसकलविघ्नविना
शदक्षं॥ यन्नम्यवेविधिहरीश्वरचंद्रमुख्यादेवालभंतिसकलेप्सितवृंदराशिं॥१॥ शारदांसकलवाक्प्रवृतिदां
सुंदरींसकलकल्मषहंत्रीं॥ संत्रमेत्सकलमंगलदात्रींहंसवाहनहठीकृतासनां॥२॥ दैतेयवृंदसुरवृंदकिरीट
कोटिज्योतिश्छटानिकरकल्पितरत्नदीपं॥ देवित्वदीयचरणंशरणंजनानांसेवामहेसकलमंगलवर्धनाय॥३॥
जयत्युपेंद्राख्यजनैरुपूरितंकोलापुरंक्षेत्रवरंत्रिलोक्यां॥ येतातिरुद्राप्यतिचंचलारमाशरीरिणांमुक्तयदेश्वरेश्व
री॥४॥ भूमिसंस्थितमपीहतेचभूर्यद्दिहोत्रेस्थिदिवतोप्यधरस्थं॥ तत्पायाज्जगदघौघहारणादविमुक्तकरवी
रकंपुरं॥५॥ सेवंतुरेभुविजनाः करवीरदिव्यधेनुप्रभूतकथनामृतमत्युदारं॥ यद्देभवाब्धिगदनाशकरं
पवित्रंपापापहंसकलमंगलवृद्धिदंतात्॥६॥ तंवेदशास्त्रपरिनिष्ठितशुद्धबुद्धिंचर्मांबरंसुरमुनींद्रनतंक

वींद्रं॥ कृष्णत्वचंकनकपिंगजटाकलापंव्यासन्नमामिशिरसातिलकंमुनीनां॥७॥ अष्टादशपुराणानांकर्तास
त्यवतीसुतः॥ कलिंसमागतंवीक्ष्यजनंदृष्ट्वाजडंमुनिः॥८॥ कृत्वावेदंचतुर्भागंचतुर्भिःसमपाठयन्॥ प्रत्ये
कमपिशाखांवैविधिवत्समपाठयत्॥९॥ इतिहासपुराणंवैपंचमंवेदमेवच॥ जितेंद्रियायशांतायसंतायस
त्यवादिने॥१०॥ सूतायकथयामाससर्वपापप्रणाशनं॥ व्यासउवाच॥ निमिषेनैमिषारण्येनानाद्रुमविभूषिते
॥११॥ नानादेववराकीर्णेनानापशुविभूषिते॥ नानापुष्पफलाकीर्णेयजंतःश्रद्धयान्विताः॥१२॥ नरनाराय
णस्याग्रेतस्मिन्वनवरेसदा॥ निवसंतिमुनिःश्रेष्ठाः परध्यानपरायणाः॥१३॥ कश्यपोगालवोगार्ग्योगौतम
श्चांगिरास्तथा॥ याज्ञवल्क्योवसिष्ठश्चभृगुः कुत्सस्तथैवच॥१४॥ पराशरोभरद्वाजोजालूकर्ण्यस्तथैवच॥विश्वा
मित्रस्तथात्रिश्चधनंजयविभावसू॥ मांडव्यश्चाथदुर्वासाजमदग्निस्तथैवच॥१५॥ आपस्तंबोथजाबालिः क
पिलश्चवनस्तथा॥ मुद्गलश्चकपिश्चैवजलंधोवीतिहोत्रकः॥१६॥ वामदेवोगस्त्यसमदोत्यघमर्षणएवच॥पा

क.र.म. वमान्य: प्रगाथश्चशंखश्चसोभरिस्तस्तथा ॥ १८ ॥ अष्टाशीतिसहस्रैस्तुसमेता: सर्वएवहि ॥ इत्येतेसंय
२ तात्मानोमुनय: शौनकादय: ॥ बदरीवनसंस्थाना: सूतंपप्रछुरादरात् ॥ १९ ॥ ऋषयऊचु: ॥ सूतजीवचि
रंसाधोयङ्कवान्श्रवणामृतं ॥ कथनंसर्वशास्त्राणांप्रकरोषिबहुश्रुतं ॥ २० ॥ श्रुत्वापिसर्वतीर्थानांभुवनत्र
यवासिनां ॥ नानास्थानप्रसिद्धानांमाहात्म्यमननंस्थिरं ॥ २१ ॥ माहात्म्यश्रवणात्तेषांसंशयोबहुजायते ॥ त
दुत्तममिदंवेतिसंशयाद्भ्रमतेमति: ॥ २२ ॥ अधुनेहमहाभागत्वादृशंब्रूहिन: प्रभो ॥ क्षेत्रंतीर्थवराकीर्णं
मिहामुत्रफलप्रदं ॥ २३ ॥ पुष्कराद्यानितीर्थानिगंगाद्या: सरितस्तथा ॥ प्रयागंचगयाचापिनैमिषारण्यमे
वच ॥ २४ ॥ विरजंसेतुबंधंचकृष्णावेणीचगौतमी ॥ द्वारकागोकुलंचापिश्रीशैलंपांडुरंगकं ॥ २५ ॥ वारा
णसीमहापुण्याचंद्रभागासरस्तथा ॥ इत्यादिसर्वतीर्थानिक्षेत्रेयस्मिन्वसंतिहि ॥ २६ ॥ तादृशंतीर्थमेकंहि २
ब्रूहिसंशयनाशनं ॥ यद्वासात्सुखिन: स्यामसर्वतीर्थनिवासिन: ॥ २७ ॥ मनोवैनिश्चलंकृत्वासर्वतीर्थफ

लाकुलं ॥ सूतउवाच ॥ अहोमेभाग्यमतुलंवेदशास्त्रविशामहं ॥ २८ ॥ भवतांप्रश्नतीर्थेनपूतोहंसर्वकर्म
सु ॥ वाराणस्याधिकंक्षेत्रंकरवीरपरंमहत् ॥ २९ ॥ नत्वाव्यासायमुनयेवदिष्येतत्कथानकं ॥ यन्नित्यंत्रि
जगत्पवित्रविलसत्तीर्थवृंदाततंश्रीमच्छक्तिवपुर्धरस्यहिविभोर्विष्णोर्निवासालयं ॥ यद्ब्रह्मेंद्रमुनींद्रवृं
दनिकरै: संसेवितंसर्वदा ॥ तत्क्षेत्रंकरवीरकंपुरवरंपायादपायाच्चिरं ॥ यत्रास्तेदिव्यलक्ष्मीर्द्विविधगुणव
तीविभ्रतीपानपात्रं ॥ सव्येज्ञानसुदायुतंगदहरंमातुलिंगंकरेन्ये ॥ भक्तांन्संवदतीवरंशिशुवरासंसारल
ग्नाश्चिरं ॥ पानंकुर्वेतुन्वेदंकटुयदिहिभवेत्तर्हिदास्येफलंव: ॥ यत्रास्तेसर्वमातात्रिभुवनभयहरव्यात्तरे
रवदिष्टपापापंसंप्रहिणोतियाप्युविन्नणांसंदर्शनात्पापिनां ॥ यत्राधिव्याधिरुपीडानहिभवतितथाकालभर्तुश्च
पीडातत्सव्यंकरवीरकंपुरवरंक्षेत्रंमहन्मात्रकं ॥ यत्रपंचनदीकास्तिपावनीपंचपातकविनाशिनीक्षणात्
पंचभिर्मुनिभिरात्तपापरै: स्वर्नदीस्वतनुमुक्तिदायिनी ॥ यत्पंचाशद्वितयाष्टकाधिकमहाकल्पप्रभूतंचिरं

क०र०म
३

सेव्यंनामविभूषितंसुखकरंशास्त्रायुतंत्वाज्ञया ॥ ३५ ॥ तावल्लिंगमुख्यलिंगैः प्रथितमधुयुतैर्भूषितंतत्पवि
त्रंतत्सेव्यंकरवीरमक्षयफलंकोल्हापुरंसर्वदा ॥ विघ्नान्कुर्वंतिसर्वेप्रथितसुखकराश्चैर्ष्यायास्त्यमानागुच्छ
त्येतेविमुद्रास्वपरपदतोप्युच्चमात्रस्थितायै ॥ ३५ ॥ एवंसंचित्यनूनंविविधमृगतनुबद्धचैतन्यरूपायत्नो
त्सज्याषिनित्यंप्रमुदितहृदयाह्यक्षरूपावसंति ॥ यत्रस्वभावेनरपशुमृगायांतिलोकंविकुंठंभोगान्भुक्तास
पदिपरिचितानैहिकामुष्मिकादीन् ॥ ३७ ॥ तद्दृक्षेत्रंप्रभजतजनाः सर्वसौख्यास्पदंयन्नत्साज्यंभुविमुक्ति
दंस्थलवत्स्थलधर्धंचापिकोल्हापुरंवै ॥ पुत्रावैपुत्रभावंनखलुसमायांसदस्वात्रपिंडंसेयंरुद्रपदप्रभृत्तविभवारो
हीगयाविश्रुता ॥ ३८ ॥ जंबुद्वीपशिरोविभूषणकरीकोल्हापुराख्यापुरीसंसेव्यात्रयबाधिकानरवरैर्वाराणसी
दक्षिणा ॥ आशास्पष्टसुसर्वरक्षकतयातिष्ठंतिदिव्यानिवै भ-३६ ॥ लिंगान्यष्टमहोज्वलानिमुनिभिः संसेवि
तानिक्रमात् ॥ ३९ ॥ तत्क्षेत्रंमृतमुक्तिदंस्थितजनानंदप्रदंसर्वदासेव्यंगेयमभीक्ष्णशः प्रतिदिनंकोल्हापु

रंपूर्वरं ॥ यस्मिन्क्षेत्रेविलसतिचतुर्द्वारतोनंतशाईलक्ष्मीकांतः स्वपक्षिद्विजलैःसर्वरक्षात्तचक्रः ॥ ४० ॥ तद्दृक्षेत्रं
प्रभजततसाशासर्वतीर्थादिभूतंसेव्यंरुद्रेंद्रचंद्रप्रमुखसुखकरैः सर्वतीर्थायदंयत् ॥ क्षेत्रेस्मिन्प्रथिताविभातिनग
रीद्वारावतीगोमतीश्री ४१ वंत्यासहसंगतात्रनिरतरांब्रह्मादिभिः सेव्यते ॥ ४१ ॥ तत्कोल्हापुरमत्रवैत्रिभुवनेक्षे
त्रंमहच्छोभतेकिंवर्ण्यंनिवसंतियेत्रसुचिरंतेषामनंतंफलं ॥ रामेश्वरोनिवसतेकिलसेतुबंधेयद्दर्शनंमहदघौघह
रंहियत्र ॥ किंतादृशेषुविभवेप्रथितंपुराणंक्षेत्रंविनापिकरवीरपुरंहिनान्यत् ॥ ४२ ॥ मल्लिकार्जुनशिवोपियत्रवै
शैलशृंगमधिरुह्यविभाति ॥ तत्क्षेत्रंप्रभजतांकरवीरंसुंदरंसकलतीर्थनिकायैः ॥ ४३ ॥ श्रीचक्रेत्रापुरंक्षितावधि
करायत्राग्निशंसंतिवैकल्लेशाजलशायिनोपिचचतुर्दिक्षुप्रशस्ताश्रयाः ॥ तच्चैतत्प्रथितंप्रभारमणुलंकोलापुरंराजते
विश्वेशादिसुदिव्यलिंगनिचयैः श्रीरुद्रपाशान्वितैः ॥ ४४ ॥ विराजतेयत्रतथाप्रयावांमहाबलक्रांतमुनींद्रवंद्यः ॥ त
तीर्थवर्यंकरवीरसंज्ञंकिंवर्णनीयंपरमेपवित्रं ॥ विष्णोर्गयाचापिविराजतेत्रविष्णुतीर्थस्थितहाटकेशं ॥ ४५ ॥ कोल्हा

४ ज्योतिरूपंत्र्यंबकेशाख्यलिंगंयत्रोदीच्यांराजतेपापभंजि ॥ तत्कोलाख्यंक्षेत्रमेतत्पवित्रंकृष्णागंगाप्यस्तिपुण्यप्रवाहा ॥ ४

कर॰ म॰ पुरंतीर्थमतीवपुण्यंजगत्त्रयेनेनसमंनचान्यत् ॥ वाररंवमनमपीहराजतेक्षेत्रपश्चिमविभागतोमहत् ॥ ४६ ॥
४ योजनत्रयसमंतरेणतत्करवीरंमहदघौघनाशनं ॥ विरजंविरजंहिभासतेयत्रमुकुलमुनीश्वरयुतं ॥ ४७ ॥ कर
वीरंसकलार्थितप्रदंसंसेव्यंस्वहितेच्छुभिश्चिरं ॥ गोकुलंसकलगोकदंबैः संयुतंसकलमंगलदात् ॥ ४८ ॥ शो
भतेकरवीरपुरेस्मिन्नत्यजेतदतोप्यधिष्ण्यंगौ यत्रास्तेपांडुरंगोविधृतकटिकरः क्षेत्रनैर्ऋत्यभागेद्वारेवैपौंडरी
केप्रमुदितहृदयः सेवयैवास्यपुत्रः ॥ द्वात्रिंशद्युगसंभवेपुरवरेनंदापुराख्येपुरेतत्क्षेत्रंप्रभजतामभीष्टफलदं
कोल्हापुरंवैभवं ॥ यस्मिन्क्षेत्रेविलसितमहाभैरवोरंकनाथोदेव्यायोविहितोविदुष्टदमनेरक्षणेसज्जनानां ॥ ५०
सेव्यंतत्करवीरकंपुरवरंचयंसदासर्वदाख्यातंदृणामभयप्रदंशुचिकरंपापापहंसेवनात् ॥ उज्वलांबास्थिता
यत्रद्वारेपूर्वेमहाशुभे ॥ कात्यायनींमहादेवींदक्षिणद्वाररक्षिणी ॥ ५१ ॥ पश्चिमद्वारपालस्तुश्रीसिध्यवटुके ४
श्वरः ॥ क्षेत्रस्योत्तरदिग्भागेस्थितोरत्नेश्वरोमहान् ॥ ५२ ॥ क्षेत्रस्यपूर्वदिग्भागेत्र्यंबुलीयत्रतिष्ठति ॥ देव्याद

4

त्तवरोदर्शोलोकयात्राफलप्रदा ॥ दर्शनंयेनकुर्वंतितेषांपुण्यापहारिणी ॥ वार्षिकाद्दर्शनाद्यावैरव्यायिनांदीयतेफ
लं ॥ ५४ ॥ पक्षत्रयनिवास्यत्रपुनात्यासप्तमंकुलं ॥ महाकल्मषलंपापंसंप्राप्यकरवीरकं ॥ ५५ ॥ क्षणा
द्विलीयतेनित्यंकिंचित्रंस्नानदानतः ॥ वीरोमहाबलोयत्रदैत्यदर्पापहारकः ॥ ५६ ॥ श्रीरंकभैरवश्चैवदेत्य
दानवयोः क्रमात् ॥ देव्यासंस्थापितोनित्यंदंडपाणिविभावसू ॥ ५७ ॥ देव्यालब्धवरोतौहिपूजनात्सर्वका
मदो ॥ संतिष्टतोमुनिश्रेष्ठाः केनेदंवर्ण्यतेपुरं ॥ ५८ ॥ एवंतीर्थवराकीर्णसर्वदेवनिषेवितं ॥ सर्वाभीष्टफ
लंतीर्थंत्रिषुलोकेपुनःक्वचित् ॥ ५९ ॥ छ ॥ छ ॥ इतिश्रीपद्मपुराणेकरवीरकांडेयममहामुनिसंवादेप्रथ
मोध्यायः ॥ छ ॥ छ ॥ सूतउवाच ॥ इममेवपुराप्रश्नंमार्कंडेयोमहामुनिः ॥ नारदंपरिपप्रच्छसर्वज्ञंकरुणा
निधिं ॥ १ ॥ अधीत्यवेदान्विधिवदर्थंविज्ञानतस्ततः ॥ पठित्वाधर्मशास्त्राणिपुराणान्यधिगम्यच ॥ २ ॥ अ
अगान्यभ्यस्यतर्कांश्चपरिलोक्यसमंततः ॥ मीमांसोद्वयमालोक्यधनुर्वेदंविगाह्यच ॥ ३ ॥ आयुर्वेदंविचा

कर· म· विचार्याथनाद्यवेदेकृतश्रमः ॥ अर्थशास्त्राण्यनेकानिप्राप्याश्वगजचेष्टितं ॥ ४ ॥ कलाश्चकृताभ्यासोमंत्रशा
५ स्त्रविचक्षणः ॥ भाषाश्चनानादेशानांलिपिर्ज्ञात्वाविदेशजाः ॥ ५ ॥ अर्थानुपाज्यधर्मेणभुक्ताभोगान्यदृच्छया ॥ यौव
नंगत्वरंज्ञात्वाजरांदृष्ट्वाभितंश्रुतिं ॥ ६ ॥ चिंतामणापमहतींमार्कंडेयोमहामुनिः ॥ पठतीमेगतः कालस्तथैवा
र्जयतोधनं ॥ ७ ॥ नाराधितोमहेशानः कर्मनिर्मूलनक्षमः ॥ प्राप्तोहंमानुषंदेहंनानायोनिर्विगाह्यच ॥ ८ ॥
स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्यच ॥ कालहीनागमस्यमानंजनंवीक्ष्यश्रुचान्वितः ॥ ९ ॥ अजयापरमात्मानं
तपसाकर्तुमुद्यतः ॥ तपोभूमिमचक्षाणश्चिंतयामासतांमुनिः ॥ १० ॥ किंतत्क्षेत्रंभवेदत्रयत्रोप्यस्कमहत्तपः
सहस्रधाप्रपद्येतयत्रायुर्दीर्घमाप्नुयां ॥ ११ ॥ इतिचिंतानुरेतस्मिनारदः पर्यटन्महीं ॥ समागतोमुनिश्रेष्ठो
मार्कंडेयेसमाश्रयं ॥ प्रणम्याथमुनिश्रेष्ठंसंपूज्यविधिपूर्वकं ॥ नारदंपरिपप्रच्छमार्कंडेयोमहामुनिः ॥ १२ ५
मार्कंडेयउवाच ॥ त्रिषुलोकेषुविख्यातंतीर्थंक्षेत्रंचदैवतं ॥ यत्रैतद्विद्यतेब्रह्मन्तत्तीर्थंब्रूहिमेमुने ॥ १३ ॥

5

अन्यान्यपिचतीर्थानिप्रयागादीनियत्रवै ॥ निवसंतिसमस्तानिक्षेत्रंतद्ब्रूहिनारद ॥ १४ ॥ कृतंदत्तंतथातप्तंय
ज्ञानंस्नायकल्पते ॥ वांछितंलभतेमर्त्योब्रूहितद्विस्तरान्मम ॥ १५ ॥ सूतउवाच ॥ इतितत्प्रश्नसंहृष्टोनार
दोमुनिसत्तमः ॥ क्षणंचिंत्यमहायोगीप्रवक्तुमुपचक्रमे ॥ १६ ॥ नारदउवाच विष्णुनाभिहतंक्षेत्रंमत्पित्रेपृ
च्छतेमुने ॥ तेनयत्कथितंमह्यंब्राह्मणात्पृच्छतेपुरा ॥ १७ ॥ तदहंसंप्रवक्ष्यामिकरवीरंमहापुरं ॥ नानातीर्थ
समायुक्तंनानामुनिगणान्वितं ॥ १८ ॥ सिद्धचारणगंधर्वयक्षकिंनरसेवितं ॥ पीठमाद्यंमहालक्ष्म्याः सर्वा
भीष्टप्रदंनृणां ॥ १९ ॥ करवीरेजलंशंभुः पाषाणस्तुजनार्दनः ॥ सिकतामुनयः सर्वेतरवः सर्वदेवताः ॥
॥ २० ॥ तिस्रः कोट्यर्धकोट्यश्चतीर्थानिभुवनत्रये ॥ निवसंतिसंगमंयांतिराहुग्रस्तेदिवाकरे ॥ २१ ॥ यद्दु
ग्रस्तशतंचैवनिष्कत्यांयत्फलंभवेत् ॥ तत्फलंहिमुनिश्रेष्टकरवीरेदिनेदिने ॥ २२ ॥ श्मशानउखरंक्षेत्रं
पुरंपीठंतथैवच ॥ पंचैतानिनलभ्यंतेकरवीरपुरंविना ॥ २३ ॥ आद्यंतुवैष्णवंक्षेत्रंशाक्तागमसमन्वितं

कर·म· मुक्तिमुक्तिप्रदंनृणांवाराणस्यायवाधिकं ॥२४॥ मार्कंडेयउवाच ॥ यवाधिकंपुरस्यास्यकथंजातंमहामुने ॥
५ ब्रूहितत्सकलंपूर्वंयथामेनिश्चलामतिः ॥२५॥ नारदउवाच ॥ वाराणसीद्वयंपूर्वंविष्णुनानिर्मितंमुने ॥ सर्व
जीवनिकायानांसंसारार्णवतारकं ॥२६॥ उत्तरंपुण्यपापानांदक्षिणोत्तरतः क्रमात् ॥ काशिकाचोत्तरेभागे
करवीरंतुदक्षिणे ॥२७॥ शिवरूपेणतत्रास्तिशक्तिरूपेणचात्रहि ॥ तस्मात्करद्वयंचेदंवैष्णवंप्रथितंभुवि
॥२८॥ कदाचिच्छिवशक्त्योस्तुविवादः समजायत ॥ तत्क्षेत्रंवामहत्पूर्वंत्वत्क्षेत्रंवामहत्परं ॥२९॥ एवंविव
दतोस्तत्रशिवशक्त्योरुपागतः ॥ विष्णुः संबोधयामासतुलांकृत्वाकरेस्वयं ॥३०॥ पुरद्वयंसमारोप्यकर
वीरंचकाशिकां ॥ उच्चैः करंप्रणीयाथप्रोवाचजगतांपतिः ॥३१॥ अधः किंदृश्यतेक्षेत्रंदक्षिणंवातथो
त्तरं ॥ शिवः प्रोवाचभगवान्तत्क्षेत्रंवोर्ध्वतोमहत् ॥३२॥ शक्तिः प्रहस्यतंत्वाहमत्क्षेत्रंभुविदृश्यते ॥ ना
नातीर्थसमुद्भूतगौरवेणार्पितंमहत् ॥३३॥ शिवः श्यामंमुखंकृत्वादस्मीतस्थौश्चार्पितः ॥ तुलांसंत्यज्य ६

वेविष्णुः शिवशक्त्योःफलप्रदः ॥३४॥ ब्रह्मादिदेवतुष्टायांसभायामुपविश्यसः ॥ उभयोर्जनयन्हर्षंप्रोवा
चजगतांपतिः ॥३५॥ विष्णुरुवाच ॥ शिवशक्त्योः समेक्षेत्रेमयात्रनिर्मितेपुरा ॥ तथापिजातंशक्तेर्वैयवमात्रंत
तोधिकं ॥३६॥ इतिविष्णुवचः श्रुत्वाब्रह्मेंद्रप्रमुखाःसुराः ॥ प्रोचुः कोल्हापुरंक्षेत्रंवाराणस्यायवाधिकं ॥३७॥ तत
तः शिवश्चशक्तिश्चजग्मतुः स्वस्वमाश्रयं ॥ शिवस्तुकिंचिद्विमनाः शक्तिश्लाघ्यातथाभवत् ॥३८॥ ततआरभ्य
तत्क्षेत्रंकाश्याबह्वपिचाधिकं ॥ प्रथितंसर्वलोकेषुवाराणस्यायवाधिकं ॥३९॥ दृष्ट्वैवंक्षेत्रमाहात्म्यंविचार्यचपु
नः पुनः ॥ सगणोविश्वनाथोपियत्रचागत्यसंस्थितः ॥४०॥ शिवसंस्थितिमाकर्ण्यकाशिकापूर्वरीपुरा ॥ ती
र्थरूपावसत्त्यत्रमणिकर्ण्यायुतास्वयं ॥४१॥ भागीरथीतथागंगाकरवीरेमहापुरे ॥ पंचक्रोशांतरेयेषातीर्थेषु
सर्वदेवहि ॥४२॥ संतिष्ठतिमहादेवीप्रकटाजायतेक्वचित् ॥ दर्शनस्पर्शनस्नानैः पुनातीहजगत्त्रयं ॥४३॥
श्रीविश्वेशोगतंदृष्ट्वास्वतीर्थसहितंमुने ॥ प्रयागतीर्थराजोपिबिंदुमाधवसंयुतः ॥४४॥ आगत्यसंस्थितोयत्र

क॰र॰म॰ क्षेत्रवायव्यभागतः ॥ कालिकामागतांवीक्ष्यप्रयागंचापियन्मुने ॥ ४५ ॥ समागतानितीर्थानिलोकत्रयगतान्यपि ॥ म
७ हाकालीस्वरूपेणवसत्यत्रमहेश्वरः ॥ ४६ ॥ महासरस्वतीरूपोब्रह्माप्यत्रसुसंस्थितः ॥ साक्षाल्लक्ष्मीस्वरूपेणवि
ष्णुरत्रैवसंस्थितः ॥ ४७ ॥ त्रयस्त्रिंशत्कोटिदेवाः सर्वेप्यत्रसमंततः ॥ आगत्यसंस्थितानित्यंकरवीरपुरेवरे
॥ ४८ ॥ द्वारकांचापिचागत्ययत्रतिष्ठंतिपूर्वतः ॥ जीवंस्यासंगतांयत्रगोमतीपापहारिणी ॥ ४९ ॥ चतुर्णामपिव
र्णानांयत्रद्वाराणिसर्वतः ॥ अतोद्वारवतीप्रोक्तावेदविद्भिः स्तत्वदर्शिभिः ॥ ५० ॥ अस्थीन्यपिचजंतूनांयत्रचक्रां
कितान्यहो ॥ अद्यापियत्रदृश्यंतेसंगमेपतितानिच ॥ ५१ ॥ नद्योर्जीवंतिगोमत्योः संगस्थमस्थाम्देवहि ॥ ता
रयेत्सकलान्जंतून्घतमात्रात्कलाटके ॥ ५२ ॥ तिलेतिलेवसंत्यत्रलिंगानिकरवीरके ॥ तस्मादेतत्समानंवैती
र्थमन्यंनविद्यते ॥ यत्राणुमात्रंसत्पात्रेत्यर्पितंमेरुणासमं ॥ ५३ ॥ स्वल्पमप्यत्रयज्जप्तंतदानंत्यायकल्प्यते ॥ ७
कृतमप्यत्रचानंत्यंयथाबीजान्महावटे ॥ ५४ ॥ जायतेहिमुनिश्रेष्ठक्षेत्रमाहात्म्यतः परं ॥ करवीरंसमाश्रित्यमास

7

मेकंददातियः ॥ ५५ ॥ तेनेयंसकलापृथ्वीदत्तारत्नसमन्विता ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥
गवांकोटिप्रदानंचकरवीरेचार्धभिक्षया ॥ पुमानाप्नोतिसततंसत्यंसत्यंवदाम्यहं ॥ ५७ ॥ भिक्षार्थमटतेनित्यं
दत्तात्रेयोमहामुनिः ॥ वासिनामक्षयंपुण्यंभिक्षयादातुमत्रकिं ॥ ५८ ॥ भिक्षयाप्राप्यतेयद्धिकरवीरविवा
सिभिः ॥ तदन्यैर्नाप्यतेसर्वैर्महायज्ञैर्महामुने ॥ ५९ ॥ बहवोत्रगतिंलब्ध्वाकरवीरनिवासिनः ॥ भिक्षादा
नेनवैभिक्षंश्रद्धयासर्वयोनिषु ॥ ६० ॥ वेदवेदार्थदानंहियत्रकुर्वंतिमानवाः ॥ तेषांपुण्यंप्रवक्तुंचसहस्राव
दनप्रभुः ॥ ६१ ॥ द्विजायगृहदानंवैयेकुर्वंत्यत्रवैनराः ॥ तेसर्वेपापनिर्मुक्ताः स्वर्गलोकेवसंतिहि ॥ ६२
करवीरपुरेयेवैगांदद्युभयतोमुखीं ॥ संसारभयनिर्मुक्ताः तेयांतिविष्णुमंदिरं ॥ ६३ ॥ अन्यान्यपिचदानानि
येकुर्वंतिहिमानवाः ॥ अनंतंचभवत्येषांफलदानसमुद्भवं ॥ ६४ ॥ येचैवनिवसंत्यत्रजपंत्यपिमुनीश्वराः
कपिलोत्रमुनीज्ञात्वाक्षेत्रमध्येसुसंस्थितः ॥ ६५ ॥ अहमप्यत्रतिष्ठामिक्षेत्राद्धेष्टतोमुने ॥ गौतमीसंगमे

कर॰ म॰ यत्रद्वारकायांवसेद्धरिः॥ ६६॥ क्षेत्रस्यदक्षिणेभागेअगस्त्योस्तिमहानृषिः॥ विसृज्यकाशिकावासंक्षेत्रमाहा
८ त्म्यसारवित्॥ ६७॥ क्षेत्रवायव्यदिग्भागेतिष्ठत्यत्रपराशरः॥ पर्वताग्रेसोमतीर्थेसोमेशंलिंगसंन्निधौ॥ ६८॥
व्यासोपिनिकटेयत्रविशालनिकटेमुनिः॥ वालखिल्यपुरोभागेच्यवनोपिकृतसंस्थितः॥ ६९॥ अष्टाशीतिसहस्रं
वैमुनयश्चपृथक्पृथक्॥ क्षेत्रात्तमंततः सर्वेसंतिष्ठंतिविवेकिनः॥ ७०॥ एवंरुद्रादयोदेवादृक्षोपलस्वरू
पिणः॥ नत्यजंतीहयत्क्षेत्रंकिंतद्वर्ण्यंमहामुने॥ ७१॥ पंचक्रोशमिदंक्षेत्रंपावनंकरवीरकं॥ संत्यत्रसर्वती
र्थानित्रैलोक्यंतर्गतानिवै॥ ७२॥ गृहाच्चलितमात्रेणकरवीरपुरंप्रति॥ स्वर्गारोहणसोपानंपितॄणांचपदेपदे
॥ ७३॥ पदेपदेश्वमेधस्यगच्छतः करवीरकं॥ फलंभवेत्समग्रंहिसत्यंसत्यंवदाम्यहं॥ ७४॥ श्राद्धंकृत्कर
वीरेयः पितॄणामनृणोहिसः॥ शिरसिश्राद्धकृद्यस्तुकुलानांशतमुद्धरेत्॥ ७५॥ येननालोकितंतीर्थंकरवी
रमिदंक्वचित्॥ याम्यवाराणसीक्षेत्रंनिरर्थंतस्यजन्महि॥ ७६॥ तस्मात्वमत्रसंस्थित्वातपस्तपस्तुनिश्चलः ८

प्राप्स्यसेसकलान्कामानैहिकामुष्मिकानपि॥ ७७॥ शिवालयंदेवगणालयंचमहेश्वरंयोगचिरालयंच॥ ए
वंनरोयोविधिवन्महात्म्यंनंसत्यजेत्कोलगिरींकदाचित्॥ ७८॥ ७९॥७६॥ इतिश्रीपद्मपुराणेकरवीरकांडे
करवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेद्वितीयोध्यायः॥ ॥२॥ मार्कंडेयउवाच॥ अत्राश्चर्यमिदं
प्रोक्तंक्षेत्रंवैविश्वपावनं॥ माहात्म्यंतस्यमेब्रूहिसकलंविस्तरान्मम॥ १॥ नारदउवाच॥ कृपेसंश्रृणुमाहात्म्यंकर
वीरपुरस्यहि॥ दक्षिणस्यांविमुक्तस्यभुक्तिमुक्तिप्रदस्यच॥ २॥ व्यासतोयस्यमाहात्म्यंप्रवक्तुंपुरुषायुषा॥ सह
स्रवदनोनालंमादृशः किंभवेत्प्रभुः॥ ३॥ तथापिकथयिष्येहंयथाज्ञानंयथाश्रुतं॥ यदुक्तंब्रह्मणामह्यंतस्य
वैश्रृणुनिस्वशाः॥ ४॥ विसृज्यकाशिकावासंयत्रासंदुर्मनाःप्रभुः॥ अगस्त्योथययोस्थातुंकरवीरपुरेतदा
॥५॥ महिष्यासहितोब्रह्मन्देव्यायत्रनिवासिनः॥ विनापुण्येनवैनॄणामविमुक्तंचवैमुने॥ ६॥ दक्षिणे
चोत्तरेवापिवासोनैषभवेद्दिह॥ मार्कंडेयउवाच॥ विसृज्यकाशिकानेनकलशोत्थेनवैमुने॥ ७॥ सर्वाभि

करः म॰ ज्ञेनमुनिनाकाशीवासविरातथा॥ आगतस्यापिदेव्यावाकरवीरपुरंप्रति॥ ८ ॥ वासेनैवचसंदिष्टः संदिष्टं
१ स्वामिदर्शनं॥ दक्षिणोत्तरयोः काश्योवासेतस्यमहात्मनः॥ ९॥ कोवांतरायः समभूत्तत्सर्वंब्रूहिनारद॥
विनांतरायमन्येपिजडानेवहिकाशिकां॥ १०॥ त्यजंतिमनुजानित्यंकिमुताद्यकविपश्चितः॥ कः काशिकां
सर्वगुणप्रकाशिकांत्यजेतमंदः स्वकुटुंबरामः॥ विश्वेश्वरोयत्रहिजंतुमात्रंसमुद्धरेत्स्वात्मपरोपदेशात्॥
॥ ११॥ कः काशिकांविसृजामीतिजंतुरात्माघातीचिंतयेद्यापिमंदः॥ कुंभंहित्वानिधिंगर्भंयथावैभिक्षार्थं
वाधारयेत्कः कपालं॥ १२॥ सूतउवाच॥ इत्थंप्रश्नद्विनयात्संप्रहृष्टोदेवर्षिर्वैनारदस्तंमुनीद्रं॥ मार्कंडेयं
संप्रवक्तुंप्रवृत्तस्त्वेतच्छ्रोतव्यंसावधानैर्भवद्भिः॥ १३॥ नारदउवाच॥ कदाचिद्विधियोगेनकलशोद्भवएक
दा॥ तीर्थालोचनसंप्रीत्याचचारावनिमंडलं॥ १४॥ संभ्रमन्सर्वतीर्थानिशिष्यवृंदसमन्वितः॥ नानातीर्थ
विधिंशिक्षन्नाजगामकुलाचलं॥ १५॥ पाठलाशोककुजंबीरपनसांचविभूषितं॥ शुकपारावताकीर्णंसारी १

पिकूनिनादितं॥ १६॥ मत्तषट्पदनिर्घुष्टंचलत्पद्मरजः पयः॥ मनोहरतिवैनृणांसरोवरगतिंसुभ्रं॥ १७
हंसकारंडवाकीर्णंचक्रकैः सारसैरपि॥ शोभितंपक्षिसंघातैर्ज्वलत्खलवनेचरैः॥ १८॥ तत्राददर्शभ
गवान्सुद्युम्नंराजसत्तमं॥ पद्मासनसमारूढंमीलितेक्षणशोभितं॥ १९॥ हरिध्यानपरंशांतंदंभभेदवि
वर्जितं॥ तंदृष्ट्वाराजशार्दूलंराजानंदैवयोगतः॥ अहंकारपरोभूतः प्रवरस्थस्त्वकोविदान्॥ पश्यन्
ताश्चर्यमेताद्धिबलंविप्राः स्वकाश्रमं २१॥ हरिध्यानछलेनायंनेत्रेनिमील्यसंगतः॥ करोतिनसपर्या
योमंदभाग्योयथापशुः॥ २२॥ नपृच्छतेस्वागतंचस्वागतान्चागतान्प्रति॥ प्रणामंमेवरंचायंन
किंपश्यतिदुर्मतिः॥ २३॥ येनतोयानिधिः पीतोमहारत्नसमुद्भवः॥ वातापील्वलनामानौदैत्यौचापिवि
नाशितौ॥ २४॥ तंमान्नाकिमयंवेदकदर्थीकृत्यतिष्ठति॥ नाशितंतपएतेनस्वकीयंयत्पुराकृतं॥ २५
प्रतिबध्नातिहिश्रेयः पूज्यपूज्याव्यतिक्रमः॥ ब्राह्मणानमतेसोपियध्यानानिरतोह्यसौ॥ २६॥ ब्रह्म

प्यरेवः सहरिस्तध्यानंनायमर्हति हरिपादांबुजंसाक्षात्सात्विकैरेवसेव्यते ॥ २७ ॥ नाधिकारोस्तियध्याने
तामसस्यास्तिवैध्रुवं ॥ तस्मादयंनंदनीयोयथान्यः प्रविभेतिमां ॥ २८ ॥ भवत्वंहिगजोमत्तः इतिशप्तागतो
मुनिः ॥ प्रतिशप्तुंसमर्थोपिसराजादुःखपासकः २९ प्रतिशापंददेनैवहरिस्तोत्रंचकारह ॥ इंद्रद्युम्नउवाच
भक्तवत्सलहरेकृपानिधेपाहिपाहिभवपाशविमोचिन् किल्बिषंचकिमकारिभोमयादंडएषपतितोममदुः
सहः ॥ ३१ ॥ नबिभेमिहरेजगत्पतेदुष्टयोनिगमनादपिनित्यं प्रबिभेमिभगवच्चरणांबुजध्यानहानिकर
करींद्रजन्मतः ॥ वत्सलोसियदिभक्तजनेविभोनाथनाथकरुणानिधेमम ॥ दुष्टयोनिविहितस्यतेवि
मोचितमंबरणयोरुपदेहि ॥ ३२ ॥ नारदउवाच ॥ इत्थंस्तुतोमुनिश्रेष्ठः श्रीहरिभक्तवत्सलः ॥ माभैरिति
ब्रुवन्नुच्चैराययौगरुडध्वजः ॥ ३३ ॥ पीतवासाघनःश्यामः शंखचक्रगदाधरः ॥ वनमालाभियुक्तांगः
कंबुकंठोबृहत्तनुः ॥ ३४ ॥ प्रद्युम्नंचाथराजानंसमाश्वास्याथलीलया ॥ प्रोवाचजगतांनाथस्तूष्णीमेवपुरस्थि

तं ॥ ३५ ॥ श्रीविष्णुरुवाच ॥ कर्मदोषेणवैराजन् गजयोनिमधारय ॥ अंतेमत्स्मरणंभूयात्तवएवमनोर
थः ॥ ३६ ॥ ततोमत्पार्षदत्वंतेदास्यामिभवतश्चिरं ॥ यदन्येनाप्नुवंतीहनानापुण्यसमृद्धिभिः ॥ ३७ ॥
येनक्तश्चाविशोस्यंगतस्मादर्थोभविष्यति ॥ परस्यदुःखदोयस्तुसस्वयंदुःखभाग्भवेत् ॥ ३८ ॥ नारदउ
वाच ॥ इत्थमामंत्र्यराजानंहरिः पार्षदसंयुतः ॥ जगामाथमुनिश्रेष्ठवैकुंठंपुरमुत्तमं ॥ ३९ ॥ कदाचित्त्व
यंलोकान्गतोहंविष्णुमंदिरं ॥ शक्रब्रह्मादिनातोथभगवंतमधोक्षजं ॥ उपविष्टः स्तवंचाहंतदावि
ष्णुर्जगादह ॥ विष्णुरुवाच ॥ पश्यपश्यमुनिःश्रेष्ठदौरात्म्यंकंसजन्मनः ॥ ४१ ॥ इंद्रद्युम्नोयेनसंशप्तो
निर्मथोनिरहंकृतिः ॥ यथाचविघ्नितंतस्यप्रियंमत्सेवनंपुरं ॥ ४२ ॥ तथातत्प्रियमप्यंगविघ्नितंकुरु
सत्वरं ॥ वाराणसीद्वयेवासः प्रियस्तस्यमहामुने ॥ ४३ ॥ सोजसाविघ्नितः कार्योभुक्तिमुक्तिफलप्रदः
वाराणसीद्वयंपूर्वसमंसृष्टमयात्रवै ॥ ४४ ॥ काशिकाचोत्तरेदेशेकरवीरंतुदक्षिणे ॥ काश्यांविश्वेश्व

रूपेणस्थितोयंसर्वदेवहि ॥ ४५ ॥ तत्रस्थानांचसर्वेषांमोक्षमेवददाम्यहं ॥ तारकस्योपदेशेनसर्वलोक
हितप्रदः ॥ ४६ ॥ स्थितोहंशक्तिरूपेणदक्षिणेकरवीरके ॥ भुक्तिमुक्तिप्रदानार्थंशक्तिरूपंमयाधृतं ॥४७
साक्षाद्विष्णुस्वरूपेणमुक्तिदोहंनभुक्तिदः ॥ वाराणस्याः सकाशाच्चैकरवीरंपुरंमहत् ॥ ४८ ॥ मुक्तिमात्रा
प्रदायाचैभुक्तिमुक्तिप्रदंमहत् ॥ मुक्तिमात्रप्रदात्र्येताः पर्यषट्पुरिस्ताः शृणुनारद ॥ ४९ ॥ अयोध्याम
थुरामायाकाशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैतामोक्षमात्रदाः ॥ ५१ ॥ भुक्तिमुक्तिप्रदाश्चाथ
षट्पर्यस्तान्निबोधय ॥ करवीरंविरूपाक्षंश्रीशैलंपांडुरंगकं ॥ ५२ ॥ श्रीरंगंसेतुबंधंचभुक्तिमुक्तिप्रदानि
षट् ॥ पुरीषुसप्तस्वश्रेष्ठंकाशीक्षेत्रंमहत्तरं ॥ ५३ ॥ भुक्तिमुक्तिप्रदास्वेवंषट्पुरिष्वपिवैमुने ॥ याम्य
वाराणसीक्षेत्रंकरवीरंमहत्तरं ॥ ५४ ॥ अन्यानिसर्वतीर्थानित्रैलोक्यांतर्गतानिवै ॥ अविमुक्तद्वयासौहिका
स्थानिनसंशयं ॥ ५५ ॥ वाराणसीद्वयंचेदंपावनंसर्वदेहिनां ॥ निर्मितंहिमयानूनंजंतूनांहितकाम्यया ५६

स्थितोहंतत्रवैसाक्षाच्छिवशक्तिः स्वरूपतः ॥ शिवशक्त्योः समेक्षेत्रेमयायद्यपिनिर्मिते ॥५७ ॥ तथापिशक्तिकंक्षे
त्रंत्वधिकंदृश्यतेमुने ॥ शिवशक्त्योर्यदाचैवंविवादः समभूत्पुरा ५८ मदीयमेतत्क्षेत्रंहिपरमित्यब्रवीच्छिवः
शक्तिरप्येवमेवाहक्षेत्रंवैमामकंमहत् ५९ तयोर्विवादनाशार्थंतुलयातुलितेमया मुक्तिमात्रप्रदातस्माच्छि
वक्षेत्रान्महामुने ६० भुक्तिमुक्तिप्रदंतीर्थमधिकंकरवीरकं संजातंतुलयायस्माद्यवाधिकमितीरितं ६१ ये
वाद्विषंतिमद्भक्तास्तेचापिमुनिसत्तम। वाराणसीः-द्वयेस्थातुनममर्थाभवंतिहि ६३ ॥ तस्मादयंबहिर्नें
यः काशिवासपरायणः अयमेवहिदंडोस्यभवेदुत्पथगामिनः ६४ घंटोकवस्यदुर्बुद्धेर्बहिर्नेयंममा
ज्ञया ॥ त्वयाचांतर्गतेनाथभक्तेनेत्यब्रवीद्धरिः ६५ ६६ ६७ इतिपाद्मेमहापुराणेकरवीरकांडेकरवीर
माहात्म्येनारदमार्कंडेयसंवादेतृतीयोध्यायः ३ ६८ ६९ नारदउवाच ततोविनिर्गतश्चाहंविचार्यचपु
नः पुनः किमद्यैवमयाकार्यंकथंचायंमहामुनिः १ तूष्णींकाश्यांबहिर्यायांनयथाद्वेषमाचरेत् तथासंचि

कर-म. स्यमनरिगतोहंविंध्यपर्वतं २ संसारतापसंहारिरेवावारिपरिष्कृतं द्वैरूप्येणापिकुर्वंतंस्थावरेणचरेणच ३
१२ साभिख्येनयथार्थाख्यामुख्यैर्वृक्षमतीमिमां रसालैः पनसैसालैरशोकैःशोकहारिभिः ४ शालैस्तमालैःश्री
तालैरन्यैः सर्वत्रशालितं नारिकेलैः सखर्जूरैर्घनंछत्रमिवांबरे ५ उत्सृजंतमिवार्घ्यंवैफलपुष्पैरितस्त
तः केकिकेकारवैदूरात्कुर्वंतंस्वागतंकिल ६ अथसूर्यसमाभासंनभसिद्योतितांबरं भांतदादृष्टवान्स
शैलोदूरात्प्रत्युज्जगामिह ७ दृष्ट्वाम्हदुल्लतांतस्यद्वैरूप्येपिमहामुने संतुष्टोहंतदाजातस्तद्दर्शनमहोत्स
वः ८ गृहमार्यांसमालोक्यगुरुंवागुरुमेवच योगुरोर्नम्रतांधत्तेस्वगुरुर्नगुरुर्गुरुः ९ मरुत्पुष्पैः शिरः
सोपिविनम्रोनकंलेधरः शैलस्विलान्मीलन्मौलिः प्रणनामतदामुनिं १० समुत्थायकराग्राभ्यांमात्री
भिरभिनंद्यच तदुद्दिष्टासनेतत्रउपविष्टस्तुचादृतः ११ सद्भामधुमाज्येननीराज्ञीक्षतदूर्वया नीलैः १२
कुशैः प्रसूनैश्चमिष्टान्नाद्यैरपूजयत् १२ गृहीतार्घ्येकिलश्रांतंपादसंवाहनादिभिः गतश्रमंमथालो

।—

क्यबभाषेचनतोगिरिः १३ अद्यःसद्यः परिष्कृतंत्वदंघ्रिरजसारजः त्वदंगसंगिमहसासहसाप्पलरंतमः १४
सकलद्दिरङ्कंचाद्यसुदिवाद्यैचमेमुने प्राक्तनैःसुकृतैरद्यफलितंमेचिरार्जितैः १५ । धराधरत्वंकुलिषु
मान्यमेद्यभविष्यति इतिश्रुत्वातदाकिंचिदुद्धस्यास्थितवानहं १६ पुनरेवकुलिवरः संभ्रमापन्नमानसः
उद्धासकारणंप्रश्नंचकृदिसर्वार्थकोविद १७ अनुकंपास्तिमयिचेदुच्यतांप्रणतोस्म्यहं त्वदागमनजानं
दसंदोहैर्मेदुरोदरः १८ अकंनवकुंसमकुन्तथाप्येकंवदाम्यहं धराधराणांसामर्थ्यैर्वादोद्धुद्धिपौरुषैः
१९ वर्ण्यतेसमुदायातद्दृमेकोधरेधरां नमेरुस्वर्णपूर्णत्वाद्रत्नसानुस्तथापिवा २० सूरसंघतयावा
पिकपिमान्योमतोमम हेमकूटत्रिकूटाद्याः कूटोत्तरपदास्तुते २१ किष्किंधक्रौंचरासल्लाश्चभारसह्यान
तेभुवः अखर्वखर्वसंसर्गोमहत्त्वायप्रकल्पते २२ श्रीशैलमुख्याः किंशैलानेहसंत्वमलश्रियः तेषांद
र्शनमात्रेणादर्शनंमुक्तयेसतां २३ अद्यास्यचलमालोक्यमितिमत्वामहंध्रुवं नारदउवाच सत्यमुक्तंहिभ

कर·म· वतागिरिसारंविचक्षणता २४ वरंशैलेषुशैलेन्द्रो मेरुस्त्वामवमन्यते मयानिश्वसितंचैतत्त्वयिचापिनिवेदि
१३ तं २५ अथवामद्विधानांहि केयंचिंतामहात्मनां स्वस्त्यस्तुतुभ्यमित्युक्त्वागतोहंव्योमवर्त्मनि २६ गते
मयिनिनिंदस्वमतीवोद्विग्नमानसः चिंतामवापमहतींविंध्योवंध्यमनोरथः २७ विंध्यउवाच धिक्
जीवितंशास्त्रकुलोज्झितस्यधिग्जीवितंधर्मविवर्जितस्य २८ धिग्जीवितंव्यर्थमनोरथस्यधिग्जीवितं
ज्ञातिपराजितस्य कथंभुनक्ति सदिवाकथंरात्रौस्वपित्यहो रहः शर्मकथंतस्ययस्याभिभवनंरिपोः २९ किं
करोमिक्वगच्छामिकथंमेरुंजयाम्यहं उत्पत्यतस्यशिरसिपतामिचलपास्युत ३० अथवासकथंमेरुःस
तोच्चैस्स्पर्धतेमया भूमिसारच्छतः प्रायोभवंतिभ्रांतिभूमयः ३१ अलीकंवाक्यमथवासंभाव्यंनारदो
मुनौ ब्रह्मचारिणिवेदज्ञेसत्यलोकनिवासिनि ३२ युक्तायुक्तविचारोयंमादृशोनोपयुज्यते पराक्रमेष

13

सक्तानांविचारेगाहतेमनः ३३ क्षणंमनसिसंदिस्यभवेदित्थमसंशयं विचक्षणोरूपेस्योनवर्धमानोजयाजयो ३४
मेरुंप्रदक्षिणीकुर्वन्नित्यमेवदिवाकरः सग्रहर्क्षगणोनूनंमन्यमानोबलाधिकं ३५ इतिनिश्चित्यविंध्याद्रिर्ववृ
धेसमृद्धेक्षणः अनंतंगगनस्यांतंकुर्वद्भिः शिखरैरिव ३६ कैश्चित्साकंविरोधेनकर्तव्यः केनचित्कचित्
कर्तव्यश्चेत्प्रयत्नेन यथानोपहसेज्जनः ३७ निरुध्यब्राध्नमध्वानंकृतकृत्यइवाद्रिराट् स्वस्थोभवद्भवाधीनां
प्राणिनांप्राणिनांस्थितिः ३८ ममचमपकर्तासौदक्षिणांप्रक्रमिष्यति सकुलीनः सचश्रीमान्समहान्स्महितं
श्रुतिः ३९ योवैस्वशक्तिंशक्तोपिनदर्शयतिकर्हिचित् तावत्सलंघ्यः सर्वेषांज्वलनोदारुगोयथा ४० इतिचिं
तामहाभारंयत्क्लांतस्थोस्थिरोधमः आकांक्षमाणस्तरणेरुदयंब्राह्मणोयथा ४१ सूर्यआत्मास्यजगतःस्तस्थु
षः स्तामसोरिपुः उदियायोदयगिरौशुचिप्रसृमरैःकरैः ४२ सवर्धयन्ततोधर्मान्प्रकुर्वन्नतामसीतनुं प
द्मिनीबोधयंस्तत्क्षणंरात्रौमुकुलितानना ४३ हव्यंकव्यंभूतबलिंदेवादीनाप्रवर्तयन् प्राण्हापराण्हामध्यान्ह

क्रियाकालंविजृंभयन् ४४ असत्ताद्दिवक्रेषुनिर्दिशांस्तामसीगतिं यामिनीकालकलितंजगदुज्जीवनंपुनः ४५
यस्मिन्ननुदितेजातः सम्यक्पुण्यजनोदयः अहोपरोपकरणंसद्यः फलतिनेतिचेत् ४६ सायमस्तमितिप्रातः
कथंजीवेद्द्वीपुनः ४५ स्फुरत्सद्दक्षणामासामासानाथः प्रतस्थिवान् ४७ क्रमंतः सर्वमहतोहेलियाहेलिकस्य
च नशेकुरगतोगंतुंततोनूरुर्व्यजिज्ञपत् ४८ अरुणउवाच भानोभानोंनतोविंध्योनिरुध्यगगनेस्थितः स्पर्ध
तेमेरुणाप्रेप्सुस्त्वद्दत्तांतुप्रदक्षिणां अनूरोर्वाक्यमाकर्ण्यसविताहृद्यचिंतयन् ४९ अहोगगनरुध्यतेचातिवि
स्मितः योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने ५० योजनस्याभ निमेषार्धेयातिसोपिचिरंस्थितः गतेबहुति
थेकालेप्राच्योदीच्याभ्यार्दिताः ५१ चंडरश्मेकरव्रातपातसंतापतापिताः पश्चात्यादक्षिणात्यास्त्वनिद्रामुद्रि
तलोचनाः ५२ शयातात्राएववीक्ष्यंतेसतारगहमंबरं अहोनाहस्कराभावानिशानेवानिशाकरात् ५३ अस्त
गतंक्षान्नभसः कः कालस्त्वेषएषते भ्रांतांकिमकांडेवैलवमप्येष्यतित्कथं ५४ परापतंतिनात्यापिपारा

याराद्दालस्ततः स्वाहास्वधावषट्कारावर्जितेजगतीतले ५५ पंचयज्ञक्रियालोपाच्चकंपेभुवनत्रये सूर्योदया
प्रवर्तनेयज्ञाद्याः सकलाक्रियाः ५६ ताभिर्यज्ञभुजांतृप्तिः वितातत्रकारणं चित्रगुप्तादयः सर्वेकालंजानंति
सूर्यतः ५७ स्थितिसर्गविसर्गाणांकारणंकेवलंरविः तत्सूर्यस्यगतिस्तंभात्ताभितंभुवनत्रयं ५८ यद्यत्रतत्स्थितं
तत्तच्चित्रन्यस्तमिवाखिलं एकतस्तिमिरान्नाशादेकतस्करिवातपात् ५९ बहूनांप्रलयोजातः कादंशीकृतभू
ज्जगत् इतिव्याकुलितेलोकेसुरासुरनरोरगे ६० आकिमेतदकांडेभूदुरुदुर्दुद्रुवुः प्रजाः ततः सर्वेस
मालोच्यब्रह्माणंशरणंययुः ६१ स्तुवंतोविधिवत्स्तोत्रैरक्षरक्षेतिचाब्रुवन् देवाऊचुः नमोहिरण्यगर्भायब्र
ह्मणेब्रह्मरूपिणे ६२ अविज्ञातस्वरूपायकैवल्यायामृतायच यन्नदेवाविजानंतिमनोयत्रापिकुंठितं ६३
नयत्रवाक्प्रभवतिनमस्तस्मैचिदात्मने योगिनोयंचिदाकारोप्रणिधानेनानिश्चलाः ६४ ज्योतिरूपंप्रपश्यंति
तस्मैश्रीब्रह्मणेनमः कालात्परायकालायस्वेच्छयापुरुषायच ६५ गुणत्रयः स्वरूपायगुणः प्रकृतिरूपिणे

नमस्तेरुद्ररूपायसर्वस्थिसंतकारिणे ६६ विष्णवेसत्वरूपायरजोरूपायवेधसे पंचतन्मात्ररूपायपंच
कर्मेंद्रियात्मने नमोबुद्धिस्वरूपायपंचबुद्धींद्रियात्मने क्षित्यादिपंचरूपायनमस्तेविषयात्मने नमोब्रह्मांड
रूपायतदंतर्वर्तिनेनमः ६८ अर्वाचीनपराचीनविश्वरूपायतेनमः अनित्यनित्यरूपायसदसत्पतयेनमः
७० नमस्तेभक्तकृपयास्वेच्छाविष्कृतविग्रहः तवनिश्वसितंवेदास्तवरेतोखिलंजगत् ७१ विश्वभूता
नितेपादाश्शीर्ष्णोद्यौः समवर्तत नाभ्याआसीदंतरिक्षंतेलोमानिचवनस्पतिः ७२ चंद्रमामनसोजातःच
क्षोःसूर्यस्तवप्रभो त्वमेवसर्वंत्वयिदेवसर्वंस्तोतास्तुतिस्तुत्यइहत्वमेव ७३ इशत्वयावाकिमिदंहिसर्वंनमो
स्तुभूयोपिनमोनमस्ते इतिस्तुत्वाविधिंदेवानिपेतुर्दंडवत्क्षितौ परितुष्टस्तदाब्रह्माप्रत्युवाचदिवौकसः
७४ ब्रह्मोवाच यथार्थमनयास्तुत्यातुष्टोस्मिप्रणतास्सुराः उत्तिष्ठंतुप्रसन्नोस्मिवृणुध्वंवरमुत्तमं ७५ यः
स्तोष्यत्यनयाः स्तुत्याश्रद्धावान्प्रत्यहंशुचिः मावाहरंवाविष्णुंवा तुष्टास्तस्यसदावयं ७६ दास्यामःस

कलत्रकामान्पुत्रान्पौत्रान्पशून्वसु सौभाग्यमायुरारोग्यंनिर्भयत्वंरणेजयं ७७ ऐहिकान्मुष्मिकान्भोगानप
वर्गंतथाक्षयं यद्यदिष्टतमंयस्यतत्तत्तस्यभविष्यति ७८ तस्मात्सर्वप्रयत्नेनपठितव्यः स्तवोत्तमः अभीष्टद
तिख्यातस्तवोयंसर्वसिद्धिदः ७९ पुनःप्रोवाचतान्वेधाः प्रणिपत्यास्थितान्सुरान् स्वस्थास्तिष्ठतथोभूयोवि
तत्रापिसमाकुलः ८० स्पर्धतेमेरुणाविंध्योब्रह्माध्वपरिरोधकृत् यदर्थमागतायूयंतमुपायंवदामिवः ८१ ब्र
ह्मोवाच अस्यागस्त्यस्तप्यमानस्तपउग्रंमहत्तपाः मैत्रावरुणिराधायचित्तंविश्वेश्वरेविभो ८२ अविमुक्तेम
हाक्षेत्रेसर्वेषांमुक्तिहेतुके तारकस्योपदेशार्थंविश्वेशाधिष्ठितेस्वयं ८३ याचध्वंतत्रगत्वातंसर्वकार्यंविधास्य
ति तेनैकदावितालोकावातापील्वलभक्षणात् ८४ तदाप्रभृतिवैलोकेकोगस्त्यानैवविष्यति नारदउवाच
इत्युक्तांतर्दधेवेधास्तेपिप्रमुदिताननाः ८५ देवाःपरस्परंप्रोचुः रहोधन्यतमावयं प्रसंगतोपिद्रष्टव्यो
काशिकाशीपतीइमौ ८६ अहोत्यहोभिर्बहुभिःफलितोनोमनोरथः उत्फुल्लपद्मनयनानिर्मितःसुदिवा

कर॰ म॰ घनः ८७ चरणौतौसुचरणौयौकाशीमभियायिनौ एकाक्रियाद्भ्यर्थकरीप्राप्यतेपुण्यगौरवात् ८८ एवंवदं
१५ तोर्दृष्टास्याः सुराः काशींसमाययुः ८९ ७ ७ इतिश्रीपद्मपुराणेचरवीरमाहात्म्येनारदमार्कंडेयसंवादेच
तुर्थोध्यायः ४ ७ ७ मार्कंडेयउवाच भगवन्तभव्यादिसर्वज्ञानमहानिधे अवाप्यकाशींगिर्वाणैः कि
मकारिवसाप्यथ १ अश्रुत्वेमांकथांपुण्यांनतृप्तिर्मधियाम्यहं शेवधिस्तपसांदेवैरगस्त्यः प्रार्थितःकथं
२ कथंविंध्योप्यवापस्वांप्रकृतिंतादृशींगतः तववागमृतांभोधौमनोमेस्नातुमत्सरं ३ नारदउवाच
ऋषेशृणुमहाबुद्धेभक्तिश्रद्धासमन्वितः ततोवाराणसींप्राप्यगिर्वाणास्तेसवासवाः ४ अविलंबंप्रथम
तोमणिकर्ण्यांविधानतः सचेलमभिमज्ज्याथकृतसंध्यादिसत्क्रियाः ५ संतर्प्यविधिवद्दिव्यपितृन्कुशा
तिलोदकैः तीर्थवासार्थिनः सर्वान्संतर्प्यचपृथक्पृथक् ६ विश्वेश्वरंभवानींचपूजयित्वाविधानतः
काशीगुणानुकथनंकुर्वंतोजग्मुरोजसा ७ अगस्त्यस्याश्रमंसर्वेगिर्वाणावासवादयः सर्वार्थानामत्रदा

16

दत्रीभवानीसर्वान्कामान्पूरयेत्तत्रढुंढिः सर्वान्जंतून्तारयेत्तत्रकालेविश्वेशोयः स्तोत्रमंत्रोपदेशात्
९ विश्वेश्वरोयत्रनतत्रचित्रंधर्मार्थकामामृतरूपरूपः अरूपरूपः सहिविश्वरूपंतस्मान्नकाशीसदृशी
त्रिलोके १० इतिब्रुवाणागिर्वाणास्ततोवैददृशुर्मुनिं होमधूम्रस्कगंधाढ्यंब्राह्मणैर्वटुभिर्वृतं ११ पतिव्र
ताशिरोरत्नलोपामुद्रांघ्रिमुद्रया मुद्रितंवीक्ष्यविविशुः पर्णशालांगणंसुराः विसर्जितसमाधिंचधृतकृष्णा
क्षमालिकं। अधिष्ठितदर्शीपृष्ठंब्रह्माणमिवचापरं १३ पुरोगस्त्यंसमालोक्यसर्वेदेवाः सवासवाः प्रहृ
ष्टवदनाः प्रोचुरुच्चैर्जयजयेतिच १४ मुनिरुत्थायतान्सर्वान्उपवेश्ययथोचितं १४ आशीर्भिरभिनंद्याथ
पप्रच्छागमकारणं नारदउवाच अगस्तिवचनंश्रुत्वाबहुमानपुरःसराः १५ धिषणाधिपतेरास्यंविबुधा
आलुलोकिरे उ गुरुरुवाच शृणुघेतन्महाभागदेवागमनकारणं १६ धन्योसिकृतकृत्योसिमान्योसिम
हतामपि पतिव्रतेत्वकल्याणीलोपामुद्रेसधर्मिणी १७ तवांगछाययालुत्थायस्कथापुण्यकारिणी परलो

क॰ म॰
१७

कस्त्वयंलोकोजायतेभार्ययाद्वयं १८ देवपित्रतिथिज्यादिनाभार्यः कर्मचार्हति गृहस्थः सहिविज्ञेयोयस्यगे
हेपतिव्रता १९ तस्यलेभ्यः प्रतिपदंराज्यस्याजरयायथा यथागंगावगाहेनशरीरंपावनंभवेत् २० तथापति
व्रतांदृष्ट्वान् उभयापावनंभवेत् गंगास्नानंसमंत्वेतद्यज्ञातंत्वदर्शनं इतिश्रुत्वामहाभागांमुनिपत्नींपति
व्रतां २१ प्रणम्याथमुनिंप्राहमुनिः सर्वार्थकोविदः प्रणवस्त्वंश्रुतिरियंस्तमैपात्वंस्वयंतपः २२ सत्क्रियेयं
फलंत्वंहिधन्योसीतिमहामुने इदंपातिव्रतंतेजोब्रह्मतेजोप्यवाप्तवान् २३ तत्राप्येतत्तपस्तेजाकिमसाध्यम
स्तव २ तवनाविदितंकिंचित्तथाविप्रवदाम्यहं यदर्थमागतास्तेवास्तनुन्मुनेत्रनिशामय २४ अयंशत
मुखः साक्षाद्वृत्रहाकुलिशायुधः सिध्यष्टकंहियद्द्वारिदकप्रसादंप्रचक्षते २५ यस्यपुर्याः परिसरेकाम
धेनुव्रजश्चरेत् यत्पौराः कल्पवृक्षाणांनिसंछायास्करोरते ॥ २६ यद्रथ्यासुचतिष्टंतिसेचिंतामणिराकराः
अयमग्निर्जगज्योतिर्धर्मराजस्त्वयंपुनः २७ निर्ऋतिर्वरुणोवायुः श्रीदोरुद्रास्यस्त्वमी आराध्यंतेसुचारित्रैः

17

सर्वकामार्थमीश्वराः २८ समभ्यर्थयितारोमीत्वंप्रोच्यस्तजगत्कृते वाञ्छान्नोयमसाध्यंचतवविश्वोपकारकं २९ कु
श्चिच्छैलोविंध्यनामाभानुमार्गावरोधकः वर्धतेस्पर्धयामेरोस्तद्वृद्धिंत्वंनिवर्हय ३० येनास्वभावकुटिलायेचमा
र्गावरोधकः परस्पर्धाद्वृद्धिमंतस्तद्वृद्धिर्गर्हिताबुधैः ३१ इतिश्रुत्वागुरोर्वाक्यंसुविचार्यमहामुनिः क्षणंमनः स
माधायतथेतिप्रत्युवाचह ३२ साधयिष्यामिवः कार्यंविसृजेतिदिवौकसः मुनिश्चिंतापरोभूत्वागस्तिर्ध्यानपरोभ
वत् ३३ नारदउवाच ततोध्यानेनविश्वेशमालोच्यसमुनीश्वरः ऋषिः प्रोवाचतांपुण्यांलोपामुद्रामिदंवचः ३४
अगस्त्यउवाच अपिपश्यवरारोहेकिमेतत्समुपस्थितं क्वतत्कार्यंक्वचवयंमुनिमार्गानुसारिणः ३५ येनगोत्रभि
द्गोत्राविपक्षाहेलयाकृताः भवेत्किंटितसामर्थ्यंसकथंगिरिमात्रके ३६ कल्पवृक्षोगणोयस्यकुलिशंयस्यचा
युधं सिध्यष्टकंचयद्द्वारिससिध्योप्रार्थयेद्विजं ३७ क्रियंतेव्याकुलाः शैलाः अहोवोरागिनाचये तद्वृद्धिंस्तं
पनेराशिः कृतास्ताश्चुश्चुक्षणे ३८ नियंतासर्वभूतानांयोसोअंबुधरः प्रभुः सकिंरुद्धचिदुनालंमेकंतंया

कर·म·
३८

वमात्रके ३९ आदित्याव आदित्यावसवोरुद्रास्तुषिताः समरुद्गणाः विश्वेदेवास्तथादस्रौयेचान्येपिदिवौकसः
४० येषांदृक्पातमात्रेणपतंतित्रिभुवनान्यपि तेकिंसमर्थानोकांतेरिगिरद्धिनिषेधने ४१ आज्ञादंकारणंतत्रस्मृ
तंवाक्यंसुभाषितं काशीमुद्दिश्ययद्गीतंमुनिभिस्तत्वदर्शिभिः ४२ अविमुक्तंनमोक्तव्यंसर्वथैवमुमुक्षुभिः किमु
विघ्नाभविष्यंतिकाश्यान्निवसतांसतां ४३ उपस्थितोयंकल्याणिसोनरामोमहानिह नशक्यतेन्यथाकर्तुंविश्वेशेणापि
मुखोयतः ४४ काशिद्विजाशीभिरहोयदास्याः काश्यामुमुक्षुर्यदिवैमुमुक्षुः न्यासंकरस्थंसविसृज्यदपंस्वकूपे
रंकोढिविमूढचेताः ४५ अहोजनाबालिशाबालिमेतांकाशींत्यजेयुः स्फुरतेकराशिं शालूककंदप्रतिमज्जनंकिंलभे
तत्तद्वत्स्फलभाक्किमेषा ४६ भवांतरार्जितपुण्यराशिंरुद्धैर्महद्भिः विनिमय्यकाशी संप्राप्यकिंमूढधियोयतोवै
पिपासवोदुर्गतिमत्ययासवः ४७ फकाशिकाविश्वपदप्रकाशिकाफकार्यमन्यत्परतोहितुच्छं तत्पंडितोन्यत्र
कुतः प्रयातिकिंयातिकूष्मांडफलंत्यजास्ये ४८ हेयक्षराजरजनीकरचारुमूर्तेश्रीपूर्णभद्रसुतनायाकदंडपाणो

18

त्वंवैतपोजनितदुःखमेवैषिसर्वंकिंमांबहिर्नयसिकाशिनिवासरक्षिन् ४९ परापवादोनभयात्कृतोकः परोप
कारोपिमयाकृतोनहि परस्वबुद्धिः परदारबुद्धिः कृतामयानात्रकएषपाकः ५० अभ्यर्थितोदेवगणैः करोमि
किंपरोपकारायनकिंविधीतैये दधीचिरस्थीन्यपिपुरानकिंददौजगत्त्रयंकिंनददैर्थिनेबलिः ५१ इत्तस्मनोकिंम
धुकैठभोशिरोबभूवतार्क्ष्योपिचविष्णुवाहनः आपृच्छ्यसर्वान्समुनीन्मुनीश्वरः सबालखल्यानपितत्रवासिनः
५२ स्थाणिवृक्षांश्चलतासमस्ताः पुरीपरिक्रम्यचनिर्ययौबहिः ५३ अश्रूण्युपस्पृश्यपुनःपुनर्मुनिःप्र
सादमालापरितोविलोकयन् उवाचनेत्रेसरलेप्रपश्यतांतांकाशिकांवांक्रपुरीत्वियंक ५४ स्वैरंहसंस्त्वद्यवि
धायतालिकांमिथः करेणापिकरंप्रगृह्यसीमाचराभूतगणाव्रजाम्यहंविहायकाशींस्फुरतेकराशिं ५५ इत्थंवि
लोक्यपदुशास्यमुनिः स्वगस्परतक्कोशयुग्मवदनोअबलासहायः मूर्छामवापमहतीविरहीचजल्पंहाकाशि
काशिपुनराह्वयदेहिदृष्टिं ५६ स्तिलास्तपांशिवशिवोतैतदेवचोक्तायावः प्रियेतिकठिणाहिदिवौकसस्ते किं

कर॰म॰ नस्मरेत्रिजगतिंरूखदानरक्षंत्र्यक्षंप्रयाहिमदनंयरकारिकेस्तु यावद्धजेत्रिचतुराणिपदानिखेदास्वेदोदबिंदुकाणि
१९ कांचितभालदेशः ५७ प्रत्युक्तमाकरणतः किलमेविनाशः स्तावद्धराभयभराद्विवृसंचकोप तपोयोनमिवास्त्यनि
मिर्बाधेनवैमुनिः अग्रेददर्शितंविंध्यंरुधांबरमथोन्नतं ५८ चकंपेचालयस्तूर्णंदृष्ट्वाग्रेस्थितंमुनिं तमगस्त्यं
पत्नीकंवातापील्वलवैरिणं ५९ तपःक्रोधसमुत्थाभ्यांकाशीविरहजन्मना प्रलयानलवत्तीव्रंज्वलंतंत्रिभिरग्नि
भिः ६० गिरिःखर्वतरोभूत्वाविवक्षुरवनीमिव आज्ञाप्रसादःक्रियतांकिंकरोमीतिचाब्रुवीत् ६१ अगस्तिरुवा॰
विंध्यसाधुरसिप्राज्ञमांविजानासितत्वतः पुनरागमनंयावत्तावत्स्वर्वतरोभवेत् ६२ नारदउवाच इत्युक्त्वादक्षि
णामाशांसनाथामकरोन्मुनिः निजैश्वरणविन्यासैस्तयासाध्यातपोनिधिः ६३ ९ गतेतस्मिन्मुनिवरेवेपमानस्त
दागिरिः उत्कंठसमहत्पश्यन्साध्वसंपरमंगतः ६४ अद्यज्ञातःपुनरहंनशप्तोयदगस्तिना नमयासदृशो १९
धन्यइतिमेनेसवैगिरिः ६५ अरुणोपिचतत्कालेकालज्ञोश्वानचोदयत् अगस्त्यास्तपमयापोध्येः पूर्ववज्ज्ञानुसं

17

चरेः अद्यश्वोवापरश्वोवागमिष्यतियवैमुनिः इतिचिंतामहाभारेगिरिराक्रांतवैस्थितः ६७ नाद्यापिमुनिरायातिना
ताथाभिगिरिरेधते यथाखलजनानांहिमनोरथमहीरुहाः ६८ विवर्धप्यतियोनीचः पूरास्थांसमुद्वहन् दूरतो
हद्विवार्तास्तांप्राग्वधेरपिसंश्रयः ६९ मनोरथानसिध्यंतिसिद्धानस्यंतिवैध्रुव खलानांतकुशालिनंसर्वविश्वेशरक्षि
तं ७० अविज्ञायान्यसामर्थ्यंनिजशक्तिप्रदर्शयन् उपहासमवाप्नोतियथैवायमिवाचलः ७१ ६५ ७५ राम॥ ७५
॥ इतिश्रीपाद्मेमहापुराणेकरवीरकांडेनारदमार्कंडेयसंवादेविंध्यागर्वपरिहारोनामपंचमोध्यायः ॥ ५ ॥ ७५॰
नारदउवाच गोदावरीतटेरम्येविचरन्नापिचैमुनिः नतत्याजचसंतापंकाशीविरहजंपरं १ उदीचीदिक्स्पर्शम
पिसमुनिर्मातरीश्वरं प्रसार्यबाहुसंश्लिष्यकाश्याः पृच्छेदनामयं २ लोपामुद्रेनसामुद्राकापीहजगतीतले वारा
णस्याः प्रदर्शितानकृतीनयतोविधिः ३ क्वचित्तिष्ठन्क्वचिज्जल्पन्क्वचिद्गायन्क्वचिच्चलन् क्वचिच्चोपविशश्वेति
भावमेतत्ततोमुनिः ४ प्राणत्यागपरोभूत्वामहाचिंतापरोमहत् क्वगच्छामिक्वतिष्ठामिक्ववसिष्याम्यहंभुवि ५ तपा

क॰र॰म॰ भूमिः कथाभ्यासकृकाशीसदृशीमम त्राहिविश्वेशविश्वात्मन्त्राहिमांकार्तिनाशन त्वद्वियोगपरिक्लेशान्मनसिलीना
२० मयिस्थिता अंतर्यामितयाविश्वंसर्वंव्याप्यसंस्थितः ७ तादृशंतीर्थवर्यंहिहृदयेमेप्रकाशय दर्शनंयत्रमेभूयाद्य
थाप्राप्स्येमनोरथं ८ नोवाप्यजामिदेहंवैत्वद्वियोगाग्निनाहतः इतिव्याकुलचित्तस्यपततस्तस्यचैपथि प्रादान्मतिंस
विश्वेशोहृदयेनुप्रविश्यच ९ स्मृतंतदामहत्क्षेत्रंकरवीरंयथाधिकं समुत्थायततःप्राहप्रियांचंचललोचना १०
नमालोक्यमुनिश्रेष्ठंसस्मितंसाश्रुविस्मिता पतिवाक्यमुवाचेदंलोपामुद्रामनोरमा ११ लोपामुद्राउवाच मत्प्रा
णाधिपतेस्वामिन्पृच्छाम्येकंवदस्वतत् यस्मात्वंहियथानूनंमहदानंदलक्षितं १२ अन्यत्रशीघ्रगमनंकाशीविर
हितोमुने घटतेपतितस्येदंनवैजातुमहाव्रत मन्यसेयदितच्छ्राव्यंमयाश्रोतुंमहामुने निदानंब्रूहिसकलंतदा
नंदमहोदधेः १३ नारदउवाच इतिप्रियानुपृष्टः सन्प्रोवाचार्थघटोद्भवः याम्यवाराणसीक्षेत्रमाहात्म्यंहृ
दिसंस्मरन् १४ अगस्त्यउवाच शृणुष्वाथवरारोहेमहदानंदकारणं श्रीविश्वेशप्रसादेनसंस्मृतंकरवीरकं १५

20

याम्यवाराणसीचेतित्रिषुलोकेषुविश्रुतं । जंबूद्वीपशिरोरत्नंभुक्तिमुक्तिप्रदंशिवं १६ देव्याविष्णुःस्वरूपिण्याय
द्दत्तंदक्षिणेकरे यस्मात्स्वाचंद्ररूपिण्याकाशीविरहजोनलः १७ शमितोममसुश्रोणीतत्क्षेत्रंकिंनुवर्ण्यते विश्वे
शदर्शनंयत्रकाशीवासश्चमत्प्रियः १८ स्नानंहिमणिकर्ण्यांवामत्प्रियंचवरानने ॥ सर्वमेतद्भवेन्नूनंकरवीरेमहा
पुरे १९ अधिकंचापिभूयान्मेमहादेव्याःप्रदर्शनं भुक्तिमुक्तिप्रदानार्थंस्थितायाजगतीतले २० वासंतत्रकरिष्या
मिसर्वदेवनिषेविते तीर्थवृंदसमाकीर्णेकरवीरेपुरेसदा २१ इत्याशयेचसुश्रोणीकाशीविरहजंमहत् दुःखं
विस्मृत्यवैसर्वंजातस्त्वानंदनिर्भरः २२ पूर्वसंकल्पइत्यासीद्गंतव्यंकरवीरकं विधिनाथसुसंपूर्णोमद्भाग्यंहि
मामकं २३ परोपकारणंजंतोर्यथाफलतितत्क्षणात् तथान्येसर्वधर्मावैनफलंतीतिमेश्रुतिः २४ एकाक्रियाद्य
र्थकरीपुण्यवद्भिरवाप्यते यद्विविंध्यस्यदमनंकरवीरप्रदर्शनं २५ पंचक्रोशांतरेणैवात्रिस्थलीयत्रविद्यते प्रया
गःकाशिकाचैवगयारोद्रीशुचिस्मिते २६ संकल्पंयत्रकुर्वंतिकरवीरंपुरंशुभं गंतव्यमितितेषांवैपितृणामुत्सवं

कर॰ म॰ शृणु २७ संमील्यपितरः सर्वेवंशजाः सर्वएवहि परस्परवदंत्येवंमहानंदाब्धिसंस्थिताः २८ सर्वेध्वजपताका
२१ द्दिलंवयित्वासमुत्सुकाः अद्यश्वोवापरश्वोवागंतारुद्रगयांप्रति २९ वंशजश्चास्मदीयोवैकरतालसमुत्सुकाः नि
निर्गतंवंशजंदृष्ट्वापरमानंदनिर्भराः ३० वर्णयंतिचतेभाग्यंस्वकीयंहिपरस्परं पितरस्तुः अहोवयंधन्यतमाल्लो
केगंतास्मदीयः किलवंशजोयं गयांहिरौद्रीकरवीरसंस्थितांपिंडान्समाधास्यहितारयिष्यति ३१ अतीवधन्याकर
वीरसंस्थितागंताप्रयागंकरवीरसंस्थितं किंदत्तवान्पिनहिवंशजोस्मान्नरकान्नोदकेनैवहितारयिष्यति ३२ धन्यावयंभो
पितरः कृष्णवर्तागतस्ववंशप्रभवश्चकाशिकां कोल्हापुरस्थंभवपाशभेदिकांस्नात्वाप्रदत्वासहितारयेत्कुलं ३३
अहोवयंधन्यतमाश्चलोकेयद्देषपांकुप्रसवैः पवित्रैः पुनातिलोकत्रयसंस्थितंकुलंकोल्हापुरंगच्छतिधन्यएषः ३४
अहोतिधन्यः परपुण्यदानयदृणत्रयंयेनपराकृतंमहत् रौद्रीगयांगंतुमथोद्यतः स्वराट्कोल्हापुरंपुत्रवरोत्रलो २१
के ३५ अहोजनाबालिशाएवसर्वेनोयत्रगच्छंतिमहद्धिरम्यं कोल्हापुरंतीर्थवरंयदाधिकंवाराणसीक्षेत्रमितिप्रसिद्धं

21

कुलोद्भवंपितृदमत्रदृष्ट्वावदामिलोकंपरमंपवित्रं आविमुक्तमितिख्यातंत्रिषुलोकेषुभामिनी ब्रह्मस्कंदादितत्क्षेत्रेभि
वसामः सुखंचिरं॥ येवैगत्वाननिवर्तंतिसर्वेपुण्योपेताः परमानंदयुक्ताः ३७ धनीयशस्वीबहुपुत्रपौत्रो
भवेदयंपुत्रवरः सदैव कुलं।पवित्रीकृतमेवतत्स्यंगत्वाविचित्रंकरवीरकंपुरं ३८ प्रियेयत्क्षेत्रमाहात्म्यंवर्ण
यंतिदिविस्थिताः तद्देक्षेत्रंपरंकिंतुवर्ण्यतेकरवीरकं ३९ करेकिंविधंतेरुस्याभुक्तिमुक्तिप्रदंपरं निमि
षार्धवियोगोपिशतवर्षायतेमम॥४०॥ नारदउवाच इतितद्वाक्यमाकर्ण्यपरमानंदनिर्भरा माहात्म्यंकरवी
रस्यपप्रच्छावसुविस्मिताः ४१। लोपामुद्राउवाच किमर्थंहिमहादेवाकरवीरंमहापुरं करमध्येधृतंचे
दंकथंवाभुक्तिमुक्तिदं ४२ तत्सर्वंकथयस्वामिन्कृपयादीनवत्सल माहात्म्यश्रवणात्तस्यनिश्चलास्यान्मतिर्मे
म ४३ अगस्तिरुवाच एकदातुलितंशंभुक्षेत्रयुग्मंहिविष्णुना याम्यवाराणसीक्षेत्रंतथैवोत्तरसंस्थितं ४४
गौरवंलाघवंवापिज्ञातुंक्षेत्रद्वयस्यहि पुनर्विवादः समभूद्धिनरान्योयदाशुभे ४५ तस्मिन्प्रकारेणलाघ

कर॰ म॰ वंगौरवंतयोः ज्ञातुंप्रोवाचभगवान्महाविष्णुरतंद्रितः ४६ विष्णुरुवाच विश्वनाथमहादेवश्रीलक्ष्मीमत्स्वरू
२२ पिणी उभयोः क्षेत्रयुग्मंचभुविख्यातुंनवार्हति ४७ तस्मात्पुरद्वयंचेदंउभयोः शास्त्रकोटिना शूलाग्रेणमहा
ग्रेणकामहस्तध्रुतेनवै ४८ आचंद्रतारंध्रियतामुभाभ्यामपिसंततं अगस्तिरुवाच एमुक्तोविश्वनाथः शूला
ग्रेणस्वकांपुरीं ५० दधारलीलयाशंभुस्तदाकाशीपुरींशिवः ततोलक्ष्मीमहादेवीस्वपुरंकरवीरकं ५१ वामह
स्तसमाश्लिष्टगदाग्रेणमहाबलात् धर्तुंयतंतीतत्क्षेत्रंनानातीर्थयुतंशुभे करवीरंमहाक्षेत्रधर्तुंस्थानत्रयात्क
ह तदादधारत्रासितैर्दक्षिणेनकरेणतत् क्षेत्रंक्षेत्रवराकीर्णंमहापुत्रफलप्रदं ५२ तदाविष्णुःप्रहस्याहत्रि
वचान्योरिदंवचः विष्णुरुवाच लाघवंगौरवंचैवयुवयोः क्षेत्रयोर्दृढं विज्ञातंमेप्रदिष्टंच युवयोःक्षेत्रधारणं
विश्वनाथत्वयाशीघ्रंतारकंक्षेत्रमुत्तमं ५४ लघुत्वाद्धिध्रुतंतूर्णंत्रिशूलाग्रेणलीलया धनुराकारकस्येहभव २२
त्क्षेत्रस्यलाघवं ५५ भवतेवसमादिष्टंकिंबहूक्तेनयत्रहि महालक्ष्म्यामहादेव्याक्षेत्रंवैकरवीरकं ५६ गदा

22

ग्रेणमयावष्टंनचचालमहत्तरं तदामहाबलेनाथलक्ष्म्यावैदक्षिणेकरे ५७ चक्राकारंमहाक्षेत्रंविध्रुतंकरवीर
अनयोः क्षेत्रयोरंगगौरवंलाघवंतथा ५८ प्रत्यक्षेणसमाज्ञातंकिंपुनर्वच्मिवारशः अगस्त्यउवाच क्षेत्रगौरवमेवं
हिविज्ञायशिवयासह ५९ सगणोविश्वनाथोपिकरवीरेस्कसंस्थितः आगतंविश्वनाथंचविज्ञायकाशिकांपुरीं
६० करवीरंसमाश्रित्यतीर्थरूपेणतिष्ठति गतंविश्वेश्वरंवीक्ष्यमणिकर्ण्यपिभामिनी ६१ आगत्यसंस्थिताचा
त्रकरवीरेमहापुरे आगतंविश्वनाथंहिक्षेत्रंतीर्थसमायुतं ६२ समागतानितीर्थानिलोकत्रयगतान्यपि॥अ
रण्यंसेतुबंधंचकुरुक्षेत्रमतःपरं ६३ द्वारकागोकुलंचरंश्रीशैलादीनिसर्वशः नानाक्षेत्रस्थितादेवाः स्वस्वक्षे
त्रैः समागताः ६४ तिष्ठंतियत्रवैशंभुः दरिद्रास्थानुमस्तमः गणिकायत्रनिर्मुक्तामहापापस्वरूपिणी॥ ६५
श्रीपापनाशिनीतीर्थेसर्वपापापहारिणी॥ अजामिलोमहापापोयत्रमुक्तिमुपेयुवान् ६६ दुरितापरणेतीर्थेत
पः स्नानकैर्निर्मलैः भगीरथस्यराजर्षेयत्रसप्तकुलानिवै ६७ तीर्थेसप्तकुलोद्धारेमुक्तिंजग्मुर्निषेवणात्

ब्रह्महत्यागतायत्रश्रीरुद्रस्यमहात्मनः ६८ कपालंपतितंतस्माद्रुद्रतीर्थेशुचिस्मिते यत्रहत्यामहापापादह
त्यागमनात्पुरा ६९ इंद्रोप्यत्रविनिर्मुक्तश्चेंद्रकुंडेपरार्थदे गुरुदाराभिगमनात्स्वस्त्रीणांत्यागतोपिच ७०
चंद्रोपिचंद्रकुंडेवैनिर्मुक्तः स्नानदानतः ऋणत्रयापहारीचस्कद्रार्मोपिद्विजाधमः ७१ ऋणविमोचनेकुंडे
निर्मुक्तः स्नानतर्पणैः नानापापरतः कश्चिदिंद्रसेनोद्विजाधमः यमयातनानिर्मुक्तः स्नात्वातीर्थेपिकापि
ले त्रिःसप्तकृत्वानिर्हत्यक्षत्रियान्भार्गवोबली ७३ मातृद्रोहाच्चनिर्मुक्तः स्तीर्थेपरशुरामके कुष्टगंधा
दिनायुक्तोब्रह्महत्यादिकिल्बिषैः ७४ शूद्रः कश्चिद्विनिर्मुक्तः स्वग्निकुंडनिषेवणात् ॥ गोत्रहत्यामहापा
पैनिर्मुक्ताः पंचपांडवाः ७५ श्रीपंचनामकेतीर्थेपांचालेश्वरदर्शनात् ॥ मिथ्याभिशापसंतप्तोदुर्वासा अपिवैमु
निः ७६ मिथ्याभिशापनिर्मुक्तोदुर्वासस्तीर्थसेवणात् ब्रह्मादोपिचदेसैंद्रोपिस्त्वद्रोहकृतादघात् ७७ प्र २३
ल्हादाख्येकतीर्थेपिनिर्मुक्तस्तेनपाप्मना नारदोदक्षशापेनस्थातुंकापिनयःप्रभुः ७८ गोमतीसंगमेस्नात्वा

कृष्णदर्शनतत्परः शापप्रभावनिर्मुक्तः सुखमत्रसतिष्ठति ७९ शापायत्रनवैस्कभुबाधंतेन्यत्रसंभवाः तत्क्षे
त्रंयेचसेवंतेतेधन्यामनुजाभुवि ८० कृतेथाष्टचत्वारिंशद्योजनंक्षेत्रमुत्तमं तदंतर्गतकीयादिसदेतत्प्रपुनातिहि
८१ त्रेतायांतुतदर्धेनपुनातीदंजगत्त्रयं द्वापरेचापिवैस्कभ्कतदर्धंक्षेत्रमुत्तमं ८२ कलौषड्योजनक्षेत्रमि
हामुत्रफलप्रदं पंचक्रोशंविशेषेणपवित्रंक्षेत्रमुत्तमं ८३ पंचक्रोशांतरेणात्रयेवैतिष्ठंतिमानवाः सर्वेतेयांति
निर्मुक्ताभवंतिस्वर्गगामिनः ८४ तत्रापिक्रोशमेकंहिपावनंक्षेत्रमुत्तमं यत्रब्रह्मादयोदेवावासमिच्छंतिसर्व
दा ८५ देव्यालयस्ययाभूमिर्यासानिकटवर्तिनी ॥ भवेत्सापिपवित्रावैकामधेनुरिवार्थदा ८६ श्रीमुक्तमंडपे
देव्याकृतंदर्शनंतथाकृतं अनंतंजायतेस्कभुध्वान्यतीर्थमुत्तमं नीराजनविधानेनदेवाब्रह्मपुरोगमाः करतालस
मायुक्तास्त्रिकालंसावधानिनः ॥८८॥ उदयंप्रतिगर्जंतोजयशब्दैर्विशेषतः ॥ कात्यायनीमहादेवीनवकोटिस
खीयुता ८९ दीपंप्रज्वालयेत्स्कभुपात्रेहाटकनिर्मिते प्रत्येकंनवकोटीस्ताकात्यायन्योमहास्वनैः ९० उदयंप्रति

गर्ज्यंतोदेवींनीराजयंतिहि योगिन्यश्चापितत्कालेचामरव्यंजनैर्युताः ९१ चतुःषष्टिसमायुक्ताः प्रत्येकंमुदय
त्वेनैः त्रिकालंहिकुर्वंतेसावधानाः पृथक्पृथक् ९२ भैरवाश्चागणाः सर्वेदंडपाणिपुरःसराः भेरिडुंडु
भिठकाद्यैर्वादित्रैः संयुताः पृथक् ९३ छत्रयानयुताः सर्वेजयोदयस्वनैर्युताः सेवंतिकिंकरीभूताः नीराज
नविधौपृथक् ९४ येवैपश्यंतितत्कालेनीराजनविधिंपरं सफलंजन्मवैतेषांवासिनांकरवीरके ९५ येवैप
श्यंतिचानंदंअस्माद्योत्सिदर्शेः कृतं तेधन्यामनुजाः एभुरत्यंसत्यंवदाम्यहं ९६ स्तेनः सुरापोमित्रघ्नो
ब्रह्महागुरुतल्पगः स्त्रीराजपितृगोहंतायेचपातकिनोपरे ९७ सर्वेतेप्यत्रपश्यंतेवसंतः करवीरके चक्रवर्ति
समायुक्तंज्वलंतंदेवतोपरि ९८ कुर्याद्दारार्तिकंयस्तुकृत्यकोटिदिवंवसेत् नैवेद्यसमयेदेवींयः पश्यति
विमूढधीः ९९ सर्वापराधमध्विष्यादंडत्वेसोयमार्किंकरैः नीराजनविधिंयेवैनिरीक्षंतेत्रिकालकं १००
देवीपश्यंतियेनित्यंकरवीरनिवासिनः नीराजनविधौतेहियांतिविष्णोःपरंपदं ॥१॥ करवीरवासिनांसुख

मुख्यकर्मद्वयंभवेत् ॥ नीराजनविधेः सम्यक्त्रिकालदर्शनंपरं भिक्षापपालनंचैवश्रद्धयासर्वयोनितु ॥२॥ क्षेत्र
मध्येतुयत्पापंवासिभिः सर्षपार्जितं तत्सर्वंहरतेतेषांभिक्षानीराजनेविधिः ३ धर्मद्वयमिदंचात्रवासिनांय
दुदीरितं नाचरेद्यस्तुतैमंदात्मातस्यवासफलंकुतः ४ यत्रपुष्पांजलिंवेदाश्चत्वारोमूर्तिधारिणः नानामंत्र
घोषेणदेव्यादद्युर्निरंतरं ॥ ५ ॥ यत्रपुष्पांजलिंनित्यंप्रवदंतिविपश्चितः तेवेदपारगाः सर्वेपुनंतिकुलत्र
यं ६ मुक्तमंडपिकामध्ये~~क्षेत्रमाहात्म्यमुत्तमं पुराणान्यपि~~चान्यानियेकुर्वंतिसुकीर्तनं तेधन्यामनुजानि
त्यंसर्वान्कामानवाप्नुयुः ७ मुक्तमंडपिकामध्येक्षेत्रमाहात्म्यमुत्तमं ॥ पुराणान्यपिचान्यानिश्रुण्वंतिश्रावयं
तिच ॥ ८ ॥ कामक्रोधविनिर्मुक्तामुक्तिमेष्यंतितेनघाः मुक्तमंडपिकामध्येयेनृत्यंतिनरोत्तमाः ॥९॥
चक्रांगस्येपणाद्यापिमुच्यंतेतेहसोस्विकात् योगीतवाद्यनृत्यानिमोत्यंदत्वातुकारयेत् १० सदाक्रभवने
तिष्ठेद्यावदाभूतसंप्लवं ॥ देवताग्रेद्विजाग्रेवायोनृत्यंतुप्रकारयेत् ॥११ विमोदयतितंसर्वेनित्यमप्सरसो

कर॰म॰ गणात् गीतवादित्रनिर्घोषंदेवदेवस्यकारयेत् ९२ घंटाभवेयत्रालस्यसर्ववाद्यमगीयतः अहोविश्वेश्वरीक्षेत्रंम
२५ रणादपिनोभयं ९३ यत्रसर्वेप्रतीक्षंतेमत्सुप्रियमिवातिथिंकामदं हिसकामानांनिःकामानांचसिद्धिदं ९४ नान्य
दृष्टंमयाक्षेत्रंकरवीरपुरंविना पराशरोमुनिर्ज्ञात्वाक्षेत्रमाहात्म्यमुत्तमं समागतोथरुक्श्रोणीत्सकामः काममा
प्नुयात् ९९५ छ छ इतिश्रीपाद्मेमहापुराणेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेषष्ठोध्यायः छ छ
॥६॥ नारदउवाच श्रुत्वैवंक्षेत्रमाहात्म्यंलोपामुद्राथवैमुने पुनः पप्रच्छसाप्रभुः गर्भितंकथितद्वयं १ लो
पामुद्राउवाच पराशरोमुनिश्चात्रकिंकामः समगान्मुने फलंवातेनकिंचात्रतत्सर्वंब्रूहिमेप्रियः २ नारदउवाच
इतितत्प्रश्नसंहृष्टोभगवान्स्वघटोद्भव प्रशस्यश्लक्ष्णयावाचाप्रवक्तुमुपचक्रमे ३ अगस्तिरुवाच वयंधन्यत
मालोकेमार्गेप्राप्तंकथामृतं अध्वश्रमंनजानीमोयत्सेवनपराःप्रिये ४ करवीरकथापुण्यासर्वलोकभयापहा २५
वासनांप्रभुनोसेपतत्क्षेत्रवसतिर्यथा ५ नतथाप्रीयतेसुभ्रूयत्कथामृतसेवनात् क्षेत्रप्रश्नामृतास्वद्दासोमि

25

यःप्रसीदति ६ यत्सेवयाममनवेत्रलपानंनिद्रानैवक्षुधानापथिजः श्रमएवचान्यः तद्देभजंतुकरवीरकथामृतं
सत्सर्वेजनाविरहशोकभयापहंयत् ७ शृणुदेविवरारोहेपराशरागमकारणं तदाश्रमंकथाचापियथावत्कथया
म्यहं ८ विष्णुनाकुलितंक्षेत्रंकरवीरपुरंमहत् श्रुत्वापराशरोभ्यागान्नैमिषारण्यतः प्रिये ९ कलिंसमागतं
वीक्ष्यसर्वबुद्धिविनाशनं चितयामाससर्वज्ञः सर्वलोकहितायसः १० सहस्रशाखयायुक्तोवेदोयंजगतीतले
कथंग्रथेत्तुलोकेषुस्वल्पायुष्येषुचैवहि ११ अल्पज्ञेषल्पसत्वेषुअल्पपुण्येषुवैतथा पुराणान्यपिसर्वाणिइतिहा
साःसहस्रशः १२ सत्यश्चमहापुण्याःकोवासंप्रार्थयिष्यति विनाविष्णुंहिकर्मेद्रंकोवाकर्तुंसमुत्सहेत्
१३ तादृशंपुत्रमेकंहियाचेयंसर्वदंहरिं पूरयिष्यतिमेकामंहरिर्भक्तःप्रियःपरः १४ शक्यतेसद्दशी
कर्तुंतपसाराधनेनच इतिसंचिंत्यरुद्रंढतपोभूमिंविचार्यसच १५ समागतस्ततोभद्रेकरवीरपुरंमुनिः
नानापुण्यवनाकीर्णंसर्वामरनिषेवितं १६ रुतीर्थनिकराकीर्णंवडुदेवालयान्वितं रत्नस्फटिकपाषाणैः

कर· म· कृतदुर्गएकदुर्गमं १७ गोपुरैर्विविधाकारैर्बहुशोभाकरं चिरं कृतविद्रुमसोपानं कृतमार्तकभूमिकं १८
२५ गंगाद्वयेनासमंतात्परिखीकृतवत्स्थितं उत्तरे कृष्णयाचाथ वारुण्या दृढीकृतं १९ पूर्वेपि कृष्णयारे
व्यागाणया नापि यंत्रितं दक्षिणे चेद पाक्षिम्यां नदीभ्यां च दृढरक्षितं २० पश्चाच्छिवमयूरीभ्यां नदीभ्यां दृढ
ढीकृतं महाद्वारेषु चत्वारि संति लिंगानि रक्षसा २१ पर्वतोपरि पूर्वे च लिंगं रामेश्वराभिधं कल्लेशं च महा
लिंगं स्थितं पश्चिमभागके २२ उत्तरे तु यथाभागे श्रीगुह्यं मल्लिकार्जुनं मध्यद्वारे एकसंत्यत्र देवतास्तान्निबो
धय २३ उज्वलांबा स्थिता पूर्वे याम्ये कात्यायनी स्थिता पश्चिमे तु विभागे वै श्रीसिद्धेशं प्रकीर्तितं २४ उत्त
रे दिग्विभागे च श्रीकेदाराभिधं स्थितं समंताद्दृष्टलिंगैर्यदिव्यैश्च प्रतिभूषितं २५ अमरेशाभिधं लिं
गं पूर्वे कृष्णातटे स्थितं ~~समंताद्दृष्टलिंगैर्य~~ कोपेश्वराभिधं लिंगं अग्निकोणे एकसंस्थितं २६ वीरभद्रं म २५
हालिंगं दक्षिणे तु संस्थितं श्रीभोगेशं महालिंगं पश्चिमे तु एकसंस्थितं २७ वटेश्वराभिधं लिंगं वायुकोणे तु

26

संस्थितं उत्तरे स्थितरामेशं कृष्णातटे एकसंस्थितं २८ ईशान्ये संगमेशं च कृष्णावरुणसंगमे इति लिंगाष्टकेना
थ यत्क्षेत्रं एकदृढीकृतं २९ अकन्नायिचतुष्केण समंताच्चतुरक्षितं पूर्वे चौदुंबरे तीर्थे पूर्वाब्धिरिति विश्रुते ३०
शेतेनंतः सुपर्यंके क्षेत्ररक्षात्चक्रकः ३१ प्रत्यक्पलाशके तीर्थे पश्चिमाब्धिरिति श्रुते शेतेनंतसुपर्यंके क्षे
त्ररक्षात्चक्रकः एवं सरक्षितं सर्वक्षेत्रं यत्करवीरकं उत्तरेश्वत्थके तीर्थे उत्तराब्धिरिति श्रुते ३२ शेतेनंतसु
पर्यंके क्षेत्ररक्षात्चक्रकः एवं संरक्षितं सर्वक्षेत्रं यत्करवीरकं ३२ देव्याश्चाथ महालक्ष्म्या दम्याघ्रतं यद्दक्षिणे
करे दातुं भक्तजनानां हि भुक्तिमुक्तिमिव प्रिये ३३ तत्क्षेत्रं प्रभवं दृष्ट्वा परमानंदनिर्भराः सभाग्यं एकवेकण्वं
न्वे जगाम तन्मना मुनिः ३४ पराशर उवाच अहो मदीयं एककृतं किम याख्यितं कृतं पूर्वमिह स्फुटं ततु दृष्टम
येतत्करवीरकं पुरं ब्रह्मेरद्रुरुद्रप्रमुखैर्विमृग्यं ३५ दृष्टं मया क्वापि न चेदृशं वै क्षेत्रं पवित्रं जगतीतलेन्यत्
मुनींद्र दृष्टं सिकतास्वरूपं विभात्य पूर्वं करवीरकं पुरं ३६ विलोकितान्यत्र बहूनि तानि मुनींद्रवंद्यैः करवीर

क॰र॰म केपुरे यत्रासमंतात्प्रतिभांतिवृक्षा देवस्वरूपा हिमहृद्विचित्रं ३७ दृष्टान्यनेकान्यवनीतलेमयातीर्थान्यथाप्यत्र
२७ मनोविमग्नं जलंपवित्रंशिवस्वरूपं दृष्टंयथैवात्रविभात्यपूर्वं ३८ यद्भुक्तिदंतन्नविमुक्तिदंक्वचिद्यन्मुक्तिदंन
भुक्तिदंक्वचित् क्षेत्रंमयाचोभयदंविचिन्वतानदृष्टमन्यत्करवीरतोमहत् ३९ धन्यंमदीयंचरणद्वयंवैध
न्यंमदीयंननुदृष्टियुग्मं जन्माद्यधन्यंकिमहाद्यधन्यंदृष्टंमयायत्करवीरकंपुरं ४० अगस्त्यउवाच परा
शरोमुनिश्चैवंवदन्प्रमुदिताननः समागतोथवारकूभूप्रयागंचालखिल्वकं ४१ मार्गद्वारस्थितान्देवान्
संपूज्यविधिपूर्वकं गंधाक्षतस्रक्पुष्पाद्यैस्सन्नतिप्रार्थनैरपि ४२ त्रिस्रणांचेहगंगानांसंगमोयत्रविद्यते क्षे
त्रनायव्यादिग्भागेतत्प्रयागमितीरितं ४३ श्रीब्रह्मरूपिणीकुंभीभद्रयाविष्णुरूपिणी शिवयाशिवरूपि
ण्यासंगतात्तत्प्रयागकं ४४ यत्रचाहर्दिनंब्रह्मासर्वदेवसमान्वितः ब्रह्मयज्ञंप्रकुर्वाणोब्रह्मयज्ञंकरोत्यतु २७
४५ स्नानदानपरैस्तत्रवासिभिर्ब्रह्मरूपिभिः सद्घोषः श्रूयतेचापिपुण्यवद्भिक्वचित्क्वचित् ४६ स्नानं

27

कृत्वामुनिस्तत्रतीर्थश्राद्धंविधायच गोभूतिलहिरण्यादियथाशक्त्याप्रदत्तवान् ४७ पितॄन्संतर्प्यविधिवत्कृ
त्वामाधवदर्शनं कुमारस्वामिनंपूज्यपत्न्यासहवटेगतः ४८ वटंसंपूज्यविधिवत्सावित्रीवटसंस्थितां कुंकुमां
जनगंधाद्यैरुपचारैरपूजयत् ४९ वटंसंवेष्ट्यनवभिः स्तंतुभिः समनोरमैः कंचुक्याद्युक्तशूर्पाणिदत्वात
त्प्रणम्यच ५० ततोजगामसमुनिः करवीरंमहापुरं मलापकर्षणंस्नानंकार्यंकृत्वावरानने ५१ नत्वाविश्वे
श्वरंदेवंभवानींविश्वमातरं विनायकंततोनत्वातथावैदंडपाणिनं ५२ नत्वाचत्र्यंबिकांदेवींवाराहींतदनंतरं
ब्रह्माणंचततोनत्वाविष्णुंचैवततः परं ५३ शिवंनत्वाततः सम्यक् अविमुक्तेश्वरंततः कुंडलेशंनमस्कृत्यत
त्वानंदीश्वरंततः ५४ स्नात्वाथमणिकर्ण्यांवैमणिकर्णेश्वरंततः कुकुटेशंनमस्कृत्यतथान्यानपिसर्वशः ५५
दत्तात्रेयमुनेश्चाथपादुकेसंप्रणम्यच मुक्तमंडपिकादेव्याविवेशाथमुनीश्वरः ५६ विनायकंचरुद्रंचपू
जयद्विधिवत्ततः कालवेतालकौपूज्यद्वारपालौमहाबलौ ॥ ५७ ॥ देव्यादत्तवरौद्वौपूजितौसर्वकामदौ ॥ ग

कर॰म॰ भेंगृहंसमासाद्यमहादेवींप्रणम्यच ५८ गंधपुष्पफलवस्त्राद्यैर्महालक्ष्मीः प्रपूज्यसः पुष्पांजलिंप्रदत्वाचप्रण
२८ नामसदंडवत् ५९ नमोलक्ष्म्यैमहादेव्यैशिवायैसततंनमः नमः प्रकृत्यैभद्रायैनीयताः प्रणताः स्मतां ६०
७ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेसप्तमोध्यायः ७ ५ अगस्त्यउवाच नत्वा
चैवंमहालक्ष्मीमनोवाक्कायकर्मभिः कृतांजलिपुटोभूत्वास्तुतिंकुकर्तुमुपक्रमे १ पराशरउवाच नमाम्यहंदे
ववरांपवित्रांजगत्कृतिस्थामविरोधसंभवां भुक्तिप्रदामज्ञकुलस्यसर्वदामुक्तिप्रदांप्राज्ञकुलस्यसद्धृतः २ त
वप्रभावंकनिरूपितंशुभेपराक्रमंवानहिदेवचंद्रे अलंप्रसीदेश्वरिसर्वदेहिनांकामप्रदात्वंभवसर्वकामिनां
३ नूनंस्थितात्वंकरवीरकेपुरेमुक्तिंप्रदातुंखलुसर्वदेहिनां तथापियाचेभवतीस्फुरार्तिहांमनोरथंकंदरिपूर
यास्तुभे ४ आंबेरिपांवितनुतेभवतीविमुक्तिंसाकंददातिनहिसज्जनभक्तिचंद्रे सर्वात्मनातवपदाब्जकथासु २८
स्थेभृंगोभवंचरणपंकजवाससक्तः ५ धन्योस्मिकृतत्वोस्मितवपादाब्जदर्शनात् संसारभयभीतोस्मिपाहि

21

मांसर्वदाभेदे ६ सुदिनंचाद्यसंजातंप्राप्तंजन्मफलंमया मत्तस्त्वद्दर्शनादेवजातः सर्वमनोरथः ७ नयाचेव
रमन्यंहिपूर्णचंद्रनिभानने त्वत्क्षेत्रवसतिंदेहिसर्वकामप्रपूरणी ८ अगस्त्यउवाच मुनिनैवंस्तुतादेवीसर्वभी
ष्टफलप्रदा प्राहप्रसादसुमुखीमुनिपाराशरंशुभे ९ महालक्ष्म्योवाच धन्योसिकृतकृत्योसिमुनेमत्क्षेत्र
दर्शनात् मत्क्षेत्रदर्शनंनृणामिहामुत्रफलप्रदं १० देवद्विजगुरुद्रोहाचात्रवासंनैवददाम्यहं देवधर्मद्रुहां
चापिक्षेत्रवासिद्रुहामपि ११ परनिंदारतानांचकृतघ्नानांतथैवच नैववासंददाम्यत्रमिथ्याभिशापिनाम
पि १२ त्वंशांतः श्रद्धयायुक्तः सत्यवान्विजितेंद्रियः निवसात्रसुखंब्रह्मन्यत्रतेमनसोरुचिः १३ वा
सस्तेसर्वदात्रास्तुसंपूर्णाः संतुकामना पंचक्रोशांतरेणैवयत्रत्वंहिवसिष्यसि १४ तत्रतत्रभवेत्तीर्थंत्वं
नाम्नाविश्रुतंभुवि यथाविधितपस्तप्त्वासर्वान्कामानवाप्नुहि १५ अगस्त्यउवाच गृहीत्वाथवरंनत्वाम
हालक्ष्मींसचेमुनिः मुक्तिमंडपमागत्यश्रुत्वाधर्मकथाशुभाः १६ नीराजनविधिंदृष्ट्वासर्वकामप्रदायिनं

कर॰म॰ क्षेत्रपश्चिमभागेतुक्रोशयुग्मांतरेपरे १७ स्थितंपर्णकुटिंकृत्वासशाहंस्कविचक्षणः तत्राभवन्महातीर्थंत
२८ पोयोगसमुद्भवं १८ करप्रभावतोदेव्याः पराशरमितीरितं तत्राग्नेवाभवल्लिंगंपावनंसर्वदेहिनां १९ स्नां
त्वासर्वेषुतीर्थेषुकोटितीर्थादिषुक्रमात् दक्षिणेचोत्तरेवापिमानसेतुविधानतः २० अंतर्गृहेबहिर्वापिस्नात्वा
चैवयथाविधि काशीक्षेत्रविधिंकृत्वागयाक्षेत्रंततोगतः २१ क्षेत्रस्येशानदिग्भागेकोशार्धांतेरसंस्थितं गया
क्षेत्रंहिविज्ञेयंसर्वतीर्थफलप्रदं २२ कांक्षंतिपितरःपुत्रान्नरकाद्भयभीरवः गयांयास्यतियःपुत्रःसन
स्त्राताभविष्यति २३ गयाप्राप्तंसुतंदृष्ट्वापितॄणामुत्सवोभवेत् पद्भ्यामपिजलंस्पृष्ट्वास्मभ्यंकिंन
दत्तवान् २४ गयांगत्वान्नदातायःपितरस्तेनपुत्रिणः पक्षत्रयनिवासीचपुनात्यासप्तमंकुलं २५ महाकल्प
कृतंपापंगयांप्राप्यविनश्यति पिंडंदत्वाचपुत्रादेआत्मनोपितिलैर्विना २६ आत्मजोप्यन्यजोवापिगयाभू २८
मौयदादा यन्नाम्नापातयेत्पिंडंतन्नयेद्ब्रह्मवाहिनं २७ ब्रह्मज्ञानंगयाश्राद्धंगोग्रहेमरणंतथा वासःपुंसां

27

कुरुक्षेत्रेयदिपुत्रोगयांव्रजेत् २८ ब्रह्मज्ञानेनकिंसाध्यंगोग्रहेमरणेनकिं वासेनकिंकुरुक्षेत्रेयदिपुत्रोगयांव्रजेत्
२९ मयाप्रकल्पितान्विप्रान्हव्यकव्यादिनार्चयेत् तैस्तुष्टैःतोषिताःसर्वाःपितृभिःसहदेवताः ३० दंडंप्रता
पयेद्भिक्षुगयांगत्वानपिंडदः दंडंन्यस्त्वारुद्रपदेपितृभिःसहमुक्तये ३१ रुद्रपदाच्चपूर्वस्मिन्दक्षिणेपश्चिमो
त्तरे सार्धकोशद्वयंसा[illegible]नंगयारोद्रीतिविश्रुता ३२ पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः तन्मध्येसर्वतीर्था
नित्रैलोक्येयानिसंतिवै ३३ श्राद्धकृद्योगयाक्षेत्रेपितॄणामनृणोहिसः शिरसिश्राद्धकृद्यस्तुकुलानांशतमुद्ध
रेत् ३४ गृहाच्चलितमात्रेणगयायांगमनंप्रति स्वर्गारोहणसोपानंपितॄणांचपदेपदे ॥३५॥ पदेपदेश्वमेधस्य
यत्फलंगच्छतोगयां तत्फलंचलभेन्नृणांसमग्रंनात्रसंशयः ३६ पायसेनाथ्यचरुणासक्तुनापिष्टकेनच तंडुलैः
फलमूलाद्येगयायांपिंडपातनं ३७ गयायांपिंडदानेनयत्फलंलभतेनरः नतच्छक्यंमयावक्तुंकल्पकोटिश
तैरपि ३८ मुंडनंचोपवासश्चसर्वतीर्थेष्वयंविधिः वर्जयित्वाकुरुक्षेत्रंविशालांविरजांगयां ३९ गयायाश्चप्रवे

शेतुस्नातव्यंफल्गुतीर्थके देवादींस्तर्पयित्वाथश्राद्धंकृत्वास्वसूत्रतः ४० अपरेह्निशुचिर्भूत्वागच्छेतंप्रेत
पर्वतं रुद्रकुंडेततः स्नात्वादेवादींस्तर्पयेत्सुधीः ४१ कृत्वाश्राद्धंसपिंडंचप्रयतः प्रेतपर्वते तिलमिश्रांस्तुलः
सक्तूनुक्षिपेत्प्रेतपर्वते येकेचित्प्रेतरूपेणवर्तंतेपितरोमम ४२ तेसर्वेतृप्तिमायांतुसक्तुभिस्तिलमिश्रितैः
आब्रह्मस्तंबपर्यंतंयत्किंचित्सचराचरं मयादत्तेनतोयेनतृप्तिमायांतुसर्वशः प्रेतत्वाच्चविमुक्तास्तुः पितरस्त
स्यनान्यथा प्रेतत्वंतस्यनास्त्येवकुलेचापिनजायते ततोनत्वाचप्रेतेशमिमंमंत्रमुदीरयेत् प्रमाणंदेवताःसं
तुलोकपालाश्चसाक्षिणः मयागत्यसमेयस्मिन्पितॄणांनिष्कृतिःकृता फल्गुतीर्थंव्रजेत्तस्मात्सर्वतीर्थोत्तमोत्त
मं ४३ मुक्तिर्भवेत्पितॄणांचकर्तॄणांचैवशाश्वती तीर्थान्यपिचसर्वाणिभुवनेषुचसंतिच ४४ तानिस्नातुंसमा
यांतिफल्गुतीर्थेसुरैःसह गंगापादोदकंविष्णोःफल्गुर्ह्यादिगदाधरः ४५ स्वयंहिदेवरूपेणतस्माद्गंगा
धिकंविदुः अश्वमेधसहस्राणांसहस्रंयःसमर्पयेत् ४६ नासौतत्फलमाप्नोतिफल्गुतीर्थाभिषेचनात् फ

ल्गुतीर्थेनरःस्नात्वादृष्ट्वादेवंगदाधरं ४७ आत्मानंपितृभिःसार्धंनयेत्तैर्वैष्णवंपरं अष्टैः पंचभिःस्ना
नंपुष्पवस्त्राद्यलंकृतं ४८ नकुर्याद्योगदापाणेस्तस्यश्राद्धमपार्थकं प्रथमेह्निविधिःप्रोक्तोद्वितीयदिवसेव्र
जेत् ४९ धर्मारण्यंयत्रधर्मोयोस्माद्यागमकारयत् धर्मंधर्मेश्वरंनत्वामहाबोधितरुंनमेत् ५० तृतीयेब्र
ह्मसरसिगत्वास्नानंसमाचरेत् कृत्वाब्रह्मसरःश्राद्धंब्रह्मलोकंनयेत्पितॄन् ५१ आम्रान्वैरोपितास्तत्रब्रह्मणा
लोकपावनाः तेषांसेवनमात्रेणपितरोमोक्षगामिनः तयोर्यमबलिंदद्याद्यमस्यतृप्तिहेतवे ततःश्वानबलिं
दद्यात्तन्मंत्रेणवैपृथक् ५३ ततःकाकबलिंदत्वापुनःस्नानंसमाचरेत् यमराजसमौराजानिश्चलौयत्र
संस्थितः तस्मैबलिंप्रयच्छामिपितॄणांतृप्तिहेतवे श्वानौद्वौश्यामशबलौवैवस्वतकुलोद्भवौ ताभ्यांबलिंप्रय
च्छामिरक्षेतांपथिसर्वदा ऐंद्रवारुणवायव्यायाम्यावैनिर्ऋतास्तथा वायसाःप्रतिगृण्हंतुभूमौपिंडंमयार्पितं
फल्गुतीर्थेचतुर्थेतुस्नानंचसमाचरेत् गयाशिरस्यथश्राद्धंपदेकुर्यात्सपिंडकं ५४ गदाधरंतुसंपूज्यम

कामक्रोसनास्थितं रुद्रादिपदरूपेणपितृणांतृप्तिहेतवे ५५ यत्ररुद्रपदंदिव्यंदर्शनात्पापनाशनं स्पर्शना
त्पूजनाद्वापिपितॄणांस्वर्गमक्षयं ५६ एकार्णवेवटस्याग्रेयः शेतेयोगनिद्रया स्थूलरूपधरस्तस्मैनमस्तेयोगशा
यिने ५७ श्राद्धंसपिंडकंकृत्वापदेविष्णोर्महात्मनः श्राद्धंरुद्रपदेकृत्वाकुलसाहस्रमात्मनः नयेद्विष्णुपदंदिव्य
मनंतंशिवमव्ययं सहात्मानंकुलशतंनयेत्परमंपदं ५८ तथाब्रह्मपदेश्राद्धंकृत्वापूर्वविधानतः ब्रह्मलो
कंकुलशतंसमुद्धृत्यनयेन्नरः कार्तिकेयपदेश्राद्धंशिवलोकंनयेत्पितॄन् गणेशस्यपदेश्राद्धि[illegible]लोकंन
येत्पितॄन् ५८ गयाशिरसियः पिडान्येषांनाम्नाप्रपातयेत् नरकस्थादिवंयांतिस्वर्गस्थामोक्षमाप्नुयुः ५९
गार्हपत्यपदेश्राद्धीवाजपेयफलंलभेत् श्राद्धंकृत्वाहवनीयेराजसूयफलंलभेत् ६० दक्षिणाग्निपदेश्राद्धीअश्व
मेधफलंलभेत् श्राद्धंयस्यपदेकृत्वाज्योतिष्टोमफलंलभेत् ६१ अवसथ्यपदेश्राद्धीसोमयागफलंलभेत्
श्राद्धीसूर्यपदेपंचपापीनोर्कपुरंनयेत् ६२ कश्यपस्यपदेश्राद्धीपितॄन्ब्रह्मपुरंनयेत् अन्येषांचपदेश्राद्धीमम

लोकंनयेत्पितॄन् ६३ ततोभूमिप्रदानेभ्यब्राह्मणान्पूजयेन्नरः संतुष्टैर्ब्राह्मणैस्तत्रगयाश्राद्धंहिसार्थकं ६४
आश्वपाकादिभूतानियथावैतोषितेत्रहि सफलाभवयात्रेतितेषांवाक्यंप्रगल्भ्यच ६५ अक्षयेचवटेतत्रश्राद्धंकृ
त्वाविधानतः ६६ वटवृक्षसमीपस्थेशाकेनाप्युदकेनवा एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता ६७
दृष्ट्वानत्वाथसंपूज्यवटेशंचसमाहितः पितॄन्नयेद्ब्रह्मलोकमक्षयंचसनातनं ६८ दक्षिणाग्निपदेश्राद्धी
अश्वमेधफलंलभेत् गार्हपत्यपदेश्राद्धीवाजपेयफलंलभेत् ६९ श्राद्धंकृत्वाहवनीयेराजसूयफलंलभे
त् श्राद्धंयस्यपदेकृत्वाज्योतिष्टोमफलंभवेत् ७० अवसथ्यपदेश्राद्धीसोमयागफलंलभेत् श्राद्धीसूर्यप
देपंचपापीनोर्कपुरंनयेत् ७१ कश्यपस्यपदेश्राद्धीपितॄन्ब्रह्मपुरंनयेत् अन्येषांचपदेश्राद्धीममलोकंनये
त्पितॄन् ७२ संसारवृक्षशस्त्रायः शेषपापहरायच अक्षय्यब्रह्मदात्रेचनमोक्षय्यवटायते ७३ ८
इतिश्रीपद्मपुराणेकरवीरमाहात्म्येकरवीरकांडेअगस्तिलोपामुद्रासंवादेगयामाहात्म्यंनामाष्टमोध्यायः ८

कृ॰ म॰ अगस्त्यउवाच॥ एवंगयाविधिंकृत्वा॥त्रिस्थलीसमुपास्यसः महालक्ष्मींप्रणम्याथद्वाराण्यालोक्यसर्वतः १ महालिं
३२ गाष्टकंपश्यन्आजगामपराशरः गिरिव्रजाभिधानंचक्षेत्रंवायव्यभागतः २ यत्रब्रह्मातपस्तेपेप्रजासर्गार्थ
मादृतः प्राप्तश्चमहतींसिद्धिंप्रजाश्चैवोपबृंहयन् ३ यत्रसंस्थापयामासस्लिंगंसोमेश्वराभिधं आनीयसर्वतीर्था
न्सोमतीर्थंचकारसः ४ वरंचदत्तवांस्तत्रतंब्रवीमिवरानने अस्मिन्गिरिवरेयेवैकरिष्यंतितपोमहत् ५ तेसर्वे
पापनिर्मुक्तायांतितत्परमंपदं सकामःकाममाप्नोतिनिःकामोमोक्षमेवच सोमेश्वरंमहालिंगंयेपश्यंतिसुचेतसः
सोमतीर्थेसुसंस्नात्वातेयांतिपरमंपदं ७ सोमवारेचयःस्नात्वासोमतीर्थेविचक्षणः दृष्ट्वासोमेश्वरंलिंगंतेन
यांतिपुनर्भवं ८ येरुद्रादिमहासूक्तैर्लिंगंसोमेश्वराभिधं अभिषिंचंतितेधन्याः सर्वान्कामानवाप्नुयुः ९
पावमान्यैर्महामंत्रैः पौरुषैर्वाविशेषतः तेसर्वपापनिर्मुक्ताः पुत्रपौत्रधनान्विताः १० बिल्वपत्रैःसमर्चं ३२
न्तियेसोमेशंमहाशिवं सहस्रनाममंत्रैर्वातेपुनंतिजगत्त्रयं ११ येचवासंकरिष्यंतिश्रीसोमेश्वरसंनिधौ भुक्तिं

32

मुक्तिंचतेसर्वेसमीयुर्मदनुज्ञया १२ अगस्त्यउवाच इतिलब्धवरंक्षेत्रंपावनंसर्वदेहिनां गिरिंसमाययौदेवींस
मुनिब्रह्मनामकं १३ चूताम्रपनसाकीर्णंतालशालविराजितं सरलाशोकपालाशभल्लातकसुशोभितं १४ दाडि
मीनिंबजंबीरपिचुमंदमनोरमं जातीचंपकमाल्याद्यैर्वल्लीभिरुपभूषितं १५ सारिकोकिलसंलापैराहूयंतमिवा
गतान् मत्तषट्पदनिर्घुष्टवनमालाविराजितं १६ सिंहव्याघ्रवनाकीर्णंशार्दूलाक्षभयानकं यक्षकिंनरगंध
र्वविद्याधरविभूषितं १७ एवंपर्वतमालोक्यप्रहृष्टहृदयोमुनिः सोमतीर्थेसुसंस्नात्वाकृत्वाश्राद्धंहिरण्म
यं १८ पितृन्संतर्प्यविधिवत्ततोदेवालयंगतः उमादेवींचतत्रादौसंपूज्यविधिपूर्वकं १९ नत्वाचैवगणेशा
नंक्षेत्रपालंविरिंचिनं एतानभ्यर्च्यविधिवत्ततःसोमेश्वरालयं २० नत्वादेववराकीर्णमर्चयामासभक्तितः॥
रुद्रेणशतरुद्रेणश्रीसूक्तेनतथैवच २१ पौरुषैःकुशारुद्रैश्चपावमान्यैर्विशेषतः अभिषिच्यमहादेवंगंधाक्ष
तसुपुष्पकैः २२ धूपदीपोपहारैश्चनानाशाखसमुद्भवैः कृत्वानीराजनंचैवदत्वापुष्पांजलिंतथा २३ नत्वा

मभुविकायेनसाष्टांगंदंडवन्मुनिः कृतांजलिपुटःपश्चात्समुत्थायमहामुनिः २४ अस्तौषीत्सर्वदंशंभुंसोमे
शंप्रीतिविह्वलः पराशरउवाच नतोस्म्यहंत्वांपरिपूर्णमीश्वरंसर्वप्रदंयोगिमनोनिवासं सद्भक्तिनम्रैरभिषेवितांघ्रि
पद्मंमायापहंसेवनतत्परायणं २५ आभासतेभासमशेषसाक्षिन्नखिलं प्रभूतंत्वयिसंस्थितंच त्वय्येवलीनं
नपरंपराङ्क्षेवप्रलीयतेलीनमथापिसत्यं २६ विद्भिरेवंप्रतिबुध्यविद्वन्त्वदेकलिंगेकलयंप्रपंचं याताःशा
रण्यंशरणंभवंतंतेषांहिधन्यंजननंभवाब्धौ २७ भवांधकूपेपतितस्यमेविभोत्तनुप्रकाशंभवदीयसंमतंआ
त्मप्रदंशोकविनाशदक्षंयंप्राप्यसर्वेरूकगतिंप्रकीर्णाः २८ आत्माभिरामकमनीयगुणाभिरामश्रीकामकामद
हनाखिलभोगधाम रामाभिरामभवकाममभिपराभिरामकामंप्रपूरयपूरयकामिजनस्यविद्वन् २९ अ
गस्त्यउवाच इतिस्तुत्वामहादेवंसोमेशंसपराशरः विलोक्यपर्वतंसर्वेभ्युचिरध्यानंसमीक्ष्यच ३० कृत्वात·३३
त्राश्रमंदिव्यंदिव्यपत्नीसमायुतः दिव्यशिष्यगणोपेतः तपःस्तप्तुंप्रचक्रमे ३१ श्रीहरिंमनसाध्यायन्स्व

नासाग्रकृतेक्षणः विलसच्चारुवदनंमुनींद्रंनलिनेक्षणं ३२ हेमकुंडलसंचारविलसद्गलमंडितं नीलके
शंघनश्यामंपीतकौशेयवाससं ३३ चतुर्भुजंविशालाक्षंशंखचक्रादिभिर्युतं वनमालापरीतांगंसर्वल
क्षणसंयुतं ३४ सर्वाभरणसंयुक्तंहरिंध्यायन्विचक्षणः सन्नियम्येंद्रियग्रामंप्राणांसंरुध्यमस्तके ३५
एवंबहुतिथंरुभुकुर्वन्नेतत्तपउत्तमं नददर्शयदाविष्णुंचचारोग्रंतपस्तदा ३६ यदाद्रक्ष्यामितंविष्णुंस्व
रूपेणसमागतं तदापूर्णंकरिष्यामितपएतदितिस्थिरः ३७ मत्वातपः समारेभेपर्णभक्षपरायणः हि
मवर्षातपसहोजलशाय्यग्निमध्यमः ३८ सूर्यदृष्टिर्धृतःप्राणः तपःस्तप्तुंयदोद्यतः तस्यमूर्ध्नास
मुद्भूतःसतपोग्निस्त्रयीमयः ३९ तिर्यगूर्ध्वमधःसंस्थःलोकान्दग्धुंयदोद्यतः तदेंद्रश्चिंतयामा
सभीतस्वस्थानशंकया ४० आरब्धंतपएतेनमल्लोकविजिगीषया अन्यथातपएवायमुग्रंतूष्णींनचारभे
त् ४१ तस्माद्विघ्नःप्रकर्तव्योयथास्यतपएवहि शीघ्रंसर्वंप्रणश्येतकरवंस्वनुयाम्यहंततः ४२ इति

कर० म० निश्चित्यवैकस्तुमहेंद्र: सभ्रशार्दित: आहूयमदनंप्राहमानदोमानयन्बहून् ४३ इंद्रउवाच पंचबाण
३४ महाबुद्धेसर्वकार्येषुकोविद: संकटंमेबहुप्राप्तंकरणीयमिहात्रकिं ४४ त्वंनिर्मितोसिवैधात्रादेवानांरक्षणा
र्थवै मनुष्याणांविशेषेणप्रजार्थेचविनिर्मित: ४५ त्वत्संनिधानरहितोमनुष्योत्यतिगर्हित: षंढ:सउच्य
उच्यतेसर्वैर्हव्यकव्येषुगर्हित: ४६ पातालेपिभवान्श्रेष्ठोनागकन्याप्रिय: सद: तस्मात्त्वंवैषुलोकेषुत्व
द्विनावेनशोभते ४७ देवानांचविशेषेणसहायंभवत: स्फुटं शास्त्रद्वयंममश्रेष्ठंकुलिशंचभवांस्तथा वज्रं
मुनीष्टकुंठंतुत्वंसर्वंमेविधानकं ४८ कतिवारंत्वयापूर्वंतपसोस्मद्विरोधिन: चालिताभवतावीरदेवका
र्यविधौतथा ४९ तस्मात्ब्रह्मगिरौकामतपस्तपतिवैमुनि: अस्मल्लोकेछयान्नंत्वंकृत्वात्वंनिवर्हय ५०
अगस्त्यउवाच माहेंद्रवचआकर्ण्यपंचबाणोमुदान्वित: उवाचस्मयमानस्तंसंप्राप्तावसरस्तदा ५१ मदन० ३४
किंकार्यमुपदिष्टंमेलघुभूतंपुरंदर वीरस्यैववधेकार्येकाचिंतातववृत्रहन् ५२ रुद्रोपिचमयाभग्नी

चलितस्तपसोबलात् त्वदाज्ञयाममस्वामिन्देहितांबूलमारुत: ५३ प्रेषयास्तुवसंतंचदिव्यस्त्रीगणसंयुतं मं
जुलंचतथावातंगंधर्वप्रवरानपि ५४ अगस्त्यउवाच इत्याकर्ण्यामरेंद्रोपियदुक्तंमदनेनवै तत्सर्वंप्रतिदत्वाथप्रे
षयामासतंशुभे ॥ ५५ मदनोपिमुदायुक्तोप्सरोगणसंयुत: तूर्णंसमागत: शुभ्रगिरिंब्रह्माभिधानकं ५६
रसालैरसालैस्तैरशोकैःशोकहारिणं तालै: स्तमालै: श्रीतालै: शालै: सर्वत्रशालितं ५७ सुधाकुलसमारं
भिरंभाभि: परिभूषितं सुरंगैश्चापिनारंगैरंगमंडपवच्छ्रियं ५८ वानीरैश्चापिजंबीरै: बीजपूरै: प्रपूरितं
मदांदोलितकर्पूरकदलीदलसंश्रया ५९ विभ्रमायसमापन्नमह्वयंतमिवाध्वगान् पुन्नागमिवपुंनागपल्ल
वै: करपल्लवै: ६० कलयंतमिवालोलैर्मल्लिकास्तं० बकस्तनं । विदीर्णदाडिमै: स्वांतंदर्शयंतमिवरागवत्
६१ माधवीधवरूपेणाश्लिष्यंतमिवकानने कदंबपातिनोभृंगान्दृष्ट्वाकंठाकैनेरिव ६२ समंततोभ्रा
जमानंकदंबककदंबकै: नीराजितमिवोद्दीपैराजचंपककोरकै: सत्पुष्पशाल्मलीभिश्चजितपद्माकरश्रियं

क्वचिज्जलरुहैरम्यैः क्वचित्कांचनकेतकैः ६४ कृतमालैर्नक्तमालैः शोभमानं क्वचित् क्वचित् गलन्मधु
कुंकुमैर्धारारूपधरैर्घनैः ६५ स्वरसमुक्तमुक्ताभिरर्चयंतमिवानिशं नानामृगगणाकीर्णनानाद्विजनि
नादितं ६६ नानासरित्सरस्त्रोतः पल्लवैः परितोवृतं शुभाश्रियः स्वर्गभूमिः परित्यागगतैरिव ६७ ना
नासुरनिकायैश्च विश्वभोगेच्छयाश्रितं उत्सृजंतमिवार्घं चैः पतत्पुष्पैरितः स्ततः ६८ केकेकेकारवैर्दूरान्
कुर्वंतं स्वगतं किलः २ वायुना चापरोमिश्च वसंतमदनादयः ६९ जग्मुः पराशरो यत्र तपआस्थायति
ष्ठति स्वनाम्नालिंगमाख्याय कुंडं कृत्वा तदग्रतः ७० महापुरुषसूक्तं च जपन्निश्चलमानसः तं दृष्ट्वा
दूरतो देवा द्वितीयमिव भास्करं ७१ ज्वलज्ज्वलनसंकाशैरंगैः सर्वत्र शोभितं साक्षात्किं वाह्नवीमूर्तिः स्वा
दुर्गं तपते तपः ७२ स्थाणुवन्निश्चलतरं निर्मलं सन्मनो यथा अथवा सर्वतेजांसि श्रुत्वेमां श्लाघ्यपीनतं ७३
शीलयंतं परं धाम शांतं शांतपदाप्तये तपनस्तपतेत्यर्थं दहनोपि च दह्यते ७४ यत्रीन्नचपराचापिचप

लाचपला भवत् यस्मान्नमेप्रदृश्यंतेहिंस्त्राअपिसमंततः ७५ शांतरूपा अमी सत्वास्त्यक्त्वा वैरं स्वभावजं
शुंडादंडेन करिणः सिंहं कंडूयते भयः ७६ भुजंगस्य फणापृष्ठे नकुलः स्वकुलोद्भवं वैरं परित्यज्य लुंठे
दुत्पत्योत्पत्य लीलया ७७ आलोक्य मूषकं सर्पश्चरंतं वदनागतः क्षुधार्तोपि न गृण्हाति सोपि नस्माद्बि
भेतिन ७८ प्रसूयमानां हरिणीं दृष्ट्वा कारुण्यपूर्णदृक् तंत्रक्षिपातं मुंचंश्च व्याघ्रो दूरं व्रजत्यहो ७९ मा
र्जारीव्याघ्रस्य चरितं मृगीमृगविचेष्टितं उभावकथितोन्योन्यं सखाविवमुदान्विते ८० दृष्ट्वा युद्धं डकोदं
डं शांबरं शबरो मृगः योद्धुंश्चावसीत्यजति सोपि कंडूयते हितं ८१ बकोपि पल्वले मत्स्यान्नाप्नात्यग्रे
चरानपि न महांतोप्यमहतो मत्स्या मत्स्यान्नदंति च ८२ एकतः सर्वमांसानि मत्स्यमांसं तथैकतः स्व
त्रिस्त्वेति किं तैर्भिरतो मत्स्यान् त्यजंति च ८३ परप्राणैस्त्वकीयेप्राणान्स्वान्पुष्यंतिहि पापिनः आकल्पं
नरकान्भुक्त्वा भुंजते वा ततः पुनः ८४ अंदुमासं न भोक्तव्यं प्राणैः कंठगतैरपि भोक्तव्यं तर्हि भोक्तव्यं स्वमां

क०र०म० संन्नेतरस्यच ८५ लोकद्वयध्वंसकारिधिग्गहोमांसभक्षणं यस्त्वार्थमांसपचनंकुरुतेपापमोहितः ८६
३८ यावंतिपशुरोमाणितावत्सनरकंव्रजेत् आलेचंसर्वशास्त्राणिनहिंसंतिपरस्परं ८७ अहोसत्संगमाहा
त्म्यंपश्यतांसन्मतिः कथं जातावैमुनिसंगेनधन्यापिपत्रावत्सलमी ८८ इत्याश्रमन्वरान्दृष्ट्वातिर्यंचोपि
मुनीनिव अबोधिविबुधैरित्थंप्रभावः क्षेत्रजस्त्वयं ८९ मृगाणांपक्षिणामित्थंदृष्ट्वाचेष्टांत्रिविष्टपं अ
कांडपातसंकष्टंनिर्विंडस्त्रिदशावद्ध ९० चरमेतेपक्षिगणाः पद्मावःक्षेत्रवासिनः येषांनपुनरावृत्ति
र्येयंरेवापुनर्भवाः ९१ अत्रस्थैः पक्षिभिस्तस्मान्नवयंस्वर्गिणः क्वचित् अत्रपाताद्भयंनास्तिस्वर्गेपात
भयंमहत् ९२ करवीरपुरेवासोवरंचोपोषणादिभिः विचित्रान्नत्रस्थायंराज्यंनान्यत्रशोभते ९३
शाकैर्मूलाकैरत्रयत्फलंसमवाप्यते तत्पदंनाप्यतेन्यत्रयोगयुक्तैः स्वयोगिभिः ९४ शुक्लपक्षेयथाचं ३८
द्रः कलयाकलयैधते करवीरेत्रवसतीधर्मराशिः पदेपदे ॥ ९५ ॥ ५ ॥ इतिश्रीपद्मपुराणेकरवी

36

रमाहात्म्येमदनागमनंनामनवमोध्यायः ॥९॥ ५॥ अगस्त्यउवाच इत्थंवरंतोबहुधाक्षेत्रमाहा
त्म्यमुत्तमं ॥ कामवाय्वादयः सर्वेस्वंस्वंकर्मसमाचरन् १ ववौवायुः सुखःस्पर्शः मंदःशीतसुगंध
वान् स्पर्शमात्रेणवैन्दृणांमनःसंविहरंभ्रमं २ वसंतागमनेनैवप्रफुल्लावनराजयः गंभीरंहिवनंचक्रुः
षट्पदाःपुष्पवासिनः ३ चक्रुःस्वनंपिकास्तत्रऋषिमानसहारिणं योगिनांमानसंचापिकुर्वंतःकामकौ
तुकं ४ गंधर्वागायनंचक्रुर्नानाश्रुतिसमन्वितं स्पर्द्धयोननृतुस्तत्रचलत्कुचमनोरमाः ५ विलितैःप
लितैश्चापिकुमस्मेरविवर्जितः हासभ्रूक्षेपणात्कापिहस्तन्यासस्वनर्तनैः ६ हरंत्योमानसंसर्वाःसर्वेषां
पश्यतांहृदं कराग्रप्रहितैर्बाणैर्विभ्रंत्यः सर्वमर्मसु ७ विमोहयंत्यस्तच्छात्रानन्यानपिमुनीश्वरान् म
दनोप्यथबाणांस्त्वंदूरेक्षिताविशंकितः ९ महतस्तपसोनूनंमदनेनदुरात्मना मत्वाचाधमहाश्चर्यं
मनंगःस्वव्यथाश्रमः १० द्वितीयंसंदधेबाणंतपस्याकिंतुमुनिः भग्नाश्वःसमभून्मत्वाबाणांनवापि

क०र०म विस्मितः ११ तृतीयसंहर्षणंबाणंयेनरुद्रोवशीकृतः चालयिष्येत्सनेनैवंमुनिंचेतिसुनिश्चितः १२ रुद्रस्यापिमनो
३७ मोहीबाणोयमितिसंदधे सर्वशस्त्रास्त्रभेत्तायंसकथंनिष्फलोभवेत् १३ इतिनिश्चित्यवैसकंभुर्बाणमास्मिन्न
चाक्षिपत् तेनबाणेननिर्भिन्नः न्नहृदयः सपराशरः १४ दृष्टीमुन्मील्यवैसकंभुपरितः समपश्यत तदास
दृष्टवान्सर्वमाश्रमेस्कमनोरमं १५ रंभामास्थायतत्रैवसर्वेवायुपुरोगमाः निलीनाः सर्वएवैतेमुनिशापसु
विह्वलाः १६ अपूर्वंस्वाश्रमंदृष्ट्वादृष्ट्वारंभांस्कमध्यमाः रतिंकर्तुंमनोयावत्तावत्क्षेत्रप्रभावतः १७ मतिर्जे
ज्ञेशुभेतस्यकामक्रोधविनाशिनी कोहंकेयंकुतः प्राप्तातपोनाशसमुद्यता १८ भोगाद्वाशापतोवापिस
र्वमेनाशयिष्यति इतिनिश्चित्यसमुनिस्तांप्रोवाचविभीषयन् १९ गच्छदुष्टेनचेत्त्वाभस्मशेषंकरोम्यहं
शापादपितपोनाशंमिच्छंतीतस्यवैमुने: २० शापंप्रतीक्षतीतस्यतूष्णींतस्थौशुचिस्मिता पतिव्रतांततः
प्राहस्वपत्नीसमुनिः प्रिये २१ पराशरउवाच किंपश्यसिवरारोहेनिर्जलांपुरतस्थितां तपोनाशकरींधृष्टां

37

शापंचापिसमस्थतीं २२ सर्वमेवमयाज्ञातंयदर्थेयंसमागता इंद्रेणप्रहितानूनंवसंतमदनादिभिः २३ सहिता
तपसोनाशंमेकर्तुंचसमुद्यमे येनकेनप्रकारेणतपोनाशकरीत्वियं २४ इंद्रसंदेशकुर्वाणाभोगाद्वाशापतोपिवा
कामादयोपिसर्वेवैनिलीनाः संतिपर्वते २५ इयमेकैवनाशार्थंतपसः संस्थितापुरः इमांशप्तुंसमर्थोपि
नशपेहंस्कमध्यमे २६ यथाभोगात्तपोनाशस्तथाशापादपिप्रिये तस्माच्छापादिनात्वत्रदंडनीयागतेर्युतां
२७ दुर्विनीतायथापश्चादन्यन्नेदंनकारयेत् अगस्त्यउवाच इत्थंपतिवचःश्रुत्वाशापंशतुसमुद्यता २८
तदाकामादयः सर्वेचकंपुः शापकातराः हाहतावयमद्यैवक्षयामोदेवयोगतः २९ पतिव्रतामहाशापाभ
विष्यामोवयंकिल भस्मीभूताः स्ततः सर्वेपलायध्वंयथेच्छया ३० अगस्त्यउवाच पलायनपरांदृष्ट्वासमु
निः कृपयार्दितः सहप्रोवाचसस्मितंकामवायुपुरोगमान् ३१ पराशरउवाच माभैर्माभैर्महाकामदेवा
योभोमधोचिरं मत्कृतंपूजनंसर्वेप्रगृह्णंतुयथाविधि ३२ आश्रमंमामकंश्रम्यंमाकुरुध्वंसमाश्रितं अनि

कुर॰ म॰ तीर्थस्यभग्नाशीघ्रंसाप्रतिनिवर्तते ३३ तस्यपुण्यंसमादायपापंदत्वास्वकंहिसः अतिथिंचागतंयेनस्वा
३८ गतेनाभिनंदयेत् ३४ तस्यपुण्यंनिरर्थंस्याद्यथास्कृशूलकृतोमरवः विप्रपादोदकान्नेवजातोयत्रसकर्द
मः ३५ मन्येतमाश्रमंनूनंश्मशानसदृशंपरं ब्रह्मघोषोनवैयत्रजायतेजातुमंगलः मन्येतमाश्रमंशून्यं
सद्भिर्गर्ह्यममंगलं स्वाहास्वधादिकंनैवकर्मयत्रप्रवर्तते ३६ तमाश्रमंत्यजेत्पापंश्वपचाश्रमवत्सदा
यत्रमूलफलैर्वापिभवेत्दतिथिपूजनं ३७ तमाश्रमंविजानीयात्सर्वदैवपरिश्रमं तस्मात्कृतंमयप्रीत्याव
तिथ्यंयथाविधि ३८ ततोगच्छंतुवैसर्वेस्वाश्रमंस्वगणैःसह अगस्त्यउवाच इत्याश्चर्यकरंवाक्यंश्रु
त्वाकामपुरोगमाः ३९ नमस्कृत्यमुनेस्कृभुः सपत्नीकंभयान्विताः मुनिनापूजिताःसर्वेत्कपचारैस्तपो
द्भवैः ४० विलज्जितास्कृतेस्कंभुमुनिवक्तुंसमुद्यताः कामादयउवाच चित्रंचरित्रंमुनिवर्यतावकंहर्षश्च
नीतः करणस्यसंमतः यन्मज्जयोदृष्टचरः कचित्प्रभोचित्रंमहत्त्वंनतुकोपनिर्जयः ४१ तपोनिविष्टं

नतुसर्वसंभृतंयन्मज्जयार्धधृतकोपजन्मनः स्वंरक्षितंस्वंचिरसंभृतंतपोगत्वावशंयत्खलुकामकोपयोः ४२
कामक्रोधौदुर्जयौवारिमुख्यौतपस्विनस्तपसोनाशदृशौ तयोःपूर्वोभोगजन्मासुसत्यःसोढुंशक्योनद्वितीयःकदा
चित् ४३ सत्यामहात्म्यात्किलनिर्जितापरीत्खीपतेस्तोयमहत्सुभाग्यं त्वंकरोषीतिचैश्रुत्वास्वलोकविजिगीषया ४४
तपश्चेंद्रेणप्रहितास्तंन्नाशार्थमिहागताः क्षेत्रमाहात्म्यतोवापिसतीमाहात्म्यतोपिच ४५ जेतुंत्वांनसमर्थाहिजा
तास्तस्मान्महातपः इंद्रलोकस्पृहांजातुत्वयिनालोचयामहे ४६ पतिव्रतायुतस्याथकोलोकस्त्याद्दुरासदः प
तिव्रतायस्यगेहेतस्यकिंतपसाफलं ४७ कल्पवृक्षाश्रितस्येहनदारिद्र्यंयथाभवेत् सतीसत्यवतीचेयंकल्या
णीचस्वधर्मिणी तवांगच्छाययातुल्यायत्कवापुण्यकारिणी पतिव्रतास्वरुंधत्यासाविश्यानुसूयया ४८ शां
डिल्ययाचसत्याचलक्ष्म्याचशतरूपया मेनयाचसुनीत्वाचसंज्ञयास्वाहयातथा ४९ यथैताकर्ण्यतेज्येष्ठा
तथात्येतिसुनिश्चितं भुक्तेभुक्तेत्वयिमुनेतिष्ठतीत्वयितिष्ठति ५० विनिद्रितेचनिद्रातिप्रथमंपरिबुध्यते नन

कर०म० तेनामग्टण्हीयात्तदायुष्यविवृद्धये ५१ पुरुषांतरनामापिनग्टण्हात्तिकदाचन अनलंकृतमात्मानंतदनोदर्शये
३९ त्कचित् ५२ कार्यार्थंप्रेषितेक्वापिसर्वमंडनवर्जिता आक्रुष्टापिनचाक्रोशेत्ताडितापिप्रसीदति ५३ इत्थंकुरुरुते
स्वामिन्भण्यतामितिवाक्चिच अदापितंत्वयाकिंचिन्नददात्यपिकिंचन ५४ नचिरंतिष्ठतेद्वारिनद्वारमुपसेवते आ
दूतागृहकर्माणित्यक्त्वागच्छतिसत्वरं ५५ नाथाद्रूताकिमर्थंतुप्रसादोमेविधीयतां पूजोपकरणंसर्वमनुक्त्वा
नयेत्स्वयं ५६ नियमोदकबर्हींषियत्रपुष्पाक्षतादिकं प्रतीक्षमाणावसरंयथाकालोचितंचयत् ५७ तदुप
स्थापयेत्सर्वमनुद्विग्नातिहृष्टवत् सेवतेभर्तुरुच्छिष्टमिष्टमन्नफलादिकं ५८ महाप्रसादइत्युक्त्वाप्रतिदत्तप्र
तीक्षति ॥ अविभज्यनचाश्नीयाद्देवपित्रतिथिष्वपि ५९ परिचारकवर्गेषुगोषुभिक्षुकेषुच कुर्यात्वयाम
नुज्ञातानोपवासव्रतादिकं ६० दूरतोवर्जयेद्दोषान्समयोत्सवदर्शनं गच्छेन्नतीर्थयात्रादिविवाहप्रेक्षणादि ३९
षु ६१ स्त्रीधर्मिणीत्रिरात्रंस्वमुखंनैवदर्शयेत् स्ववाक्यंश्रावयेन्नापियावत्स्नानेनशुध्यति ६२ सुस्नाता

31

भर्तुर्वदनमीक्षतेन्यस्यनकुचित् ॥ अथवामनसिध्यायन्मतिभानुंविलोकयेत् ६३ स्करवंचैवस्करवारीनंरसमा
पायद्दुच्छया आतुरेष्वपिकार्येषुपतिनोत्थापयेत्कचित् ६४ ॥ हरिद्राकुंकुमंचैवसिंदूरंकज्जलंतथा ॥ कर्पूरंचै
वतांबूलंमगुल्याभरणानिच ६५ केशसंस्कारकबरीकरकर्णविभूषणं भर्तुरायुष्यमिच्छंतिदूरयेन्नपतिव्रता
६६ नोलूखलेनमुसलेवर्धन्याचदृषत्स्वपि नयंत्रकेनदेहल्यांसतीचोपविशेत्कचित् ६७ विनाव्यवायसम
यंप्रागल्भ्यंनचरेत्कचित् यत्रयत्ररुचिर्भर्तुस्तत्रप्रेमवतीसदा ६८ हृष्टेहृष्टाविषण्णास्याद्विषण्णास्यप्रिये
सदा एकरूपाभवेत्पुण्यासंपत्सुचविपत्सुचं ६९ तीर्थस्नानार्थिनीःनारीपतिपादोदकंपिबेत् शंकरादपि
विष्णोर्वापतिरेकोधिकःस्त्रियः ७० व्रतोपवासनियमःपतिमुल्लंघ्यमाचरेत् ॥ आयुष्यंहरतेभर्तुःसाना
रीनरकंव्रजेत् ७१ उक्ताप्रत्युत्तरंदद्यान्नारीसक्रोधतत्परा नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं
७२ इदमेवव्रतंस्त्रीणामिदमेवतपःपरं इयमेकास्तेवपूजाभर्तुर्वाक्यंनलंघयेत् ७३ सरमाजायतेग्रामे

कू.र.म सास्त्रीजायतेवने स्त्रीणांहिनियम: श्चैक: परम: समुदाहृत: ७४ अभ्यर्च्यचरणौभर्तुर्भोक्तव्यंहितत:
४० परं याभर्तारंपरित्यज्यरहश्चरतिदुर्भगा ७५ उलूकीजायतेक्रूरावृक्षकोटरशायिनी ताडिताताडि
तुंयच्छेत्साव्याघ्रीवृषदंशका ।। ७६ कटाक्षयतियोन्यंवैकेकराक्षीतुसाभवेत् पतिमायांतमालोक्यत्व
रिताचजलासनै: ७७ तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभि: तथैवचाटुवचनैस्वेदसंमोदनै: परै: ।।
७८ याप्रियंप्रीणयेत्प्रीतात्रिलोकीप्रीणितातया मितंददातिहिपितामितंभ्रातामितंसुत: ७९ अमित
स्यहिदातारंभर्तारंकानपूजयेत् भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच ८० तस्मात्सर्वप्रयत्नेनपतिमे
वप्रपूजयेत् यापतिंहरिभावेनभजेच्छ्रीरिवतत्परा ८१ हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते जीवही
नोयथादेह: क्षणादशुचितांव्रजेत् ८२ भर्तृहीनायथायोषासुस्नाताप्यशुचि: सदा अमंगलेभ्य: सर्वे ४०
भ्योविधवात्यमंगला ८३ विधवादर्शनात्सिद्धि: क्वापिनजायते विहायमातरंचैकांसर्वा: कन्या

40

पावर्जिता: ८४ तदाशिषमपिप्राज्ञस्त्यजेदाशीविषोपमं कन्याविवाहसमयेवाचयेयुरितिद्विजा: ८५ भर्तु: स
हचरीभूयाजीवतोजीवत: सदा भर्तासदानुयातयोदेहवच्छायायथास्थितं ८६ चंद्रमाज्योत्स्नयायद्वद्विद्युत्वान्
विद्युतायथा अनुव्रजतिभर्तारंगृहात्पितृवनंयदा ८७ पदेपदेश्वमेधस्यफलंप्राप्नोत्यसंशयं व्यालग्राहीयथा
व्यालंबिलादुद्धरतेबिलात् ८८ एवमाक्षिप्यदूतेभ्य: पतिस्वर्गंनयेत्सती ।। यमदूता: पलायंतेसतीमालोक्यदू
रत: अपिदुष्कृतिकर्माणंसमुत्सृज्यचतत्पतिं ८९ यावत्तल्लोमसंख्यास्तित्तावत्कोट्ययुतानिच भर्त्रास्वर्गसुख
भुक्तेरममाणापतिव्रता ९० धन्यासाजननीलोकेधन्योसौजनक: पुन: धन्य: सचपति: श्रीमान्यस्यगेहेप
तिव्रता ९१ पितृवंश्यामातृवंश्यापतिवंश्यास्त्रय: स्त्रिया पतिव्रताया: पुण्येनस्वर्गसौख्यानिभुंजते ९२
आप: पतिव्रतास्पर्शमभिलषंतिसंघश: अद्यजातोविनाशोनोयातास्त्वद्वीतिपावना: ९३ भार्याधर्मफला
वाप्तेभार्यासंतानवृद्धये परलोकस्त्वयंलोकोजायतेभार्ययाद्वयं ९४ पर्यंकशायिनीनारीविधवापातयेत्पतिं

क.र.म तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया ९५ नैवांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् गंधद्रव्यस्यसंभोगोनै
४१ वकार्यंचपूषणं ९६ नकेशरखापनंचैवनमौलिक्यंनकंचुकं तांबूलग्रहणंनैवजग्धाचनिरयंव्रजेत् ९७
भोक्तव्यमेकवारंचताम्रपात्रादिषुद्विज कांस्यपात्रेचभुंजन्नेप्राप्नुयात्किल्बिषंमहत् ९८ तर्पणंप्रत्यहंकार्यं
भर्तुस्तिलकुशोदकैः विष्णोस्तुपूजनंकार्यं पतिबुध्यान्वचान्यथा ९९ पतिमेवसदाध्यायेद्विष्णुरूपधरंहरिं
यद्यदिष्टतमंलोकेयच्चपत्युः समीहितं १०० तत्तद्गुणवतेदेयंपतिप्रीणनकाम्यया वैशाखेकार्तिकेमाघे
ह्याषाढेनियमांश्चरेत् १ सत्कथाश्रवणंकार्यंमंतर्हष्टवतीसदा नहसेन्नवदेन्नोच्चैर्नकंचनसमस्पृशेत्
२ विष्णुरूपेणपतिनानधार्ष्ट्येनचसंस्पृशेत् स्नानंदानंतीर्थयात्राविष्णोर्नामग्रहंमुहुः स्थूलवर्तीनप्र
दीपांश्चनैवेद्यैर्विविधैस्तथा भर्तुः स्वरूपोभगवान्प्रीयतामिवचोच्चरेत् एवंविधैश्चविधवाविविधैर्नियमै ४१
व्रते ३ नाधिरोहेदनड्वाहंप्राणैः कंठगतैरपि मुक्ताफलकृतंहारंस्वर्णमणिमंडितं ४ नधारयेत्तथावस्त्रं

५।

चित्रितंसप्तरंगकैः शुक्लांबरधराशुद्धात्रिकालंस्नानकीतथा ५ पितृपतिकृतश्राद्धवचनंकारयेच्चवै तद्
चोल्लंघनंकृत्वारौरवंनिरयंव्रजेत् ६ व्रतचर्यापरानित्यंविधवापिपतिव्रता एवंधर्मसमायुक्ताशरीरंक्षीयते
व्रतैः ७ पतिलोकमवाप्नोतिनभवेत्कापिदुःखभाक् गंगासमाचविज्ञेयायानारीपतिदेवता ८ उमाशिव
समासाक्षात्तस्मात्तांपूजयेद्बुधः पतिव्रतांसमालोक्ययेनमंतिनरोत्तमाः ९ तेधन्यामनुजानित्यंपुत्रपौत्र
धनान्विताः गंगास्नानफलंत्वेतद्यज्जातंतवदर्शनं १० सत्यवतीमहाभद्रेभर्तृपादांबुजेक्षणे इदंपाति
व्रतंतेजोब्रह्मतेजोभवात्परं ११ तत्राप्येततपःस्तेजः किमसाध्यतमंतव भुक्तिमुक्तिस्तृणायत्रजा
यतेकरवीरके १२ तत्रसंवसतिस्तेवैमज्जयः किंनुदुर्लभः उत्तरेचयथाकाशीसर्वकल्मषनाशिनी
१३ तद्वद्दक्षिणजाकाशीकामक्रोधविनाशनी त्वदीयजीवितंधन्यंवासोयंकरवीरके १४ यत्राधिके
महाक्षेत्रेचक्राकारेमहामुने पश्यतोपिपदंश्रेष्ठंनीचाअपिस्वयांतिहि १५ इतिमत्वाद्विषंस्त्यत्रवासिनो

कर॰म॰ द्रुहिणाद्यः कुर्वंतोप्यंतरायान्नैवनसमर्थाभवंतिहि १६ देव्याः सुरक्षिताः संतिकरवीरकवासिनः य
४२ मोपिनप्रभुर्यत्रतत्रकिंमादृशाः खलाः १७ तपोनाशयितुंशक्तुंभविष्यंतितवानघ क्षम्यतांममदौरात्म्य
मज्ञानाद्यदनुष्ठितं १८ धर्मोयंमहतांश्रेष्ठ शरणागतरक्षणं गंतुमाज्ञांमुनेस्माकंदेहिवैपरिसेविनां १९
गत्वाकिंकथनीयंतेमहेंद्रंतत्प्रदिश्यतां ॥२०॥ ६॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येअगस्तिलोपामु
मुद्रासंवादेसतीमहात्म्यदशमोध्यायः ॥१०॥ ६२॥ अगस्तिउवाच॥ इतितेषांवचःश्रुत्वामुनिःपाराश
रःप्रिये प्रशस्यरूक्ष्यायावाचाचात्रवक्तुमुपचक्रमे १ पराशरउवाच सर्वेगच्छंतुकामाद्याः स्वालयंतुष्ट
मानसाः भवत्स्वभावएवायंयदन्यदुःखनाशनं २ आरब्धंनमयैतद्धितपोलोकजिगीषया सुखानस्वीय
तामिंद्रः स्वलोकेभोगलालसः ३ मयासंतप्यतेनैवतपोलोकहितायवै अवतारंकलौकृत्वाहरिर्ब्रह्मसमु ४२
द्भवः ४ वेदसंविभजेत्सर्वमित्येतन्ममचेप्सितं करवीरसुवासीनोनिर्यंनासाध्यंस्वर्गिकंसुखं ५ आसा

42

ध्यमपिसंसाध्यंतपसात्रमनीषिभिः भवेल्लोकोदशास्नानैः दशाश्वमेधिकेन्नभिः ६ संप्राप्यतेसुखेनैव
तदर्थंहितपोमेषा शताश्वमेधैर्नलभ्यतेयद्वास्पदंकालहतंहिसर्वैः कोल्हापुरस्थैः किमुदुर्लभंतद्धिसे
वत्वात्रनकिंलभेत ७ नीराजनंनित्यमहर्निशंयेपश्यंतिदेव्याः करवीरकेपुरे तेनैवतत्स्थानभजंतितेत्यंत्र
स्मादिलोकंजितविष्णुलोकाः ८ दशाश्वमेधेनतुमज्जनंन्नणांददाति किंस्वर्गफलंहिचान्यं तत्किंमहत्प्रार्थ्यत
मेजनानांकोल्हापुरेमुक्तिपुरेस्थितानां ९ अहोविमुक्तेकरवीरकेपुरेसंनिष्ठतांकिंभयमेत्रमंत्र क्रोधादिवी
जंनतुहंतिसर्वंनिरीक्षणंयत्रजगज्जनन्याः १० नवेदकिंसर्वमिदंमहेंद्रःस्नात्वागतायस्यमहेंद्रकुंडे द्विजा
तिहत्यामहतीविचित्रंतद्धिस्थलंकिंकरवीरकंपुरं ११ देव्याअमीबालिशएवसर्वेविघ्नानिकर्तुंकरवीरवा
सिनां इच्छंतितेकिंनविदुःपुराणंदुर्वासशापंसमशेषनाशनं १२ अगस्त्यउवाच इतिश्रुत्वावचस्तस्य
कामाद्याः सर्वशर्मदं परिक्रम्यमुनिंचैवसपत्नीकंदिवंययुः १३ परात्परंवरंतीर्थंक्षेत्रमाहात्म्यमुत्तमं

कर॰म॰ तपसिद्धिंमुनेश्चापिवर्णयंतोतिविस्मिताः १४ कामउवाच अहोविचित्रंजगतीतलेमयाविचिन्वतेदृनुदृष्टंस्तती
४३ र्थं जितंमयैकेनजगत्त्रयंपुरापराभवोदृष्टचरोनकुत्रचित् १५ जितामयान्यत्रभवप्रमुख्यामहद्भ्यतः कोपसृज
न्मतोपिवा एकेनबाणेनमहर्द्धिचित्रंबाणत्रयंमेत्रवृथागतंमहत् १६ देवेषुजातामहतीविलज्जातेषांमतोहं
बटुवैस्वरूपे कथंमयागम्यमपींद्रसंनिधौहास्यास्पदंमेजननंवृथागतं १७ मोबोधिपूर्वंकरवीरकंपुरंनय
त्रकश्चित्प्रभवेद्विकर्तुं शक्तंभवेच्चेद्दितिमद्विधानांकथंभवेदागमनंहिपूर्वं १८ अगस्त्यउवाच इतिब्रुवंतस्ते
सर्वेमहेंद्रमभिगम्यच ॥ प्रोचुः सर्वंसमाख्यातंयथावृत्तंतथापुरा श्रुत्वाक्षेत्रस्यमाहात्म्यंमुनेःपत्नीयुतस्यच
प्राहप्रसन्नवदनोदेवानांशृण्वतांहरिः १९ इंद्रउवाच अहोतिधन्याकरवीरवासिनोत्येषांतपोनाशकरोनकोपः
अस्माद्विधानामपिकोपजन्मनाहप्रभूताअपिभ्रूस्कराणां २० नचित्रमेतत्करवीरकेपुरेसंसारपारेखिलतीर्थसारे
उन्मूलनंकामस्यकोपयोर्यत्तत्रस्थितानांविधिवद्गतांहसां २१ तूर्णमयायत्रमहातिपापंसंस्थानदानादिभिरप्य ४३

43

पूर्वैः यदन्यतीर्थैर्बहुभिर्ननाशितंनचित्रमेतत्करवीरकेपुरे २२ अस्मत्कृतांविघ्नपरान्सदैवतरंतिसर्वेकरवी
वासिनः तन्मूर्ध्निवासायपदानितेवैगच्छंतिविष्णोः पदमंजसैव २३ वयंस्थितायद्यपिदक्षरूपाः कोल्हापुरेयो
पिनराः सदेवाः येस्नानदानादिरताः सदैव प्रेक्षंतिसारार्तिकमाननंशुभं २४ वयंविमूढाननुमत्सरेण
दक्षः स्वरूपाः करवीरवासिनां अपिस्थितास्नानस्कदानशोभितंलेशंभजामोनकृतस्यतेषां २५ धन्यःपरा
शरोयंवैतपोयेनस्करक्षितं शापदानसमर्थोपिनशशापतपोभयात् २६ मूर्खाणांतपसोनाशोह्याभ्यामेवहि
जायते कामाद्याकोपतोवापिनबुधानांकदापिसः २७ कामवश्यस्यजायंतेभोगासर्वेतपोभयात् क्रोधवश्य
स्यसर्वेहिनश्यंतेव्यर्थमेवहि २८ तस्मात्क्षेत्रवरंदिव्यंकरवीरंमहत्तरं पराभवोनवैयत्रवासिनांकामकोपयोः
२९ अगस्त्यउवाच इत्युक्त्वाक्षेत्रमाहात्म्यंमहेंद्रस्थिनसंशयः लोकांस्वप्रास्यमालस्यस्करवंतस्थौमहामुने
३० अगस्तीउवाच एवंगतेप्यकामोवैमुनिःपाराशरप्रिये पुनस्तप्तुंसमारेभेस्वतपःपूर्ववत्स्थिरः ३१

कर॰म॰ शीर्णपर्णोनिराहारः क्वचिन्मूलफलाशनः कृत्वापाराशरंतीर्थंसत्यसत्यारव्यमेवच ३२ पाराशरंपरंलिंगंसं
४४ स्थाप्यविधिपूर्वकं सत्यवतीश्वरीदेवींसंस्थाप्यचयथाविधि ३३ गिरेर्नामपिसंचक्रे पाराशराश्रमेत्यनु वरंददौच
तत्क्षेत्रेस्वनाम्नाप्यृषितेशुभे ३४ पाराशराभिधेकुंडेयेस्नांतिविधिपूर्वकं पाराशरेश्वरंलिंगंपश्यंतिशक्तिसंयु
तं ३५ तेकामकोपनिर्मुक्तायास्यंतिपरमांगतिं पुत्रपौत्रादिसकलंसकामंयांतुसर्वदा ३६ येचात्रवासिनःसर्वे
तेयांतिपरमांगतिं कामादिदेवयत्नेभ्योमयंमास्कविशेषतः ३७ परेषांदुर्गमंभूयात्स्थानमेतन्ममाज्ञया पर
मेवंविधंज्ञात्वातपः प्रारब्धमद्भुतं ३८ संनियम्येंद्रियग्रामंमनसाचिंतयन्हरिं प्राणान्नियम्यवैमूर्ध्निदधार
सयदामुनिः ३९ तदातत्तपसासर्वेपातालस्थाश्चपन्नगाः संतप्तामीलिताः सर्वेविचार्यचपुनःपुनः ४० अहो
किमेतदारब्धमकालेक्षयकारणं विचारयंतस्तेसर्वेतुतुस्तेमुनेस्तपः ४१ कुर्वतस्तेतपोनाशमुपायंसमचिं ४४
तयन् तपस्तपतियेनैवजलेनगिरिमस्तके ४२ मुनिःपराशरस्तद्वैजलंसर्वंनिरुध्यतं नासीत्पूर्वजलंतत्रब्रह्म

44

पोहितपोबलात् ४३ निर्मितंकुंडमेकंहिसोमतीर्थाभिधेगुरौ ततःपराशरेणापिकुंडयुग्मंतपोबलात् कृ
तंहिवर्ततेतत्रमुनिःस्नानादिकंचरेत् कुंडत्रयादृतेतत्रजलमन्यत्रविद्यते ४४ तज्जलंपरिशोष्यंहिसर्वैर
स्माभिरादृतैः शोषितेवैजलेतत्रमुनिःकुर्यात्कथंतपः ४५ एवंसंचिंत्यतेसर्वेपन्नगाः सर्वएवहि कुंडत्र
यगतंसर्वंजलंसंशोष्ययत्नतः ४६ निरुध्यनिर्झरद्वारंसंस्थितास्तेपृथक्पृथक् ततःस्नानंगतंकर्तुंस
दापाराशरोमुनिः ४७ नददर्शजलंतत्रकुंडत्रयगतंशुचिः तदाचकारमहतींचिंतांतत्रस्करस्थितः ४८
किमद्यकरणीयंवैकेननीतंजलंत्वितः नीतमिंद्रादिभिः किंवामदनाद्यैस्कोपितैः ४९ इत्थंचिंतयतस्त
स्यमनःसंयच्छतोमुने विज्ञातमभवत्सर्वंततश्चेदमुवाचह ५० मूढाहिपन्नगाःसर्वेकिंनजानंतिमत्तपः
येमज्जलंप्रणीयाथसाधुवत्संस्थिताःस्करं ५१ ब्राह्मणानांहिमाहात्म्यंकिन्नूनंविस्मिताःपरं यत्रकुंडेषुदे
सर्वेस्वयंसंपादिताःपुरा ५२ दंडनीयामयाह्येतेसर्वेदुःखप्रदायिषात् अगस्त्यउवाच ततोगारुडिके

डिकैर्मंत्रैर्दर्भान्संमंत्र्यवैमुनिः विससर्जचपातालेपन्नगाः संतियत्रवै तैः कुशैर्गरुडाकारैपन्नगाभृशपीडिताः
५४ हताः केचिन्मृताः केचित्केचिच्छिन्नमस्तकाः अन्यत्रालब्धशरणाः शरणंतंमुनिर्ययुः ५५ प्रणम्य
भुविकायेनकृतांजलिपुटाःस्तदा स्तुतिमारेभिरेकर्तुंमुनेः पाराशरस्यते पन्नगाऊचुः नमामहेद्विजवर्यं
महेंद्रंपराशरंतपसाराशिभूतं सत्यायुक्तंतापस्यात्सर्वदिक्कृतपोनिष्ठंजगतोवैहितायच ५६ येवैद्विजा
विष्णुमुखप्रसूताः मुखंहिदिव्यंपरमंस्मराणां तेकिंनकुर्वंतिखलंपवित्रंदृग्पातेनकृतार्द्रचिताः ५७ य
त्सेवयाबहवः संप्रतीर्णाः भवांबुराशिंचतथाघराशिं पुनंतितेकिंनजडंहिकोलंस्वपादपांसुप्रसवैः पवि
त्रैः ५८ यत्पादपांसुप्रसवंस्मसेव्यलक्ष्मीस्थिरातिष्ठतिविष्णुगेहे तेब्राह्मणास्तारयितुंनचालंकिंसर्वलोकश्रि
तपादपद्मः ५९ यैराहतोविष्णुरपिस्वयंपददधारतेषामुरसिप्रसिद्धं स्पर्शंतितेलोकमिमंविमूढामस्माद्वि
घंपापकरंद्विजेषु ६० कामक्रोधौसंजितावित्यपूर्वंश्रुतंसर्वैः पूर्वमासीत्त्वयेति कोपः कोयंसंस्थितः स्वश

रीरेसर्पान्हंतुंयस्तपोघ्नः परोरिः ६१ तद्रक्षरक्षशरणागतपालनंहियुक्तंमहत्सुपुरुषेषुभवद्विधेषु अज्ञान
तोहिविध्वस्तंजलमस्मदीयैस्तत्क्षमस्वप्रणतिंकरवामतेद्य ६२ अगस्त्यउवाच इतिसंप्रार्थितोनागैः कोपंसंत्य
ज्यचेमुनिः प्रियेप्रसन्नवदनः पन्नगानिदमब्रवीत् ६३ पराशरउवाच भोभोनागवराः सर्वेशृणुध्वंवचनंम
म भवदीयैर्जलंयैर्यैर्शोषितंतीर्थजंपरं ६४ यद्ब्रह्मणासमानीतंतपसासर्वतीर्थजः तेसर्वंजलपानेनप्राप्ता
श्चेतिपवित्रतां ६५ पूजादर्शनतस्तेवैपुनंतुजगतीतले अस्मिन्नेवगिरौसर्वेसंतिष्ठंतुसमागताः ६६ तेषां
नाम्नेवविख्यातमिदंक्षेत्रंभविष्यति पूजांचैवकरिष्यंतिसर्वलोकाः सदैवहि ६७ ततस्थिताश्चयेनागायेसर्वे
जलशायिनः प्रहृष्टवदनांभोजाः क्षेत्रसेवनतत्पराः ६८ यैर्नपीतंजलंपुण्यंतेसर्वेपन्नगाःपुनः जग्मुःप्र
स्विन्नमनसः पातालंस्वाश्रमंत्वधः ६९ किंवर्ण्यतीर्थमाहात्म्यंदुष्टबुध्यातिसेवितां तिरश्चामपिचेस्कृभुजाय
तेचेदृशीगतिः ७० नचित्रतममेतद्धिविजानीहिपतिव्रते वस्करात्किंमयाकर्तुंनशक्याब्राह्मणापिहि ७१

दुष्टबुध्यानुयत्प्रीतंमम्तंसर्वकामदं ततःसर्वेपितेनागाःप्रहृष्टमनसस्तदा ७२ पातालप्रभवांगंगांमान
यामासुरोजसा सर्वेषांतारणार्थायमुनेश्चापिवितुष्टये ७३ तथापर्वतमापूर्यसंस्थिताः सर्वएवहि तदाप्रभृ
तिवैसुभ्रुनिर्झरेवहतेसदा ७४ पातालासरिदुत्कूलस्तस्मिन्गिरिवरेशुभे एवंपर्वतमापूर्यपातालंगंगया
प्रिये ७५ निर्झरंचापितस्यावैसर्वपापप्रणाशनं दृष्ट्वाप्रीतमनाः प्राहसर्पान्पाराशरोमुनिः ७६ पाराश
रउवाच भोपन्नगवराःसर्वेशृणुध्वंवचनंमम भवद्भिःपावितंयस्मात्क्षेत्रंवैमहदुत्तमं ७७ प्रथितंहिभ
वेत्तस्मात्कुर्वन्नाम्नैवसर्वदा पन्नगालयमित्येवंसर्वपापप्रणाशनं ७८ समानीतोत्रयैश्चापिनिर्झरःसर्वपुण्य
गः नागनिर्झरनाम्नेवप्रथितःसर्वदाभवेत् ७९ इदंनागेश्वरंलिंगंभवनाम्नेवविश्रुतं प्रथितंसर्वलोके
शुभवेदाचंद्रतारकं ८० भवंतःसर्वदेवात्रसंस्थिताःसुसमाहिताः स्नानदानरतानांचलिंगसंपूजनात्त
था ८१ कुलवृद्धिपुत्रपौत्रैः प्रकुर्वंतुप्रपूजिताः संवर्धतेयथामुष्यंकुलवृक्षनपायिनी ८२ तथाभवेत्पूज

कानांकुलवत्स्यनपायिनी अगस्त्यउवाच वरमेवंगृहीत्वाथसर्वेतेपन्नगाशुभे ८३ तथेत्युक्तास्थिताःसर्वे
सर्वकामप्रदायिणां येनरायातिनश्चैवयेचापिब्रह्मघातिनः ८४ नागनिर्झरसुस्नाताः कृतदानकृततर्पणाः ना
गेश्वरंचसंपूज्यमुच्यंतेतेहसोखिलात् ८५ कुष्टकंदारिकंचापिविलयंयांतिसर्वदा स्नानदानरतानांचनागे
शंश्रद्धयार्चतां ८६॥८६॥ ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येएकादशोध्यायः ॥११॥ अगस्त्यउवाच
पराशरोमुनिश्चाथतस्मिन्नागसुनिर्झरे विधायचाश्रमंदिव्यंतपस्तप्तुंसुसंस्थितः १ अभक्षः कतिचिन्मासा
न्कतिचिद्वायुभोजनः सन्नियम्येंद्रियग्रामंसमाधिस्थोभवन्मुनिः २ अथतेपन्नगाःसर्वेजातिशब्दंसुदारु
णं फूत्कारविषकल्लोलसंयुतंतेस्वभावतः ३ चक्रुस्तेनुदिनंकालेगोलिकादिस्वनैर्युतं तंकर्णनिष्ठुरंशब्द
माकर्ण्यभयविह्वला विषकल्लोलसंतप्ताददौशापंपतिव्रता निष्ठुरंनेत्रवैशब्दं कुर्वंतिभयकारिणं ४ गतवा
चोभवंत्वेतेममाकेस्वाश्रमेशुभे इतिशप्ताश्चतेनागाविषवाचःसुभृशार्दिताः ५ मन्यमानाश्चतंशापंहितंदु

क०म० ष्टकुलस्यैवै पृथक्जन्मचास्मदीयंचपरोपद्रवकारकं ६ येषांविषात्सतीत्वद्याजन्मनाकिंप्रयोजनं निर्वि
४७ षाह्यिथास्यामस्तथाकार्यंमहामुने ७ इतिसंचिंत्यतेसर्वेमुनिमानम्यदं॰उवत् विषनाशानदानंनोहितेष्
स्वन्मकवंतदा ८ पराशरमुनेस्वामिन्विषमस्मासयत्स्थितं तत्सर्वंनाशयेयेनतन्नोक्षामंहिशोधिनः ९ घा
अगस्त्यउवाच इतितत्प्रश्नसंहृष्टः पराशरमुनिस्तदा तद्वाक्यमभिनंद्याथप्रवक्तुमुपचक्रमे १० पराशर
उवाच अहोचित्रतमंलोकेक्षेत्रमाहात्म्यमुत्तमं यत्रसंस्नानमात्रेणदुष्टबुद्धिः प्रणश्यति ११ अहोनेतादृशं
तीर्थंक्वापिदृष्टंजगत्त्रये सर्पाणामपिवैयत्रजातासद्बुद्धिरीदृशी १२ इदंनचित्रमेतद्धीकरवीरपुरेवरे सर्वक्ले
शहरेनित्यंकामक्रोधापहारिणी १३ इत्याश्चर्यमहन्मत्वानागान्स्चेत्पराशरः करवीरंतीर्थयात्रांवैसंस्मृ
त्याथमुनीश्वरः १४ भोभोनागवराःसर्वेश्शृणुध्वंवचनंमम स्वभावजंविषंचैतन्नकथंचिद्धिहन्यते १५ ४७
तथापिवक्ष्येभवतांनिदानंमहदद्भुतं करवीरतीर्थयात्राचेद्विधिवत्सफलाभवेत् १६ विषबाधात्यतःस

47

वैभवदीयंगमिष्यति यत्रःस्वाभाविकःकोपोजमदग्नेर्महामुनेः क्षेत्रवासजपस्नानैः सकृच्छिन्नःकरवीरके य
त्रचंद्रादित्योदेवास्नानदानसुतर्पणैः १८ ब्रह्महत्यादिपापेभ्योनिर्मुक्ताविधिवत्कृतैः तस्मात्सर्वप्रयत्नेनकरवीर
तीर्थगानराः १९ सर्वदोषैर्विमुच्यंतेसत्यंसत्यंवदाम्यहं अगस्त्यउवाच एवंतद्वाक्यमाकर्ण्यसर्वेतेपन्नगाःप्रि
ये २० पप्रच्छुस्तेविधिंसर्वंतंमुनिंहिपराशरं नागाऊचुः ब्रूहिदेवविधिंसर्वंयथावद्विस्मृतंमुने २१ यस्यश्र
वणमात्रेणपवित्रोजायतेनरः नफलेद्विधिहीनंहिकर्मकिंचिदनुष्ठितं २२ संगमेनफलेद्देधंविधिपूर्वंतुय
त्कृतं अगस्त्यउवाच इत्थंनागैःसुसंपृष्टोमुनिःपाराशरस्तदा २३ विधिंसंस्मृत्यसर्वंहिप्रवक्तुमुपचक्र
मे पराशरउवाच अनुपोष्यत्रिरात्राणितीर्थानिअधिगम्यच २४ अदत्त्वाकांचनंगाश्चदरिद्रोनामजायते
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः २५ नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् यस्यहस्तौच
पादौचमनश्चापिसुसंयुतं २६ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते प्रतिग्रहादुपावृत्तः संतुष्टोयेनके

कृ·र·म· नाचित् अहंकारविमुक्तोयः सतीर्थफलमश्नुते अदांभिकोनिरारंभोलघ्वाहारोजितेंद्रियः विमुक्तः सर्वसंगेवः
४८ सतीर्थफलमश्नुते अकोपनोमलमितिः सत्यवादिदृढव्रतः आत्मोपमश्चभूतेषु सतीर्थफलमश्नुते तीर्थान्यनु
सरंधीरः श्रद्दधानोजितेंद्रियः २७ कृतपापोविशुध्येत किंपुनः शुद्धकर्मकृत् तिर्यग्योनिंनवैगच्छेत्कुकुलेनैव
जायते २८ नदुःखीस्यात्स्वर्गभाक्चमोक्षपायंचविंदति अश्रद्दधानः पापात्मानास्तिकोच्छिन्नसंशयः २९ हैतु
हेतुकश्चैवपंचैतेनतीर्थफलभागिनः तीर्थानिचयथोक्तेनविधिनाचचरंतिये ३० सर्वद्वंद्वसहाधीरास्तेनराःस्व
र्गगामिनः तीर्थयात्राचिकीर्षुःप्राग्विधायोपोषणंगृहे ३१ गणेशंचपितॄन्विप्रान्साधूंशक्त्याप्रपूज्यच कृ
तपारणकोहृष्टोगच्छेन्नियमधृक्पुनः ३२ शरीरंतीर्थदेवेभ्यः समर्प्यचयथाविधि शरीरंतावकंदेवजातंवा १४८
मृतमेववा ३३ विक्रीतस्यपरस्यार्थेहृदक्षेपानप्रमाणमेत् क्रीतेवैतीर्थदेवेभ्योदेहेस्मिन्ममतांत्यजेत् ३४ अने
नैवविधानेनतीर्थंकृत्वाविचक्षणः अगस्त्याभ्यर्चपितॄन्यथोक्तफलभाग्भवेत् नपरीक्ष्योद्विजस्तीर्थेस्वन्नार्थीह

48

ष्यएवच सक्तुभिः पिंडदानंचसर्पिषैः पायसेनच ३५ कर्तव्यमृषिभिर्दृष्टंपिणाकेनगुडेनवा श्राद्धंतत्रप्रकर्त
व्यमर्घ्यावाहनवर्जितं ३६ अकालेप्यथवाकालेतीर्थश्राद्धंतुतर्पणं अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् ३७
तीर्थंप्राप्यप्रसंगेनस्नानंतीर्थेसमाचरेत् स्नानजंफलमाप्नोतितीर्थयात्राभवंनतु ३८ नृणांपापकृतांतीर्थेपा
पस्यशमनंभवेत् यथोक्तफलदंतीर्थंभवेच्छुद्धात्मनांनृणां ३९ मातरंपितरंजायांभ्रातरंसुहृदंगुरुं समुद्दि
श्यनिमज्जेतसोष्टभागंलभेतवै ४० गंतुमुद्दिश्ययोगंगांपरार्थंस्वार्थमेववा योगच्छतिपरोमोहान्नापरैर्निज
भिः सह ४१ गंगास्नानार्थमुद्युक्तोमध्यमार्गेमृतोयदि गंगास्नानफलंसोपितदाप्नोतिनसंशयः ४२ षो
डशांशंनलभतेयः परार्थेचगच्छति कुशप्रतिकृतिंकृत्वातीर्थवारिणिमज्जयेत् ४३ मज्जयेच्चयमुद्दिश्यसो
ष्टभागंलभेतवै तीर्थोपवासःकर्तव्यः शिरसोवपनंतथा ४४ शिरोगतानिपापानियांतिवैवपनेकृते मुं
डनंचोपवासश्चसर्वतीर्थेष्वयंविधिः ४५ वर्जयित्वाकुरुक्षेत्रंविशालांविरजांगयां गयाक्षेत्रेतथान्यपिमातृ

क्षेत्रेतयापिच ४६ मुंडनंचोपवासंचनकुर्यात्करवीरके परमांमंगलांभूमिंकरवीरंहिमालके ४७ कामिकंस
र्वतीर्थानांधर्मकामार्थमोक्षदं अमंगलकरंकर्ममुंडनानशनंसदा ४८ वर्जितंयत्रदेव्यावैतन्मांगल्यंकिमुच्यते ती
र्थद्विद्विविधंप्रोक्तंमानसंभौममेवच ४९ तत्रतीर्थानिश्रृण्वंतुमानसानिसमाहिताः येषुसम्यंन्नरःस्नात्वाप्रया
तिपरमांगतिं ५० सत्यंतीर्थंक्षमातीर्थंतीर्थमिंद्रियनिग्रहः गुरुशुश्रूषणंतीर्थंतीर्थमग्नेरुपासनं ५१ अति
थिपूजनंतीर्थंतीर्थंकेशवपूजनं सर्वभूतदयातीर्थंतीर्थमार्जवमेवच ५२ दानंतीर्थंतपस्तीर्थंसंतोषस्तीर्थमे
वच ब्रह्मचर्यंपरंतीर्थंतीर्थंचप्रियवादिता ५३ ज्ञानतीर्थंधृतिस्तीर्थंमेमतीर्थमुदाहृतं तीर्थानामपियत्तीर्थं
विशुद्धिर्मनसःपरा ५४ जलाप्लुतवदेहस्यस्नानमप्यभिधीयते॥ सस्नातोयोदमस्नातः शुचिःशुद्धमनो
मलः ५५ योलुब्धःपिशुनःक्रूरोदांभिकोविषयात्मिकः सर्वतीर्थेष्वपिस्नातः पापोमलिनएवसः ५६ ४९
नशरीरमलत्यागान्नरोभवतिनिर्मलः मानसेतुमलेत्यक्तेभवत्यसंतनिर्मलः ५७ जायंतेचम्रियंतेचज

49.

लेष्वेवजलौकसः ॥ नगच्छंतिचतेस्वर्गेअविशुद्धमनोमलाः ५८ विषयेष्वतिसंयोगोमानसोमलउच्यते तेष्वेवहिवि
रागश्चनैर्मल्यंसमुदाहृतं ५९ चित्तमंतर्गतंदुष्टंतीर्थस्नानान्नशुध्यति शतशोपिजलैर्धौतंसुराभांडमिवाशुचिः ६०
दानमीज्यातपःशौचंतीर्थसेवाश्रुतंतथा सर्वाण्येतानितीर्थानियदिभावोननिर्मलः ६१ निगृहीतेंद्रियग्रामो
यत्रवैनिवसेन्नरः तत्रतस्यकुरुक्षेत्रंनैमिषंपुष्कराणिच ६२ ज्ञानधूतेज्ञानजलेरागद्वेषमलापहे यःस्नातोमा
नसेतीर्थेसयातिपरमांगतिं ६३ मानसानिचतीर्थानिसर्वाणिकथितायवै भौमानामपितीर्थानांपुण्यत्वेकारणंप्रि
ये ६४ यथाशरीरस्योद्देशाः केचित्पुण्यतमामताः प्रभावादद्भुताभूमेः सलिलस्यचतेजसः ६५ परिग्रहान्
मुनीनांचतीर्थानांपुण्यतास्मृता तस्माद्भौमेषुतीर्थेषुमानसेषुचनित्यशः ६६ उभयेषुचयःस्नातिसयातिपर
मांगतिं भौमानीहकृतार्थानिशतानंतानिसर्वतः ६७ तेषांनामानिसंख्यातुंनसमर्थोभवेद्विधिः तथापिकानिचि
द्वक्ष्येयथाज्ञानंमहांतिच ६८ येभ्यस्तीर्थवरेभ्योपिकरवीरंमहत्तरं श्रृण्वंतुतानिसर्वाणिमयोक्तानिविशेषतः ६९

कर॰म॰ भागीरथीनर्मदाचयमुनाचसरस्वती विशोकाचवितस्ताचकौशिकीगंडकीतथा ७० गोदावरीगोमतीचविशिष्टाश्च
५० वरान्निता चित्रकाकाश्यपीचैवशरयूसर्वपापहा ७१ मंदाकिनीस्कंदराचपंपापापप्रणाशनी वेत्रावतीवेदवती
शीघ्रगाशीघ्रगामिनी ७२ कुशावतीकुशोद्वतीफल्गुनीपापहारिणी शतद्रूरुक्मवेणीचबाकुदाश्चैवबाहुना ७३
देविदाकरतोयाचचंद्रभागाविपासिका प्रभासासामगाचैववरुणाअसिपुण्यदा ७४ हिमवद्विंध्ययोर्मध्येपुण्यश्रो
ताः प्रकीर्तिता गोदावभरीभीमरथीतुंगभद्राचवेणिका ७५ मलापहारीकावेरीवंजराचऋगामिनी। पौर्णमाचवि
शालाचप्रणिताब्रह्मनिर्मिता ७६ तापीपयोष्णीविंध्यस्यदक्षिणेचप्रकीर्तिता अर्जुनीपुष्करीचैवनैमिषंचमहाल
यं ७७ वटेश्वरंचमूर्तिंचगंगासागरमेवच नैमिषंचकुरुक्षेत्रंगंगाद्वारंहरीश्वरं ७८ पांडुरंगंविरूपाक्षंश्रीशै
लंसेतुबंधकं सरस्वतिसिंधुयोगोगंगाद्वारंमनोरमं ७९ विरजंत्र्यंबकंचापिसप्तगोदावरीतटं काशीकांचिनमा ५०
यारव्याअयोध्याद्वारवत्यपि ८० मथुरावंतिकाश्चैवंरससयुर्योत्रमुक्तिदाः श्रीशैलोमोक्षदः सर्वः केदारोपिततोधि

50

कः ८१ श्रीशैलाच्चापिकेदारान्प्रयागोमोक्षदः परः प्रयागादपितीर्थाग्र्यादविमुक्तंविशिष्यते ८२ यथाविमुक्ते
निर्वाणंनतथाक्वापिनिश्चयः तस्मादप्यविमुक्ताद्धिकरवीरंमहत्तरं ८३ याम्याविमुक्तकंक्षेत्रंयवाधिकमितीरितं
भोगंदत्वाथयत्सर्वानंतेनिर्वाणदंपरं॥ ८४॥ दुर्लभंसर्वदेवानांकरवीरंपुरंपुरंमहत् एतानिपुण्यतीर्थानिस्ना
नकालेषुयः पठेत् ८५ सर्वतीर्थेषुयस्नातोमनोवाक्कायकर्मभिः सर्वपापैर्विनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् ८६
तीर्थस्नानंविविधयहरंपापनाशंपवित्रंयेनित्यंरसं पठंतेह्यवनिलरवराः स्नानदानादिकाले ८७ येवाश्रृण्वंतिभक्त्या
सततमिहनराः पावनंसज्जनानांते सर्वेपदमव्ययंकमलयोर्यातिस्मविष्णोश्चिरं ८८ ७ ७ इतिश्रीपद्मपुरा
णेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेतीर्थविधिर्नामद्वादशोध्यायः १२ ७ ७ इत्थंतीर्थविधिंश्रुत्वानागा
स्तेवैसहस्त्रशः द्रष्टुंवासर्वतीर्थानिनिर्गताः पन्नगालयात् १ कृत्वामहाबिलंतेवैपन्नगाशनशंकिताः तेनैव
निर्गताः सर्वेकरवीरंपुरंप्रति २ स्नात्वाप्रयागकेतीर्थेकृत्वातीर्थविधिंपरं तत्रचान्यष्टतीर्थानिकृत्वापूर्वविधानतः

क०म० ॥३॥ तेनैवबिलमार्गेणप्राप्तास्तेकाशिकांशिवां मलापकर्षणंस्नानंकृत्वाचाथविधानतः ४ विश्वेशादीनिलिंगानि
५१ पूजयंतोयथाविधि॥ प्रदक्षिणास्वरूपेणनिर्गतामुक्तिमंडपं ५ सिद्धविश्वेश्वरंनत्वासिंहवाहनमेवच संस्पृश्यपंच
गंधेषुस्थितंगरुडंचखरे ६ गरुडंवाहनंदेव्याभीतभीताः प्रणम्यच अहंपूर्वमहंपूर्वंपीतास्तेपन्नगाशनात् ७
शीघ्रंतेविविशुःसर्वेगर्भागारंमनोरमं तत्रदृष्टामहालक्ष्मीपन्नगांकितमस्तकां ८ भुक्तिमुक्तिंचदातुंवैभक्तमार्गप्र
तीक्षिणी महासिंहासनगतांमुकुटादिविभूषितां ९ चतुर्भुजांमहादेवींगदाखेटकधारिणीं भूषयंतींभूषणानि
कुंडलादीन्यनेकधा १० दिव्यनूपुरभूषाढ्यांदिव्यांबरधरांपरां मुक्ताहारसमायुक्तांकटिसूत्रविराजितां ११ दिव्यां
गदविभूषाढ्यांकिंकिणीजालमंडितां सौवर्णैःकंकणैर्युक्तामंगुलीयविराजितां १२ दिव्यमाल्यांबरधरांदिव्यगं
गंधानुलेपनां उन्निद्रांभोजवदनांपद्मपत्रायतेक्षणां १३ स्तनीकृतमध्यांतांनितंबवरभूषितां सूर्यकोटिति
रस्कारिनखमंडलमंडितां १४ बर्हभारतिरस्कारीकबरीमंडिताननां पद्मगर्भसमुद्भूतरजोवक्षोररूपिणीं १५ ५२

81

प्रवालरत्नवैडूर्यनीलादिमणिभूषितां पक्वबिंबतिरस्कारिबिंबाधरमनोरमां १६ सुपक्वदाडिमीबीजाद्विजपंक्ति
विराजितां स्वनासाग्रेस्वनिहितांनासाभूषणभूषितां १७ नीराजितमुखीमुक्ताकात्यायन्योष्टकंपृथक् चतुः
षष्टियोगिनीभिश्चामरव्यजनैः सदा १८ सेव्यमानपदांभोजांनीराजनविधौसदा सगणैः कालवेतालप्रमु
खैर्द्वारसेवितां १९ सावधानजयंशब्दैसेवितः किंकरैः पृथक् मूर्तिमद्भिश्चतुर्वेदैः प्रस्तूतांजलिभिःपु
रा २० जयोदयस्वनैर्देवैर्ब्रह्मादिभिरभिष्टुतां रंकभैरववीराद्यैरन्यैश्चदंडपाणिभिः २० सावधानस्वनैस्सर्वैः
सेवितांकिंकरैः पृथक् मूर्तिमद्भिश्चतुर्वेदैःप्रस्तूतांजलिभिः पुरा २१ सेवितांवेदघोषाद्यैः सभादिभिरहर्निशं
यस्यमुखंमकरकुंडलंचारुकर्णभाजत्कपोलसुभगंसरलाग्रनासं २२ निपीतत्वेनतत्पुरंध्रीभिःपिबंत्योनार्यो
नराश्चमुदिताः कुपितानिमेषे विलोकयंतोजननीजनस्त्वांदेवाइवारंनिमिषैर्विहीनाः २३ तद्दर्शनाभावमस
ह्यमानाः सौंदर्यमस्याः किमुवर्ण्यतेजनैः धाताभग्नः प्रतिकृतिकरणेसर्वदावीक्ष्यमूर्तिंयस्याः प्राह्नस्त्वाग्रयस्य
हिसदाविश्वकर्माद्युपतः २४ एवंविधांमहादेवींसर्वलक्षणसंयुतां दृष्ट्वानागाः प्रहृष्टास्तेनेमुर्दंडवद्भुवि २५

कर॰ म॰
५२

जयंतस्तेमहास्तोत्रं सर्वसिद्धिप्रदंन्नृणां यस्यस्मरणमात्रेणासर्वसिद्धिर्भवेत्सदा २६ नागाउचुः सर्वसिद्धिप्रदेदेविभु
क्तिमुक्तिप्रदेशिवे सिद्धलक्ष्मीमहाकालीमहालक्ष्मीनमोनमोऽस्तुते २७ सर्वाभयप्रदेदेविसर्वदुष्टविनाशिनि सिद्ध
लक्ष्मीमहाकालीर्महालक्ष्मीनमोस्तुते २८ सर्वक्लेशहरेदेविमहाविष्णुस्वरूपिणी सिद्धलक्ष्मीर्महाकालिर्मोक्षल
क्ष्मीनमोस्तुते २९ अंतर्यामिस्वरूपेणंस्थितेसर्वत्रसर्वदा सिद्धलक्ष्मीर्महाकालिमोक्षलक्ष्मीर्नमोस्तुते ३० भवना
शकरेदेवीभवभेषजनाशनी सिद्धलक्ष्मीर्महाकालीमहालक्ष्मी॰ ३१ अविद्यापटलध्वंसीमहानंदोदयप्रिये सि
द्धलक्ष्मीर्महाकाली॰ ३२ संसारतारणोपायेकरवीरनिवासिनि सिद्धलक्ष्मीर्महाकालीर्महा॰ ३३ करवीरवा
सिनांनित्यंमात्स्वत्परिपालके सिद्धलक्ष्मीर्महाकालिर्महा ३४ तिरश्चेतयथावत्संवकादिभिस्तुरस्तुति दु
ध्वंस्वपायसेदत्संकरवीरनिवासिनं ३५ क्षेत्रदर्शनमात्रेणयापुनातिजगत्त्रयं नमस्तस्यैजगद्धात्र्यैमहालक्ष्म्यै
नमोनमः ३६ नीराजनविधेसम्यक्दर्शनेनपुनातिया नमस्तस्यैजगद्धात्र्यैमहाल॰ ३७ क्षेत्रभिक्षाप्रदानेनया ५२
यच्छतिमहत्फलं नमस्तस्यैजगद्धात्र्यैमे॰३८ महाकल्मषसंपापंदर्शनाद्याविनाशयेत् नमस्तस्यै॰ ३९ वैरस्व

भावजंयावैनिवारयतितत्क्षणात् नमस्तस्यै॰ ४० दुष्टानामपियावासंस्थोतमांगेदशान्तिच येषांदोषंनपश्यंति
तस्यैदेव्यैनमोनमः ४१ दोषस्वभावजंयावैदर्शनादेवनाशयेत् नमस्तस्यै॰ ४२ दुष्टोवैदुष्टभावंसंत्यजंतेयस्य
मागमात् नमस्तस्यैजगद्धात्र्यैमहालक्ष्म्यैनमोनमः ४२ इतिमंत्रैर्नमस्कृत्वामहालक्ष्मीविधानतः तेनागाः पूज
यामासुः श्रीसूक्तादिविधानतः ४३ गंधाक्षतसुपुष्पाद्यैधूपदीपैर्मनोरमैः कोमलैर्बिल्वपत्रैश्चशवस्त्रपरिधान
कैः ४४ सौगंधकैरनेकैश्चद्रव्यैरुत्पिविशेषतः उपहारैरने॰कैश्चलेह्यपेयसुचोष्यकैः ४५ कर्पूरपरचूर्ण
संयुक्तैस्तांबूलैश्चसुपूगकैः सौगंधिकैरनेकैश्चनीराजनमहोत्सवैः ४६ मंत्रपुष्पांजलीभिश्चसंपूज्यविधिपू
र्वकं अष्टाग्रशतदूर्वैश्चसर्वसिद्धिःप्रदोषधक् ४७ तेसर्वेपूजयामासुमहालक्ष्मीविधानतः येनीमभिस्तुताल
क्ष्मीः सर्वसिद्धिप्रदाभवेत् ४८ तानिनामानिवक्ष्येहंप्रियेतानिश्रृणुष्वहि अगस्त्यउवाच ॐकाररूपिणीलक्ष्मी
विलोदरयसंस्थिता ४९ बिम्बांगनंदिनीनंदानदाक्षीबिंदुरूपिणी हस्तिनीपद्मिनीचक्रीसुताम्रकोमलेक्षणी ५०

कर॰म॰ विष्णुपत्नीवितिख्याताख्यानंदाशक्तिरूपिणी चतुःषष्टिरूपीठस्थाकोटिचंद्रसमप्रभा ५१ आद्यंतरहिताशक्ति
५३ मोक्षिनीयंत्रयोगिनी ब्रह्मांडकोटिसंयुक्तावाराहीसिंहवाहिनी ५२ नादबिंदुकलाशक्तिर्योगिहृत्स्थानसंस्थिता शा
स्त्रास्थानाउमापआपआक्षीज्वालशोभिता ५३ ज्वालाज्वालनदीकांतामहादेव्याप्तिरूपप्रभा सूर्यकोटिप्रतीकाशा
चंद्रकोटिसुशीतला ५४ सर्वमूर्तिकरासूक्ष्माब्रह्मरूपव्यवस्थिता अकारोब्रह्मणोरूपंउकारोविष्णुरेवच ५५ मका
रोरुद्रमित्याहुरेताः प्रणवदेवताः ॐकारेसंस्थितंचापितथाशक्तित्रयंविदुः ५६ ॐ ॐकारोध्यायतेयेनसर्वपा
पैः प्रमुच्यते मासमेकंजपेत्स्तोत्रमलक्ष्मीनाशनंभवेत् ५७ नदरिद्रोभवेद्यस्तुद्वितीयेमासियःपठेत् तृतीये
मासिजयतःखेचरत्वंप्रजायते ५८ जयन्चतुर्थकेमासिसिद्धविद्याधरोभवेत् पंचमासंजपेत्स्तोत्रंसदेवत्वम
वाप्नुयात् ५९ षण्मासंतुजपेत्स्तोत्रंमष्टैश्वर्यंचजायते अगस्त्यउवाच अनेनस्तोत्रराजेनसर्वसिद्धिप्रदेनवै ६०
स्तुत्वादेवींततःसर्वेविज्ञप्तुंकिंचिदुच्यते पन्नगउचुः देवीधन्यावयंसर्वेतवदर्शनमात्रतः ६१ नयाचामोवयं
नान्यत्वत्क्षेत्रवसतिंविना तदातीर्थवरेचास्मिन्मनोभवतिनिर्मलं ६२ नतथासर्वतीर्थेषुलोकत्रयगतेष्वपि

53

त्वत्क्षेत्रदर्शनंनृणांसर्वक्लेशापहारकं ६३ सर्वदासर्वजंतूनांश्वमार्जारादिजन्मनां देवित्वदर्शनादेवसर्वक्लेशालयंगताः
६४ तथापिवर्ततेचैकःक्लेशोगरुडसंभवः तन्निवर्तयतेनैवभवामक्षेत्रवासिनः ६५ अगस्त्यउवाच इतितेषां
वचःश्रुत्वाकरुणापूरपूरिता लक्ष्मीःप्रसन्नवदनाप्राहतान्पन्नगान्प्रति ६६ महालक्ष्मीरुवाच सर्वेधन्यतपायू
यंनागावैनात्रसंशयः मत्क्षेत्रदर्शनंनित्यंजंतूनामपिपावनं ६७ सत्समागमतोलब्धंभवद्भिःकरवीरकं दय
लब्धंभवेन्नैवपापिनांसतामपि ६८ अहोसत्संगमाहात्म्यंकेनवाकर्ण्यतेपरं बुद्धिर्विबुध्यतेयेनपशूनामपियत्स्म
णात् ६९ किंकिंददातिसत्संगःसर्वदासर्वदेहिनां धियोजाड्यंहरेत्सर्वमाद्यंयदृढबंधनं ७० सन्मानमपिवै
दद्यात्सर्वलोकेषुसर्वदा सत्यतांचापिसधनेवाचिसर्वार्थसंपदां ७१ पापंवैनाशयेत्सर्वंमनोवाकायकर्मजं
अंतर्मलंविहन्येतसर्वपापसमुद्भवं ७२ दिक्षुकीर्तिंवितनुयात्सर्वास्फुरन्मनोहरं गंगाचापंशशीतापंदैन्यंक
ल्पतरुस्तथा ७३ पापंतापंचदैन्यंचहंत्येकःसाधुसंगमः तस्मात्सत्संगमात्नागाःपूताःसर्वकुलैःसह ७४ दृष्ट

यत्करवीराख्यंक्षेत्रंसर्वत्रशर्मदं मत्क्षेत्रेभवतांमाभूत्स्मगरुडाद्भयंमहत् ७५ एवंकुर्वंतुकर्माणितीर्थानिचय
थाविधि वसतिर्यत्रवैभूयात्भवतांतत्रतत्रच ७६ भवन्नामांकितान्येवसन्तुतीर्थान्यनेकशः स्नानदानरतानां
वैपावनान्यखिलकिल्बिषात् यत्रयत्रशुचिर्भूत्वातत्रतिष्ठंतुपन्नगाः पृथग्वासयशोवापिक्षेत्रेऽस्मिन्करवीरके ७८
तीर्थयात्रार्थमटवांविषयंयत्रपतिष्यति भवतांतद्भवेत्स्थानमिहामुत्रफलप्रदं ७९ वसतांतत्रसर्वेषांनाभयंगरु
डाद्भवेत् स्मरणंमामकंचैवबध्नंतुमणिवत्सदा ८० हृदयेयेनभीतोवैगरुडोदूरतोव्रजेत् अगस्त्यउवाच इति
लब्धवराः सर्वेपन्नगाः संप्रणम्यतां ८१ तेसुपर्णभयात्सर्वेप्रययुर्मुक्तिमंडपं उपविश्यक्षणंतत्रकथांश्रुत्वापु
राणजां ८२ गायनानिविचित्राणिनृत्यानिविविधानिच श्रुत्वादृष्ट्वाचतेसर्वेतापत्रयमथात्यजन् ८३ नीराजन
विधिंदृष्ट्वामहदानंददायिनं चक्रुःप्रदक्षिणांतत्रनीराजनसमन्विताः ८४ करतालसमायुक्ताजयोदयसुघो
षिणः जयलक्ष्मीर्महाहारे विजयशत्रुविनाशिनी ८५ जयानंदकरेशक्तिर्जयश्रीविष्णुरूपिणी जयाद्ययोगिनी

देविजयकात्यायनीशिवे ८६ जयविश्वार्तिनाशार्थंधृतरूपेजयाखिले उदयोस्तुमहादेवीचोदयोस्तुमहाशिवे
८७ उदयोस्तुमहाकेशिचोदयोस्तुमहाशिवे उदयोस्तुमहाचंडिचोदयोस्तुएकमंडने उदयोस्तुत्रिलोकेशिचोद
योस्तुभयार्तिहे ८८ उदयोस्तुविशालाक्षीचोदयोस्तुरूपायते एवंसंस्तुवतोदेवींनागस्यैकस्यनैविषं ८९ त
तेवपतिर्संदृष्ट्वातत्रैवसमवस्थितः देवालयेमहालक्ष्मीदेवीध्यायन्नहर्निशं ९० दृश्यतेसहिनागेंद्रः कचि
त्पुण्यवतांमहान् महदैश्वर्यदोनृणांदर्शनादेवतत्क्षणात् ९१ नदारिद्र्यंभवेत्तेषांयदृष्टः सहिनागराट् स्तु
वंतः पन्नगाश्चान्येकृत्वाचैवप्रदक्षिणां ९२ नीराजनसमायुक्ताविविशुर्मुक्तिमंडपं प्रफुल्लवदनांभोजामहदा
नंदनिर्भराः ९३ भ स्वभाग्यमभिनंदंतः प्रोचुःस्तेथपरस्परं नागाउचुः अहोवयंधन्यतमायदत्रब्रह्मादिदेवैःस
हिताभजामः ९४ देवींमहाविष्णुमयींविचित्रांसमंहितस्माः किलराजरंकः अहोनुपूर्वंकिमकारिपुण्यमस्मत्कु
लेदुर्लभमेतदद्य ९५ देव्याभजामोनतुपादयुग्मंचवंद्यंद्रुरुद्रप्रमुखैः सुसेव्यं अहोतिधन्यावयमद्यपन्नगायद्द

क०म० शजोयंप्रविभातिमस्तके ९६ देव्याअधुवींकिमकार्यनेनयद्वैरिणः संतिकरोनिमीत्य अहोजनोबालिशएव
५५ सर्वेयामाथपक्षैककरीस्वमातरं ९७ उपेक्षतेसर्पयुतोत्तमांगां ब्रह्मादिमृग्यांघ्रियुगांसदेव अगस्तीउवाच स्व
भाग्यमभिनंचेत्थंक्षेत्राद्वेपूर्वतःप्रिये ९८ स्थिताःक्रोशांतरेणैवत्रिपक्षंविधिवत्छिराः ९९ तत्राभवंनाग
तीर्थंसर्वपापप्रणाशनं नागेशंलिंगसंयुक्तंसर्वाभीष्टप्रदायकं १०० छ छ छ इतिश्रीपद्मपुराणेक
वीरमाहात्म्येसर्पयात्राविधिर्नामत्रयोदशोध्यायः १३ अगस्त्यउवाच अपरेह्निस्तुचिर्कृत्वासर्वेतेपन्नगाःप्रि
ये कोटितीर्थंसमारभ्यप्रतितीर्थेषुविस्तरात् १ स्नानंजपतपश्राद्धंपित्रर्चनविधानतः दक्षिणंचोत्तरंचापिमा
नसंप्रसमाप्यच २ चतुर्भिर्दिवसैश्चैवतत् गयाकृत्यंविधायच कृतकृत्यमिवात्मानंमन्यमानाःपरस्परं ३ अंत
र्गेहाभिधांयात्रांयथाविधिविधायच महाद्वाराणितेचक्रुःरामेशःप्रभृतिन्यथा ४ अलशायीचतुष्कंचदृष्ट्वाचैव ५५
विधानतः अवांतराणिचत्वारिद्वाराण्यत्रविलोक्यच ५ नीराजनविधिंदेव्याःप्रापश्यंतत्रिकालिकं नागतीर्थस्थि

55

ताः सर्वेत्रिपक्षंतुयथाविधि ६ द्रष्टुंलिंगाष्टकंतेथप्रस्थिताः सर्वएवहि तावदेवास्यपतितंपन्नगस्यमहद्विषं ७
पीततीर्थोदकैर्युक्तंविषकुंडंततोभवेत् दर्शनस्पर्शनाद्देवसर्वपापहरंनृणां ८ सनागःसंस्थितस्तत्रक्षेत्रमाहात्म्यसा
रवित् ध्यात्वाचमणिवद्देव्याः स्मरणंहृदयेसदा ९ रूपर्णगलशंकस्तुविद्यतेद्यापिरूकन्नते स्नानदानरतैस्तत्रकर
करवीरनिवासिभिः १० निरीक्ष्यतेक्वचिद्देविमहापातकनाशनः चक्रेश्वरंमहाद्वारंद्रष्टुंतेथमहागताः ११ तदा
प्येकस्यपतितंविषंसर्पस्यगच्छतः कात्यायन्याःपुरोभागेवापामाशांतरेणवै १२ विषकुंडेस्थितः सर्पोदर्शना
त्पुनः जन्मदः जीवंस्यात्मतथाहिन्याप्लावितंतद्विषंमहत् १३ स्नानदानरतानांवैसर्वपापप्रणाशनं कहहेशंम
हालिंगंकुं द्रष्टुंतेनिर्गतायदा १४ तदाप्येकस्यपतितःविषमार्गेप्रयच्छतः महाकाल्याःसमीपेतुभागेवैपश्चिमे
प्रिये तत्रापिसंस्थितः सर्पोदर्शनज्ञानतःपरः तद्विषंनागकुंडाख्यजातंपापप्रणाशनं महाकाल्याम्ततंतत्र
त्रिक्षिप्तंहस्तसंस्थितं १५ ततोभवन्नागकुंडंमहत्तदमृतोपमं तत्रनागेश्वरंलिंगंनागमूर्तिकसंयुतं १६ स्ना

कर॰ म॰ त्वापश्यंतियेनित्यंतेनराः पुत्रपौत्रिणः नभस्यशुक्लपंचम्यांनागकुंडेसमाहिताः १६ स्नानदानरतायेवैतेन
५५ राः स्वर्गगामिनः मधुदुग्धादिनायेवैनागपूजांविधानतः १७ प्रकुर्वंतिसमस्तास्तेमुच्यंतेसर्वपातकैः मल्लि
कार्जुनकंलिंगंद्रष्टुंतेनिर्गतायदा १८ तदाप्येकस्यपतितंविषमार्गेत्रगच्छतः क्षेत्रस्योत्तरदिग्भागेयोजनांतर
संस्थितं १९ विषकुंडंतदाजातंसनागस्तत्रसंस्थितः तत्रनागेश्वरंलिंगंदर्शनात्सर्वसिद्धिदं २० गतंविषंवि
लोक्याथसनागोहृष्टमानसः फणाटोपंततः कृत्वाननर्तानंदनिर्भरः २१ तन्नित्यमद्भुतंवीक्ष्यमहादेवः सहोम
या आगत्यसंस्थितः स्तत्रपर्वताग्रेविलोकयन् २२ दृष्ट्वानंदंतदीयंवैदेवीध्यानपुरःसरं प्राहप्रसन्नवदनोनाग
तंजगदीश्वरः २३ भोभोनागमहाबुद्धेधन्यकस्यकुलेभवान् सेवनात्करवीरस्यमहात्म्याः प्रसादतः २४ तवोनं
नैवकिंचिच्चेकरवीरनिवासिनः तथाप्यहंवरंदास्येसंतुष्टस्तवदर्शनात् २५ भवेद्यदीप्सितंतेद्यतत्सर्वंवृणुम ५५
त्पुरः अगस्त्यउवाच इत्थंमहेश्वरेणोक्तेनागः प्राहहसन्निव २६ हरंप्रोवाचसमयेवरदंहृष्टमानसः नागउवा॰

वरंवृणेनैवभवप्रदत्तंसंपूर्णकामः करवीरवासात् २७ ऊनंभवेत्किंकरवीरवासिनांसर्वार्थदांपश्यजगद्विधात्रीं न
चस्पृहावैकरवीरवासिनामाब्रह्मलोकेप्यतिकालकालिते २८ अशेषतीर्थोत्तमदर्शनेनपूर्णात्मनाविष्णुपदस्वरूपं
तथापिवरमेकंहियाचेत्सर्वहितप्रदं वरदोसियदित्वंमेतर्हिदेवसदाशिव २९ त्वमत्रवास्थितोभूत्वापर्वताग्रेसहोमया
श्रीसिद्धभोभोतुष्टोसिमत्फणाटोपनर्तनात् ॥ तस्मात्फणाटोपसंज्ञंक्षेत्रंवैतावकंभवेत् उभयत्रभविष्यामित्वत्क्षेत्रे
पर्वतेपिच श्रीसिद्धेश्वररूपेणसर्वसिद्धिप्रदोप्यहं ३० पवित्रंचापिभूयाद्धेमत्क्षेत्रंसर्वशर्मदं क्षेत्रेचास्मिन्स्कसंति
छश्रीकपर्दकेश्वरनामतः ३१ उभयत्रभवेत्तीर्थंलिंगनामैवविश्रुतं स्नानदानरतानांवैसर्वपापप्रणाशनं ३२
अगस्त्यउवाच इत्थंतद्वचआकर्ण्यमहादेवः स्मयन्मे प्राहप्रसन्नवदनस्तंनागंनागभूषणः ३३ महादे
वउवाच भोभोपन्नगतुष्टोहंत्वत्फणाटोपदर्शनात् तस्मात्फणाटोपसंज्ञंक्षेत्रंवैतावकंभवेत् ३४ उभयत्रवसि
ष्यामित्वत्क्षेत्रेपर्वतापिच कल्लेश्वरसमीपंतुकल्लकुंडंभविष्यति ३५ सिद्धकुंडंभवेत्तत्रपर्वताग्रेतुसिद्धिदं होम

कूर॰म॰ होमदानजपस्नानैः पावनः सर्वदेहिनां ३६ त्वंचाप्यत्रसुखंतिष्ठलिंगपूजनतत्परः त्वदीयदर्शनाच्चापिसर्वैश्वर्यंभवे
५७ न्नृणां ३७ लिंगद्वयमनभ्यर्च्ययेकरिष्यंतिमानवाः महाद्वाराणिचत्वारितेषांपुण्यंहितावकं ३८ अगस्त्यउ॰ इतिलब्धव
रः सर्पः स्थितः स्तत्रसुमध्यमे अगात्यः पापदृष्टीनांसंस्थितोपिसमंततः ३९ अद्यापिजायतेयस्यदर्शनंपुण्यकर्मणः
सर्वैश्वर्यप्रदंनृणांसभाग्यानांक्वचित्क्वचित् ४० अन्येषामपिनागानांतीर्थयात्रांप्रकुर्वतां यत्रयत्रविषंस्कन्नंतेनतत्रैवसं
स्थिताः ४१ अद्यापितेप्रदृश्यंतेसुपुण्यानांक्वचित्क्वचित् ततः सर्वेपितेनागाविषमुक्तासमंततः ४२ लिंगाष्टकंप्रदृ
श्यंतोरामेशंप्रययुर्मुदा पूर्वंरामाभिधंतीर्थयात्रासीद्विश्वतोमुखं ४३ पश्चात्क्ष्मागतायत्रदर्शनात्सर्वपापहा॥ लक्ष्म
णेशंपुरानत्वावायुपुत्रंततः परं ४४ सीतानत्वाततः पश्चाद्रामेशंद्रष्टुमुद्यताः नत्वारामेश्वरंसर्वेसंपूज्यविधिपूर्व ५७
कं ४५ गंधाक्षतसुपुष्पाद्यैरुपचारैः पृथक्पृथक् सम्पूज्य स्तुत्वामहादेवंप्रस्थिताः संगमेश्वरं ४६ गच्छतांतत्र
सर्वेषांसर्पाणामेकदैवहि पथिस्कन्नंविषंतत्रतत्रसर्वैःसुसंस्थितौ ४७ तन्नागस्थानकंक्षेत्रंसर्वपापप्रणाशनंत्रिषुलो

केषुविख्यातंजातंवैनागवासतः ४८ यद्विषंपतितंतेषांविषकुंडमभून्महत् कुंडत्रयगतंवारिनपातव्यंकदाचन ४९
दर्शनस्पर्शनादेवसर्वपापहरंयतः तत्रनागेश्वरंलिंगंसर्वपापप्रणाशनं नतंस्तुतंपूजितंसुसर्वकामार्थसिद्धिदं संस्थि
ताः स्तत्रतेसर्वेसुस्मातीरेमनोरमे नागेश्वरंसुसंवृताः सर्वेनाबीजनाशनं विल्वताकुलवल्लीचतेषांतत्रानपायिनी
५१ एवंबहुतरंकालेगतेवैसर्वपन्नगाः विस्मृतातेयदादेवीपुत्रदारादिवत्परैः ५२ तदातार्क्ष्यहतास्तेवैसंत्रा
साः करवीरकं हताः केचिन्मृताः केचित्केचित्संत्रुटिताभ्रवां ५३ तावत्स्मृतासुयेदेवीतेसर्वेप्राणधारिणः सूक्ष्म
रूपधराः सर्वेफणाविषविवर्जिताः आप्यदेवीतदायुक्ताः प्रणेमुर्दंडवद्भुवि त्राहिलक्ष्मिजगन्मातस्त्राहिभक्तार्तिहा
रिणी ५५ अंबत्राहिसुसंध्याख्येत्राहिदुर्गेसुरेश्वरी त्राहिकात्यायनीदेवीत्राहिदुष्टविनाशनी ५६ भवाब्धितार
णोपायेत्राहिगौरिसुलोचने विश्वाभावेसुरत्रासेपाहिपापहरेपरे ५७ ज्ञानदीपप्रदेत्राहित्राहिसंसारबंधनात्
त्राहिदेविमहेशानित्रैलोक्यवरदप्रदे ५८ दशावास्येपरेत्राहित्राहिशत्रुनिकृंतने इतिनत्वाततोनागाः संपूज्य

कर·म· विधिवत्परं ५९ महालक्ष्मीप्रणम्याथविज्ञप्तिंतेथचक्रिरे पंनगाउवाच जगन्मातर्यथास्सर्वमाख्यातंतीर्थसेवनं
५८ ६० त्वयातथैवविधिवत्अजीर्णंसर्वपन्नगैः विषंचपतितंतत्रसंस्थितास्त्वदनुज्ञया ६१ गरुडेनाहताःसर्वेपु
नस्त्वांशरणंगताः अनन्याहिवयंसर्वेरक्षणीयास्त्वयैवहि ६२ अगस्त्यउवाच इतिदीनंवचस्तेषांश्रुत्वादेवीशुचिस्मि
ता प्राहप्रसादसुमुखीसमस्तान्पन्नगानिदं ६३ देव्युवाच यूयंकिंविस्मृताःसर्वेमामकंस्मरणंपरं अतोवैग
रुडेनाथभक्षिताःसर्वएवहि तथापीतःपरंजातुमत्तजंतुस्मृतिमम मत्क्षेत्राद्युत्तरेभागेज योजनत्रितयांतरे शि
लावैविद्यतेयत्रतत्रतिष्ठंतुपन्नगाः पूर्वदेवास्थिताःस्तत्रमहिषासुरशंकिताः तस्मात्सातिपवित्रावैसंसेव्यानि
तर्रोलदा ६५ भवन्नाम्नाभवेत्ख्यातासर्वकामप्रपूरणी पूजयिष्यंतुवःसर्वेलोकाःकामयुतास्तथा ६६ पूरयि
ष्यंतुवस्कामान्नुत्तुत्रदाराधनादिभिः नभस्यशुक्लपंचम्यांबहिरागम्यचाज्ञया ६७ मदीययाचस्करेवयंयावत्पापं ५८
चमीपवेत् शीलोपरिमदीयंवैपादयुग्मंप्रपद्यते ६८ अभयंसर्वदेवानांदातुंवैनिर्गतायदा महिषासुरविघाता

58

पतितोयत्रवैमुनिः ६९ मत्कंठगतमालायांवैजयंत्यामनोरमः तत्रवैजेश्वरंलिंगंस्थितंवैसर्वपावनं ७० सदाहं
संस्थितातत्रदेवानांहितकाम्यया भवेत्क्षेत्रं मत्संज्ञयाभवेत्क्षेत्रंश्रियालयमितीरितं ७१ श्रीकुंडेसंस्थितानित्यंश्रि
यादेवीतिविश्रुता मार्गंप्रतीक्षतीतत्रकात्यायन्याःसदैवहि ७२ यदाकात्यायनीदेवीनवकोटिसखीयुता आगतामद्द
र्शनार्थंचतदाहंसमुखीयता ७३ सुमंगलानिद्रव्याणियत्रदत्तानिवैयुता नवकोटिसखीनांचैतत्क्षेत्रमंगलाभिधं
७४ ततःसर्वासुसंमील्ययत्रकंचाःसुरासुराः तांशीलांप्रसमीक्ष्याथतस्याउपरिसंस्थिताः ७५ पदानितीर्थ
लग्नानिमदीयानिशिलोपरि तस्मात्सातिपवित्रावैशिलायत्रैचविद्यते ७६ तत्रस्थेयंभवद्भिर्वैगतशंकैःसप
र्पोलः मध्यान्ननिरतानांवैतत्रसंतिष्ठतांसदा ७७ जीवतांतत्रभुक्तिंवैमृतानांमुक्तिमेवच दास्यामिसकलान्
कामानैहिकामुष्मिकानपि ७८ श्रावण्यांशुक्लपंचम्यांप्रकटीभूयतिष्ठतां तावद्देवविश्राणांवैपूजनान्नभ
वेद्भयं ७९ पूजयिष्यंतियेनित्यंपंचम्यांश्रावणेसखु मधुदुग्धादिनातेषांविशेषोवैविस्तृतोभवेत् ८० धनधा

कर॰म न्ययुताश्चापिसर्वरोगविवर्जिताः भविष्यंतिनराः सर्वेपूजकाभक्तिपूर्वतः ८१ अगस्त्यउवाच इतिश्रुत्वावचो
५९ देव्याः सर्वेतेपन्नगाः शुभे अभयंनिर्गताः सर्वेदेवींनत्वाशिलांप्रति ८२ स्वभाग्यमभिनंदंतः स्तत्रवासर
ताः प्रिये तत्रागत्यस्थितास्तेवैशिलामध्येचिरांकिताः ८३ आतानागशिलाख्यावैसाशिकालात्रविद्यते दर्श
नस्पर्शनादेवसर्वपापप्रणाशिनी ८४ तत्रापिविद्यतेतीर्थंश्रीनागाख्यंपरंशुभं स्नानदानरतानांचैसर्वपापप्रणा
शनं ८५ कुष्टकंडूदिकंचापिस्नानमात्राद्विलीयते तत्रस्थित्वाथतेसर्पायथादेव्यानिरूपितं ८६ तथैवतत्कु
र्वतः संतिष्ठंतिततः प्रिये विषंस्वाभाविकंयत्रसर्पैर्मुक्तंसुमध्यमे ८७ तत्क्षेत्रंप्रवरंकिंतुवर्ण्यतेकरवीरके
नागाख्यानंपवित्रंवैयेपठंतिद्विजाः सदा येशृण्वंतिचसद्भक्त्यातेसर्वेस्वर्गगामिनः कामक्रोधविषंयस्माद्विषबा ५९
धानजायते ८९ नभस्यशुक्लपंचम्यांयेपठंतिविशेषतः नागान्संपूज्यविधिवत्मधुदुग्धादिनातथा ॥ कुष्टादि
रोगनिर्मुक्तायास्यंतिपरमांगतिं ॥ ९० ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेनागाख्या
57

नंसमाप्तमितिचतुर्दशोध्यायः ॥ १४ ॥ अगस्त्यउवाच एवंपराशरः स्कभुनत्तपाजमहत्तपः नानांतरायमुक्तो
पिहरिध्यानपरायणः १ नददर्शतपः सिद्धिंसदोयेथमुनीश्वराः ब्रतंनिरशनंगत्यब्रह्मचर्यंजपन्हरिं तपोमहत्त्व
चाराथपादांगुष्ठाश्रितावनिः सूर्यमंडलमध्यस्थंहरिंपद्मसमप्रभुं स्थाणुवत्सुस्थिरोभूत्वाहिमवाताग्निसंस्थिताः
हरिमेवहृदिध्यायन्शंखचक्रगदाधरं ४ प्रतप्तहेमवर्णाभंसुकपोलंसुमंडलं सुवासरंचसुनसंवनमालावि
राजितं ५ घनश्यामंसुवेषाढ्यंचारुसर्वांगमंडनं एवंविधंहरिंध्यायन्तपस्तेपेतिकर्शितं ६ आसन्नोपगत
प्राणः कृशोधमनिसंततः मुनिंतथाविधंदृष्ट्वामहालक्ष्मीदयान्विता ७ समागता वरंदातुंमुनेः पाराशरस्यहि
आरुह्यगरुडंदिव्यंसादेवीशीघ्रगामिनी ८ निमेषादेवसंप्राप्तासादेवीपन्नगालयं आगस्त्यसंस्थितातत्रनानादिव्य
सखीयुता पुरोभागेमुनेस्तस्यदर्शयंतीस्वरूपकं स्वदृष्ट्यामृतरूपिण्यानिरीक्ष्याथमुनेस्तनुं ९ संजीवतीवसु
दृढं लक्ष्मीप्रोवाचतंमुनिं महालक्ष्मीरुवाच धन्योसिकृतकृत्योसिवरंवरयसुव्रत तपसातवसंतुष्टावरान्दा

क.र.म. तुभ्यिहागता उत्तमेतादृशंदृष्टंतपोनैवमयाक्वचित् ११ निरंबुधारयेत्प्राणान्कोहिदिव्यसमाःशतं तपोबलंमयाद
६० ष्टमद्यैवतवतवसन्मुने १२ दंशाभक्षितदेहस्यप्राणाश्चास्थिषुशेरते गृहाणवरमत्तोयंयंयंमनसिवांछति १३ मां
दृष्ट्वानपुनर्जंतुःशरीरंधर्तुमर्हति अगस्त्यउवाच इत्युक्तःसंस्थितांदेवींपुरतःसमुनिप्रिये १४ सूर्यानेत्रेसमा
कृष्यप्रमृज्याथस्वपाणिना- ददर्शपुरतोदेवीमहालक्ष्मीपराशरः १५ प्रतप्तकनकाभासांदिव्यांबरविभूषितां र
त्नकुंडलकेयूरहारकंकणनूपुरैः १६ शोभितांरत्नसंयुक्तांपक्वबिंबाधरींशिवां चतुर्भुजांमहोरस्कांकृशमध्यां
नितंबिनीं १७ मातुलिंगंगदांखेटंबिभ्रतींपानपात्रकं नागलिंगंचयोनिंचबिभ्रतींमस्तकेशुभे १८ कृपापूर्णे
क्षणांदेवींनवकोटिसखीयुतां दृष्ट्वैवंविधांलक्ष्मींनत्वाचैवसमाहितः लक्ष्मींस्तुत्वातपःस्तंभंमनस्येवमचिं
तयन् नेयंध्यातासामयालक्ष्मीः किमर्थंसमुपागता २० हरिरूपधरंपुत्रंदातुंचेयंकथंक्षमा विनाविष्णुंच ६०
मत्कामंपूरयेत्कःस्याद्दुर्लभं २१ यद्यपीदंजनेनिंद्यमन्यस्तुनुत्वमत्रहि। कतिवारंहिसंभाषोपकार्यंपरस्त्रतां

60

२२ तिर्यग्योनिगतस्येहस्यात्किंमत्कामपूरणे। यदायास्यतिसहरिर्दातुंवैवरमुत्तमं २३ याचेवरंनमेवाहंनान्यंवैदा
तुमक्षमं अगस्त्यउवाच सइत्थंमंदधीःश्रियंपरस्त्रीयंपश्यन्स्वसंस्थितः २४ श्रीविष्णुरूपिणींदेवींनविवेदस्वपञ्ज
तिः यदापुनःस्तपःकर्तुंप्रवृत्तःसमुनीश्वरः २५ देवीपुनःप्रहस्याहतंमुनिंहिकृपान्विता सर्वांतर्यामिनीदेवी
ज्ञात्वातस्यहृदिस्थितं २६ तयोःक्लेशंतदीयंवैवृथैवद्रष्टुमक्षमा श्रीदेव्युवाच विष्णुरूपागताहंवैमुनेवृणुच
रंतमं २७ फलावधितपःकार्यमाधिकंतदृथाभवेत् अगस्त्यउ० एवमुक्तोमुनिर्वीक्ष्य लक्ष्मींदृष्ट्वापुरस्थितां २८
प्रियेप्रोवाचसमुनिः महादेवींविमोहितः पराशरउवाच किमोहयसिमांदेवीतपोनिष्ठंवृथैवहि २९ विष्णुं
विनाफलंनैवयाचेन्यमितिनिश्चितं विष्णुस्त्वमेवचेदेवीतद्रूपंत्वंप्रदर्शय ३० नोचकृच्छ्रतपोनाशंमाकुरुष्व
राननेअगस्त्यउवाच आकर्ण्येत्थंवचस्तस्यमहादेवीकृशमध्यमे ३१ प्रशस्यश्लक्ष्णयावाचाप्रवक्तुमुपचक्रमे
श्रीदेव्युवाच। पराशरमहाभागभक्तिंस्तेजगदीश्वरे ३२ निर्मलाविद्यतेयस्मात्वंधन्योसिहरिप्रिय मामेववि

ष्णुरूपांवैत्वजानीहिमहामते ३३ अस्तिचेत्संशयस्तर्हिपश्यविष्णुंमयिस्थितं इत्युक्त्वाविष्णुरूपंस्वंदर्शयामास
लीलया ३४ सूर्यकोटिप्रतीकाशंप्रफुल्लकमलाननं पद्मपत्रेक्षणंशांतं मकराकारकुंडलं ३५ चतुर्भुजंघनश्या
मंपीतकौशेयवाससं शंखचक्रगदाहस्तंवनमालाविराजितं ३७ ज्वलन्मणिशिलाव्याप्तमुकुटाटोपशोभितं त
दाश्चर्यतमंमत्वामुनिःपाराशरःप्रिये ३८ प्रणनामसपत्नीकः साष्टांगंदंडवन्मुनिः अद्योहमद्यकर्माहमद्यास्मा
त्स्यद्यसंभवः ३९ रक्षमांकृपयाविष्णोसर्वकामप्रदोभव अद्यमेसफलंजन्मजीवितंचसुजीवितं ४० यत्तवांघ्रि
युगांभोजेमन्मूर्धाभ्रमरायते समुत्थाप्यमहाविष्णुः शीर्ष्ण्याधात्करपल्लवं ४१ तेनपूर्णोमुनिर्भूत्वाकृतांजलिः
पुरः प्रिये विष्णुदर्शनआनंदपूर्णकंठाश्रुलोचनः ४२ गिरागद्गदयाविष्णुपूर्णमनोरथः पराशरउवाच
नमः परस्मैपुरुषायवेधसेजगत्प्रकाशायसमस्तबांधवे यन्मायेयेदंप्रतिभात्यलीकं द्वैतंजनस्याविदुषोव्यली
कया ४४ अजादिमर्त्येशपरंहितत्वंजानंतितेचैवस्वविबोधतोमहत् तेषान्नबंधोनचशोकमोहौनसंशयस्या

प्रतिबोधशालिनां ४५ त्वज्ञेहिविश्वंपरमेशनित्यंत्वदस्यंविचित्रंप्रतिभात्यलीकं त्वत्स्थंसमस्तंनपरंपरात्मन्
वेगुणोयथासर्वभवादिकंच ४६ कृत्वावतारानुपासिविश्वंभक्तेच्छयापूर्णमनोरथोपि ॥ स्वयंप्रवृत्तस्यकुतो
नुवाच्यंजगद्धितंकर्तुमयापिमूढः ४७ आनेनाहंत्वत्स्वरूपंविमूढः स्त्रीरूपवापुंस्वरूपंस्थितंवा यथोपदिष्टं
गुरुणातथैवध्यातंहिरूपंफलदेस्थितोभव ४८ अगस्त्यउवाच इत्थंस्तुतस्तदादेवीविष्णुर्मुनिनातेनसन्मते प्रा
हप्रसन्नहृदयस्तंमुनिंतपसार्चितः ४९ विष्णुरुवाच लक्ष्मीजानीहिमद्रूपांपराशरमहामते यस्याममचसं
भेदोविद्यतेनमनागपि ५० पुराशुंभनिशुंभाद्यैः कृतंवैसुमहत्तपः तेनतुष्टोवरंदातुंगतोहंवरदोमुने ५१
वरंवृणिध्वत्यभिहितेतैर्वृतोयंवरः परः पुरुषान्माभवेन्मृत्युरस्माकमितितैर्वृतः ५२ तथेत्युक्त्वागतश्चाहं
तैर्जितंचजगत्त्रयं देवैः संप्रार्थितश्चाहंतद्वधार्थंयदातदा ५३ ध्यात्वालक्ष्म्याः स्वरूपंवैतेसर्वेनिहताम
या स्थितस्तेनैवरूपेणकरवीरपुरेसदा ५४ भुक्तिमुक्तिंचदातुंवैजनानांजगतीतले॰ विष्णुक्षेत्रेषुसर्वेषु

कर० म० यथाद्यं करवीरकं ५५ नविद्यतेतथान्यंचैत्रिषुलोकेष्वपिक्वचित् लक्ष्म्याममचसंभेदोविद्यतेनमनागपि श
६२ माद्याद्यवताराहिमतानेवपृथग्यथा तथायमवतारामेलक्ष्मीरूपोनमत्पृथक् लक्ष्म्याममचसंभेदंयेकुर्वंतिनरा
धमाः तेषांतीर्थफलंनैववासजंचफलंनहि त्वंभक्तप्रवरोसीतिवरंदातुमिहागतः ५६ वरंवृणुष्वसर्वस्वंय
यदिष्टंतमंतव अगस्त्यउवाच पराशरोमुनिश्चाथप्रहृष्टवदनस्तदा ५७ प्रोवाचजगतान्नाथवरदंविष्णुमव्य
यं पराशरउवाच वरदोसिचमेविष्णोचणेत्वत्सदृशंकृतं ५८ रूपेनान्यंवरंविष्णोएतदेवविधीयतां विष्णु
त्वंचतथेत्युक्त्वासद्योलक्ष्मीर्बभूवसः ५९ भासयंतीस्वदीप्त्यास्वाविश्वंविश्वार्तिहारिणी दिव्यसूर्यप्रतीकाशांचंद्र
कोटिसुशीतलं ६० मनोहरतिसर्वेषांदर्शनात्सर्वसिद्धिदं ततोविष्णुस्वरूपांत्वांमहालक्ष्मीपराशरः ६१ स
छिन्नसंशयस्तोवेननामभुविदंउवच् वरंदेव्याष्टकंस्तोत्रंसर्वाभीष्टप्रदंनृणां ६२ सर्वदैन्यविनाशार्थंलक्ष्मी
रूपव्यवस्थितां श्रीवि० श्रवणात्पठनाद्यपिसर्वसंशयनाशनं पराशरउवाच अनाद्यनंतरूपांत्वांजननीस

र्वदेहिनां श्रीविष्णुरूपिणींवंदेमहालक्ष्मीपरेश्वरीं ६३ नामजात्याद्रिरूपेणस्थितांत्वांपरमेश्वरीं श्रीविष्णुरूपि
णींवंदेमहालक्ष्मीपरेश्वरीं ६४ व्यक्ताव्यक्तस्वरूपेणस्थितांत्वांकृत्स्नंव्याप्यव्यवस्थितां श्री० विष्णुरूपिणींवंदेम
हालक्ष्मीपरेश्वरी ६५ भक्तानंदप्रदानार्थंपूर्णकामकरींपरां श्रीविष्णुरूपिणींवंदेमहालक्ष्मीपरेश्वरी ६६ अं
तर्याम्यात्मनाविश्वमापूर्यहृदिसंस्थितां श्रीविष्णुरूपिणींवंदेमहालक्ष्मीपरेश्वरी ६७ सर्वदैन्यविनाशार्थंल
क्ष्मीरूपव्यवस्थितां श्रीविष्णु० भुक्तिमुक्तिंचदातुंवैसंस्थितांकरवीरके श्रीविष्णुरूपिणींवंदेमहालक्ष्मीपरेश्वरी
सर्वाभयप्रदांदेवीसर्वसंशयनाशिनीं श्रीविष्णुरू० अगस्त्यउवाच श्रुत्वास्तोत्रंमहालक्ष्मीः सर्वपापहरंशुभं मु
निंप्रोवाचसदयंसदयापरमेश्वरी ७० श्रीदेव्युवाच मुनेधन्योसिश्रेष्ठोसिकरवीरनिवासिनः मत्क्षे॰ त्रवसंति
नृणांमज्ञानामपिसर्वदा॥ ७१ अत्रत्यमाधिपत्यंचविष्णुनाहिममार्पितं अतोमयाकृतंयच्चतत्कृतंविष्णुनैवहि
भेदबुध्यानवैजातुतपःसिध्यतिसुव्रते ममविष्णोर्मनागपिभेदोनैवात्रविद्यते ७२ आरब्धंभेदबुध्यातुत्व

यायस्कष्टंतपः अतोविघ्नैः पराभूतः तथापिरक्षितोस्मिते दिव्यवर्षशतंचापिजातंतेपदेदुद्भिदः मासमात्रेणास
ह्याहंफलमस्वादरोमुने ७४ पूरयेत्सकलान्कामान्सद्भावार्पितकामिनां अधुनासफलंतेस्तु ज्ञानंतत्वस्यवेतपः
७५ पुत्रोभूत्वामहाप्राज्ञोविष्णुरेवमहामुने पूरयेत्सकलान्कामान्जगतींचापिपावयेत् ७६ अगस्त्यउवाच
एवंदत्वावरंदेवीतत्रैवांतरधीयत मुनिः संपूर्णकामोपिस्थितस्तत्रैवसन्मतिः ७७ तस्मात्क्षेत्रवरंदिव्यंकरवीरपु
सदा सेव्यमुक्तिवरंपुण्यजंतूनामपिपावनं ७८ हस्तामलकवत्सर्वंप्राप्यतेकरवीरके पश्यद्भिर्जननींदिव्यांभुक्तिमु
क्तिप्रदायिनीं ७९ येपठंतीदमाख्यानंश्रृण्वंतिश्रद्धयान्विताः तेसर्वपापनिर्मुक्तायास्यंतिपरमांगतिं ८० ५५
॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येपराशरवरप्रदानंनामपंचदशोध्यायः ॥ १५ ॥ अगस्त्यउवाच ॥ त
तः प्रादुरभूद्विष्णुः सत्यवत्यांपराशरात् मुनिनाप्रार्थितः शंभुर्व्यासरूपीजगद्गुरुः १ लोपामुद्रोवाच म
त्स्योदर्यांसमुत्पन्नोव्यासोराजात्पराशरात् श्रूयंतेबहुधालोकेकथयंविंध्यशासन २ त्वत्कथंहित्वयाप्रोक्तंसत्य

53

वत्यांपराशरात् व्यासपुत्रोभवच्चेतित्वदुक्तंहिघटेमुने ३ अतोभर्तरिदंसर्वंविविच्यकथयस्वमे यथायंमम
संदेहोविलीयेतमहाप्रभो ४ त्वंवेदपरमंगुह्यंयतोज्ञानैकचक्षुषा अतोब्रूहिदमाख्यानंकृपयायदिमन्यसे ५
नारदउवाच विलोक्यतस्यावदनंतदीयंघटोद्भवस्तुष्टमनामहामुने ५ उवाचयद्वैसकलाघनाशनंकथानकंतद्भु
भुमन्मुखांबुजात् ६ अगस्त्यउवाच श्रृणुदेविवरारोहेयत्पृष्टंतुत्वयामम तत्सर्वंप्रवदिष्येहंसर्वसंशयनाशनं
७ स्वाश्रमेनिवसन्नेवंकदाचित्सपराशरः सपत्नीकोययौस्नातुंभद्रायांपुण्यपर्वणि ८ तांपुण्यवाहिनींभद्रां
साक्षाच्छ्रीविष्णुरूपिणीं सस्नौस्नात्वाथनत्वाचमुनिस्तन्निर्मलेजले ९ ब्रह्मयज्ञादिकंकृत्वाकृतसंध्यादिसत्क्रियः
उपविष्टोमुनिः कर्तुंदेवपूजादिसत्तपः १० तावत्तत्रवचीवापिभद्रांभसिमनोरमे स्नातुंवैनिर्गतास्कन्मत्स्यवल
न्मत्स्यमंडिते ११ ददर्शासतदातत्रमत्स्यानांमिथुनान्यलं सप्रजासहितान्येवरममाणानियुग्मशः १२ स
कौतुकंप्रपश्यंतीविस्मिताभत्सेवनं तद्भाग्यमभिनंदंतीस्थिताकामवशाच्चिरं १३ गतेषुमत्स्ययुग्मेषुतत्तः

कर॰ म॰ शंकितमानसा कृतकालातिक्रमणाद्यद्योसामुनिसंनिधौ १४ तथापिसमुनिर्ज्ञात्वाज्ञानचक्षुः पराशरः
५४ कालातिक्रमणात्क्रुद्धःशापमेवंददौस्त्रियः १५ पराशरउवाच यतोमत्तोवनेत्यक्तादृष्ट्वात्वंकाममोहिता
मत्स्यरसाध्वताप्रीतिरलस्तद्योनिमाविश १६ अगस्त्यउवाच इतिशप्तासत्यवतीपतिनातेनसाप्रिये ध्यात्वा
चरणांगुष्ठंसद्द्विजैरतिपावनं १७ शापोक्तंसंप्रतिष्ठंतीचेपमानानिरुद्धवाक् यदुवाचपतिंदुःखात्तत्सर्वंसं
निशामय १८ सत्यवत्युवाच त्राहिमांकृपयाभर्तर्मंदत्वंसर्वचिन्मुने अपत्नीयतः कृतादस्मादेनसोमानसा
प्रिय १९ अनिवार्यंकिलौतद्धिमानसंप्रियपातकं घटतेसर्वजंतूनामतोमांत्रातुमर्हसि २० अल्पपातकव
त्यामेदंडोयंहिकृतोमहान् स्मर्तिंकृत्वात्वयाभर्त्तः शापरूपोतिकोपिना २१ इदानींकुरुचोच्छापमनाथायाःपतेम
म त्वदन्यंपुरुषंनाहंवेदवाक्कायकर्मभिः २२ अगस्त्यउ॰ समुनिः प्रार्थितःश्चैवंतदाभद्रेपराशरः प्राह ५४
यद्धिप्रतिष्ठात्मात्तत्सर्वंप्रवदामिते २३ पराशरउवाच यद्यप्यसिनमेत्युक्ताकिंचिदुक्तंवचोमृषा तथापिकुर्वेउच्छा

64

पंकिंचित्प्रार्थनयात्वया २४ स्थितायामत्स्यगर्भेपिमानुषंजन्मतेभवेत् आर्षेणरेतसानूनंतथ्यंमद्वचनंप्रिये २५
अगस्त्यउवाच इतितस्यवचःश्रुत्वाभद्रेसत्यवतीपुनः प्रार्थयंतीपुनः किंचित्प्रोवाचमुनिसत्तमं २६ सत्य
वत्युवाच यत्वयाप्रार्थितस्वामिन्विष्णुरूपधरः सुतं मय्येवसंभवत्वत्रः कृपयामुनिसत्तम २७ अगस्त्यउ॰
एवमभ्यर्थितःपत्न्यातत्तोभद्रेसवैमुनिः तथात्विपुत्ररत्नंददौतस्यामनोरमं २८ यत्रोत्तरंददौभद्रेपत्न्याःस
चपराशरः तत्रोत्तराभिधंक्षेत्रंमभवज्जनपावनं २९ पराशराश्रमाद्याम्येभद्रायाश्चोत्तरेतटे तत्रोत्तरेश्वरं
लिंगंविद्ध्यतेजनपावनं ३० तत्रोत्तराभिधेतीर्थेस्नात्वाचैवयथाविधिः यः पश्येदुत्तरेशंवैसर्वपापैःप्रमु
च्यते॰ ततः सत्यवतीभद्रेहित्वायोगाध्वनावपुः भरद्वाजमुनेर्वीर्यान्मत्स्ययोन्यामुपाविशत् ३२ समत्स्योज
लवेगेनवहमानोपिपीवरः ससर्गोविद्धतः कैश्चित्गंगायांम॰त्स्यलुब्धकैः ३३ तेमत्स्यतुंडयोद्धृत्वा
त्स्योरकास्त्णवद्द्विधा कुर्वतोददृशुर्गर्भे॰ कन्यामतिसुलक्षणां ३४ अथतांपालयस्तेथवकुंप्रेमतयासुप्रिये

क र॰ म॰ मत्स्योदरीतिवैतस्यानामकुर्वन्यथार्थकं ३५ तस्यादेहेयतश्चासीन्मत्स्यगंधोतिदुःसहा अतोनाम्नांतरंचासी
६५ न्मत्स्यगंधेतिहिप्रिये ३६ एवंतेपोषयंतस्तामासन्नाविकवत्सयः सापितेषांगृहेचासीत्किंचिद्यौवनशालि
नी ३७ पितृभिर्दीयमानीतांविविहार्थंपुनःपुनः नकोपिवरयामासस्कदुर्गंधवपुष्मती ३८ ततःसाना
विकैर्युक्तागंगायांकर्मणिस्वके कुर्वतीतदनुज्ञातंवरसतिस्मातिकर्शिता ३९ ततःपराशरोभद्रेज्ञात्वातन्दुःख
मात्मनः कृपयापरयायुक्तः स्यातरंसंस्मरन्मुहुः ४० सत्यःप्रतिज्ञः स्वंकर्तुंतथ्यमुत्तरमेवहि यत्रसासी
न्मुनिःस्तत्रगतःसपर्यटन्महीं ४१ उपविष्टामथोदृष्ट्वानाव्येकांतांमहामुनिः नयाशुपरपारंमेइतितांप्रव
दन्प्रिये ४२ तयेत्युक्तानियुक्तायांतयानाव्यंतरेस्थितः गंगायांमध्यदेशेतुरंतुंचक्रेमनोमुनिः ४३ आनीय
तपसाश्वभ्रंयीक्ष्यतामथलज्जितां तस्यांसंन्निदधेवीर्यंप्रसत्यचिरसंचितं ४४ अमोघाच्चततोवीर्यात्तस्यां ६५
प्रादुरभूत्प्रिये हरिर्लोकहितायैवव्यासरूपीजगद्गुरुः ४५ यत्रव्यासःसमुत्पन्नःस्तत्राखलखलेश्वरःस्त

65

स्थायांचमहानद्यांसर्वसिद्धिप्रदस्तकवे ४६ ततोवैनिर्गतोगंतुंमुनिंसानुरक्तविस्मिता मूर्ध्नातश्चरणौस्पृष्ट्वासदयंप्र
तुवाचह ४७ मत्स्योदर्युवाच कृवायास्यधुनास्वामिन्मामनाथांविसृज्यच त्वास्वंदन्मामकेहत्वाकुमारित्वविनाश
नात् दुर्गंधामकुमारीमामन्योनैवसमुद्वहेत् अतस्त्वमेवभर्त्तामेपरिपालयसर्वदा ४९ नोचेत्कुरुकुमारीमांस्त
गंधांपूर्ववन्मुने समुद्वहेयथाचान्यश्चकवर्तीतथाप्रभो ५० यद्यशक्तोसिमांकर्तुंस्तगंधांचकुमारिकां तर्हिभर्त्ता
त्वमेवाद्यभूत्वामांपरिपालय ५१ अगस्त्यउवाच यत्वयाकामितंस्त्रभ्रूभवेन्यस्मिन्यदाचिरं तत्स्वरंपरि
भुक्षित्वंपुरुषांतरसंभवं ५३+ इत्युक्तःसतयाभद्रेमुनिःपाराशरःप्रभुः उवाचसकलंवृत्तंतस्यास्तुष्टिकरं
प्रिये ५२ ~~म~~ पराशरउवाच भवयोजनगंधात्वंतपसामामकेनहि कुमारींचयथापूर्वंराजपत्नीस्तगंधि
नी ५४ एषसाक्षाद्धरिर्मत्तःप्रादुर्भूतोमलस्त्वसौ प्रार्थितस्तपसापूर्वंमयालोकहितायय: ५५ व्यासोयंभ
वितानाम्नानस्यवेशाननेकधा अनेनसर्वदुर्गाणित्वंतरिष्यसिसंशये ५६ अगस्त्यउवाच इत्युक्तस्तदनुज्ञात

स्तपोव्ययरुदुःखितः पुनश्चस्वाश्रमंप्राप्तस्तपालव्यापिसत्तमः ५७ व्यासोपिगंतुमुद्युक्तस्तपः कर्तुंस्ववि

स्मितः कथायास्यधुनामंगसद्यंप्राहसाप्रिये ५८ इत्थंमातृवचः श्रुत्वाव्यासोपिहर्षसंयुतः संतोषाज्ज
ननीवाक्यंमातरंप्रत्युवाचह ५९ व्यासउवाच संकरेतवसंप्राप्तेस्मरतामितितांवदन् व्यासोपिजननींनत्वा
करवीरंसमाययौ ६० कृत्वासल्लोकशिक्षार्थंविधितीर्थसमुद्भवं क्षेत्रवायव्यदिग्भागेक्रोशमात्रांतरेणहि ६१
पंचनद्याः परेपारेव्यवनाश्रमसन्निधौ गुप्ताभोगवतीयत्रतत्रतेपव्रहत्तपः ६२ ततः क्षेत्रसमुत्पन्नोतप
सः समहामतिः शाखाभिर्बहुधाभिन्नंवेदंकृत्वापृथक्पृथक् ६३ वेदगुह्योक्तशिष्येभ्यः शिक्षयामाससर्व
वित् पुराणान्यपिसर्वाणिसेतिहासाः सहस्रशः ६४ वेदार्थमपिचाशेषंशिष्येभ्यः समशिक्षयत् ततोमत्स्यो
दरीचापिस्कगंधानामविश्रुता ६५ कुमारित्वंपुनः प्राप्तातत्रासीन्मुनिवाक्यतः ततस्तद्गंधलुब्धोवैराजाशं
तनुसंज्ञकः ६६ तमुवाहवरारोहांसोमवंशाभिवर्धिनी सावैसत्यवतीभद्रेमुनिशापप्रभावतः ६७ म

त्स्योदरीतिविख्याताज्ञातेतिविद्धिनिश्चितं आख्यानंसर्वमेतंतेयत्पृष्टंहित्वयामम ६८ आख्यानंसत्यवत्या
स्तत् किंभूयः श्रोतुमिच्छसि नारदउवाच श्रुत्वेतिपतिनाप्रोक्तमाख्यानंसापुनर्मुने प्रहृष्टवदनांभोजापुनरे
वमुवाचह ६९ लोपामुद्राउवाच पराशराश्रमः प्रोक्तोयस्त्वयाममसत्पते तस्यैवश्रोतुमिच्छामिव्यासंचै
वतथोच्यतां ७० यानिकानिचतीर्थानिसंतिपुण्यानितानिहि तानिसर्वाण्यथाचख्याहि सर्वांगानिमहामुने ७१
श्रुत्वापिबहुधाब्रह्मंस्तदाश्रमकथानकं पिबतस्तन्मुखाभोजच्युतंक्षेत्रकथानकं ७२ नतृप्तिमभियागच्छं
मतोमेतन्मुखांबुजात् किंत्वप्यतेमुनिवराखिलतीर्थसारंयाम्याद्विमुक्तकरवीरकथांविष्टणवन् यन्नामधेय
मपिचोच्चरितंपुनीतेसंसारकूपपतितंनतुजंतुमात्रं ७३ नारदउवाच श्रुत्वेतिवचनंतस्याः सुस्नातंबहुशा
मर्दं च यदुवाचमुनिः प्रीतस्तन्मुनेश्चप्रसादरं ७४ अगस्त्यउवाच आसीत्सपर्वतः पूर्वमुच्चोद्वादशयो
जनं सार्धक्रोशमितस्तीर्थविस्तृतोपितदूर्ध्वतः ७५ यदाचोच्चमितिस्तत्रकुंभोब्रह्मांडसंभवः निम

ग्नः सततदाभ्रम्यांसार्धैकादशयोजनं ७५ गव्यूतिमात्रमेवेन्द्रोवर्ततेचापिचैवहि कृष्णांघ्रिरजसापूति
स्तीर्थंचंद्रसुतोगिरिः ७७ नारदः श्रुत्वेतिसापतेर्वाक्यंपरमानंदसंभृता पृच्छतिस्मपतिंकृष्णयशस्स
र्वंनिबोधमे ७८ लोपामुद्राउवाच कुतश्चोत्पतितस्तस्य कृष्णोलोकैकनायकः तत्सर्वंकथयस्वामिन्कृ
पयायदिमन्यसे ७९ श्रीकृष्णस्यकथांपुण्यांसर्वलोकमलापहां त्वन्मुखांबुजनिष्क्रांतांतस्यादापइवप्रपो ८०
नारदउवाच सतीवाक्यमितिश्रुत्वाततोमुनिवरोमुने उवाचपरयाप्रीत्यातद्वागमृतयंत्रितः अगस्त्यउवाच
सतीधन्योमहत्यंतमय-जातोस्म्यभीष्याराः यतःश्रीकृष्णकथनेत्वयासंप्रेरितोनघे ८२ वक्ताचपृथकः श्रोता
यत्कथामृतसेवनात् गतिमायातिपरामांमुनीनामपिदुर्लभां ८३ तावेवकर्णौननुदेविपूतौयौकृष्णनामामृत
सेवनेरतौ सैवप्रपूतानतुलोकवाणीयावैपिवेत्कृष्णकथामृतंमुहु ८४ प्रियेकृष्णानुचरितांकःसमर्थोनि
वेदितुं ॥ रजांसिविममेन्मत्याकथंचिन्नतुनकचित् ८५ तथापिकथयिष्येहंकरवीरकथानकं किंचित्श्रीकृ

ष्णचरितंयथामतितवप्रिये ८६ यदाविलग्नः सहिकृष्णपृष्ठमासन्नमृत्युर्यवनोविमोहात् निधीछयातस्यु
स्तोविदष्ट्वापलायमानंपरिभीतचह्ने ८७ यवनउवाच रेरेधुनागच्छसिदुष्टबुद्धे क्वापुरोमत्करतोविमो
च्य जीवन्नमुच्येतवपृष्ठदेशामितिब्रुवन्पृष्ठतउच्चकैर्ययो ८८ अगस्त्यउवाच तंवैकथंसविभ्याःपुरुषंवि
चिन्वंनोनिदंदब्दशतमप्स्वनिमज्जाकोपिधावत्ययंसतिसदापियतः प्रभीतोमृत्युमहेंद्रखगवह्निभिरन्वि
तोहि ८९ योधावतीहकेषांचितारणार्थंनृणांहरिः तमत्वाहिस्वतोभीतंयवनः पृष्ठतोययौ ९० अतोमा
यावित्रेयंहरेरमिततेजसः पश्यंतोपिनपश्यंतीक्रमंजगदधीशितुः ९१ एवंसधावमानोवैयवनःपृष्ठ
तोहरेः उल्लंघ्यचबहून्देशान्धावमानस्यवेगतः ९२ यदापथिपरिश्रांतोयवनः संस्थितः क्वचित्
तदाकृष्णोपिसंतस्थौदूरेचदृष्टिगोचरः ९३ महालयाभिधंक्षेत्रंयत्रास्तिकरवीरके ॥ पराशराश्रमात्पू
र्वेक्रोशयुग्मांतरेणहि ९४ तीर्थंमहालयंनामयत्रास्तिजनपावनं महालयेश्वरंनामलिंगंचापिमनो

कृ० म० रमं ९५ केशरंद्रिसमंभूताहैमीयत्रास्तिवैनदी जनानांसकलंतापंहरंतीवात्मभोतरं स्नात्वातिन्नीतलेहैम्याज
६८ लेकृष्णोमहामना: अतस्सस्तवतत्रजहौतापंस्वदेहजं ९७ यदासिद्धिसमंभूतंजलंतज्जनकर्षितं कृष्णतापा
ग्निसंमिश्रमगमद्धिमवर्जितं ९८ धृत्वाथगोपवेषंवैकृष्ण: प्राकृतवत्सपै: जगामयत्रगोपाला: स्वंस्वंरक्षंतिगो
धनं ९९ महालयाभिधाक्षेत्रात्पूर्वतोयोस्तिपर्वत: क्रोशार्धांतरमानेनतस्थौतत्रमहामना: १०० जगौसवेणु
नातत्रकिंचित्कार्यजिगीषया ॥ षट्जातिस्वरसंक्लापैस्तध्रोल्लोदयन्मुकुः १ कलवेणुरवेणैवमोहिता: सर्वए
वहि गांविसृज्यययुर्गोपायत्रकृष्णोतिसुंदर: २ तंदृष्ट्वातिवनंगोपवेत्रकंबलधारिणं प्रोचु: परस्परंतेथव
र्हापीडंलसन्मुखं ३ गोपाउचु: अहोकोयंविचित्रांगोदृष्टपूर्वोनगोपक: कथंवादयतेवेणुमधरांगुलिभूषितं ४
नैतादृशा: स्वरोस्माभिर्वेणुत: क्वापिरकंश्रुत: नैतादृशोपिसंदृष्ट: क्वाचित्कोपोतिसुंदर: ५ गोकुलेश्रूयतेक
श्चित्गोपाल: कृष्णसंज्ञित: सएवभवितार्किंवास्कुतोत्रागमिष्यति ६ अगस्त्यउवाच गोपेषुप्रवदत्स्वेवंविस्मृता ६८

शेषकर्मसु गावोबहुतृषाक्रांता: स्वैरिण्योबभ्रमुर्वने ७ तदाकाचित्कृताएकापातुंहैमनतीजलं ततटाकाद
तीवोच्चारपतन्निर्गताभ्रशं ८ कंठ: प्राणास्तिदु:खार्ताचेषमानाजलेक्षुधा दीनमुच्चैस्वरंचक्रेसागोदुर्धारणं
प्रिये ९ निशाम्यतद्वचंकृष्ण: सदयोदृशापीडित: वेणुगायनमुत्सृज्ययौतत्रससंभ्रम: १० तेतेगोपाश्च
शंतस्यानिर्गताबहुवेगत: गांसमुच्चालयामासवहिर्नेतुंप्रियेजलात् ११ तेननोच्चलितंशेकुर्गांगोपास्तेम
नस्विनी तदातैरर्थित: कृष्णस्वयंचोच्चालयच्छनै: १२ तत्करस्पर्शमात्रेणसाधेनुर्दिव्यरूपिणी धेनुरुकाद्विनि
र्मुक्ताअप्सरास्तत्क्षणादभूत् अप्सराउवाच जयकृष्णजयानंतविभ्रमस्तैजयाजय करस्पर्शनमात्रेणा ऋषि
शापाद्दहंहरे १४ निर्मुक्तास्मिदयासिंधोदीनांगात्रातुमर्हसि अगस्त्यउवाच इत्युक्त्वासाप्रियेसम्यक्माधवंसं
प्रणम्यसा स्तुत्वानत्वाचसंकृष्णंदिव्ययानमुपाश्रितं दिव्यांबरधराचैवदिव्यालंकारभूषिता १६ स्वर्लोकम
गमत्तूर्णंयत्रदेव: शचीपति: ततोमृदतरागोपारुरुधु: दुःकृष्णमोहिता: १७ अपश्यंत: शवंचापिधेनोपि

कर॰ म॰ स्वकयार्हिता: ततस्तान्कृपणान्वीक्ष्यकृष्णश्चातिदयान्वित: १८ दर्शयामासतांधेनुंस्वमयासर्जितांक्षणात्
६९ तेगोपा:पुरतोदृष्ट्वागांचरतींस्वविस्मिता: १९ मन्यमानास्तथैवासन्स्वप्नवत्कृष्णचेष्टितं यत्रसापतिताधेनु:
पुण्याहेमवतीजले २० तत्राभवन्महातीर्थंपावनंसर्वदेहिनां गोतीर्थमितिविख्यातंअंकितंगोपदै:प्रिये २१
दृश्यतेद्यापिसुश्रोणिसर्वकल्मषनाशनं गोतीर्थेस्मिन्नर: स्नात्वाय:पश्येद्धिगवीश्वरं २२ सर्वपापविनिर्मुक्त:
स्वर्गलोकेमहीयते एवंविधस्यकृष्णस्ययोनुब्रूयाद्धिचेष्टितं २३ यत्करस्पर्शमात्रेणधेनु:स्वर्लोकमाविश
त् १२५ ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमुनिसंवादेसत्यवत्याश्चरित्रकथनंव्यासो
त्पत्तिश्चश्रीकृष्णचरित्रधेनुमोक्षकथनंनामषोडशोध्याय: ॥ १६ ॥ छ ॥ छ ॥ नारदउवाच निशम्ये
तिवचस्तस्यसामुनेपुनरेवहि पप्रच्छविस्मिताकिंचित्तत्सर्वंत्वंनिबोधमे १ लोपामुद्रोवाच आसीद्धेनु:सु ६९
रासाकायाकृष्णस्पर्शान्मुने स्वर्लोकामगमद्रूपा तत्सर्वंप्रवदस्वमे २ त्वंजानासिपतेसर्वंमतीतानागता

गतादिकं श्रृण्वत:श्रद्दधानायामामशेषमिदंप्रियं ३ नारद: इतितत्प्रश्नसंहृष्टोमैत्रावरुणिरग्रणी: विचिंत्यसकलं
वृत्तंप्रवक्तुमुपचक्रमे ४ अगस्त्यउवाच विश्वामित्रोथराजर्षिर्ब्रह्मर्षित्वयिहेतवे वसिष्ठस्पर्धयातेपेयदाभद्रेबहुत
प: ५ तदातत्तपसाभीतोभगवान्पाकशासन: तत्तपोनाशितुंमूढ: स्वगंधांदेवयोषितां ६ झटितिप्रेषयामासस
र्वभूषणभूषितां सापिहृष्टाजगामाशुनवयौवनशालिनी ७ यत्रासीत्समुनिस्तत्रचलत्कुचमनोरमा दृष्ट्वापत
त्राराजापिचरंतंतपउत्तमं ८ विभ्रमैर्मोहयामासवाक्षिभ्रूक्षेपणादिभि: विभ्रमैरथचाशेषैरविशेयंविलक्ष्यतं ९
विलज्जातस्यवामांकेविवेशाद्वैवयोज्झिता ततोकस्मान्मुनिंदृष्ट्वारिरंसुंतांप्रकोपित: १० शशापकामिनींसाततपो
नाशार्थमुद्यतां विश्वामित्रउवाच यत्त्वंपशुवद्दुष्टेममांकोपरिसंस्थिता मत्तपोनाशितुंचातोधेनुस्त्वंभवदुर्मुखी
अगस्त्यउवाच इत्थंसामुनिनाशप्तास्वगंधाथमहामुनिं १२ भूमौतंदंडवन्नत्वाययाचेशापनिष्कृतिं तयासंप्रार्थि
तश्चाथविश्वामित्रोमहातपा: १३ उवाचतांमहाप्राज्ञ: शापनिर्हरणेप्रिये विश्वामित्रउवाच धेनुरूपेणतेदेवी

कर॰म॰ १४ क्षेत्रेमहालयेहैम्यांभवेदुत्पतनंयदा तदाकृष्णकरस्पर्शात्सकलात्यतिवर्हणात् १५ भविष्यतिविमुक्तिस्ते
७० मध्यपान्नात्रसंशयः अगस्त्यउवाच इतिशप्तासगंधर्वासादेवपुण्यांगनाप्रिये १६ करवीरगतेभद्रेक्षेत्रेनित्यं
महालये वसंतीधेनुरूपेणमुनिशापप्रभावतः १७ प्राप्यकृष्णकरस्पर्शान्मुक्तिर्वैनात्रसंशयः षट्योजना
लगतेवैमुक्तिस्तत्राजरेवहि १८ आख्यानंसर्वमेतत्तेयत्पृष्टंहित्वयामम यथामतिमयासर्वंपुनःकिंश्रोतुमिच्छसि
१९ नारदउवाच श्रुत्वापतिवचस्त्वेवं सतीसापुनरेवहि पप्रच्छस्वपतिंहृष्टामुनेकृष्णकथांशुभां २० लोपामुद्राउ
वाच धेनुंवैमोक्ष्यवैशापात् कृष्णस्वामितिविक्रमः ततःकिमकरोद्ब्रह्मंस्तत्सर्वंप्रवदस्वमे २१ नारदउवाच इति
तत्प्रश्नसंहृष्टोसविध्यदमनोमुनिः उवाचपरयाप्रीत्याश्रीकृष्णस्यकथामुने २२ अगस्त्यउवाच दत्वाधेनोर्विमुक्तिं ७०
वैकृष्णोभद्रेततःपरं तमेवगिरिमारूढोयत्रपूर्वंजगोकुलं २३ स्वनाम्नालिंगमास्थाप्यतत्रगोपालकेश्वरं तीर्थंचाप्य
करोत्तत्रस्वनाम्नाजनपावनं २४ तत्रगोपालकेतीर्थेस्नात्वागोपालकेश्वरं विलोक्यबहवोमुक्तास्तत्तीर्थस्नानतोजनाः २५

70

तस्मिन्नेवगिरौरम्येकृष्णःश्रीवत्सलांछनः पीतवासाघनश्यामोमत्तेक्षणगोचरः २६ वाद्यन्सकंकणेणुंगुंजाव
तंसकोसन्मुखः ततस्सभगवान्साक्षाद्यवनंकोपयन्मुहुः २७ दृष्ट्वातंनर्तनंक्रुद्धोयवनस्तन्नमोदितः तद्योधावद्दि
धर्तुंतंयवनोमूढधीःपुनः २८ समीपमागतंवीक्ष्यकृष्णस्तंयवनंप्रिये प्रभीतइवतस्माद्वैधावमानस्ततस्ततः २९
उत्पपाततरसाचोर्ध्वंततःकिंचिच्चिकीर्षया तस्मिन्ब्रह्मगिरौकांतेकृष्णश्चोत्पतितोम्बरं ३० तदाततझारवेगेनसार्धे
कान्द्वयोजनं॥ निमग्नःपर्वतोमत्यांघ्रिष्टश्चोर्ध्वंप्रदृश्यते ३१ नचित्रतममेतद्धितस्यकृष्णस्यचेष्टितं यद्रोम
विवरेभद्रेब्रह्मांडानिलुठंतिहि ३२ तत्पादघातोयत्रोग्रैरभवत्तत्रपर्वते दृश्यतेद्यापितत्रैवगर्तवत्सचपर्वतः ३३
ततःकृष्णपदांगुष्ठात्पीडितात्पर्वतात्प्रिये प्रादुरासीन्महापुण्यानदीचोभयतोमुखी पूर्वतःप्रवहंतीसामुखेनैकेन
पर्वतात् वारुण्यासहसंगम्यपुनातिभुवनत्रयं ३५ मुखेनापिद्वितीयेननिर्गतापश्चिमामुखी भद्रयासहसंगम्यसा
पुनात्यखिलंजगत् ३६ कृष्णांगुष्टपरिभ्रांतंवीक्ष्यसोमस्तदाप्रिये स्वमंडलगतंवारिसमादायतमाययौ

३७ आच्छाद्यपर्वतंसर्वंस्वर्गाभीशामृतोर्मिभिः तत्तापशांतिमन्विच्छन्भक्त्याकृष्णमपूजयत् ३८ तावत्त आज्ञापितस्तेन
त्वा कृष्णंजगद्धरिं तुष्टावपरमः श्रीतोगोपवेषधरंपरं ३९ ब्रह्मोवाच नमोनमस्तेखिलभावनायविश्वात्मनेसंसृ
तिचक्रशांतये हृदिप्रविश्याखिलपारिंद्रियार्थिनांकुर्विंद्रियाणामनवाप्यवर्त्मने ४० यदंघ्रिछायानुविसृजंतिसमस्तसंगं
सद्बुद्धयः तवकथामलस्वल्पकामाः यस्माद्विभेत्यखिलईश्वरमृत्युरुग्रः सोयद्दशेतवविभोमहिमाबिभर्ति ४१
मन्येत्तवेश्वरपालायनमेतदयसन्मुकुंदयेखिलमहीतलसंनिवत्से यत्कोपसंभवकठाक्षतएवचांतेसंदह्यतेजगद
यंसकथंनहस्यात् ४२ मन्येहमीशगिरिमेनमहोतिपुण्यं त्वत्पादपद्मरजसावितलंसमंतात् यत्स्वल्पगोलमरली
सकलाघमुक्ताभजेतनुंखलुविसृज्यशिलास्वरूपं ४३ अगस्त्यः इत्थंस्तुतः सर्वेतेनतुष्टोगोपवपुः प्रिये तुष्टः
प्रोवाचतत्स्वयाब्रह्मणंवरदाग्रणीः ४४ श्रीकृष्णउवा० त्वयायच्चिंतितंब्रह्मन्नगुत्समस्त्वेष्टितंपरं अतस्तुष्टोस्म्यहं
तेयज्ञाततत्वस्मरस्वते ४५ यथार्थयामहाभागत्वयाभक्तिनिरुक्तया स्तुत्यानयापरानोहंप्रियतांयत्प्रदीप्सितं ४६

अगस्त्यः इत्युक्तोजगदीशेनब्रह्माब्रह्मसमुद्भवः उवाचसदयंकृष्णंगोपवेषमितिप्रिये ४७ ब्रह्मोवाच विना
त्वद्भक्तिलेशेनयाचेहंनवरंपरं त्वत्सेवनरसाभिज्ञोनमुक्तिंचानुषंगिकीं ४८ यथाप्यहंपूर्णकामस्त्वद्भक्त्यैवजना
र्दन तथाप्येकंवरंयाचेत्वत्तोलोकविमुक्तये ४९ कृत्वामुंपर्वतंतीर्थंत्वन्नाम्नाभुविविश्रुतं गोपरूपेणतेनेहस्थि
तोस्मिन्भवसर्वदा ५० यदितुष्टोसिमेदेवशरणागतवत्सल तर्हिदेहिवरंचामुंसर्वलोकविमुक्तिदं ५१ अ
गस्त्यउवाच इतिसंप्रार्थितोभद्रेब्रह्मणागोपवेषधृक् ब्रह्मणामितिहोवाचतंचपरिपालयन् श्रीकृष्णउ०
यतोगोमद्वपुश्चाहमत्राच्योभवितोभवान् अतोगोमकरिरितिप्रथितोयंगिरिर्भवेत् ५० मत्पादाग्रसमुद्भू
तागंगेयंममलोकदा गोमत्वतीतिविख्याताभूयाल्लोकविमुक्तिदा ५१ निशाम्यहमिहैवांगगोमदंगधरोनिशं य
तः संप्रार्थितोब्रह्मंस्त्वयाभक्तियुतेनहि ५२ अगस्त्यउवाच दत्वाचैवंवरंकृष्णोब्रह्मणाभ्यर्चितः स्तुतः स्था
प्यगोमद्वपुस्तत्रस्वयंतस्मात्कृतोन्यतः ५३ ध्यात्वान्यंतटवद्रूपंदिव्यपीतांबरावृतं यवनंपृष्टतोलग्नंमोहय

कर॰म॰ मोहयत्कृष्णमायया ६४ देवैर्दत्तवरोयत्रमुचुकुंदोमहाबलः कृष्णआसीद्गिरौतत्रययौकृष्णंगभीतवान् ६५
७२ मुचुकुंदमथाच्छाद्यस्वंदिव्यंपीतवाससं ययौततः स्वयंदूरात्कुहकः कृष्णस्तत्क्षणात् ६६ ततोनुयायीयवनो
मत्वातंकृष्णमित्यथ पीतांबरावृतंसुप्तंमुचुकुंदंयदाहनत् ६७ अभ्युत्थितः ततः कोपान्मुचुकुंदोमहाव
पुः भस्म॰साद्करोत्क्रूरयवनंनयनाग्निना ६८ मुचुकुंदस्ततोवीक्ष्यकृष्णंचातीवविस्मितः नत्वास्तुत्वावतं
प्राज्ञः कृतकृत्योभवत्प्रिये ६९ इत्युक्तंतीर्थपादस्यचरितंतेयथामतिः सर्वपापहरंभद्रेकरवीरकथान्वितं
॥७०॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयसंवादेस्कंगंधनाम्नीदेवांगनाचरित्रकथनंतथा
श्रीकृष्णचरित्रेकृष्णयारपतनत्वेविष्णुमाययामुचुकुंददृष्ट्यादुरात्मयवनस्यवधः कथनंनामसप्तदशोध्या
यः ॥१७॥ छ ॥ छ ॥ नारदउवाच पतिनागदितंचैवमाख्यानमितियावनं श्रुत्वासातीवसंहृष्टाः पुनःप्रो ७२
वाचतंमुनिं १ लोपामुद्रोवाच परात्पराश्रमेतस्मिन्यांतियानिचसंतिहि तानिसर्वाणितीर्थानिकथयस्वयते

72

मम २ नारदउवाच इतिपृष्टस्तयापत्न्यामुनीसकलशोद्भवः आकालयद्हृदातीर्थान्यथप्रोवाचसर्ववित् ३ अ
गस्त्यउवाच सत्यमेतानितीर्थानिसंतियद्यपितत्रहि तथापिकानिचिद्वक्ष्येयान्यहंवेदसुंदरी ४ गिरेर्नाभिस्थले
यद्विवर्ततेसानुपावनं ब्रह्मकुंडमितिख्यातंतत्रास्तिजनपावनं ५ ब्रह्मकुंडेनरः स्नात्वाब्रह्मेशंयः समर्चयेत्
सर्वपापविनिर्मुक्तोब्रह्मलोकमवाप्नुयात् ६ तस्यैवदक्षिणेभागेबाणमात्रांतरेणहि कृष्णेनस्थापितंलिंगंसती
र्थंविद्यतेनघे ७ कृष्णकुंडेनरस्नात्वायः पश्येत्कृष्णेश्वरंतुयः सर्वपापविशुद्धात्माविष्णुलोकमवाप्नुयात्
८ ब्रह्मेश्वरादयोयाम्येबाणपंचकमानतः तीर्थंगोमतीतिख्यातंविद्यतेघनिकर्शनं ९ यत्रगोमतीगंगा
कृष्णांगुष्ठाद्विनिर्गता वहतेपुण्यसलिलापूर्वपश्चिमतोमुखी १० कृष्णपादांबुजाद्यस्मान्निर्गतासामनस्वि
नी अतोनामांतरंतस्याविष्णुपत्कंजवाहिनी ११ तत्तटाकेस्थितःश्चापिकृष्णोगोपालवेषधृक् ब्राह्मणप्रार्थि
तः कृष्णदर्शनात्सर्वसिद्धिदः १२ गोमत्यांतुयः स्नात्वापश्येद्गोमद्वपुर्धरं कृष्णंसपापनिर्मुक्तोविष्णुलोक

कर· म· मवाप्नुयात् १३ तस्यैवपुरतोदेशेबाणमात्रांतरेणहि पाराशराभिधंतीर्थंसलिंगंसर्वसिद्धिदं १४ विलोकितं
७३ तयातत्ररुक्मपादप्रभृतया पर्वतेप्यपिरुक्श्रोणिसर्वपापविनाशनं १५ स्नात्वापराशरेतीर्थेभक्त्यायःपूज
येन्नरः पराशरेश्वरंभक्त्यासर्वसिद्धिमवाप्नुयात्॥ १६ तस्यापिपुरतोदेवीतीर्थंसत्यवतीकृतं सलिंगंविद्यतेयया
प्लाविततंगंगयातया १७ स्नात्वासत्यवतीतीर्थेपश्येत्सत्यवतींहियः सर्वपापविनिर्मुक्तः सुभगोजायतेनरः
१८ तीर्थमन्यत्प्रवक्ष्यामियत्पूर्वंकथितंतव ब्रह्मेशाद्दक्षिणेभागेगोमत्याश्चदक्षिणे १९ नागतीर्थमितिख्या
तंयत्पूर्वंनागनिर्मितं कुष्ठकंड्वादिशमनंनागेश्वरसमन्वितं २० नागतीर्थेनरः स्नात्वापश्येन्नागेश्वरंतुयः सर्व
रोगविनिर्मुक्तः सर्वकामानवाप्नुयात् २१ तस्यैवदक्षिणेभागेसिद्धकुंडंपरंप्रिये सिद्धेश्वरसमायुक्तंसर्व
सिद्धिप्रदंशुभं २२ यत्रपाराशरोलेभेतपः सिद्धिंपुरासति तीर्थंतद्धितदाजातंसिद्धकुंडमितीरितं २३ ७३
सिद्धकुंडेतुयः स्नात्वापश्येत्सिद्धेश्वरंनरः सर्वपापविनिर्मुक्तः सर्वसिद्धिमवाप्नुयात् २४ तीर्थमन्यत्प्रव

क्ष्यामितस्यैवसंन्निधोपरं यत्ख्यातंत्रिपुलोकेषुन्नसिंहंकुंडमित्यथ २५ आराध्यतपसापूर्वंनरसिंहंपराशरः
तद्दत्तदकरोत्तत्रकुंडंवैनारसिंहकं २५ नरसिंहाभिधेकुंडेस्नात्वायः प्रयतोनरः पूजयेन्नारसिंहंवैस
यातिपरमंपदं तीर्थमन्यत्प्रवक्ष्यामियत्पूर्वंकथितंमया ब्रह्मेश्वराद्दक्षिणेशान्येबाणयुग्मांतरेणहि २६ सोम
तीर्थमितिख्यातंसकलाघनिबर्हणं सोमेश्वरसमायुक्तंचवर्ततेप्यपिसुंदरे २७ सोमतीर्थेनरः स्नात्वापश्ये
त्सोमेश्वरंतुयः ससर्वपापनिर्मुक्तः सोमलोकमवाप्नुयात् २८ तस्यैवपश्चिमेभागेह्युर्वशीकुंडमुत्तमं
उर्वशीस्नानतोयत्रपूतायत्रमनस्विनी २९ स्नात्वावैचोर्वशीकुंडेपूजयेदुर्वशींतुयः प्राप्नुयादुर्वशीलोकंस
नरोनात्रसंशयः ३० तस्यैवदक्षिणेभागेकुंडंवैमदनाभिधं मदनेश्वरसंयुक्तंविद्यतेप्यपिसुंदरी ३१ यः
स्नात्वातुनरःतस्मिन्कुंडेवैमदनाभिधे मदनेशंसमभ्यर्च्येत्सपुण्यफलंशृणु ३२ सुभगोक्षतदेहश्चसर्व
रोगविवर्जितः आयतेधनसंपन्नः सुंदरः कामवन्नरः ३३ कुंडमन्यत्प्रवक्ष्यामियद्वसंतेननिर्मितं तस्यै

कर॰म॰ वपश्चिमेभागेसर्वपापहरंशुभं ३४ योवसंताभिधेकुंडेस्नात्वाभक्तिसमन्वितः वसंतेश्वरमभ्यर्च्यसयाति
७४ यातिपरमंपदं ३५ तस्यैवपश्चिमेभागेबाणयुग्मांतरेणहि तीर्थमन्यत्प्रवक्ष्यामियत्पूर्वंब्रह्मणाकृतं ३६ स्था
पितोयज्ञस्तंभोब्रह्मणायत्रभामिनि स्तंभतीर्थमभूत्तत्रसर्वकल्मषनाशनं ३७ स्तंभेश्वरसमायुक्तंयज्ञस्तं
भविभूषितं स्तंभतीर्थेनरः स्नात्वास्तंभेशंयः समर्चयेत् ३८ ससर्वपापनिर्मुक्तोसयज्ञफलमाप्नुयात् यस्कु
र्यात्प्रयतः स्तत्रयज्ञस्तंभप्रदक्षिणां ३९ सर्वपापविनिर्मुक्तः सयज्ञफलमाप्नुयात् तस्यैवपश्चिमेदेशेसर्वाघ
बीजनाशनं ४० तीर्थमन्यत्प्रवक्ष्यामि वायुनायत्पुराकृतं वायुतीर्थमितिख्यातंत्रिषुलोकेषुयत्प्रिये ४१ वाते
श्वरसमायुक्तंविद्यतेद्यापियत्प्रिये वायुतीर्थेनरः स्नात्वापूज्यतेवाश्वरंतथा सकामः सकलान्कामान्निःका
मोमोक्षमाप्नुयात् तस्यापिपश्चिमेदेशेसर्वकामफलप्रदं ४३ तीर्थमन्यत्प्रवक्ष्यामियद्गंधर्वविनिर्मितं गं ७४
धर्वसंज्ञकंकुंडंसर्वकल्मषनाशनं ४४ गंधर्वेश्वरसंयुक्तंविद्यतेद्यापिसुंदरी योनरः प्रयतः स्नात्वाकुंडे

गंधर्वसंज्ञिते ४५ गंधर्वेश्वरसमभ्यर्च्यतस्यपुण्यफलंशृणु सत्कुलीधनसंपन्नः कुलकेठोभवेत्प्रिये ४६
भूत्वेहनिवसेदंतेगंधर्वनगरंव्रजेत् तस्यैवदक्षिणेभागेसर्वलोकभयापहं ४७ तीर्थमन्यत्प्रवक्ष्यामियत्पूर्वं
नागनिर्मितं संस्थिताः स्तत्रयेनागाः पुरासत्यवतीप्रिया ४८ नागनिर्झरतोप्येत्यचक्रुस्तेकुंडमुत्तमं नागकुं
डेनरः स्नात्वाश्रद्धयासकृदेवहि ४९ नागेश्वरंसमभ्यर्च्यसर्वपापैः प्रमुच्यते तस्यापिदक्षिणेभागेसर्वा
घौघनिबर्हणं ५० कुंडमन्यत्प्रवक्ष्यामिसर्वदेवविनिर्मितं देवकुंडेनरः स्नात्वादेवेशंयः समर्चयेत् ५१
सकामः सकलान्कामान्निष्कामोमोक्षमाप्नुयात् तीर्थमन्यत्प्रवक्ष्यामिसर्वपापविनिर्मितं ५२ सोमेशादु
त्तरेभागेबाणषट्कांतरेस्थितं पराशरमुनेःशिष्योव्याघ्रोनाममहातपाः ५३ यत्रतेपेतपश्चोग्रंतीर्थंतत्
व्याघ्रसंज्ञितं व्याघ्रकुंडेनरः स्नात्वापश्येत्व्याघ्रेश्वरंतुयः ५४ सर्वविघ्नविनिर्मुक्तः सयातिपरमांगतिं
आख्यातानियथावत्तेतीर्थानिचयथामतिः ५५ पराशराश्रमस्थानिसर्वेष्टफलदानिच तस्माद्भद्रेनचैवाहं

कर-म· करवीरपुरस्यहि प्रवक्तुंसर्वमाख्यानंप्रभुरस्मिपरायुषा क्षेत्रैकदेशवसते पाराशर्याश्रमस्यहि यतः प्रवक्तु
७९ माहात्म्यंमसमर्थोवरानने ५७ एवंविधाश्चबहवोमुनीनामाश्रमाः प्रिये वर्त्ततेयत्रपुण्याश्चतत्क्षेत्रंकेनवर्ण्यते
५८ पराशराश्रमस्याधः पूर्वतोप्याश्वलायनः तपश्चरस्समेयात्मासर्वलोकहितायवै ५९ आश्वलायनवा
पीयामहापापापहारिणी आश्वलायनलिंगेन संयुतास्तिमनस्विनी ६० तस्यांस्नानंचदानंच सर्वपातकनाशनं
प्रकर्त्तव्यंप्रयत्नेन महापापविनाशनं ६१ पराशराश्रमस्यैवनिकटेपर्वतोपरि आश्रमोविद्यतेयत्रमार्कंडेय
मुनेश्वरः ६२ अत्याश्चर्यकरंयत्रशिलातीर्थंचविद्यते मज्जनाद्यत्रषण्मासमहर्निशमनुक्रमात् ६३ शि
लावदृढवपुर्भद्रेजायतेहिनरोजसा तृणपर्णादिपतितंषण्मासादेवयत्रहि ६४ आयतेहिशिलाकारंतच्छिलाती
र्थमुत्तमं आसमंतादुपतटंमार्कंडेयाश्रमस्यहि ६५ सिद्धाश्चसाधकाः पूर्णानिवसंतिवरानने तस्यैवदक्षिणे ७९
भागेप्रयागस्यो।वसंन्निधौ ६६ वालखिल्यागणास्तत्रनिवसंतितपस्विनः ७० ॥इतिश्रीपद्मपुराणेकरवी

रमाहात्म्येपराशरस्यमहिमा अगस्त्येनकथितंअष्टादशोध्यायः १८ ६२ ६२ अगस्त्यउवाच प्रयागस्यैववा
यम्येकोशार्धांतरमानतः श्रीशुकस्यमुनींद्रस्यविद्यतेतीर्थमुत्तमं १ यत्रकगोदोहमात्रंतुनतिष्ठतिकचिच्छुकः
सोनिशंविद्यतेयत्रतत्तीर्थंकेनवर्ण्यते २ प्रयागात्पश्चिमेभागेक्रोशमात्रेपपर्वते आश्रमोविद्यतेतत्रस्वयंभु
वमनोः शुभः ३ यत्रतस्यातपश्चोग्रंमनुर्ज्ञानमवाप्यच मानवानितत्सश्चक्रेधर्मशास्त्राणिचोदितः ४ प्रया
गाद्दक्षिणेभागेशुकतीर्थस्यचोत्तरे विद्यतेकालतीर्थंचगंगायांसर्वसिद्धिदं ५ क्षेत्रवायव्यदिग्भागेह्युत्तरेश्वर
संनिधौ श्रृंगर्षेराश्रमंतत्रविद्यतेतीर्थसंयुतः ६ आसमंताद्दशक्रानिक्रपंचक्रोशांतरेणाहि विद्यतेसर्वतीर्थानि
मन्याश्रमयुतानिच ७ प्रयागनिकटेपूर्वंतपः कृत्वासुदारुणं पश्चाद्दसर्गंहेप्राप्ताः कपिलोमुनिपुंगवः ८ त
स्यैवदक्षिणेभागेगंगायांशुकतीर्थकं शुकेश्वरसमायुक्तं सर्वपापप्रणाशनं ९ भल्लातकरसांकितंशुक्रंवास
स्तपाप्मिनः जातंशुक्रंयतावासोशुकतीर्थंनिमज्जनात् १० तस्यैवपूर्वदिग्भागेभैरवंतीर्थमुत्तमं ॥ गंगायांविद्य

कर॰ म॰ स्फुटंसंसारभयनाशनं ११ तस्यैवपूर्वदिग्भागेभोगवत्याश्चसंगमे विद्यतेहिविशालाख्यंतीर्थंवैजनपावनं १२
७६ प्रातःस्नानेनसर्वेहिभागीरथ्यांचयत्फलं सकृदाप्लुत्यतद्भद्रेविशालेलभतेनरः १३ तस्यैवपूर्वदिग्भागेव्यासती
र्थमनुत्तमं गंगायांबाणमात्रेणविद्यतेजनपावनं १४ तस्यैवपूर्वदिग्भागेबाणमात्रांतरेणाहि कश्यपस्यमुनेस्ती
र्थंसकलाघनिबर्हणं १५ तस्यैवपूर्वदिग्भागेगंगायांसर्वपापहृत् गालवस्यास्तिसत्तीर्थंसकलाघनिकृंतनं १६
+तस्यापिपूर्वदिग्भागेसर्वलोकमलापहृत् श्रीवसिष्ठमुनेस्तीर्थमाधिव्याधिविनाशनं १८ + तस्योपिपूर्वदि
ग्भागेगर्गाचार्यस्यशोभने तीर्थंवैविद्यतेस्फुटंमनीषाणांफलप्रदं १७ + तस्यापिपूर्वदिग्भागेसौभाग्य
पदमुत्तमं अरुंधत्याश्चसत्तीर्थंपुत्रपौत्रप्रवर्धनं १९ तस्यापिपूर्वदिग्भागेविश्वामित्रस्यपावनं विद्यतेती
र्थवर्यंचसर्वशत्रुविनाशनं २० तस्यापिपूर्वदिग्भागेकस्याचिद्वैमहामुनेः तीर्थंवैविद्यतेपुण्यंसपत्नीकस्यस ७६
र्वदं २१ ततोपिपूर्वदिग्भागेमयूरंतीर्थमुत्तमं संगमोविद्यतेतत्रमयूरीनामवैनदी २२ संगतापंचगंगायां

76

सर्वपापप्रणाशिनी मयूरस्वामिदेवोपिप्रकाशगिरिसंज्ञके २३ विद्यतेकरवीरेवैदर्शनाद्धिप्रजन्मनः तस्यैव
पूर्वभागेवैगंगायांतीर्थमुत्तमं २४ तारकंसर्वजंतूनांतारकेश्वरसंयुतं सर्वपापप्रशमनंविद्यतेहिमनोरमं २५
तस्यापिचाग्रतःस्फुटंदशाश्वमेधसंयुतं विद्यतेतीर्थमत्यग्र्यंदशाश्वमेधपुण्यदं २६ तस्यापिचाग्रतोभ
द्रेसर्वतीर्थमनुत्तमं सर्वेश्वरसमायुक्तंविद्यतेसंगमेशुभं २७ यत्रेयंपंचगंगावैवहतेपश्चिमामुखी जीवंता
संगताचापितद्भवेत्सार्वतीर्थके २८ इयंपंचनदीनित्यंशिवरूपाप्रकीर्तिता शक्तिरूपाजिवंतीयंतयोर्योगोहिपु
ण्यदः २९ यत्रपंचनदीनित्यंजीवंत्यासहसंगता यत्प्रयागसमंतीर्थंतत्रसंनिहितोहरिः ३० एवंबहूनिती
र्थानिपंचनद्यांचसंतिहि आसंगमंहिरुद्रायबाणमात्रांतरेणाहि ३१ अतस्तत्रत्यतीर्थानिकोनुवर्णयितुंक्ष
मः सहस्रवदनोप्युच्चैरपिब्रह्मायुषासती ३२ पंचक्रोशंपावनंक्षेत्रमेतत्सर्वाघौघध्वंसकंसज्जनानां
नानातीर्थाकालमार्यप्रकाशंतीर्थाग्र्यंवैकल्पकल्पांतरस्थं ३३ पंचक्रोशेष्वाविशन्नैवपापमाविष्टानांपापिनां

कर॰म॰ क्षेत्रमध्ये तत्क्षेत्रं किंवर्णनीयं पवित्रं विश्वाधारंविश्वबीजाद्यनुद्यत् ३४ पंचक्रोशोयत्रबाधापिनस्याद्याम्यानां
७७ वैपापिनामप्यथापि नायंलोकः पारमन्यूनभूलोकाक्रांतंक्षेत्रमेतत्पवित्रं ३५ प्रादक्षिण्यायस्यचानंततु
प्यमुच्येवैधावत्कुमापश्नमंहि तस्मिन्क्षेत्रेस्नानदानार्जितंयत्पुण्यंभूयात्केनवर्ण्यंविशालं ३६ पंचक्रोशंप
वित्रंचकोल्हापुरमितिप्रिये लिंगरूपंसमंताच्चरक्षितंजलशायिभिः ३७ पंचक्रोशात्मकंज्ञेयंक्षेत्रंतत्करवी
रकं आसमंतान्महादेव्यालिंगंस्तोभात्मकंहितत् ३८ अरूपंसच्चिदानंदंतेजोरूपमखंडकं नश्यंतिसर्वपा
पानिकरवीरप्रादक्षिणात् ३९ अपिब्रह्मवधादीनिप्रदक्षिणपदेपदे विलयंयांतिपापानिकरवीरप्रदक्षिणा
त् ४० योमौनेनोपवासेनकुर्यात्क्षेत्रप्रदक्षिणं सर्वपापविशुद्धात्मा ब्रह्मसायुज्यमाप्नुयात् ४१ एकभुक्ते
ननक्तेनतथैवायाचितेनच ॥ क्षेत्रप्रदक्षिणंकृत्वामुच्यतेसर्वपातकैः ४२ गवांकोटिप्रदानाच्चमहीदाना ७७
द्यदाप्यते तल्लभेदेकवारंहि करवीरप्रदक्षिणात् ४३ जप्तातिरुद्रसाहस्रंयत्फलंलभतेनरः तल्लभेत्करवीर

22

स्यपंचक्रोशप्रदक्षिणात् भूमिप्रदक्षिणात्क्षेत्रैर्यत्फलंलभतेनरः तत्फलंकोटिगुणितंकरवीरप्रदक्षिणात् ४४ स
र्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलं तत्फलंसमवाप्नोतिकरवप्रदक्षिणात् ४५ आनंदकाननमिदंसुखदंहिदेव्याः
कोल्हापुरंनिखिलतीर्थगणात्परंहि यत्रैवपंचनदिकाप्रवबीजहंत्रीपानावगाहननिमज्जनतोस्तिपुण्या ४६
किंविस्मृतोसिनरगर्भजदुःखवर्गमंतेतथायमपुरस्थाततोपरत्र संप्राप्यपूर्वसुकृतैः करवीरकंत्वंहित्वानु
यासिचतमूढकरस्थमुक्तिं ४७ यायादात्मस्पतश्चापियः क्षेत्रंकरवीरकं पदेपदेचतस्यस्यादश्वमेधादिकंफ
लं ४८ येनक्वापिनवैदृष्टंकरवीरपुरंशुभं वृथाजन्मगतंतस्यपादयस्यैवपापिनः ४९ यस्नात्वापंचनद्यां
वैयातिलक्ष्म्याः प्रदर्शने श्रेयसोंतोनवैतस्यश्रद्धाभक्तियुतस्यच ५० जन्मजन्मांतरैः पूर्वैः यत्पुण्यमर्जि
तंनरैः तेनस्यात्करवीराप्तिर्जातुचिन्नान्यथाक्वचित् ५१ ब्रह्मावर्ताभिधाद्देशाद्दृषिदेशात्तथैवच मध्यदे
शेतथैवार्यावर्तादपिविशेषतः ५२ चर्षेस्मिन्भारतेशेषेसर्वकर्मफलप्रदे विज्ञेयंहिविशेषेणकरवीरेजसे

कर॰म॰ नहि ५३ लोपामुद्रोवाच ब्रह्मावर्तस्यचैवविद्वन्ऋषिदेशस्यचैवहि मध्यदेशस्यचैवाथोप्यार्यावर्तस्यचैवहि
७८ ५४ स्वरूपंवदमेस्वामिन्कृपयापरयाप्लवान् येभ्यःक्षेत्रंपरंचोक्तंकरवीरंत्वयानघ ५५ अगस्त्यउवाच
ब्रह्मावर्तः परोदेशोऋषिदेशस्त्वनंतरः मध्यदेशस्ततोन्यूनंआर्यावर्तस्त्वनंतरः ५६ सरस्वतीदृषद्वत्योर्दे
वनद्योर्यदंतरं तंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते ५७ यस्मिन्देशेयथाचारंपारंपर्यक्रमागतः वर्णानां
सांतरालानांसदाचारः सउच्यते ५८ कुरुक्षेत्रं[illegible]चमत्स्याश्चपांचालाःशूरसेनयः ऋषिदेशः स्वयंज्ञेयो
ब्रह्मावर्तादिषल्लघुः ५९ एतद्देशप्रसूताश्चशकाशादग्रजन्मनः स्वयंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः
६० हिमवद्विंध्ययोर्मध्यंयत्प्राग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशः प्रकीर्तितः ६१ आसमुद्रा ७८
त्तुवैपूर्वादासमुद्राश्चपश्चिमात् तयोरेवांतरंगिर्योरार्यावर्तः प्रचक्षते ६२ कृष्णसारश्चचरतिमृगोय
त्रः स्वभावतः सज्ञेयोयज्ञियोदेशोम्लेच्छदेशःस्त्वतः परः ६४ एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः

78

शूद्रोवामिश्रितोवापिनिवसेद्यत्रकुत्रचित् वृत्यर्थंहिविपत्कालेनद्विजातिः कथंचन ६५ उत्तरंयत्समुद्रस्य
हिमाद्रेश्चैवदक्षिणं वर्षंतद्भारतंनामभारतीयत्रसंततिः ६७ अत्रजन्मसहस्राणांसहस्रैरपिसत्तमः क
दाचिल्लभतेजंतुर्मानुषंपुण्यसंचयन् ६८ लब्ध्वास्मिन्भारतेवर्षेजन्मस्वर्गापवर्गदे स्वकर्मसंस्कृताः सर्वेच
तुर्वर्णागतिंययुः ६९ प्रायात्रमानुषेदेहंसंस्काररहितोनरः लब्ध्वाचैवात्मसोपानंतस्माद्भ्रष्टः पतत्यधः
७० ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः निषेकाद्याश्मशानांतास्तेषांवैमंत्रतः क्रिया ७२ ग
र्भाधानंपुंसवनंसीमंतंजातकर्मच नामनिष्क्रमणेचान्नंचौलकर्मोपनायने ७३ महानाम्नीमहाव्रतमुपनिषत्
गोदानस्नातकं विवाहांत्येष्टिकंचेतिकर्तव्यंषोडशक्रमात् ७४ द्विजानांषोडशैवस्युः शूद्राणांद्वादशैवहि पंच
संकरजातीनांसंस्काराः कुलधर्मतः वेदव्रतोपनयनमहानाम्नामहाव्रतं विनाद्वादशशूद्राणांसंस्कारांना
ममंत्रतः ७५ अष्टमांगत्पमाद्यंस्यात्सनामकरणंपरं अन्नप्राशनचौलेचविवाहः पंचमस्मृतः

कर·म· ७६ एवंस्वकीयसंस्कारैः संस्कृताश्चैवमानवाः अस्मिन्वैभारतेवर्षेव्रजंतिपदमुत्तमं ७७ द्याष्टसंस्कार
७९ संयुक्तावेदवेदांगवेदिनः सतीर्थस्नानयात्राद्यैर्विनानैवपुनंतिहि ७८ गायंतिदेवाकिलगीतकानिधन्यास्तु
तंभारतभूमिभागे स्वर्गापवर्गास्परमार्थभूतेभवंतिभूयः पुरुषाःसुरत्वात् ७९ कर्माणिसकल्पिततत्फ
लानिसन्यस्यविष्णोपरमात्मभूते अवाप्यतांकर्ममहीमथांतेह्यस्मिंल्लयंयेत्वमराः प्रयांति ८० कोल्हापुर
भारतवर्षकेस्मिन्ब्रह्मोपदेशादपिपावनंहि नयत्रवैसंस्थितिमेतिजंतुपुनर्मृतःक्लेशनिरोहरूढा ८१ नयत्र
संभारभयंप्रवर्ततेस्नातस्यवैपंचनदी·जलेन तत्क्षेत्रमुख्यैः करवीरकंहिस्वर्भरसादिधितिकिंविचित्रं ८२
नचित्रमेतत्करवीरमुख्यैः स्वर्गादिचापीतिपुराणगीतं गयाव्रजेदित्यपिवेदराशिर्गयांत्रयंचोत्तमतरंब्रवीति।
८३ यथातिदेवर्षिपितृद्विजातिः संतृप्यतेस्मिन्करवीरभूमौ तथानचान्यत्रमहांतिदानेस्तृप्तिः समभ्ये ७९
तिसदक्षिणेहि ८४ नपंचगंगासदृशीनदीस्यान्नक्षेत्रमन्यत्करवीरतुल्यं नदेवतंरुद्रपदात्परंहिविमुक्ति

71

दंस्यादपिचेत्रिलोक्यां ८५ संत्यन्यतीर्थान्यपिचत्रिलोक्यांबहूनिनानाफलदानिचैव विमुक्तिदंवैकरवीरमे
तत्श्रीमोक्षलक्ष्मीपदमंजसैव ८६ छ छ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येएकोनविंशतितमोध्या
यः ॥१९॥ छ छ नारदउवाच माहात्म्यंकथयंत्वेवंप्रियायैसघटोद्भवः मार्कंडेयमुनेः प्रासः क्षेत्रंवै
करहाटकं १ संसारतापसंहारिकृष्णावारिपरिष्कृतं कृष्णांभसिततः स्नात्वादृष्ट्वावैपावकेश्वरं २ दुरि
तापहारिणीनत्वानिर्गतः करवीरके मार्गेवटेश्वरंनत्वासंपूज्यविधिपूर्वकं ३ ततोव्रजन्ददर्शाग्रेकेदारं
पर्वतोपरि कुंडेकेदारकेस्नात्वापितृन्संतर्प्यवारिणा ४ उत्तरद्वारपालंवैश्रीकेदारंप्रणम्यच पर्वताग्रेक्षणं
क्षित्वाविलोक्याथसमंततः ५ तत्रस्था एवसंपश्यन्° करवीरंमहापुरं समंतात्तीर्थवृंदैर्यच्छोभितंसु
मनोरमं ॥ ६ ॥ नानोद्यानश्रियाजुष्टंसर्वदेवनिषेवितं दर्शनात्स्पर्शनाद्यापिसर्वपापप्रणाशनं ७ तद्द
र्शनमहानंदः करतालसमन्वितः ननर्तोयत्कलक्रांतशरीरः संस्मरन्हरिं ८ जयकृष्णजयानंतवि

क्र·म·
८०

विश्वमूर्तेजयाजय जयसर्वेशकर्तात्वं संहर्तात्वंजयप्रभो ९ जयस्वनेर्महास्तोत्रैगोयन्वैर्निर्गतः स्ततः स्वभाग्य
मभिनंदश्च जगाद्देतन्महात्मने १० अगस्त्यउवाच द्रक्ष्यामिदेवींजगदेकमातरं मयूरएषोव्रजतिप्रदक्षिणं
यन्नामकोलापुरतोविभातिनूनंहिधन्यंजननंमदीयं ११ अद्यैवनूनंकरवीरकंपुरंगच्छाम्यतोयच्छशांकः पुरो
गतः दृष्टैवयत्क्षेत्रवरंपवित्रंरुद्रेंद्रचंद्रप्रमुखाः प्रतीर्णाः १२ द्रक्ष्यामिविश्वेश्वरमद्यनूनंमृगादयस्तेप्रचरंति
सेव्यं ज्ञात्वेवपूर्वंतुसमागतंकिंत्वस्माद्धियोगंकरवीरकंपुरं १३ पारोप्रपूतो करवीरगोयोपूतंशरीरंकरवीरगं
यत् पूतंकुलंयत्कुलजः समागतोनान्यद्धिसत्यंकरवीरकंपुरं १४ देवाद्रुमेयत्रवसंतिवृक्षाविभांतिधन्याः
करवीरवासिनः शिवः स्वरूपाणिजलानिभांतिचैचित्रदेतत्करवीरकेपुरे १४ दृष्ट्वास्वरूपाण्ययसोकृतानि
सर्वेमुनींद्राः प्रतिभांतिपूर्वं अद्यानिनैवात्रसमाचरंतिधन्याअमीयेकरवीरवासिनः १५ नारदउवाच इत्थं
धन्यमथात्मानंमन्यमानोघटोद्भवः प्रयागंचाथसंप्राप्तोवालखिल्याभिधानकं १६ स्नात्वातत्रसपत्नीकश्राद्धं

80

कृत्वाहिरण्मयं पिंडान्संपाद्यविधिवत्पितृन्संतर्प्यवारिणा १७ गोभूतिलहिरण्यादियथाशक्त्याप्रदायच
भूरिश्राद्धंततः कृत्वामाधवंप्रणिपत्यच १८ कपाठस्वामिनंनत्वातथान्यानपिसर्वशः समागतोवटंचाथ
सपत्नीकोमहामुनिः १९ वटंसंपूज्यविधिवत्सावित्रींसेवितंतथा द्रव्यैर्मांगल्यकैः पूजनतथावेष्यस्कृतंतुभिः
२० कंचुकीयुक्शूर्पाणि सप्रदत्वाविधानतः विप्रान्संपूज्यविधिवद्यथाशक्त्यामहामुनिः २१ गंतुंवैनिर्गत
स्तस्मात्करवीरंमहापुरं दशाश्वमेधकंकुंडं दूराद्दृष्ट्वापतिव्रता २२ पतिंप्राहातुस्रुसंतुष्टापुरः किंदृश्यतेम
हत् तत्प्रदर्शयमेस्वामिन्तत्कथांचापिकथ्यतां २३ नारदउवाच इत्थंप्रियानुपृष्टः सन्भागवान्सघटोद्भवः
दशाश्वमेधतीर्थस्यमाहात्म्यंवक्तुमुद्यतः २४ अगस्त्यउवाच विष्णुनाप्रेरितः स्रष्टुंप्रजासर्गेपितामहः तपो
ब्रह्मगिरौकृत्वायज्ञार्थंमत्रचागतः २५ सभार्योयज्ञसंभारंविधिवत्कर्तुमारभेत् होतारंकश्यपंचक्रेपोता
रंगालवंतथा २६ उद्गातारंतथाचक्रेवसिष्ठंचमहामुनिः प्रनेष्टारंतथाचक्रेविश्वामित्रंमहामुनिं २७ कृत्वाथ

कु.र.म. प्रतिवत्सारंयज्ञंप्रारब्धवान्स्वयं होमार्थंतुमहच्चक्रे कुंडंवैमंडपान्वितं २८ सर्वेदेवाः सहेंद्रेणद्रष्टुंयज्ञमथागताः
८९ २९ ब्रह्मावैनिर्मितंतत्रतीर्थंवैमहदुत्तमं स्थापितंतस्यनामानिदशाश्वमेधतीर्थकं ३० मूर्तिंतत्रप्रतिष्ठाप्यब्रह्म
णः सर्वसिद्धिदं दृष्टवंतोवयंसर्वेमहदाश्चर्यकारकं ३१ दशाश्वमेधतीर्थेवैस्नात्वाब्रह्मेश्वरंतथा पूजयिष्यंति
येलोकास्तेवैयांतुमहत्फलं दशाश्वमेधजनितंसर्वदेवाज्ञयाग्निदं इतिदत्वावरान्सर्वेब्रह्माद्यादेवतागणाः ३२
यज्ञंसंपादयामासुर्नानाद्रव्यमनोरमं दशकंहयमेधानांसमाप्यचयथाविधिः ३३ यज्ञांतावभृथार्थंवैचिं
तांचक्रुः परस्परं अवभृथंमहत्स्नानंमहागंगांविनाकथं ३४ सर्वेषांचभवेद्यज्ञएकदेवभुचिष्टप्रदे इ
तिचिंतातुरान्देवान्समीक्ष्याथमहर्षयः ३५ होत्राद्याः पंचतेसर्वेपंचगंगाः समानयन् शिवाभद्रा
नयोर्मध्येकुंभीचैवसरस्वती ३६ भोगावतीपंचमीचपंचनद्यः प्रकीर्तिताः कश्यपोगालवोगार्ग्योवसिष्ट ८९
श्चमहामुनिः ३७ विश्वामित्रोमहातेजाः पंचनद्याः प्रवर्तकाः चतस्रः प्रवहंत्यत्रगुप्ताभोगावतीभवेत् ३८

शिवाशिवतनुः साक्षाद्भद्राविष्णुःस्वरूपिणी ब्रह्मस्वरूपिणीकुंभीभोगासर्वस्वरूपिणी ३९ सरस्वतीमहागंगा
साक्षाद्देवस्वरूपिणी एतासांपंचगंगानांयोगस्स्यात्पंचगंगका ४० तस्यांस्नानंचदानंचकाश्याः शतगुणंभ
वेत् मितंभागीरथीस्नानंमितंवैगोमतीफलं ४१ गोदावर्यांमितंस्नानंमितंभोम्याः फलंतथा अमितंपंच
नद्यांवैमाहात्म्यंब्रह्मणोदितं ४२ यत्रैषांपंचगंगांवैपश्चिमावहतेसदा तत्रसर्वाणितीर्थानितत्रसंनिहितोह
रिः ४३ पंचनद्याजलंस्पृष्ट्वावायुस्पर्शनतः सदा सर्वेयांत्यपिवैपापास्तद्विष्णोः परमंपदं ४४ करवीर
समुद्भूतंपंचगंगाजलंमहत् ब्रह्महत्यादिकंपापंनाशयेत्स्पर्शमात्रतः ४५ माहात्म्यंपंचगंगायावक्तुंनैवपिता
महः समर्थोह्यभवत्कस्माद्यदोचेयंसमागता ४६ यज्ञसंपाद्यवैसर्वेयज्ञांतस्नानतत्पराः मार्गेवैपंचगंगा
स्तुनिरीक्ष्यंतस्तथास्थिताः ४७ तावत्पंचनदीयंवैप्राप्तासर्वाघनाशिनी दशाश्वमेधकंतीर्थंप्लावयंत्यपिपाव
नी दृष्ट्वायांतीसुराः सर्वेमहानंदसुनिर्भराः ४८ जयशब्दंप्रयुंजानांयज्ञांतस्नानमाचरन् अपप्लिंगके

मेहामंत्रैः सूक्तैरपितथैवच ४९ अभिषेकंतदाचक्रुर्ब्रह्माणोकश्यपादयः ततस्तेवभृथः स्नाताः ब्रह्माद्या
वैमहापराः ५० दिव्यांबरधराः सर्वेदिव्यगंधानुलेपनाः होमशेषंसमाप्याथचक्रुर्ब्राह्मणपूजनं ५१ कश्य
पादिमुनीन्द्राणांसर्वेषांचपृथक्पृथक् कमंडलुजलैस्तैश्चचक्रुः पादावनेजनं ५२ गंधमाल्यांबरैस्तद्वद्भूषणैः
सुमनोरमैः अंगुलीयोत्तरीयाद्यैः कर्णभूषणसंयुतैः ५३ गोभूतिलहिरण्याद्यैः सम्यक्तोर्च्यद्विजोत्तमान्
तदाशिषंप्रगृह्याथसंस्थिताः सर्वएवहि ॥ ५४ दशाश्वमेधमाहात्म्यंमयावक्तुंनशक्यते तथापिकथयिष्ये
हंयच्छ्रुतंहितदाशिवात् ५५ तदिदंशृणुदेवित्वंमाहात्म्यंपरमोत्तमं ५६ छ छ ॥ इतिश्रीपद्मपुरा
णेकरवीरमाहात्म्येअगस्तिलोपामुद्रासंवादेदशाश्वमेधमाहात्म्यंनामविंशतितमोध्यायः २० छ छ छ
अगस्त्यउवाच यदासमागतः शंभूमहादेवः सहोमया माहात्म्यंकरवीरस्यश्रुत्वादृष्ट्वातथैवच १ अ
नेनैवपथागंतुमुद्यतः करवीरकं तदाप्रियानुपृष्टः सन्प्रत्युवाचसदाशिवः २ दशाश्वमेधमाहात्म्यंत

त्सर्वंप्रवदामिते श्रीभवान्यउवाच महादेवमहाशंभोतीर्थमेतन्महत्तरं ३ पुनःप्रष्टव्यतेयद्धिमाहात्म्यंवदतस्यमे
अगस्त्यउवाच इतितद्वचनंश्रुत्वाविश्वनाथस्तदाप्रिये ४ दशाश्वमेधमाहात्म्यंप्रियायैवक्तुमुद्यतः श्रीविश्वनाथउ
वाच दशाश्वमेधकंतीर्थमिदंजानीहिसुव्रते ५ इदंदेवाश्रयंचापिब्रह्मणःसुमनोहरं विद्यतेब्रह्मणोमूर्तिःप्रजा
नित्यंप्रजायते ६ विद्यतेपूजनंयस्यब्रह्मणोनैवकुत्रचित् शापप्रभावतोदेवीनापिदेवालयंक्वचित् ७ नैवात्रप
भवेच्छापोबाधितुंकरवीरके पूजनीयस्ततोब्रह्मादशाश्वमेधसंस्थितः ८ दशाश्वमेधकेतीर्थेस्नात्वाचैवविधान
तः यः पश्येद्ब्रह्मणोमूर्तिंसंपूज्यविधिपूर्वकं ९ दशाश्वमेधजंपुण्यंसमाप्नोतिनसंशयः बहवोत्रगतिंलब्धाः
स्नानदानजपादिभिः १० अगस्त्यउवाच श्रुत्वैवपतिवाक्यंसाकिंचित्संदिग्धमानसा किंचित्स्मितानना सुभ्रूःपु
नःपप्रच्छतंपतिं ११ भवान्युवाच विश्वनाथमहाशंभोविमोहयसिमेबहू दशाश्वमेधजंपुण्यंकथंवैप्राप्नुयान्न
रः १२ स्नानमात्रेणतीर्थेनव्यलीकंभातिमेमहत् साध्यतेयद्दृढक्लेशैर्नानाद्रव्यव्ययादिभिः १३ सोगवे

दृष्टंतैश्चैवबहुकालेनभोप्रिय तत्कथंलभ्यतेसर्वैःस्नानमात्रेणवैफलं १४ कथितंचित्रमेतद्यत्तन्नगृण्हातिमेमनः॥
अगस्त्यउवाच इत्थमाकर्ण्यतद्वाक्यंकृत्वाचाथमहेश्वरः १५ विश्वासजननंवाक्यंनिजगादतदाप्रिये श्रीशंकरउ
वाच विश्वासंकुरुमेकांतेमदुक्तेवचसिस्थिरं १६ अश्रद्धयाविनश्यंतितत्कृतंतीर्थादितःक्षणात् अतएवकृत
तीर्थानिनपुनंतिनराधमान् १७ अश्रद्धितांश्चपशुवत्तत्स्पर्शनान्मुक्तिदान्यपि शृ॰ पशुतुल्यादिमेसर्वेन
राजीवनतत्पराः १८ नश्रद्धाविद्यतेयेषांतीर्थेचैवद्विजातिषु देवमन्यंतिपाषाणंयेवैतीर्थंजलंबिंदुः १९
द्विजंमन्यंतियेजंतुंतेनराःखररूपिणः मंत्रेतीर्थेद्विजेदेवेदैवज्ञेभेषजेगुरौ २० यादृशीभावनायस्यसिद्धि
र्भवतितादृशी तस्मात्कुरुषविश्वासंत्यक्त्वासंशयमात्मनः २१ तीर्थभूदेवदेवेषुयदित्वंफलमिच्छसि अथापि
चेदविश्वासःप्रत्ययंकौतुहलंमहत् २२ अहंहिब्राह्मणोभूत्वामरिष्येतीर्थसंनिधौ त्वंहिमद्ब्राह्मणीभूत्वादह
नंकुरुसुव्रते २३ सएवमेदशहतांश्चिंतोनिर्दक्षिसमानरः दशाश्वमेधकान्कृत्वायोधैवाचनतोभवेत् २४

अगस्त्यउवाच एवमुक्त्वाविश्वनाथोजातोवृद्धोद्विजोत्तमः दशाश्वमेधकेतीर्थेमृतश्चापिवरानने २५ भवानी
ब्राह्मणीभूत्वारुरोदभृशदुःखिता हानाथहारमणमेक्वगतोसिपतेमम २६ दीनामांपरिशोचंतीविहायप
रिनिष्ठुरः किंकरिष्यामिक्वगच्छामिक्वतिष्ठामिमहाप्रियः २७ तद्वियोगाग्निनादग्धंत्यजामीदंकलेवरं इ
त्थंतद्रोदनंकृत्वानिघ्नंत्याःस्वकरैःकरः २८ सर्वैसमागतास्तत्रलोकाद्रष्टुंहिनागराः तांप्रतोष्याथतेसर्वे
चितांकृत्वाविधानतः २९ दग्धुंचितासमाधायशवमुच्चालितुंगताः नचशक्ताःशवंतद्धितदान्येपिसमीप
गाः तेप्यशक्ताथराजानातदासर्वैयनागराः लोकाश्चोच्चालयमासुस्तथापिनचचालतत् ३० लोकाः
सर्वेविचित्रंतत्दृष्ट्वातत्रैवसंस्थिताः चालयंतोपिसर्वेनशेकुश्चालयितुंशवं ३१ आसीद्राजागंडनामा
सूर्यभक्तिपरायणः चक्रवर्तीमहाशांतःसत्यवाग्विजितेंद्रियः ३२ सपूर्वेसूर्यकुंडेवैतपश्चक्रेमहत्त
रं जीर्णपर्णोनिराहारःसूर्यदृष्टिदृढोनलः ३३ सौरेसूक्तन्महासूर्यपादांगुष्ठश्रितावनिः तुष्टस्तस

कृ. म. महासूर्यः प्राहतंपुरतस्थितं ३४ कुंडलेमेगृहाणत्वंसर्वदासर्वदेहिनां अन्नोत्थानुदिनंदास्येरत्नपात्रेनिधाय
८४ च ३५ यद्भुक्त्वासूर्यसंकाशोनरोगीस्यान्नरः क्वचित् यदास्याच्छावमाशौचंनगरेतावकेपरे ३६ आयास्यतितदा
न्नेवतदन्नंमत्समीपतः गृहीत्वाथवरंराजागंउनामास्कंसंस्थितः ३७ सूर्यप्रेषितमन्नंहिभुंजानःसर्वधर्मकृत्
सूर्यसंप्रेषितंपात्रमन्नयुक्तंतथास्थितं ३८ शावमाशौचकंदृष्ट्वाभूमिगंन्नंततोभवत् श्रुत्वाराजाव्यवस्थातांस्व
यंतत्रागतस्तदा ३९ सर्वेचोच्चलयामासुर्नानाजल्पपुरःसरं नचचालयदातद्धि तदाराजातिविस्मितः ४०
प्राहतंब्राह्मणीराजाकिमिदंन्नोच्चलेत्शुभे ब्राह्मणीप्राहतंराजन्शृणुसर्ववदाम्यहं ४१ दशाश्वमेधवान्क
श्चित्अद्यैवसभवेद्यदि उच्चालनंतस्यवैनंदहनंचैवकारयेत् ४२ इतिश्रुत्वाततोराजासर्वान्लोकान्सपृष्ट
वान् तेसर्वेपब्रुवंन्नैवंकृतोनैकोपिचक्वचित् ४३ दशाश्वमेधकेतीर्थेद्विजःकश्चिद्दुःकृतः धर्मशर्मेतिवि ८४
ख्यातोविष्णुधर्मपरायणः ४४ अमत्सरःसदाचारःसत्यवाग्विजितेंद्रियः निर्द्वंद्वोनिर्ममोदक्षःस्तितिक्षुः

84

समदृक्शुचिः ४५ शांतोदांतउदारीनोदांभिकोमोहवर्जितः प्रतिग्रहनिवृत्तिश्चश्रद्धावान्परदुःखवित् ४६
भिक्षान्नोमिताहारोज्ञातज्ञेयचतुष्टयः आत्मज्ञानपरोभूततापत्रयमहाज्वरः ४७ तत्रपर्णकुटींकृत्वासं
स्थितोबहुवासरं दशाश्वमेधकेतीर्थेस्नानकृत्वाविधानतः ४८ पितृतर्पणसंसक्तः सदाजपपरायणः नीरा
जनविधिंदेव्याः सदाप्रेक्षणतत्पराः ४९ संध्यास्नानादिसंपाद्यभिक्षांकर्तुमथोद्यतः तावच्छ्रुत्वाव्यवस्था
तांसर्वलोकहितायसः ५० गतोवैतत्रराजानंकिंचिद्वक्तुमथोचत: अत्रकिंस्थापितंचेदंशावंस वैमहासन्निभः
५१ किन्नूनंवाजिमेधानांकरवीरनिवासिनां दशाश्वमेधकेतीर्थेमज्जनात्सकृचेतरं ५२ कतिभाव्यावाजि
मेधाराजन्तत्कथयाशुभे देशोत्कर्षेगतस्तत्रदशाश्वमेधकेद्विजः ५३ तथैवोच्चार्यसंकल्पंस्नात्वाचैवविधा
नतः संतर्प्यचपितृन्देवान्श्रद्धाभक्तिसमन्वितः ५४ दशाश्वमेधमाहात्म्यंसंस्मरन्हृदिसंस्थितः ब्राह्मणं
चतथापूज्यगंधपुष्पादिनातथा ५५ नत्वासंप्राप्यविधिवत्आगतःशिवसंनिधौ जनेषुस्मितयुक्तेषु

कर॰म॰ प्रवरस्तुचनिष्ठुरं ५५ कथमेकः शार्वभिस्तुरुद्धात्याथस्वयंहरेत् प्रबलैरपियत्सर्वैरस्माभिर्नैवचालितं ५७
८५ तत्कथंहिस्वयंकर्तुमुद्यतोस्मिविमूढधीः हास्यंचापिनवेवेतिजनानांधृष्टमानसः ५८ इतिलोकेप्रजल्प
स्तुधर्मशर्मद्विजोत्तमः एवंसंपूजयामासनत्वाचैवयथाविधिः ५९ साक्षाद्विष्णुगणोपेतं दर्शनात्सर्वपाप
हं तद्धवंदिव्यमाल्योक्यप्रहृष्टवदनःप्रिये ६० लोकंचैवजडं दृष्ट्वाकिंचित्प्रोवाचविस्मितः अहोजनाबालि
शाएवसर्वेमन्यंतियेवैकरवीरकेपुरे ६१ एवंशिवंतेपशुवद्विमूढाः विष्णुस्वरूपंनपरंपरंविदुः ततोपि
धन्याःकरवीरवासिनोमृताभविष्यंतिशिवःस्वरूपा ६२ श्रीविष्णुदूतैरभिमृज्यमानाः तदंतुवेलास्त्वविमु
क्तवासं यज्जीवितोप्यत्रमृतास्तुधन्याः विष्णुःस्वरूपाकरवीरवासिनः तेषांहिपुण्यंनतुगण्यतेकिंरुद्रेंद्र
चंद्रादिभिरप्यपूर्वं ६३ तद्वर्ण्यतेकिंसुकृतंमनुष्यैर्गोभूतिलाज्यादिहिरण्यदानां भिक्षाप्रदानादिकृतं ८५
नतुच्छंतस्मात्तुपुण्याः करवीरवासिनः ॥ ६४ ॥ अगस्त्योवाच इत्थमुक्त्वाद्विजःसोथहरींसंस्तुत्यलील

या उद्धृत्याथएवंचितांनिधायाथप्रदग्धवान् ६५ तस्मिन्नेवविवेशाग्नौब्राह्मणीसास्तुविस्मिता तीर्थाविश्वा
सजायायात्प्रायश्चित्तमिवाभवत् ६६ तदग्निस्पर्शमात्रेणादिव्यरूपधरावुभौ अग्निमध्येस्तुविध्मातहे
मवर्णौविरेजतुः ६७ घंटाघोषस्तुनिर्भातदिव्ययानसमास्थितौ स्तुधर्मणासमायुक्तौजग्मतुर्विष्णुमं
दिरं ६८ दृष्ट्वातन्महदाश्चर्यंगंडोराजाजनैःसह स्नात्वातत्रविधानेनजयघोषपुरःसरं ६९
गयास्नातीर्थमाहात्म्यंलक्ष्मीपूज्ययथाविधिः अन्नपात्रमथादायसूर्यलोकसमागतं ७०
राजागृहागतःस्तुभ स्वकीयंलोकसंयुताः ॥ ७१ ॥
इतिश्रीपद्मपुराणेकरवीरमाहात्म्ये अगस्तिलोपामुद्रासंवादेदशाश्वमेधवर्णनंनामएक
विंशतितमोध्यायः ॥ २१ ॥ ॥ श्रीसीतारामचंद्रायनमः ॥ श्रीमहालक्ष्मीदेव
तायैनमः ॥ श्रीसांबसदाशिवायनमः ॥ श्रीकृष्णनाथायनमः ॥ श्रीगजाननायनमः ॥

॥अगस्त्यउवाच॥ दशाश्वमेधमाहात्म्यंप्रत्यक्षंविश्यपार्वती ॥ विश्वथनाथंप्रणम्याथविज्ञप्तुंकिंचिदुद्यता १ श्रीपा
र्वत्युवाच विश्वनाथविरूपाक्षसर्वलोकाघनाशन दृष्टानिबहुतीर्थानिनदृष्टत्वीदृशंक्वचित् २ सर्वदेवगणोपेतंस
र्वतीर्थनिषेवितं भुक्तिमुक्तिप्रदंनृणांकरवीरपुरंमहत् ३ कीदृशीक्षेत्रगुणाः सर्वेसंत्यत्रकरवीरके ऊनमंत्रैकमेवां
गनास्तियन्नारकः श्रुतिः ४ सर्वेषांतारकस्त्वंहिजनानांसर्वतःपिता कृपयादेवदेवेशशरणागतपालक ५ स्थित्वा
चास्मिन्महाक्षेत्रेकृपणान्याहिसर्वदा तारकस्योपदेशेनपुनीहीसकलान्नृतान् ६ अगस्तिउवाच तस्यावाक्यंसमा
कर्ण्यमहादेवोमुदान्वितः हसन्प्रोवाचभगवान्प्रियांतांप्रीतिपूर्वकं ७ श्रीमहादेवउवाच प्रियेनदृष्टमद्यापिक्षेत्रमा
हात्म्यमद्भुतं दशाश्वमेधकंपुण्यंलभ्यतेस्नानमात्रतः ८ संप्राप्यश्चापिवेदेविधर्मशर्मापुनर्भवं दर्शनादेवश्रीदेव्याः
संस्थितः करवीरके ९ देवींपश्यंतियेनित्यंकरवीरनिवासिनः नीराजविधौतेवैयांतिविष्णोः परंपदं १० मुक्तिदे
त्वंतरापेक्षानैवास्तिकरवीरके निरीक्षणांसदादेव्याः सर्वदंसर्वदेहिनां॥ ११ नवेदाध्ययनापेक्षानचषट्दर्शनाश्रमः

नचव्रतंनक्षत्रत्वंनमौनंनतपःश्रमः १२ सत्कुलप्रसवोनैवनवित्तंनबहुज्ञता त्रयीप्राप्तंनकर्मापिनोपदेशोपि
तद्गुरोः १३ तारकस्योपदेशोहि कोपियुज्येतमामकः विनैवतेनसंप्राप्तोधर्मशर्माहरेःस्तनुं १४ वासिनांकरवी
रेवैमुक्तिद्वारमपावृतं त्रिकालदर्शनंदेव्याभिक्षादानंततःपरं १५ परमंमुक्तिबीजंवैपश्चाद्देव्यानिरीक्षणं तद
न्यद्भुवनैश्वर्यंतृणीकृत्यनिरीक्षतां १६ तथाप्युपदिशोदेविलवतुष्ट्येहितारकं दृष्ट्वालक्ष्मींविष्णुरूपांकरवीरनिवासि
नीं १७ येयेतीर्थस्थितादेवायेयेतीर्थस्थिताद्विजाः नावमान्याश्चतेजातुतत्तीर्थफलेप्सुभिः १८ तत्तीर्थस्थिता
न्देवान्द्विजांश्चैवावमान्यच येयत्कुर्वंतितीर्थादि तत्सर्वंनिष्फलंभवेत् १९ तस्मात्वांपरिपृष्ट्वैवकरिष्येतारकंश्रुतिं
मृतानांचैवसर्वेषांकरवीरपुरेप्रिये २० अगस्त्यउवाच एवमुक्त्वाविश्वनाथसहदेव्यास्कमध्यमे गत्वादेवालयंनत्वा
थमहालक्ष्मींप्रणम्यच २१ श्रीविष्णुरूपिणींदेवींतुष्टावाथयथाश्रुतं गीर्भिःपवित्ररूपाभिःस्त्रीमूर्तिरूपधारिणीं २२
एकंब्रह्मैवनित्यंत्रिविधमथचतेसंन्निधानात्परेशे ब्रह्माविष्णुमहेश्वराभिधमभूत्सत्वादिभि—हितं २३ सात्वंजाना

सिसर्वेसकलहृदयगतंसर्वगेसर्वमातः कस्तोतुंत्वांसमर्थःसदयहृदयेवाग्यतोवैनिवृत्ता २४ दैतेयवृंदसुरवृंद
किरीटकोटिजोतिश्छटाभिश्चरकम्पितरत्नदीपं देवीत्वदीयचरणंशरणंजनानांसेवामहेसकलमंगलवर्द्धनाय॥२५॥
उत्फुल्लकैरवदलायतलोचनायैगंडोल्लसच्चटुलकुंडलमंडितायै राकाशशिप्रतिभटाननकोमलायैतस्यैनमःकमल
लोचनवल्लभायै २६ सद्रत्नकृत्स्नकृतिकांहरिकंठभूषांकेयूरहेमकटकोज्वलकंकणांकां संसारसागरमुखेपतित
स्यजंतोर्देहित्वदीयकरयष्टिमनंगमातः २७ अगस्त्यउवाच इतिस्तुताभगवतीशंभुनाविष्णुरूपिणी प्राहप्रसादसु
मुखीसर्वांतर्यामिणीसदा॥२८॥श्रीदेव्युवाच महादेवमहाशंभोत्वमत्रोपदिशप्रभो आगच्छात्रप्रदेदेवीत्वमप्यत्रावि
शप्रभो २९ समागतोयुवामत्रसर्वलोकहितायच संपूर्णकामयोर्नित्यंनतीर्थागमनस्पृहा ३० येषांसंस्पर्शनादे
वतीर्थेनतीर्थतांययुः तेषांतीर्थस्पृहाकिंतुलोकतारणएवहि यस्यसंस्मरणादेव।नश्येत्सर्वमघंकृतं नलोकोपकृ
तेरन्यस्तूलंतीर्थेषुदृश्यते ३१ सोत्रेहितावकेस्थित्वायथालोकान्पुनातिच तथैवमामकेस्थित्वापुनीहीदंजगत्त्रयं ३२

क.म. त्वंहिमद्दक्षिणेभागेनित्यंसंतिष्ठपावन: त्वंन्नाम्नावैभवेत्क्षेत्रंत्रिषुलोकेषुविश्रुतं ३३ गयारोद्रीतिवैनित्यंसर्वदंसर्व
देहिनां माहात्म्यंतववैदृष्ट्वाधृतोसिमस्तकोमया ३४ तस्मात्सर्वप्रयत्नेनलोकानांमुक्तिहेतवे कामनापूर्ववैपूर्वंतस्मा
ज्जपस्कृतारकं ३५ त्वत्पूजामविधायैवयेमत्पूजनतत्परा: तेषांतीर्थफलंनैवभवेत्सर्वंनिरर्थकं अगस्त्यउवाच इतिश्रु
त्वामहादेवोविश्वनाथ: सहोमया संस्थितोदक्षिणेभागेदेव्यावैभुक्तिमुक्तिद: ३७ दशाश्वमेधतीर्थस्यमाहात्म्यंकथि
तंमया प्रष्टव्यंयदिचेदन्यदस्तितत्पृच्छमत्प्रिये ३८ नारदउवाच इतिश्रुत्वामहाख्यानंदशाश्वमेधकस्यहि सर्वती
र्थपुरोदृष्ट्वातत्पप्रच्छाथवैपतिं ३९ लोपामुद्रोवाच पुर: किंदृश्यतेस्वामिन्तीर्थंवैमहदद्भुतं माहात्म्यंतस्यसर्वंहि
समाख्याहिपतेशुभां ४० नारदउवाच इतितत्प्रश्नसंहृष्टोभगवान्सघटोद्भव: माहात्म्यंकथयामाससर्वतीर्थस्यशो
भनं ४१ ७८ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येविश्वनाथवरप्रदानंनामद्वाविंशोध्याय: २२ छ अगस्त्यउवाच
इदंतीर्थवरंदेवीसर्वतीर्थमितिश्रुतं इदंसर्वेश्वराख्यंवैलिंगंपापप्रणाशनं १ सर्वतीर्थेनिरस्नात्वाय: पश्येत्सदाशिवं १

86

सर्वेश्वराभिधंसोथमुच्यतेसर्वकिल्बिषै: २ तीर्थकोटित्रयंसार्धंराहुपर्वसमागमे निरृत्याख्येमहातीर्थेस्नातुमा
यातिपावनं ३ तदत्रविद्यतेनित्यंसर्वतीर्थैर्दिवानिशं स्नानदानरतान्जंतून्पुनातिमहताहस: ४ समाग
दा तार्यदेवायतंद्रष्टुंहिपावनं प्रारब्धंब्रह्मणाश्रुत्वामीलिता: सर्वएवहि ५ विचारंतेथसचक्रुर्नानामुनिगणान्वि
ता: समागतावयंसर्वेयज्ञंद्रष्टुंचब्रह्मण: ६ क्षेत्रंचैकरवीराख्यमिहामुत्रफलप्रदं सत्यनंतानितीर्थानिकर
वीरपुरेसदा ७ लिंगानिचाप्यनंतानिसंतिदिव्यानिसर्वत: कथंतीर्थविधि: कार्यकथंयज्ञसमापनं ८ संप्रार
ब्धापिसंभार्योयज्ञार्थंब्रह्मणोन्वहं नोचेद्ब्रह्माकुपेदस्मात्तीर्थयात्राकृतात्मन: ९ नोपेक्ष्याण्यपितीर्थानिदृष्ट्वा
सर्वार्थदान्यहो क्षेत्रंप्राप्याथयोमूढ: स्नानादिनसमाचरेत् १० कृतंसर्वंनिरर्थंस्यात्पापंचापिभवेत्परं उपेक्ष्यो
स्मिन्वैयज्ञ: सर्वपापप्रणाशन: ११ ब्रह्माचापिकुपेदस्मात्पापंचापिसमाश्रयेत् नपश्यंतिमहायज्ञंनयेकुर्वंति
सेवनं १२ तेसर्वपापकर्माणोयमदंडंसमाप्नुयु: इतिचिंतातुरा: सर्वेदेवावैवासवादय: १३ गुरुंसंपूज्यवि

क॰ म॰ धिवत्पप्रछुरिदमाहृताः देवाऊचुः गुरोवाचस्पतेस्वामिन्शिष्यत्राणपरायणः संसारार्णवमग्नानांपोतवत्ता
रयाशुनः १४ गुरुरेवपरंदैवंगुरुरेवमहत्तपः गुरुरेवपरोधर्मएवंवेदविदोविदुः १५ एवंयश्चिंतयेन्नित्यंतस्य
सिद्धिःकरेस्थिता यस्यसाक्षाद्भगवतीज्ञानदीपप्रदेगुरौ १६ मर्त्यबुद्धिःकृतेनस्यसर्वंकुंजरशौचवत् सचक्षुरंधस्य
यथाग्रणीर्मतोतथाज्ञनस्याविदुषोमतोगुरुः स्वंकर्मदकृसर्वदृज्ञांसमीक्ष्णोमतोगुरुः नेमतिंबुभुत्सुतां कथयाशु
गुरोस्वामिन्यथाधर्मद्वयंभवेत् यत्रैवेसर्वतीर्थानांयज्ञसंसेवनंतथा अगस्त्योवाच ततोगुरुरुराचेदंविचार्यचपु
नः पुनः देवानांरक्षयंन्धर्मंतथायज्ञसमुद्भवं ७ गुरुरुवाच आनीयसर्वतीर्थानितीर्थमेकंप्रकल्पयेत् तत्रस्ना
त्वाभवेत्सर्वंप्रत्येकंस्नानजंफलं एवंकृत्वाभवेत्सर्वंधर्मद्वयमनामयं हितंचापिभवेन्नृणामिहामुत्रफलार्थिनां अ
गस्त्यउवाच इतिश्रुत्वावचस्तस्यसर्वेदेवाः सवासवाः आनीयसर्वतीर्थानित्रैलोक्यांतर्गतानिच पुष्करादीनिस
र्वाणिकरवीरस्थितान्यपि चक्रुस्तीर्थंमहत्तेवैसर्वतीर्थाभिधंपरं सर्वेश्वराभिधंलिंगंदिव्यंसंस्थाप्यतेमुदा वरंचा

89

पिदुस्तत्रसर्वेलोकमनोरमं सर्वतीर्थेचयः स्नात्वालिंगंसर्वेश्वराभिधं पूजयन्विधिवद्भक्त्यातेसर्वेस्वर्गगामि
नः रुद्रेणशतरुद्रेणश्रीरुद्रेणविशेषतः बिल्वपत्रैःसुगंधैश्चशतपत्रैर्मनोरमैः मल्लिकाजातिकाद्यैश्चनानाकुसु
मजातिभिः सर्वेशंयत्रपूज्यंतेतेसर्वेपुत्रपौत्रिणः अस्नात्वासर्वतीर्थेषुयः कुर्याद्दृष्टतीर्थकं तस्यसर्वंनिरर्थंस्या
तीर्थयात्रार्जितंफलं इतिदत्वावरंतत्रमहेंद्रप्रमुखाःसुराः सर्वतीर्थेषुसंस्नात्वादृष्ट्वासर्वेश्वरंतथा यस्यतेयस
हायंचचक्रिरेब्रह्मणःप्रिये ततीर्थपंचनद्यांवैप्लावितंविद्यतेमहत् आनीतायाहियज्ञांतेस्नानार्थंतुम षिभिः
यत्रैवंपंचगंगावैवहतेपश्चिमामुखी जयंत्यासंगतावापितद्भवेत्सर्वतीर्थकं इयंपंचनदीनित्यंशिवरूपाप्रकीर्तिता
शक्तिरूपाजयंतीयंतयोर्योगोहिपुण्यदः यत्रपंचनदीनित्यंजयंत्यासहसंगता तत्प्रयागसमंतीर्थंतत्रसंनिहितो
हरिः नगोमतीनवैगंगानगोदानंचपुष्करं पश्चिमाभिमुखीचेत्स्यात्पंचगंगातिपावनी ॥ स्वभावतःपवित्रैवैसर्व
तीर्थविशेषतः तत्रापिपंचगंगेयंजयंत्यासंगतापरा पश्चिमावहतेयस्मात्तस्मात्काश्याःशताधिका स्करवंभागी

क· म· रथीलभ्या सकृल्लभ्याचगोमती गोदा चापिसुखंलभ्यासकृल्लभ्यासरयूस्तथा नलभ्यतेपंचगंगा जयंतीसंगमेस्थिता
सर्वतीर्थोपरिगतावहतेपश्चिमामुखी इयंपंचनदीगंगानाल्पपुण्यैः प्रलभ्यते संतियास्यांसकृतीर्थानिबाणबाणप्र
माणतः पंचनद्याश्चमाहात्म्यंकोहिवर्णयितुंप्रभुः अस्थिमात्रंपतत्येवांपंचनद्यांस्वभावतः अपिपापात्मनांनित्यं
घोराघघातितात्मनां गतिः सजायतेयेषांयाप्यावैसुकृतात्मनां ४१ नारदउवाच तस्येतिवचनंश्रुत्वालोपामुद्रा
पतिव्रता पप्रच्छाथपतिंसाध्वीतद्वागमृतयंत्रिता ४२ लोपामुद्रोवाच कथंकस्येहसंजातागतिस्तद्विस्तरान्मम
तत्सर्वंकथयस्वामिन्यथावदनुपूर्वतः नारदउवाच इतितत्प्रश्नसंहृष्टोमहामुनिरुदारधीः प्रियांप्रोवाचभगवा
न्षठजन्मापतिव्रतां अगस्त्यउवाच मरीचाख्येमहाक्षेत्रेत्वासीत्कश्चिद्द्विजाधमः नानापापरतः क्रूरः पिशुनः कु
टसाक्षिकः परनिंदारतः पापआत्मघातिगतत्रयः वेश्यासक्तः स्तयासार्धंक्षपयत्धनमर्जितं चौर्यादिनासमा भ
नीतंस्वगृहादपिहारितं चौर्यवृत्यासमालब्धंयद्द्रव्यमपूरितं तदामार्गस्थितांचक्रेमार्गिण्यांवधमेवसः आश्रितः

पर्वतद्रोणीमार्गिण्यांवधकाम्यया आघ्रेणभक्षितः सोथमृतोदुर्मरणात्खलः याम्यैर्दूतैर्दृढंबद्ध्वाप्रणीययातना
गृहं चक्रुस्तस्यमहाघोरायातनाः पापकारिणः असीपत्रवनेपश्चकुंभीपाकेतथैवच कालसूत्रेदृढंपाश्चैरोरवेतु
निपातितः एवंसपचमानस्यनिरयत्पापदर्शनः व्याघ्रोच्छिष्टः स्ततोदेहः श्वादिभिर्भक्षितस्तदा गृध्रेनीतंचतुर्दिक्षुत
स्यमांसंहिपाप्मनः केनचिन्नीयमानांतंगृध्रेणमुखतश्च्युतं५ पतितंपंचगंगायांसास्थिकंपलकंक्वचित् तस्यतत्कृत
तंदृष्ट्वायमः प्रोवाचतान्भटान् आनीयतामरेशीघ्रंरो॰ स्वस्थंहितंद्विजं यमस्याथवचः श्रुत्वाक्षणात्साथनीयतंद्वि
जं पुरतःस्थापयामासधर्मरूपधरस्यच तावद्दिव्यंविमानंवैघंटाघोषसमुज्वलं दिव्यैर्दूतैःसमानीयद्विजंतत्रोपवि
श्यच नीतोद्विजवरः सोथयत्रदेवः शचीपतिः पंचनद्याश्चमाहात्म्यमुक्तंसामान्यतोमया महापापरतस्तीर्णोद्विजो
यत्रास्थिपाततः तारयेत्स्वतटेजंतुंमृतंवायत्रकुत्रचित् साकेनवर्ण्यतेदेवीपंचगंगाघनाशिनी भागीरथेनयानी
तापास्यकार्यांतपोबलात् भागीरथीमहाभागातारयेत्सकलंजगत् तथैवकरवीराख्येक्षेत्रेपंचनदीपरा आनीता

क॰ म॰ स्वनठीचैषाऋषिभिस्तुतपोबलात् भागीरथीस्वरूपेणस्वर्नदीचोत्तरेयथा पुनातिसकलंलोकमागताकाशिकापुरीं
तथैवदक्षिणेभागेकरवीरपुरेशुभे पंचनद्यास्वरूपेणस्वर्नदीतारयेज्जगत् ॥६४॥ ॥छ॥ इतिश्रीपद्मपुराणेकर
वीरमाहात्म्येअगस्तिलोपामुद्रासंवादेसर्वतीर्थवैतीर्थवर्णनंनामत्रयोविंशतितमोध्यायः ॥२३॥ श्रीमहालक्ष्म्यैनमः ॥छ॥
नारदउवाच इतितीर्थद्वयंपत्न्यैसमाख्यायाथमहामुनिः समागतोमुनिश्रेष्ठः करवीरपुरंमहत् १ प्रविष्टएवसंवीक्ष्यस्व
देहलिविनायकं अनुलिप्यततोभक्त्यापूज्यसिंदूरकर्दमैः २ नैवेद्यमोदकान्भक्त्यारक्षयंतंनिजंजनं महोपसर्गेव
गेभ्यस्ततोंतःक्षेत्रमाविशत् ३ आगत्यदृष्ट्वामणिक~~कं~~र्णिकांचसकाशिकांस्वर्गतरंगिणीयुतां संक्षीणपुण्यनरक
र्मणांन्स्वांगणेः स्थाणुगणैरिवादृतां ४ सचैलमाप्लुत्यजलेस्वच्छेमनोविलंबमालंबितशुद्धबुद्धिः संतर्प्यदेवर्षिमनु
ष्यदिव्यपित्दृंस्तथास्वाह्निककर्मकांडवित् ५ आनम्यचैनंमणिकर्णिकेशंसंपूज्यभक्त्याक्षतगंधपुष्पैः श्रीकुंडलेशांप
स्याचभक्त्यानत्वाभवानीशिवसंन्निधौस्थितां ६ समागतश्चाथमुनिर्महेश्वरंविश्वेश्वरंप्रीतमनाःसतीयुतः साष्टां

गमानम्यजयस्वनान्मुदाकृत्वावदून्पूजनमारभन्महत् ७ पंचामृतैश्चेक्षुरसैः पवित्रैः श्रीनारिकेलप्रभवैर्जलैः
पुरैः गंधोदकैःपुष्पजलैःपवित्रैः संस्नापयामासमहेश्वरंसुधीः ८ रुद्रानुवाकैः शतरुद्रियैस्तथाश्रीरुद्रसूक्तैरपि
रुद्रलिंगकैः संस्नाप्यविश्वेश्वरमादिदेवंसमर्चयामासतथोपचारैः ९ सुगंधपंकैरनुलिप्यलिंगंपत्रैश्चबिल्वप्रभवैरने
कैः सहस्रनामाग्रथितैश्चमंत्रैरपूजयद्विश्वमनोहरंहरं १० धूपैश्चदीपैश्चतथोपहारैः शाल्यान्नयुक्तैर्वटकैर्घृतप्लु
तैः नानाफलैश्चापितथापवित्रैः तांबूलयुक्तैःसस्वर्णपुष्पैः ११ नीराजनैर्दीपयुतैरनेकधासन्मंत्रपुष्पांजलिभिः
प्रपूज्यच पुनःप्रणम्याथमहेश्वरंमुनिस्तुष्टावचभक्तिप्रणयेनचेतसा अगस्त्यउवाच देवदेवजगतांपतेविभोभर्गभीम
भवचंद्रभूषण १२ भूतनाथभवभीतिहारकत्वांनतोस्मिनुतवांछितप्रद नीललोहितसमीहितार्थदत्र्येकलोचनविरू
पलोचन १३ व्योमकेशपशुपाशनाशनत्वांनतोस्मिनतवांछितप्रद चंद्रचूडमृडधूर्जटेहरत्र्यक्षदक्षशततंतुशात
न १४ शंतशाश्वतशिवापतेशिवत्वांनतोस्मिनतवांछितप्रद देवदेवशितिकंठशूलधृक्चंद्रशेखरफणींद्रभूषण १५

कर॰ म॰ कामदृरपशुपतेमहेश्वरत्वांनतोस्मिनतवांछितप्रद॥ शार्वरांरहितशर्वसर्वगस्वर्गमार्गसुखदायवर्गद॥१६॥ अंध
सुर कौरिपोथकपर्दिस्त्वांनतोस्मिसुतवांछितप्रद॥ त्र्यंबकत्रिपुरसूदनगर्भशापशुक्तिनयनत्रयीमय॥१७॥ कालकूट
दलनांतकोलकत्वांनतोस्मिसुतवांछितप्रद॥१८॥ शंकरोग्रगिरिजापतेशिवविश्वनाथविधिविष्णुसंस्तुत वेदवेद्य
विदिताखिलगीतत्वांनतोस्मिसुतवांछितप्रद॥१९॥ नारदउवाच स्तुत्वेत्थंविश्वनाथंवेधसजन्मामहामुनिः॥ तद्द
र्शनमहानंदेननर्तमुक्तिमंडपे २० धन्योहंसुलकल्योहमद्यविश्वेशदर्शनात् काशीविरहजंदुखंविस्मृतः करवी
रके २१ जयविश्वेशसर्वात्मन्करवीरपुरीगतः ज्ञात्वेवंक्षेत्रमाहात्म्यंसर्वं शत्वंजयप्रभो २२ मत्पापक्षपणंक
र्तुमागतः किंपुरेवहि भक्तवत्सलविश्वेशपाहिपाहिकृपानिधे २३ इतिस्तुत्वामहादेवंदेव्यादर्शनलालसः सनि
र्गतोमुनिश्रेष्ठदेवान्पश्यन्प्रदक्षिणं २४ योगतीर्थेपुरस्नात्वादृष्ट्वायोगेश्वरंतथा कनकाख्येमहाकुंडेततःस्नात्वा
विधानतः २५ कनकेशंसुसंपूज्यतीर्थमप्सरसांगतः अप्सरेशंततोनत्वागोरंभातीर्थमागतः स्नात्वातत्रविधाने

नगोरंभांपूज्यभक्तितः २६ विनायकंततोनम्यनत्वाचैवदंडपाणिनं नत्वाकामाक्षिकांदेवींवाराहीतदनंतरं २७ ब्रह्मा
णंचततोनत्वाविष्णुंनत्वाततःपरं शिवंनत्वाततःसम्यकततोविश्वेश्वरंगतः २८ कुक्कुटेशंनमस्कृत्यतथान्यानपिस
र्वशः दत्तात्रेयमुनेश्चाथपादुकेशंप्रणम्यच २९ सिद्धविघ्नेश्वरंनत्वासिंहवाहनमेवच गरुडंवाहनंदेव्याखितंगरुड
चत्वरे नत्वाचैवविधानेनतस्यैवपुरतस्थिते देव्याश्चपादुकेनत्वाप्रविष्टोमुक्तिमंडपं ३१ देव्याश्चैवोत्तरेभागेमहा
कालींप्रणम्यच दक्षिणाभिमुखींदेवीमाखिलांसर्वसिद्धिदां ३२ पूजयित्वाविधानेनस्तुतिंचक्रेघटोद्भवः अगस्त्य
उवाच दैत्यसंहारकर्त्रींत्वांमहामायांसुरेश्वरीं ३३ श्रीरुद्ररूपिणीदेवीमहाकालीतमोगुणां दशवक्त्रांदशभुजांसर्वा
भरणभूषितां ३४ श्रीरुद्ररू॰पिणीदेवीमहाकालीतमोगुणां त्रिंशद्योजनयुक्तास्यामंजनाभ्पांमहेश्वरीं श्रीरुद्र॰
शंखचक्रगदाशूलखड्गबाणधरांपरां श्रीरुद्ररूपिणीदेवीमहाकालीतमोगुणां परिघंकार्मुकंशीर्षंभुशुंड्यायुधधा
रिणीं श्रीरुद्ररूपिणीदेवीमहाकालीतमोगुणां नारदउवाच इतिस्तुत्वामहाकालींनत्वाश्चैवपुनःपुनः महासरस्व

कू॰र॰ म॰ तीद्रष्टुंततोगच्छन्महामुनिः देव्याश्चदक्षिणेभागेस्थितांचैवोत्तरामुखीं महासरस्वतींपूज्यनत्वासर्वविचक्षणः म
हासरस्वतींदेवींतुष्टावामितविक्रमां अगस्त्यउवाच अक्षमालांकुशधरांवीणापुस्तकधारिणीं महासरस्वतीदे
वंदेरजोरूपांविधेस्तनुं श्वेतपद्मासनादेवींरक्तकांतिकनकांबरां महासरस्व॰ चंद्राननांविशालाक्षींविद्यादानरतां
परां महासरस्वतीवंदेरजोरूपांविधेस्तनुं ४० हंसासनसमारूढांसितचंदनचर्चितां महासरस्वतीवंदेरजोरूपां
विधेस्तनुं ४१ सर्वसिद्धिप्रदादेवीकमंडलुधरांपरां महासरस्वतींवंदेरजोरूपांविधेस्तनुं ४२ नारदउवाच म
हासरस्वतीस्तुत्वालक्ष्मीदर्शनलालसः समागतोमहाद्वारंकालवेतालरक्षितं ४३ तौपूज्यविधिवद्भक्त्यास्तुत्वा
नत्वाततःपरं गर्भागारंमहादेव्याविवेशाथमहामुनिः ४४ तत्रापश्यन्महालक्ष्मीमास्थितांपश्चिमामुखीं दिव्य
सिंहासनवरेज्वलन्मणिविभूषिते ४५ चतुर्भुजांमहादेवीगदाखेटादिधारिणीं भूषयंतीभूषणानिकुंडलादीन्य
नेकधा ४६ दिव्यनूपुरवेषाढ्यांदिव्यांबरधरांपरां मुक्ताहारसमायुक्तांकटिसूत्रविराजितां ४७ दिव्यांगदवि

भूषाढ्यांकिंकिणीजालमंडितां दिव्यमाल्यांबरधरांदिव्यगंधानुलेपनां ४८ सुस्तनींकृशमध्यांतांनितंबवरभू
षितां सूर्यकोटितिरस्कारिनखमंडलमंडितां ४९ प्रवालरत्नवैडूर्यनीलादिमणिभूषितां नीराजितासखीयुक्ता
कात्यायन्याःपृथकपृथक ५० चतुःषष्टियोगिनीभिश्चामरध्वजनादिभिः सेव्यमानपदांभोजांनीराजनविधौ
सदा ५१ सगणैःकालवेतालप्रमुखैर्द्वारसेवितां जयोदयस्वनैर्देवीब्रह्मादिभिरभिष्टुतां ५२ एवंविधामहाल
क्ष्मींदृष्ट्वानंदसुनिर्भरः ननामभुविकायेनस्तोत्रमुच्चारयन्मुनिः ५३ अगस्त्यउवाच नमस्तेस्तुमहामायेश्रीपी
ठेसुरपूजिते शंखचक्रगदाहस्तेमहालक्ष्मीनमोस्तुते ५४ नमस्तेगरुडारूढेकोल्हासुरभयंकरी कौमारीवैष्ण
वीब्राह्मीमहालक्ष्मीर्नमोस्तुते ५५ सिद्धिबुद्धिकरेदेवीभुक्तिमुक्तिप्रदायिनि मंत्रमूर्तिसदानंदेमहालक्ष्मीर्नमो
स्तुते ५६ स्थूलसूक्ष्मेमहारौद्रेमहाशांतेमहोदये महापापहरेदेविमहालक्ष्मिर्नमोस्तुते ५६ पद्मासनस्थि
+ श्वेतांबरधरेदेविरत्नाभरणभूषिते जगत्स्थितेजगन्मातेमहालक्ष्मीर्नमोस्तुते ५७ + तेदेवीपरब्रह्म

कर० म० स्वरूपिणी पद्महस्तेजगत्पूज्येमहालक्ष्मीर्नमोस्तुते ५८ सर्वेशेसर्ववरदेसर्वदुःखविनाशिनी सर्वपापहरे
देवीमहालक्ष्मीर्नमोस्तुते ५९ आद्यंतरहितेदेवीह्यादिशक्तेह्यगोचरे योगिनीयोगसंभूतेमहालक्ष्मीर्नमोस्तु
ते ६० महालक्ष्म्यष्टकंपुण्यंयः पठेद्भुक्तिमुक्तिदं दुःखदारिद्र्यनिर्मुक्तः सर्वान्कामानवाप्नुयात् ६१ नारदउ०
इतिनत्वामहालक्ष्मींपूजाद्रव्ययुक्तांमुनिः पूजयामाससंप्रीत्याविधिवन्मुनिपुंगवः ६२ पंचामृतैस्तुसंस्नाप्य
तथाशुद्धोदकैः पृथक् नारीकेलोदकैस्नाप्यनानापुष्परसैस्तथा ६३ अभ्यज्यचंपकैः स्नेहैः कस्तूर्यादिसुक
र्दमैः उद्धृत्यस्नापयामासमहोष्णैर्वारिभिर्मुनिः ६४ श्रीसूक्तैर्लक्ष्मीसूक्तैश्चअंवासूक्तैर्विशेषतः महाभिषेकं
कृतवान्महापुण्यजलैर्मुनिः ६५ दिव्यैस्तथांशुकैः पूज्यचंदनैर्विविधैरपि जातीचंपकमाल्याद्यैः कुसुमैर
पिपूज्यच दिव्यैर्धूपैः प्रपूज्याथरत्नदीपैस्तथैवच नैवेद्यैर्विविधैर्भक्त्यापूजयामासनिर्मितैः ६७ शाल्यान्नैर्व
टकैः सूपैः घारिभिस्तुतथैवच घृतपक्वैस्तथाचान्यैः पायसैर्विविधैरपि ६८ लेह्यैः पेयैः सचोष्यैश्चसंपू

ज्यविधिवन्मुदा दिव्यकर्पूरसंयुक्तैस्तांबूलैः सुमनोरमैः ६९ फलैश्चबहुभिः पूज्यदक्षिणाभिस्तथैवच नीराजनै
रनेकैश्चपूजयित्वासवैमुनिः ७० सहस्रनामभिश्चैवबिल्वपत्रैः पृथक्पृथक् पूजयामासविधिवल्लक्ष्मीस्तोत्रैः पृ
थक्पृथक् ७१ मार्कंडेयउवाच यैः पूजितामहालक्ष्मीसहस्रनामभिर्मुने मुनिनातेनतानीहममाख्याहिमहामते
७२ त्वद्दर्शनंमुनिःश्रेष्ठसर्वसिद्धिप्रदंमम जातंयत्पूर्वपुण्येनमहाभाग्यंहिमामकं ७३ नारदउवाच सुगोप्य
मपिवक्ष्येहंत्वत्स्नेहान्महामुने देव्यानामसहस्रंहिभुक्तिमुक्तिप्रदंनृणां ७४ यन्नाख्येयंमुनेस्तोत्रंनास्तिकायशठा
यच कथनीयंहिशांतायश्रद्धाभक्तियुतायच यदादेव्याहृताः सर्वेमहिषाद्यामहासुराः ७५ ब्रह्मादिभिः कृतंस्तो
त्रंतदासंतुष्टमानसैः ब्रह्मणायत्समाख्यातंकुमारायमुनेपरं ७६ तेनयत्कथितंदिव्यंयोगिभिः सर्वसिद्धिदं तद
हंसंप्रवक्ष्यामिदेव्यानामसहस्रकं ७७ त्वत्स्नेहान्महाभागतदहैकमनाः शृणु नारदउवाच सनत्कुमारमासीनं
द्वादशादित्यसंन्निभं ७८ पप्रच्छुर्योगिनः सर्वेभुक्तिमुक्तिफलप्रदं योगिनउचुः भगवन्केनमंत्रेणभुक्तिमुक्तिर्भवि

चिष्यति ७९ तन्नोब्रूहिमहाभागप्रसादंकर्तुमर्हसि दारिद्र्यध्वंसनंकेनकेनविद्याविवर्धनं ८० केनवाब्रह्मविद्याप्तिः
केनवामृत्युनाशनं कथंविद्याकथंसिद्धिः कथंवासर्वसिद्धयः किमत्रबहुनोक्तेनसर्वसिद्धिः कथंभवेत् ८१ तत्सर्वं
ब्रूहिमेदेवसर्वज्ञोसिनमोस्तुते सनत्कुमारउवाच साधुपृष्टंमहाभागे: सर्वलोकहितार्थिभिः महतामेवधर्मस्याय
परार्थरतिःसदा ८२ ब्रह्माविष्णुमहादेवैर्महालक्ष्मीः स्तुतिःपुरा ॥ प्रोक्तांतांकथयिष्यामिदुष्टदारिद्र्यभंजनी श्रीवि
ष्णुरूपिणीदेवीभुक्तिमुक्तिप्रदायिनी सर्वकर्ममयीदेवीसर्वस्तुतिपरायणा सर्वकर्मफलाप्रोक्तासर्वज्ञाज्ञाभयापहा स
र्वकर्ममयीदेवीचतुर्वर्गफलप्रदा तस्यानामसहस्रंवोभुक्तिमुक्तिफलप्रदं महालक्ष्मीभवेत्तस्यदेवतासर्वसिद्धिदा
ऋषिः ब्रह्माभवेत्तस्यछंदोनुष्टुप्तथैवच भुक्तिमुक्त्यादिसंप्राप्त्यैविनियोगः प्रकीर्तितः ध्यानंतस्याः प्रवक्ष्यामि
सर्वसिद्धिप्रदंनृणां सर्वपापहरंपुण्यंपवित्रंपरमोत्तमं सर्वसिद्धिर्महालक्ष्मीस्त्रिगुणापरमेश्वरी लक्ष्यालक्ष्यस्वरूपा
साव्याप्यकृत्स्नंव्यवस्थिता मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती नागंलिंगंचयोनिंचबिभ्रतीचैवमूर्धनि स्व

95

र्णभादिव्यवर्णाचसर्ववर्णयुतासती सर्वसिद्धामहालक्ष्मीः सर्वचित्तमनोहरा शांतमादौशांतंचांतेमूलंजप्यार्थ
सिद्धिदं नाम्नामष्टसहस्राख्यंमध्येस्तोत्रमिदंजपेत् ॥ छ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येअगस्तिलोपा
मुद्रासंवादेचतुर्विंशोध्यायः ॥ २४ ॥ छ ॥ सनत्कुमारउवाच ॐ महालक्ष्मीर्महाकालीमहाकन्यासरस्वती महा
सरस्वतीदेवीभक्तानुग्रहकारिणी ईशानीशामहादेवीमहामायामहेश्वरी ईशानास्यामहालक्ष्मीमहादेवीमहेश्वरी
हृल्लेखापरमाशक्तिर्मातृकाबीजरूपिणी नित्यासर्वस्वतीनत्वानित्यानंदानिरंजना नित्यप्रकाशिनीदेवीस्वप्रकाशस्व
रूपिणी त्रिपुराभैरवीविद्याहंसावागीश्वरीशिवा ४ वाग्ज्ञात्रीचमहारात्रिः कालरात्रिस्त्रिलोचना महाकालीकपा
लीसामहागौरीतिलोत्तमा ५ कालीकरालीविक्रांताकामाक्षीकामदाशुभा चंडिकाचंडरूपाचचामुंडालिंगधारिणी
६ त्रैलोक्यविजयादेवीत्रैलोक्यविजयोत्तमा सिद्धलक्ष्मीर्महालक्ष्मीर्मोक्षमार्गप्रदायिनी उमाभगवतीदेवीचंडी
दाक्षायणीपरा प्रत्यंगिराः परावेलालोकमाताहरिप्रिया पावनीचरमादेवीब्रह्मविद्याप्रदायिनी अरूपाबहुरूपाच

१०

कर· म· चिद्रूपानंतरूपिणी पंचभूतात्मिकावाणीपंचैकापंचरूपिणी शक्तिदापुंजिकापंक्तिर्भुक्तिमुक्तिप्रदांबिका गायत्रीसां
ख्यसंभूतासावित्रीप्रणवात्मता देवमातासुरेशानीदेवगर्भात्मकाधृतिः सांख्यजातिक्रियाव्यक्तिः प्रकृतिर्मोहिनीम
ही यज्ञविद्यामहाविद्यागुरुविद्याविभावरी ज्योतिष्मतीमहामातासर्वमंत्रफलप्रदा दारिद्र्यध्वंसिनीदेवीहृदयग्रं
थिभेदिनी सहस्रादित्यसंकाशाचंद्रिकाचंद्ररूपिणी अकारादिमकारांतामातृकावर्णरूपिणी समाशांताचसावित्री
गायत्रीप्रणवाक्षरात् शाकंबरीवैष्णवीचसर्वदेवनमस्कृता नवदुर्गाविशालाक्षीकरवीरनिवासिनी कुब्जिकाकौलि
काशास्त्रीवीणापुस्तकधारिणी सर्वशक्तिस्त्रिशक्तिश्च ब्रह्मविष्णुशिवात्मिका इडापिंगलमध्यस्थामृगलीतंतुरूपि
णी यज्ञसेनीध्रुवादीसादक्षिणासर्वमोहिनी अष्टांगयोगिनीदेवीनिर्बीजाध्यानगोचरा २० सर्वतीर्थस्थितासर्वा
भूपर्वतनिवासिनी वेदशास्त्रब्रह्मरूपाषडंगपदविक्रमा शिवाधात्रीशुभानंदायज्ञकर्मस्वरूपिणी व्रतिनीमो
निकादेवीब्रह्माणीब्रह्मचारिणी एकाक्षरापरातारातारकाभयभंजनी ऋतंभरानिराधारानिराधाराधिकाक्षरा रा

96

काचक्रूरभावाचपूर्णमास्यामहाद्युतिः सिनीवालीविशालाक्षीरक्षोघ्नीपुष्टिकारिणी दुष्टविद्राविणीदेवीसर्वोपद्रवना
शिनी जयाचविजयाचैवजयंतीचापराजिता सुह्याबहामहादेवीसर्वपर्वतनिवासिनी अयुतायुद्धरूपाचप्रशांतासर्व
रूपिणी समुद्रवसनेशानीब्रह्माउश्रोणिमेखला पंचवक्त्रादशभुजाशुद्धस्फटिकसंनिभा शारदाशांकरीधारासर्वशा
स्त्रास्त्रधारिणी गंगासरस्वतीवेणीयमुनानर्मदातथा रक्तापीतासिताशावासर्ववर्णागिरीश्वरी गुर्वीकात्यायनीशुभ्रासं
सारार्णवतारिणी कपिलाकर्णिकाशोणामल्लिकानवमल्लिका कौशिकीचक्रियादेवीसबलाचक्रिकास्थिता सर्वभक्ष्यात्मि
कापंक्तिर्विश्वभक्तिर्जयात्मिका दिग्वासावनवासाचकर्णिकाकमलोद्भवा श्रीसूक्तलक्षणादेवीदुर्गासत्वप्रबोधिनी श्र
द्धामेधाधृतिः प्रज्ञाधारणाशांतिरेवच श्रुतिस्मृतिर्धृतिर्धन्यावधिरेषामनस्विनी विभक्तावैष्णवीमायासर्वमायाप्रभं
जनी माहेंद्रीमानुषांगीमाहेंद्रीतालरूपिणी अवस्थात्रयनिर्मुक्तासर्वरोगविवर्जिता एषणात्रयनिर्मुक्तागुणत्रयवि
वर्जिताः योगज्ञानैककाम्याचयोगज्ञानपरायणा त्रयीविश्वावशोकाख्यविदांतज्ञानरूपिणी भारतीकमलाभाषापद्मा

पद्मवल्लीप्रिया गौतमीगोमतीगौरीनरहंसप्रवाहिनी नारायणीप्रभाधाराजाह्नवीशंकरात्मिका व्याघ्रचर्मपरीधाना
नागयज्ञोपवीतिनी निर्मांसाभस्मदिग्धांगीअस्थिकंकालरूपिणी विशीर्णाचविशालाक्षीछायादेवीकुरेश्वरी चित्रघंटा
कुनंदाश्रीमालिनीमनुसंभवा स्तंभिनीस्तोभिनीवीणाभ्रामिणीवारुणीकृतिः मोहिनीद्वेषिणीघोराद्यघोरारूपरूपि
णी रुद्रैकादशिनीपुण्याकल्याणीलाभकारिणी देवदूतिर्महादूतिः स्वप्नदुर्गाष्टभैरवी सूर्यचंद्रार्धमात्रासाग्रहन
क्षत्ररूपिणी बिंदुनादकलानीताबिंदुनादकलात्मिका उशानादुर्जनाकाराकुलाषोडशासंयुता काश्यपीकमलादेवी
नाभि चक्रनिवासिनी हृदाधारास्थितागुह्यदेविकाचक्ररूपिणी आदित्याशार्वरीशुभ्राशुंभास्करनिवर्हिणी त्रिशि
खाविशिखासुभ्राकर्मनिर्मूलकारिणी आदिलक्ष्मीर्गुणाधाराशुद्धब्रह्मात्मिकाबला कुलब्रह्मस्वाधारासर्वचित्र
स्वरूपिणी मृतसंजीवनीदेवीकामिनीकामवर्जिता निर्वाणभाग्यदादेवीहंसकाकौशिकीक्षमा अच्छिद्यागुणिनीवे
दान्निर्गुणाखंडितासदा सौदामिनीवेदजाख्याशबलाचक्रधारिणी दंडिनीमुंडनीव्याघ्रीशशांखिनीसोमसंमता

सौत्रामणीसदानंदापंचबाणप्रभंजनी बाणशोकसहस्राक्षीसहस्रभुजपादुका संध्यावलीत्रिसंध्याख्याब्रह्मांड
मूर्तिरूपिणी राजिकारत्नमालाचकामधेनुगुरुक्रमात् चिंतामणिरूपादेविकर्णिकास्वर्णभूषणा अश्वत्थावारुणीसे
नाकाग्निकाकामभंजनी पंचप्रणवरूपाद्याकांताकाम्पतराजना मंत्रब्राह्मणविद्याचनादरूपाहविष्मती अथर्वणश्रु
तिः शून्याकल्पनावर्जितासती सत्यज्ञानीप्रभामैत्रीप्रकृतिः पार्वणासती अवर्णापंचवर्णाचएकवर्णाभुवनेश्वरी त्रै
लोक्यमोहिनीविद्यासर्वाधाराक्षरेश्वरी हिरण्यवर्णाहरिणीसर्वोपद्रवभंजनी कैवल्यपदवीलेखासूर्यमंडलसंस्थि
ता सोममंडलमध्यस्थानक्षत्रमंडलेस्थिता वायुमंडलमध्यस्थाव्योममंडलसंस्थिता सर्वसिद्धांतमार्गस्थावर्णा
वर्णविवर्जिता शांतरूपासंहरंतीसर्वसंहारकारिणी चक्रिकाचक्रमार्गस्थाचक्रमार्गप्रवर्तिनी कौलिकीचक्रकेशी
चपक्षिणीपंक्तिपावनी कुलभापौरुषीतुष्टिः सर्वसत्वप्रसूतिका धर्मनारीश्वरीदेवीसर्वविद्याप्रदायिनी पार्वतोपो
रूपीविद्यासर्वोपनिषदास्थिता त्रिकालज्ञानदाशांतानंदिनीकमलासना रक्षाशांतिप्रथादेवीगंधर्वीगंधवाहिनी

अचिंत्यलक्षणागोत्रानामजात्यादिवर्जिता सत्तमात्रापरिछिन्नाकैवल्यज्ञानदीपिका व्योमकेशाखिलाधारापं
चकोशाविलक्षणा पंचकोशात्मिकादेवीपरब्रह्मात्मिकाभर्त्री जयाजराजयंतीचत्रैलोकमाताप्रसूतिका वाग्देवीभार
णाकांतासर्वसामान्यसंस्थिता अष्टांगाचचतुःषष्टिर्गणिकाविद्ययार्चिता कालिंगीकर्षणीश्यामापक्षिणीकिंनरेश्वरी
केतकीमल्लिकाशोणावाराहीचधराधरा नरसिंहीमहोग्रास्याभक्तानांमृत्युनाशिनी अंतर्बहिस्थितालक्ष्मीर्जरामरणना
शिनी त्र्यंबकाचमहामारीसोमसूर्याग्निलोचना अदितिर्देवमाताचसुमित्राचसूर्ययोनिका अष्टप्रकृतिरिष्टाचविभ्रष्टा
विकृतिःकृतिः दुर्भिक्षध्वंसिनीदेवीसीतासत्यस्वरूपिणी ख्यातिश्चभार्गवीदेवदेवयानातपस्विनी शाकंभरीमहाद्यो
गागरुजेपरि२७संस्थिता विशिख्याव्याघ्रपादेवीवायुवेगातिभीषणा अकारादिमकारांतासर्वविद्याधिदेवता मंत्रव्या
करणाकाराज्योतिःशास्त्रस्वरूपिणी इडापिंगलमध्यस्थासुषुम्नानाडिभेदिनी कालचक्रप्रयुक्तास्याकालचक्रप्र
वर्तिनी वैशारदीमतिज्येष्ठाश्रेष्ठावेसर्वदीपिका वैनायकीवरारोहाश्रोणिमोलीचबर्बरा जृंभिणीजृंभिणीजृंभागणि

कागोलिकापरा शरभाचंद्रिकानंदासर्वव्याधिप्रभेषजा देवकीदेवसंकाशावारिधिः करुणाकरा शांभवीसर्वसंप
न्नासर्वपापप्रभंजनी एकमात्राद्विमात्राचत्रिमात्राचतथापरा अर्धमात्रातथासूक्ष्मास्वगम्याचतथापरा एकवीरा
विशेषाख्याषड्गोमथनस्वनी निष्कम्पनिष्कलाकोलाज्ञानकर्मात्मिकागुणा सुसांद्रानंदसंदोहाव्योमकेशनिरूपिणी
गद्यपद्यात्मिकावाणीसर्वालंकारसंयुता सामवेदपदन्यासासंस्कृतासंस्कृतावरां षट्कर्कशाकारासर्वतर्कविवर्जि
ता आदित्यवर्णास्वर्णाभातपसःपररूपिणी ब्रह्मण्याब्रह्मसंतानावासवस्याजनेश्वरी पुराणन्यायमीमांसाधर्मशास्त्रां
गमिश्रिता वेदावेदवतीसर्वाहंसविद्याधिदेवता विश्वेश्वरीजगद्धात्रीजगन्निर्वाणकारिणी नारायणीमहादेवीसर्वस
त्वप्रवर्धिनी हिरण्यावकरूपासाहिरण्यपदसंभवा कैवल्यपदवीपुण्याकैवल्यपदगोचरा ब्रह्मसंपत्तिरूपासाहिरण्य
पदसंसंभवा भरणाचरणाधारासर्वलोकप्रवर्तिका एकाक्षरपरायुक्तासर्वदोषप्रभंजनी पाशांकुशधरादेवीवीणावा
दाक्षसूत्रिका कपालिनीमहादंष्ट्राभ्रकुटीकुटिलानना एकमूर्तिस्त्रयीधारामधुकैटभभंजनी सर्वानासासुवासाश्च

कर· म· बृहतीजगतीसमा छंदस्त्रिष्टुप्प्रतिष्ठाश्च कल्याणीरक्षणात्मिका चक्रभ्रमतीमहाघोराखड्गचर्मधरासिनी शिल्पविद्या
श्रयादेवीसर्वतोभद्रकारिणी अचिंत्यलक्षणासिद्धांतसूत्रभाष्यनिरुंबिनी सर्वविद्यार्थसंपत्तिः सर्वशास्त्रार्थमातृका अका
रादिक्षकारांतामातृकाचालिपिक्रिया स्वाहास्वधास्वरूपाचस्तोत्राक्षरनिरूपिता त्रयीविद्यासदानंदात्रयीविद्यासदाशि
वा सर्वज्ञासर्वसाक्षीचप्रसंन्नाचचराचरा अणिमादिगुणोपेतापराकाष्ठापरागतिः हंसयुक्तविमानस्थाहंसारूढाशशि
प्रभा वभवानीवासनाचितिः प्रकृतिः कमलामला तंत्रीतंत्रीविचित्रांगीव्योमांगंगावलिप्रिया वारुणीवारुणीवेश्याकृप्य
नुः सामरूपिणी महानदनदीपुण्यागंगापुण्यागनाश्रया समाधिर्धारणाध्येयाश्रोतव्याश्रोत्रियाघ्रिणिः रामप्रियामहादेवी
स्युपसर्गाभुजारुणा निपातारुंधतीजंघासर्वमालाविशेषणी आसीनाचशयानाचतिष्ठतीधावतीतिच लक्ष्मीरलक्ष्मीरूपा
चस्वरूपागणिकाकृतिः एकरूपातपोरूपास्त्ररूपाचतथाकृतिः समासतद्धिताकाराविभक्तिर्व्यंजनात्मिका स्वराकारानि
राकारास्त्रीसत्यतिविशेषता गंभीरागहनागुह्यायोगलिंगागधारिणी शेषवासुविकिश्रांताब्रह्मांडफलचंचला करुणार

९१

ससंपत्तिः कीलकामंत्रकीलका शक्तिबीजात्मिकासर्वामंत्रामंत्रफलात्मिका आग्नेयीपार्थिवीव्याघ्रीवारुणीव्योमकी
तनुः सत्यज्ञानात्मिकानंताब्राह्मीदेवीसनातनी अविद्यावासिनीमायाप्रकृतिर्मोहिनीतिच शक्तिराधारशक्तिश्चचिच्छक्ति
श्चातिशक्तिका चक्रारीह्रीमहामारीमानवीमानरूपिणी वीराविराजमानस्थासर्वमार्गप्रदायिनी त्रिकालज्ञानसंतानात्रि
कालज्ञानदायिनी आज्ञापहामज्जनीचभवानीभवभंजनी नानाज्ञप्तिः स्मृतिः प्रज्ञाधात्रीदेवीत्रिलोचना परचित्तविधा
नज्ञा विशेषगुणसंश्रया हिरण्यकेशिनीदेवीब्रह्मसूत्रविचक्षणा एकाद्ययुतपर्यंतावर्णामात्रात्मिकापरा मधुयज्ञामधु
मतीमधुनासामधुप्रिया माध्वीदेवीमहाभागास्निग्धांगीचतरस्विनी ब्रह्मविष्णुशिवध्येयाध्यातव्याचविशेषतः नाभौव
ह्निशिखाकाराललाटेचंद्रसंनिभा भ्रूमध्येभास्कराकारा मुंडकंठहृदिस्थिता कृत्तिका धुडुसंस्थाना काशिकामालिका
त्मिका विद्याविद्यात्मिकादेवीपंचभूतात्मिकाक्षया सर्वमंत्राक्षराबीजा सर्वकामप्रदायिनी ब्रह्मांडगर्भिणीदेवीसदाव
रणमातृका वैराजपुरुषाप्रज्ञाकुमारीकुलिशात्मिका अचलाविचलादेवीशिवदूतीशिवात्मिका हिमवंध्याद्रिकासंस्था

कर॰ म॰ नाकावेरीरश्मिसंस्थितिः योगनिद्रामहानिद्रावनिताराजताश्रया ह्रास्कपर्णाभिधारंगासर्वकामार्थदायिनी अजपा
नामयाविद्यामहालक्ष्मीसरस्वती प्रासादैकाक्षरादेवीजीवंतीजीवमातृका आसुरीराक्षसीदेवीकल्याणीकल्पनाकृतिः
पंचसामात्मिकादेवीसप्तसामात्मिकातथा उद्गीथोपासनारूपापंचाग्निविद्यसाकृतिः त्रेताग्निचित्घनाचापिसर्ववि
द्येश्वरीतथा भक्तिलभ्यामहादेवीज्ञानेचापिविशेषतः सर्वरक्षामहामायाऋषिदेवनमस्कृता अष्टाष्टकमहारूपाप्र
त्यक्षातिप्रमातृका वेदशास्त्रप्रमातीता मिथ्याप्रपंचवादिनी सत्यप्रपंचवादाख्याविशोकाशोकनाशिनी मौक्तिकाभू
तसूक्ष्माद्याद्यादिभूतादिदेवता अपिलोकाधिपंचाख्यापंचाख्यापंचसंस्थिता उद्धारिणीकलावेद्याचेतनाचित्तरंजि
नी एकसंख्यापरार्धांतासंख्यासंख्येयरूपिणी समुद्रव्योममध्यस्थाव्योमबुद्धिसमाश्रिता वीणासरस्वतीदेवीवैष्णवी
विष्णुसंभवा वलित्रयसमायुक्ताभारतीभरताश्रया शब्दब्रह्मात्मिकादेवीज्ञानब्रह्मपरात्मिका ज्ञानब्रह्मेश्वरीदेवीब्रह्म
कैवल्यरूपिणी ब्रह्मज्ञानेश्वरीदेवीज्ञानब्रह्मपरात्मिका कालिकेयीमहाघोरामहोदधिजलाश्रया वडवाग्निमुखादे

100

वीयोगिनीयोगदायिनी महाफलामहामायामहाविद्याप्रदायिनी पंचभूतमहाग्रासीपंचभूताधिदेवता सर्वप्रमाणसंपत्तिःस
र्वापाहृन्निवारिणी ब्रह्मांडबहिरंतस्थावर्णमात्राधिदेवता महामालामहाभोक्त्रीमंगलाचसमाश्रया आर्याशिवकरादेवीप्र
वरावरहेतुकी हेतुकीहेतुमालाचत्रिशिखापंचलोचना सर्वागमसदाचारामन्युहारवपरंपरा गीतागाथाचचंद्राभासर्वा
तर्ज्योतिरूपिणी सात्मिकासामगासामीवीरभद्राजनाश्रया जीवयंतीमहाताराशवणीतरणीहिंसाज्योतिश्चक्रसमासोमा
सूर्याग्निसंनिभातथा अर्धचंद्रोल्लसद्दंष्ट्राब्रह्मार्कवह्निसंस्तुता सप्तजिह्वामहाजिह्वामहापापप्रभंजनी महोग्राच
महोत्साहामहाभक्ताधिदेवता भुवनज्ञानसंपन्नाभवनाकारसंयमा शाश्वतीशाश्वतीलोलालोलौकानुग्रहकारिणी सर
सीमानसिंहंसीहंसलोकप्रदायिनी योगनिद्राकराबंधाभानुकोटिसमप्रभा लोकपुण्यामहादेवाद्दिष्टकार्याधिकारिणी
सर्वसंकरदोषघ्नीग्रहोपद्रवनाशिनी कलिदुःखप्रशमनीब्रह्महारिप्रभंजनी सदाशांतात्मनादेवीगृहेकलिविभंजनी
सर्वदेवनिवासाख्याभ्रामरीभ्रमरस्वना यक्षीणाहाकिनीदेवीशाकिनीडाकिनीतथा काकिनीलाकिनीचैवषडाधाराधिदे

वत्ता गौणिकाल्काक्षिणीमुख्याजघन्यान्तलवर्जिता अविद्यापावनीमायाचेतनाचितरंजनी वासवीवस्करूपासाद्वियरूपप
रिछरा छांदसीछंदरूपासामंत्रस्वछंदभैरवी नरमालानराझंसीनिरोषाग्रहरूपिणी सदानंदासदाकारानिष्प्रपंचाग्निरा
श्रया सत्वाराध्यारमारा मारमणीमृत्युभंजनी ज्येष्ठकाष्ठाकनिष्ठाचलक्ष्मीगर्गागुणाश्रया मैत्रेयीमित्रवंदाचशे
षाशिवकलाश्रया वारणस्यांस्थितादेवीमृत्युंतत्रैवयछती अंतर्बहिःस्थितादेवीसाथिनीज्ञानशालिनी सर्वज्ञानमयी
देवीसत्यज्ञानमयीशुभा उत्पत्तिस्थितिसंहारहेतुरूपाजयेतिच नमस्तेस्तुमहादेवीनमस्तेस्तुमहेश्वरी नमस्तेसर्वदेवा
नांमातर्नित्यंशिवेस्वणी सर्वज्ञेसर्वजननीसर्वपत्कार्तिभंजनी सिद्धलक्ष्मीर्महाकालिर्महालक्ष्मीर्नमोस्तुते सद्योजाता
दिपंचाग्निरूपपंचकपंचके सिद्धलक्ष्मीर्महालक्ष्मीर्नमोस्तुते ऋग्यजुः सामवेदाख्याब्रह्मविष्णुशिवात्मके सिद्धलक्ष्मी॰
शब्दब्रह्ममयीब्रह्मीपंचभूतात्मिकेपरे॥ + कालिमहा + ॥ सिद्धलक्ष्मी॰ पंचपंचात्मिकेभूतेपंचेंद्रियविवर्जिते सिद्धल
क्ष्मीर्म॰ सत्यज्ञानात्मिकेनंतेनित्यानंदप्रदेशिवे सिद्धलक्ष्मी॰ स्वयंप्रकाशानित्यास्वप्रकाशाकालरूपिणी सिद्धलक्ष्मी॰

सृष्ट्यादिकारिणीदेवीचुत्पत्यादिप्रभेदिनी सिद्धलक्ष्मी॰ शांकरीवैष्णवीब्राह्मीमूलप्रकृतिरीश्वरी सिद्धलक्ष्मी॰ सद्यो
जातेवामदेवेअघोरेपुरुषेशिनि सिद्धल॰ अविद्यापटलाध्वंसीविद्याद्वयविनाशिनी सिद्धलक्ष्मी॰ नवदशकोटिस्वने
भावेचामुंडेपरमेश्वरी सिद्धलक्ष्मी॰ अष्टादशकोटिभेदेदेवीसर्वीलोकधारिणी सिद्धलक्ष्मी अनंतकोटिभेदेशोभा
श्रीदेवीतिकीर्तिते सिद्धलक्ष्मी॰ मातुलिंगगदांखेटंपानपात्रंचबिभ्रती सिद्धलक्ष्मी॰ नागंलिंगंचयोनिंचबिभ्रतीपर
मेश्वरी सिद्धलक्ष्मीर्म॰ लक्ष्यालक्ष्यस्वरूपेयंव्याप्यकृत्स्नंव्यवस्थिता सिद्धलक्ष्मी॰ परमात्मायथातद्वदेकैकविविधा
स्थिता सिद्धलक्ष्मी॰ प्रयोजनवशाछक्तिकेवल्पाविविधास्थिता सिद्धलक्ष्मी॰ सर्वमंगलमांगल्येशिवेनारायणप्रिये
सिद्धलक्ष्मी॰ दुष्टविद्राविणीदेवीदुष्टदारिद्र्यभंजनी सिद्धलक्ष्मी॰ उमेदेविनमस्तेस्तुदेविप्रणवसंस्थिते सिद्धलक्ष्मी॰
सनत्कुमारउवाच एवंस्तुतामहालक्ष्मीः श्रीसूक्तेनापिसंस्तुता॥ हिरण्यवर्णामित्यादिश्रीसूक्तेनापिसंस्तुते एवंस्तुता
महालक्ष्मीब्रह्मविष्णुमहेश्वरान् प्राहंगंभीरयावाचादर्शयंतीस्वकांतनुं श्रीदेव्युवाच आद्यासर्वापरास्माकंत्वंतथैवम

कर॰ म॰ हेश्वरी उत्पत्तिस्थितिसंहारहेतुभूतापराश्रया अभिन्नरूपमस्माकमीश्वरेणसहास्तुते अयमेववरोस्माकं ईश्वराभे
दलक्षणः संनश्चास्तुमहालक्ष्मीः किमन्येनवरेणनः पठतांशृण्वतांस्तोत्रं वरमेतंप्रयच्छतु दुष्टविद्राविणंचैवदुष्टदा
रिद्र्यभंजनं आयुष्यंचतथारोग्यंसर्वोपाद्रिनिवारणं आणिमादिगुणैश्वर्यंजातिस्मरणमेवच वाराणस्यांचमरणंस्व
च्छंदमरणंतथा सर्वज्ञत्वंतथाभक्तिचालरागित्वमेवच स्वाराज्यायुष्यमर्यादाचैराज्यपदवीतथा ईषणात्रयनिर्मुक्तिः
साम्राज्यपदवीतथा किमत्रबहुनोक्तेनतारकंब्रह्मणः परं उपदेशंतुदेवेशीप्रसादंकर्तुमर्हसि सनत्कुमारउवाच एवं
हिसंस्तुतादेवीमहालक्ष्मीर्महेश्वरी त्रिमूर्तिशक्तिरूपेणकनकांबरधारिणी क्षणादंतर्हितादेवीत्रयाणामेवपश्यतां
अपियूयंमहाभागायोगिनः शांतमानसाः नामाष्टकसहस्रंवैजपध्वंसर्वकालिकं दारिद्र्यंभवरोगाश्चनपश्येन्ना
त्रसंशयः अष्टम्यांचचतुर्दश्यांनवम्यांचव्रतेस्थितः पौर्णमास्याममावास्याविशेषेणप्रकीर्तयेत् इदंनामसहस्रं
वैसर्वसिद्धिकरंनृणां सर्वान्कामानवाप्नोतियोनित्यंप्रयतः पठेत् शतमादौशतंचांतेमूलंजप्त्वापठेदिदं देव्यानामस

हस्रंवैभुक्तिमुक्तिफलप्रदं मूलमंत्रंकथिष्यामिस्वगोप्यमपिवैमुने अष्टमात्प्रथमंचैवसप्तमाच्चद्वितीयकं अथर्व
स्वरसंयुक्तंस्वकलानादभूषितं एतत्पिंडीकृतंबीजंमहालक्ष्म्याभिधानकं आद्येपिंडीकृतंबीजंविनिक्षिप्यततःप
रं महालक्ष्मीपदंचैवचतुर्थ्यंतंसमुच्चरेत् पुनरंतेचतद्बीजंनमः पल्लवसंयुतं शिरोयुक्तंजपेन्मंत्रंमूर्तिध्यानसम
न्वितं कृत्वाचादौपुरश्चर्यासहस्रंतुत्रयोदश मंत्रेणानेनयस्तोत्रंसंपुटीकृत्ययः पठेत् सकामः सकलान्कामान्
निष्कामोमोक्षमाप्नुयात् अष्टोत्तरशतंचापिनित्यंमंत्रंजपेन्नरः छंदस्त्रिष्टुप्ऋषिर्ब्रह्मामहालक्ष्मीश्चदेवता बीजेना
द्येनवैन्यासंप्रकुर्वीतयथाविधिः षट्पल्लवयुतेनैवहृदयादिषडंगकं अरिमित्रादिदोषोपिनात्रपश्यमुनिपुंगव सिद्धमं
त्रमिमंप्राहुःसनकादिमुनीश्वराः गुरोर्मुखात्प्रलभ्यतन्नान्यथासफलंभवेत् सप्तजन्मनिदारिद्र्यंस्तोत्रपाठाद्विनश्यति
कुलेनजायतेतस्यदारिद्र्यंकलहादिकं महापातकसंभूताव्याधयश्चापिदारुणाः नश्यंतिसकलास्तस्यस्तोत्रपाठत
स्तस्यचभ। महालक्ष्म्यामहादेव्यानाम्नामष्टसहस्रकं सर्वसंपत्प्रदंचेदंब्रह्मणारचितंपुरा यस्येदंपुस्तकंगेहेतिष्ठेल्लक्ष्मीः

सदाध्रुवं न तत्राग्निभयं घोरं सर्वचोरादिकं तथा यश्चैतत्पूजयेन्नित्यं भक्त्या वै पुस्तकं बुधः तस्य तुष्टं भवेन्नित्यं त्रैलो
क्यं सचराचरं जायंते पशवः पुत्राः धनं धान्यं तथा स्त्रियः रत्नान्यश्वगजा भृत्या तस्य सर्वं भवेत्स्थिरं दिव्यनामसह
स्रं वै कथितं तव सुव्रत येनेयं पूजिता लक्ष्मीः कलशोत्थेन भक्तितः तत्सर्वं कथितं तुभ्यं पुनः किं श्रोतुमिच्छसि ॥१७७
॥७॥ इति श्रीपद्मपुराणे करवीरमाहात्म्ये श्रीमहालक्ष्मीसहस्रनामकथनं षड्विंशोध्यायः ॥ २६ ॥ ॥ श्रीराम ॥ ॥
नारद उवाच संपूज्य विधिवद्देवीं घटजन्मा महामुने एवं च प्रणिपत्याथ सपत्नीको मुदायुतः तद्दर्शनमहानंदहृष्टरो
माश्रुलोचनः स्तुतिं चकार महतीं गिरा गद्गदया मुनिः २ अगस्त्य उवाच लक्ष्मीः प्रसीद जगतां नमतां शरण्ये ब्रह्मा
दिवंद्यचरणांबुजदिव्यशोभे स्थित्वा पुनासि करवीरपुरे समस्तान् जंतून्विहस्य सकलास्करवृंदसंघान् लक्ष्मीः प्रपा
हि शरणागतजंतुमात्रं मातर्नमामि भवतीं भवपाशहंत्रीं संसारसागरमुखे पतितस्य मे यद्देहि त्वदीयचरणांबुजभ
क्तिपोतं ४ त्वं वैष्णवी शक्तिरिति प्रसिद्धा मुक्तेर्निदानं तव दर्शनं परं न लभ्यते योगिभिरप्यपूर्वं तद्दयजानं सकलाघहारि

मे ५ मातर्नमामि भवतीं भवतीह दुःखं संभारिहारिणि शरण्यमिहास्ति नान्या अन्यास्त एव भुवनेषु त एव मान्या येषु रस्फु
रेत्तव शुभः करुणाकटाक्षः ६ श्रीमंगले सकलमंगलजन्मभूमे श्रीमंगले सकलकिल्बिषतूलवह्ने श्रीमंगले स
कलदानवदर्पसंघहंत्रि श्रीमंगलेखिलमिदं परिपाहि विश्वं ७ मातस्तवांघ्रियुगलं सकलं हृदिस्थं यस्यास्ति तस्य
भुवनं सकलं करस्थं यो नाम ते जपति मंगलगौरि नित्यं सिद्ध्यष्टकं न परिमुंचति तस्य गेहं ८ विश्वेश्वरी त्वमसि वि
श्वजनकस्य श्रीत्वं पालयिष्यसि तथा प्रलये प्रहंत्री त्वंनाम कीर्तन समुल्लसदच्छपुण्यस्रोतस्विनी हरति पातककूल
वृक्षान् ९ त्वं देवि देवजननी प्रणवस्वरूपा गायत्र्यसीव सकला द्विजकामधेनुः त्वं व्याहृतित्रयमिहाखिलकर्मसि
द्ध्यै स्वाहा स्वधासि सुमनः पितृमुक्तिहेतुः १० गौरी त्वमेव शशिमौलिनि वेधसि त्वं सावित्र्यसि त्वमसि चक्रिणि चा
रुलक्ष्मीः त्वं वै स्थितासि करवीरपुरे सदेव श्रीमोक्षलक्ष्मी विजये भव मे शरण्या ११ नान्यं वृणे वरमिहेश्वरि पूर्णकाम
त्वद्दर्शनादिभिरलं परिपूर्णकामे वासं प्रदेहि करवीरपुरे त्वदीये सर्वार्थदे जगदघोपहरे निकामं १२ नारदोवाच इति

स्तुत्वामहालक्ष्मीमैत्रावरुणिरग्रधीः साष्टांगंप्रणानामाथसपत्नीकः सरंउवच् १३ सापिदेवीमहालक्ष्मीः करुणापूर
पूरिता उवाचमुनिशार्दूलंमाययातंविमोहयन् १४ देव्युवाच घटजन्मन्समुत्तिष्ठभद्रमस्तुसदैवते शुभव्रतेसमु
निष्ठलोपामुद्रेपतिव्रते १५ व्रियतामीप्सितंयच्चित्तुभ्यंप्रीत्याददामितत् मत्क्षेत्रदर्शनात्ब्रह्मन् कृतकृत्यासिसांप्रतं
१६ नारदउवाच इतिश्रुत्वावचोदेव्याः प्रत्युवाचश्रियंमुनिः महाभागः प्रणम्याथभक्तिपूर्वमिदंवचः १७ अगस्त्य
उवाच वरोमह्यंयदादेयः त्वयादेविवरानने वाराणसीहृदयेवासमिममेववृणेवरं १८ दक्षिणेचोत्तरेवापिकाश्यांचक
रवीरकं वासंदेहिमहालक्ष्मीजन्मजन्मांतरेमम १९ तावकंस्तोत्रमेतद्धियेपठिष्यंतिचादरात् मास्तुतेषांहिदारिद्र्यं
विजयश्चास्तुसर्वदा २० विच्छेदः संततोमास्तुमास्तुसंपत्तिसंक्षयः मास्तुचेष्टवियोगस्तुसंतापोमास्तुसर्वदा २१
नारदउवाच एवंप्रोक्तामहालक्ष्मीर्मुनिनातेनवैमुने मोहयन्निवतल्लक्ष्मीरुवाचाथघटोद्भवं २२ श्रीदेव्युवाच एवं
मस्तुमुनेसर्वंत्वयायत्परिभाषितं त्वत्कृतस्तोत्रपठनंसर्वसिद्धिप्रदंभवेत् २३ वाराणसीहृदयेवासंदक्षिणेचोत्तरेत

व श्रुत्वाहृष्येत्पुनर्विंध्यस्तदागमननिश्चयात् २४ त्वदीयागमनंनित्यंचिंतयन्नद्रिराण्मुने अतिखर्वतरोभूत्वा
संतिष्ठतिमहाभयः २५ त्रयाणामपिलोकानामुपकारः कृतस्त्वया विंध्यस्यदमनंतद्धन्नसाध्यममरैरपि २६ कृ
तंत्वयैवलोकेस्मिन् सर्वकर्मप्रवर्तकं परोपकरणार्थंहियोजीवेत्सतुजीवति २७ श्वसन्मृतः सविज्ञेयोयः स्वार्थेमुप
जीवति परोपकरणंयस्यजागर्तिहृदयेसदा २८ वारासीहृदयंतस्यजायतेहिपदेपदे परोपकृत्यायोधर्मोधर्मोदाना
दिसंभवः २९ एकत्रतुलितोधात्रातत्रपूर्वोभवद्गुरुः तीर्थस्नानेनसाबुद्धिर्नकुदानेनतत्फलं ३० तपोभिरुग्रैस्तन्ना
थमुपकृत्यायदाप्यते परिनिर्मथ्यवाग्जालंनिर्णीतमिदमेवहि ३१ नोपकारात्परोधर्मोनापकारादघंपरं शृणुधे
दंपुराविद्भिभाषितंयत्सुभाषितं ३२ परोपकारणंयेषांहृदयेवसतेसदा नश्यंतिविपदस्तेषांसंपदस्तुपदेपदे ३३
करिकर्णाग्रचपलंजीवितंमनुजस्यहि तस्मात्परोपकरणंकार्यमेवविपश्चिता ३४ परोपकरणंजंतोः सद्यः फलति
वैमुने उपकारफलंतेद्यजातंमत्क्षेत्रदर्शनं ३५ करवीरपुरंचेदंनाल्पपुण्यैः प्रलभ्यते यद्दर्शनात्प्रपूयंतेमहापात

कर·म· क्रिनोनराः ३६ आतस्त्वंकृतकृत्योयमुनेमत्क्षेत्रदर्शनात् मत्क्षेत्रदर्शनंनृणामिहामुत्रफलप्रदं ३७ हितंचतेव
दाम्येकंसांप्रतंतत्समाचर पश्यकिंचिदितोगत्वास्कंदमग्रेस्थितंप्रभुं ३८ श्रीशैलंचापिसंपश्यपातालगंगायायुतं
तस्यैवेशिखरेदृष्टेभवेन्नैवपुनर्भवः ३९ भवानीयंमहादेवीस्कंद२दर्शनतत्परा विवाहंकर्तुमिच्छंतीषण्मुखस्यक
नीयसः ४० स्कंदमाकारयामासपृष्टलग्नायसातदा निर्गतस्तुकपाटेवैसंवेनायातिदुर्मतिः ४१ परोपकरणेश्रा
न्तस्त्वमेवासिमहामुने त्वदीयंभयमुग्रंवैत्रिषुलोकेषुविद्यते ४२ त्वयापीतःसमुद्रोवैहतौदैत्यौमहाबलौ वाता
पीत्वलनामानौविंध्याद्रिश्चाधरीकृतः ४३ तस्माद्दानपितुंस्कंदंगत्वाद्यैवघटोद्भव महत्तेसुकृतंभूयान्मातृपुत्रयु
तेःपरं ४४ नारदउवाच इतितस्यवचःश्रुत्वामैत्रावरुणिरात्मवान् पपातमूर्छितोभूत्वावृक्षोवायुहतोयथा ४५
महाशोकाश्रुसंयुक्तोरुदन्वैभृशपीडितः सदयंप्रार्थयामासमहालक्ष्मीमहामुनिः ४६ अगस्त्यउवाच किंमांब
ब्धि हिर्नयसिदेविभवांस्त्विन्नविस्मृत्यवैशिवपुरंभवदाज्ञयाहं ४७ वासेच्छयैवकरवीरपुरेत्वदीयेप्राप्तोस्मिवैतवपदंसक

105

यनाद्यं त्वंनिष्ठुराकथमिहेश्वरिसांप्रतंवैजातासिदीनजननिमयिदीनपाले ४८ त्यक्त्वाव्रजेतवपुरंकथमेवमातःसर्वा
र्थदंहरिहरींद्रविधिप्रगीतं यत्रस्थितानरसरीसृपदंशकीटाविहगाः प्रयांतिभवनंस्वविबोधसाध्यं ५० तत्तावकंच
करवीरपुरंविसृज्यगच्छाम्यहंकथमितः कथय स्वमातः हाहाकथंगिरिरयंममम्त्युरूपः संसृष्टएवविधिनाकिलविं
ध्यनामा वाराणसीहृदयमिदंममजीवरूपंनोचेत्कथंहरतिचैवनिमित्तभूतः एवंशापामियदिपर्वतमुद्यमानस्तत्पा
दाममकथंहिरुताघ्नतास्तु ५२ यद्धर्मतोद्यघटितंतवदर्शनंमेसर्वार्थदंतवपुरंकरवीरकंच निधानमेतत्करवीरकंवै
हित्वापदान्यत्रकथंव्रजेहं ५३ काशीवियोगानतथाबिभेमियथाहिमातस्तवपूर्वयोगात् यत्संस्मृतीदतवतीममदुख
भारंकाशीवियोगजमशेषमनंतमातः ५४ तत्तावकंपुरवरंकरवीरकंवैहित्वाकथंबहिरुपैम्यधुनैवजीवन् मातःश्व
सन्नपिमृतःसपुमान्नलोकेवाराणसीहृदयमिदंविजहातियोवै ५५ यत्तारणीयरचितंखलुविष्णुनावैपोतंनृणांभव
निधौहिनिमज्जतांनृणां स्कंदस्त्वयाममविनिर्मितएषमृत्युः हाहाविधेचकिमकारिमयात्वदीयं ५६ प्राणप्रियंचकरवी

कर॰ म॰ रपुरंविसृज्यगम्यंमयैवतुयदाननहिकर्तुं आज्ञानिराज्ञामहतीकुलेवंत्वयावसर्वज्ञदयाकिलार्थिनां हारंविजानासि
समयनंस्तदेहिनांकिंप्रार्थनीयंबहुधातवांबिके ५७ प्राणांस्त्यजामिकरवीरपुरेत्वदीयेयज्जीवतोपिमरणंसकलार्थ
दंहि सर्वेमृतास्फुरन्मृताः करवीरकेहितस्माद्वरंतुमरणंखलुजीवनात्किं ५८ नारदउवाच इत्युक्त्वापिपतंस्तूष्णीम
हाशोकसंदुःखितं उत्थाप्यपाणिनादेवीतत्रतत्राम्बुजक्षणैः ५९ आधायमस्तकेचापिकरकालभयापहं लक्ष्मीःप्रो
वाचसदयंघयोद्भूतंदयावती ६० श्रीमहालक्ष्मी धन्योसिकृतकृत्योसिमुनेमत्क्षेत्रदर्शनात् मत्क्षेत्रदर्शनन्दृणां
भुक्तिमुक्तिप्रदंमहत् ६१ गयायांपिंडदानेनयत्फलंलभतेनरः दानेनयत्कुरुक्षेत्रेकाश्यांवासेनवातथा ६२ प्र
यागेदेहघातेनमणिकर्ण्योमृतेनच स्नानेनयद्वारवत्यांलभतेमनुजःफलं ६३ उपोषणाद्धरिद्वारेस्नानेनापि
यदाप्यते दर्शनात्करवीरस्यलभतेतत्फलंनरः ६४ कुरुतीर्थविधिंसर्वंशीघ्रमेवसमाहितः तावद्वासोपितेत्रा
स्तुयावत्तीर्थविधिर्भवेत् ६५ संतितीर्थान्यनेकानिमत्क्षेत्रेपदमानतः तिलेतिलेचसंत्यत्रलिंगान्यपिसमंततः ६६

108

तानिसर्वाणिकर्तुंवैनभवेत्पुरुषायुषा समर्थः पुरुषोनित्यंतीर्थयात्रांचरन्नपि ६७ तस्मात्तीर्थविधिंकर्तुंदत्तः षण्मास
कोवधिः तावत्तीर्थानिसर्वाणिलिंगानिचविलोकय ६८ ततऊर्ध्वंभवेन्मत्युर्विष्णुचक्रांकितस्यच अन्यच्चशृणुविप्रेंद्रभ
विष्यद्वापरेभवान् ६९ एकोनत्रिंशकेब्रह्मन्व्याससोभविष्यसि तदावाराणसीयुग्मंदक्षिणंचोत्तरंतथा ७० पुनःस
प्राप्यविधिवत्वासस्तत्रास्तुतेमुने अप्यस्यवेदान्सकलान्मुनेधर्मानुसारतः ७१ वाराणसीद्वयेतिष्ठयत्रतेमनसोरु
चिः तावल्लिंगस्वरूपेणउभयत्रस्कंसंस्थितः ७२ लभवासफलंसर्वंयावदागमनंभवेत् हितंचतेवदाम्येकंसांप्रतं
तत्समाचर ७३ पश्यकिंचिद्दिलोगत्वास्कंदमग्रेस्थितंप्रभुं वाराणसीद्वयाख्यानंयथावस्थितभाषितं ७४ तवतुष्टि
करंब्रह्मन्कथयिष्यतिषण्मुखः माहात्म्यंशृण्वतोनित्यंभवेद्वासफलंतव ७५ नरोयःक्षेत्रमाहात्म्यंशृणुयाच्छ्रद्धया
न्वितः अन्यत्रापिस्थितोनित्यंसलभेद्वासजंफलं ७६ विधिवत्क्षेत्रमाहात्म्यंयःशृणोतिसमाहितः सलभेत्क्षेत्रवास
वादंद्रसेनरूवस्थितः ॥७७॥ छ ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयसंवादेअगस्तिशोकशमनंना

कर० म० मसप्तविंशोध्यायः ॥२७॥ ॐ ॥ अगस्त्य उवाच ॥ कथयस्व महादेवी यदुक्तं हि त्वया मम क्वासीदिंद्रसेनाख्यो राजा
पुण्यकथानकः १ क्षेत्रवासफलं येन संप्राप्तं श्रृण्वता कथं तत्सर्वं विस्तरान्मातः कृपया वद सुंदरी २ नारद उवाच
इत्थं तत्प्रश्नसंहृष्टा महालक्ष्मीर्महामुने इंद्रसेनकथां दिव्यां कथयामास विस्तरात् ३ श्रीदेव्योवाच श्रृण्वगस्त्यम
हाख्यानमितिहासं पुरातनं सर्वपापहरं दिव्यं क्षेत्रवासफलप्रदं ४ क्षेत्रे पाटलिपुत्राख्ये राजासीदमितद्युतिः इं
द्रसेन इति ख्यातः सर्वधर्मपरायणः ५ विजित्य पृथिवीं सर्वां समुद्रवलयांकितां विधिवत्पालयामास राज्यं चेतिम
हामतिः ६ अदंड्यो नैव दंड्योस्ति तद्राज्ये हि कदाचन अपूज्यपूजनं चापि नैवासीत्तद्गृहे क्वचित् ७ मार्गे मार्गे
प्रायाश्चासन्नशालादिव्यान्नसंभवाः देवभूदेवपूजापि सर्वत्रासीद्यथाविधि ८ एवं पालयता तेन राज्यं वै महदद्भुतं
प्रारब्धस्तु महायज्ञो राजसूय इति श्रुतिः ९ आकारितास्तेन सर्वे मुनयः शौनकादयः यज्ञं संपादयामासुर्वेदशास्त्रा
र्थकोविदाः १० यज्ञांते पूजिताः सर्वे महादानैः पृथक्पृथक् वस्त्रांगुलीयभूधेनुः रत्नमुक्तादिभिस्तथा लक्ष्मीं विज्ञा

107

यमहतीं विद्युद्वच्चंचलां सदा ११ विज्ञाय तां न माहात्म्यं इंद्रसेनो बहुश्रुतः तोषयामास सर्वैस्तैर्ब्राह्मणान् ब्राह्मणप्रियः
१२ संपूज्य विधिवद्भक्त्या ब्राह्मणांस्तान्समाहितः राजा मुक्तिनिदानं हि पप्रच्छ परमं महत् १३ राज्यांते नरकं घोरं श्रु
त्वा सर्वं मुखांबुजात् यातनाश्चैव तत्रावस्थः श्रुत्वाभीत पुनः पुनः १४ इंद्रसेन उवाच तारयंतु हि मां विप्राः सर्वपाप
करं जडं यद्राज्यसुखलोभेन राजानो बहवो मया १५ हताहृतं धनं चापि तेषां दाहास्मबुद्धिना देवा अपि तदीया वै दी
पितास्तत्पाप्मना १६ एवं पापरतस्याशु भवेन्मे पतनं महत् नरकेषु समस्तेषु को वा तत्र विमोचयेत् संततिश्चापि वै
नास्ति यात्रृणान्मोचयेत्स्वपापात् तस्माद्रक्षंतु मां विप्राः पतंतं भवसागरे यत्र मे संततिर्भूयान्मुक्तिश्चापि प्रबाधितः ॥
तादृशं तीर्थमेकं मे प्रवदंतु विपश्चितः १७ देव्युवाच इति तत्प्रश्नसंहृष्टा मुनयः शौनकादयः विचार्याथ मम क्षेत्र
प्रवक्तुमुपचक्रमुः १८ ऋषय ऊचुः श्रृणु राजन्प्रवक्ष्यामि तीर्थं सर्वोत्तमोत्तमं साम्यवाराणसी चेति विश्रुतं करवीर
कं १९ मुक्तितीर्थसहस्रेषु श्रेष्ठा या काशिका शिवा सापि यत्क्षेत्रराजस्य कलां नार्हति षोडशीं २० चक्राकारं तु यत्क्षेत्रं य

वाधिकमितीरितं संसारशोकसंतप्तास्तारयेत्करवीरकं २१ यत्रागत्यसुतीर्थानिनिवसंतिसदैवहि क्षेत्रमाहात्म्यम
तुच्चंविज्ञायनरपुंगव २२ तारकेशास्थितोयत्रतीर्थेवैतारकाभिके तारयेत्सकलान्जंतून्मुपदिश्यसुतारकं २३
बहवोयत्रनिर्मुक्ताः संसारपाशबंधनात् तत्क्षेत्रं प्रवरंसेव्यंकरवीरपुरंमहत् २४ आगतंपर्वतेयत्रविरजं
तीर्थमुत्तमं जनानामुपकारार्थंलवणालयमीरितं २५ अहोतत्क्षेत्रमाहात्म्यंकिंवर्ण्यंनरपुंगव विरजंविरजंजा
तंकरवीरसुसेवनात् २६ पञ्चजाविचलेतत्रलवणालयसंनिधौ ब्रह्महत्यादिपापानिनाशयंतीसुपूजिता २७ सं
वंधाब्राह्मणादीनांपुत्रजन्मनिरोधकीः सर्वेपियत्रलीयंतेतत्रस्नानस्कृतर्पणैः २८ स्नात्वापश्यंतियेनित्यंपञ्चजां
लवणालये ब्रह्महत्यादिपापानितेषांनश्यंत्यसंशयं २९ सोमवारेतुयः स्नात्वापुमान्वैलवणालये सर्वान्कामा
नवाप्नोतिसर्वपापैः प्रमुच्यते अमासोमेनसंयुक्ताभौमेनापियदाभवेत् तदालोणारकेतीर्थेयः स्नायान्नरपुंगव
३१ पितॄन्संतारयेत्सर्वान् आत्मनासहितान्नरः पिंडान्प्रपातयेद्यस्तुतीर्थेवैलवणाभिधे ३२ पितरस्तस्यगच्छं

ब्रह्मलोकंसनातनं यस्तर्पयेत्पितॄंस्तत्रलोणारेशुद्धमानसः ३३ जलंतत्सोमपानंहिपितॄणामक्षयंभवेत्॥
स्ववर्णतिलपात्रंवैयोदद्याल्लवणालये ३४ तद्भवेन्मेरुणातुल्यंसर्वकामफलप्रदं ततशाकागतंयश्चतुल
स्यादिवनेपरं ३५ तस्यसेवनमात्रेणनराः स्युः पुत्रपौत्रिणः येदद्युर्गुप्तदानानितत्रैवलवणालये ३६ आ
चंद्रार्कंभवेत्तेषांकुलवल्यंनपायिनी भोजयेद्विप्रमेकंयस्तत्तटाकेसमाहितः ३७ भोजिताविप्रकोटिस्यात्तेन
राजन्नसंशयः यत्रमज्जनमात्रेणनराः पुत्रप्रपौत्रिणः ३८ ततीर्थप्रवरंकिंतुवर्ण्यतेलवणालये तस्यैवचो
त्तरेभागेधनुः षड्कांतरेणवै ३९ विद्यतेमुद्गलंतीर्थंमुद्गलेश्वरसंयुतं आगतंमुद्गलक्षेत्रान्मुनिनासहितं
परं ४० तत्रस्नात्वानरोराजन्यः पश्येन्मुद्गलेश्वरं अपुत्रफलवान्भूयात्सर्वपापैः प्रमुच्यते ४१ ततयाक
समुद्भूतामश्वत्थादींश्चयोनरः सिंचेद्धैपयतोभूत्वासलभेद्वांछितंफलं ४२ ब्रह्मचारीहविष्याशीसत्यादिनिय
मैर्युतः सत्यसत्यकपर्यंतंयः सेवेन्मुद्गलेश्वरं ४३ असाध्यमपिसर्वंहिसाधयेत्तत्रमानवः इदंतीर्थद्वयंय

कर॰ म॰ त्रकरवीरेविराजते ४४ लोणारंमुद्गलंचापिपुत्रपौत्रफलप्रदं पराशरमुनिस्नात्वासत्पुत्रंयत्रलब्धवान् ४५ जम
दग्निरपिप्राप्य: स्वपुत्रंस्नानदानत: दितिस्तत्वातपस्तत्रपयोव्रतपरायणा ४६ लेभेपुत्रवरंशांतंतीर्थयुग्मप्रभा
वत: एवंनरश्चनार्योपिप्राप्ता: सर्वमनोरथान् ४७ क्षेत्रेवैकरवीराख्येभुक्तिमुक्तिप्रदेशुभे विद्यतेमणिकर्णीवै
यत्राघौघविनाशनी ४८ किमलभ्यतमंतत्रकरवीरनिवासिनां सत्यनंतानितीर्थानिकरवीरमहापुरे ४९ लिंगा
निचाप्यनंतानिसमंतात्तिलमात्रत: स्नातव्यंमणिकर्ण्यांवैद्रष्टव्यापरमेश्वरी ५० भुक्तिमुक्तिप्रदालक्ष्मीर्दर्शना
त्पापनाशनी पादौहितौयद्गुमजन्मभाजौनयौगतौतत्करवीरकंपुरं ५१ करौहितौकाष्ठकरौनराणांनपिंडदेयौ
करवीरकेक्वचित् मूर्धानमूर्धासनरस्यभारोनियोविमग्न: किलपंचनद्यां ५२ नवैनतोय: करवीरलक्ष्मींमूल:
स श्वसंन्पुमान्पशुरूप: दृष्टि:पवित्रापुरुषस्यसैवयायाहिदृष्टाकरवीरवासिनी ५३ चित्तंत्वणांतत्परमंपवित्रंय
द्भुत्कामंकरवीरकंपुरं संतारयेद्वैकुलमप्रमत्तोयोनुव्रजे–द्गगयांपवित्रां ५४ यत्रास्थितांवैबहवोपिलोकास्तीर्णा

10

र्णाद्वैमुनिदेवपैत्ककात् ५४ तस्मात्वंगच्छराजेंद्रकरवीरपुरंप्रति ५५ भुक्तिमुक्त्यादिसकलंयदीच्छसिमहत्फलं श्री
देव्युवाच इतिश्रुत्वामुनींद्रेभ्य: करवीरंमहत्परं ५६ तत्क्षणान्निर्गतोराजाश्रद्धाभक्तिसमन्वित: राज्येनिधायचा
मात्यंसपत्नीकोमुदायुत: ५७ गृहीत्वासर्वकोशांश्चमुनींद्रै:सहितोययौ विधायोपोषणंपूर्वंसंपूज्यचगजाननं ५८
समाराधनकंकृत्वातीर्थसंकल्पमेवच कृतपारणकोभूत्वानिर्गत:स्वपुरात्क्षणात् ५९ माहात्म्यंकरवीरस्यवदद्भि
र्मुनिभिर्युत: समागतोमुनि:श्रेष्ठकृष्णांवैलोकपावनीं ६० मुंडनंचोपवासंचकृत्वातत्रविधानत: तथाकृत्वापित्
श्राद्धंनत्वाचभुवनेश्वरीं ६१ समागतस्ततोराजाप्रयागंदक्षिणंमहत् कृत्वातीर्थविधानंवैतत्रत्यंसर्वमेवच ६२
आगत: करवीरंवैमत्क्षेत्रंलोकपावनं संपूज्यविधिवद्भक्त्याविघ्नेशंविघ्ननाशनं ६३ लड्डुकैर्मोदकैश्चापिसाज्यपिं
दूरकैस्तथा स्नात्वाथमणिकर्ण्यांवैदृष्ट्वालिंगानिसर्वत: ६४ कृत्वामद्दर्शनंचापिदृष्ट्वानीराजनंमम मान्मुक्तिभुड
पैस्थित्वाकथाश्रुत्वापुराणजा: ६५ कृतकृत्यमथात्मानंमन्यमानोवनीपति: चक्रेसवसतिंसम्यक्तीर्थेलोणारके

कर॰ म॰ मुने ६५ अपरेह्निशुचिर्भूत्वासर्वसंभारसंयुतः गतः सकोटितीर्थंवैमुनिवृंदसमायुतः ६७ कोटितीर्थस्यमाहा
त्म्यंश्रुत्वामुनिमुखांबुजात् तीर्थदेवान्नमस्कृत्यकृतसंकल्पमेवच ६८ कोटितीर्थेसुसंस्नात्वाचक्रेश्राद्धंहिरण्यकं
दत्तासनेभ्योविप्रेभ्योदक्षिणाबहुदत्तवान् ६९ प्रत्येकंभारमेकैकंसुवर्णंगोसमन्वितं प्रपात्यविधिवत्पिंडान्पितॄ
न्संतर्प्यवारिणा ७० तुलापुरुषदानंवैचक्रेराजाततःपरं विधायतुलिकांतत्रसपत्नीकोमुदान्वितः ७१ तुला
यामेकभागेतुस्वयंवैसंस्थितः शुचिः सुवर्णरत्नवैडूर्यप्रवालंमौक्तिकानिच ७२ निधायद्वितियेभागेब्राह्मणे
भ्यः प्रदत्तवान् भूरिश्राद्धंततः कृत्वागोदानानितथैवच ७३ पौरुषेपावमान्येश्चरुद्रसूक्तैस्तथैवच धूपदी
पस्कनैवेद्यैर्दक्षिणामंत्रपुष्पकैः ७४ दीपमालादिभिश्चापिसंपूज्यकोटिशंकरं ब्राह्मणानांसहस्राणिभोजयि
त्वाविधानतः ७५ कुब्जांधबधिरादिभ्यस्त्वनाथेभ्यस्तथैवच अन्नकंबलवस्त्रादियथाशक्त्याप्रदायच ७६
कोटितीर्थविधिंसर्वंसमाप्यविधिपूर्वकं अनेनैवविधानेनदक्षिणोत्तरमानसं ७७ समाप्यविधिवद्भक्त्याततोरो

द्रीगवांगतः चतुर्भिर्दिवसैः सर्वंगयाकृत्यंचकारसः ७८ गत्वाप्रेतशिलांपूर्वंप्रेतकृत्यंविधायच गोभूतिलहि
रण्यादिदत्वायथाविधि ७९ ततोरुद्रगयांप्राप्यविधिंचक्रेसमागतः कृत्वाहिरण्मयंश्राद्धंपिंडान्दत्वायथा
विधिः ८० गोसहस्रंददौतत्रब्राह्मणेभ्यःस्वलंकृतं हेमशृंगंरौप्यखुरंताम्रपृष्ठंसवस्त्रकं ८१ मुक्तापुच्छंकांस्य
दोहंसकशीत्वंदक्षिणायुतं स्वलंकृतेभ्योविप्रेभ्यःप्रत्येकंचप्रदायच ८२ भूरिश्राद्धविधिंकृत्वाततोक्षय्यवटंगतः
ब्रह्मप्रकल्पितान्विप्रान्भोजयित्वाविधानतः ८३ कृतकृत्यमथात्मानंमन्यमानोमहीपतिः स्थितोलोणारकेकुं
डेसपत्नीकोमुदान्वितः ८४ नित्यमद्दर्शनंकुर्वन्सत्यवादीधृतव्रतः हविष्याशीमिताहारःपुत्रार्थीमुनिभिर्युतः
८५ स्नात्वावैमुद्गलेतीर्थेलोणारेचतथैवच संपूज्यमुद्गलेशंचपद्मजांचतथैवच ८५ अश्वत्थांस्ततटाकस्थां
स्तुलस्यादिननानिच सेवयामासराजेंद्रः सपत्नीकोविधानतः सहस्रंभोजयामासब्राह्मणानांनिरंतरं सप्तसप्त
कपर्यंतमेवमेवविचक्षणः ८७ चकारविधिवन्नित्यंपूजासेवनभोजनं ततस्तस्यमहातुष्टेमुद्गलेश्वरपद्मजे ८८

ददतुः पुत्रमेकंवैमयासन्नोदितेमुने ततोलब्ध्वावरंराजापरिपूर्णमनोरथः ८९ मुक्तिसंस्थस्थितः पश्चात्तारकेश्व
रसंनिधौ विधायचाश्रमंदिव्यंसपत्नीकोमुदान्वितः ९० मणिकर्ण्यांसदास्नात्वापंचनद्यांतथैवच कृत्वामद्दर्शनंनि
त्यंमुनिवृंदसमायुतः ९१ मुक्तिकामः सदाराजातारकेशमपूजयन् पंचामृतैर्महासूक्तैः श्रीरुद्रादिभिरन्वहं
९२ कोमलैर्बिल्वपत्रैश्चगंधधूपादिभिस्तथा नैवेद्यैः फलतांबूलैः संपूज्यतारकेश्वरं अन्नंचप्रददौतत्रश्रद्धयासर्व
योनिषु राज्यभोगांस्तृणीकृत्यमत्क्षेत्रवासतत्परः ९४ द्विजेभ्यः क्षेत्रवासिभ्योददौदानानिसर्वदा प्रतिग्रहनिवृत्तेभ्यः
प्रणिपत्यपुनःपुनः ९५ गजाश्वमहिषीभिश्चद्विसुरवीधेनुभिस्तथा अजादिभिर्मृगैश्चैव वृषभैःखलुसंयुतैः ९६ चक्रे
दानान्यनेकानिश्रीविष्णुः प्रीयतामिति तीर्थवासार्थिनः सर्वान्संतर्प्यचपृथक्पृथक् ९७ रत्नैर्हिरण्यैर्वासोभिर्मुक्ता
भरणधेनुभिः विचित्रैश्चतथापात्रैस्वर्णरौप्यादिनिर्मितैः ९८ अमृतःस्वादुपक्वान्नैः पायसैश्चसशर्करैः सगोरसै
रन्नदानैर्धान्यदानैरनेकधा ९९ गंधचंदनकर्पूरैस्तांबूलैश्चारुचामरैः सतूलैर्मृदुपर्यंकैर्दीपिकादर्पणासनैः १००

शिबिकाव्यंजनाद्यैश्चविमानैः पशुभिर्गृहैः चित्रध्वजपताकाभिरुज्वलैश्चंद्रचारुभिः १ वर्षाशनप्रदानैश्चगृ
होपस्करसंयुतैः उपानत्पादुकाभिश्चयतिनश्चतपस्विनः २ योग्यैः पट्टदुकूलैश्चमृदुलैश्चित्रपल्लवैः दंडैः कमंड
लुयुक्तैरजिनैर्मृगसंभवैः ३ कौपीनैरुत्तमंकश्रैपरिचारककांचनैः मठैर्विद्यार्थिनामन्नैरतिथ्यर्थैमहाधनैः ४
महापुस्तकसंभारैर्लेखनानांचजीवनैः अनाथौषधदानैश्चसूत्रदानैरनेकधा ५ ग्रीष्मप्रपादिदानैश्चहेमंतो
ष्मस्थकेधनैः छत्राच्छादनिकाद्यर्थैर्वर्षाकालोचितैर्बहु ६ रात्रौमंडपदीपैश्चपादाभ्यंजनकादिभिः पुराणपाठ
कांश्चापिप्रतिदेवालयंधनैः ७ देवालयेनृत्यगीतकरणार्थैर्वरनेकशः देवालयेसुधाकार्येजीर्णोद्धारैरनेकधा
८ विचित्रलेखकैर्मौल्यैरंगमालादिमंडपैः आरार्तिकैर्गुणलैश्चदर्शगादिसुदीपकैः ९ कर्पूरारार्तिकाद्यैश्चदे
वोद्यानैरनेकशः महापूजार्थमाल्यादिगुंफनार्थैर्निकालतः १० शंखभेरीमृदंगादिवादनार्दैः शिवालये घंटाक
हुकुंभादिस्नानोपस्करभाजनैः ११ श्वेतैर्मार्जनवस्त्रैश्चसुगंधैर्यक्षकर्दमैः जपैर्होमैस्तोत्रपाठैर्नामोच्चारा

दिमार्पणैः वेदपारायणैश्चैवलक्षहोमैरनेकधा कोटिहोमैर्महायज्ञैरयजत्बहुदक्षिणैः पश्चान्निष्कामोराजासौमोक्षार्थी
निरहंमनः चकारसर्वकर्माणिश्रीविष्णुप्रीयतामिति १४ इत्थंससंस्थितःस्तत्रमुक्तिकामः सदैवहि क्षेत्रमाहात्म्य
मत्युच्चैर्विज्ञायनपुरंगवः १५ राजानंसंस्थितःश्रुत्वामंत्रिणःस्तस्यवैमुने परस्परंतदाचक्रुःकलहंराज्यकाम्यया
१६ तेषांयुद्धैः प्रजाःसर्वाःपीड्यमानास्त्वहर्निशं मत्क्षेत्रवासिनंतंवैराजानंशरणंययुः १७ कृत्वातीर्थविधिं
सर्वंमहदानंदनिर्भराः जग्मुस्तदाश्रमंदिव्यंमुनिवृंदसुसंवितं १८ तत्रासीनंनरेंद्रंतंदृष्ट्वाहर्षसुनिर्भराः दंडव
त्प्रणिपत्योच्चैः प्रजाःप्रोचुरिदंवचः १९ प्रजाऊचुः रक्षरक्षमहाराजपितामातात्वमेवनः सुतवत्पालिताःस
र्वाःप्रजादीनाःत्वयाविना २० राज्ञांहिपरमोधर्मोयत्प्रजानांसुरक्षणं प्रदिष्टयधर्ममार्गेणस्थापनंसर्वदैवहि
नलोभीलुब्धमांधातामनुनामाउरूरवाः प्रजानांरक्षणेनैवतीर्णाः सर्वेभवांबुधिं २२ नयेकुर्वंतिराजानः प्रजा
नांरक्षणंपरं वार्षिकंकरमादायपतंतिनरकेषुते २३ दस्युभिःपीडिताःपश्यंत्यःप्रजाःपृथिवीपतिः व्याघ्रः

संजायतेनित्यमपिधर्मपरायणः २४ चोराग्निपरराष्ट्रेभ्योयः प्रजारक्षयेत्सदा सराजाप्राप्नुयात्सर्वमैहिकामुष्मि
कंफलं २५ तस्माद्रागत्यवैराजन्पालनीयास्त्वयाप्रजाः अन्यथाहिमरिष्यंतितवामात्यैःप्रपीडिताः २६ अयमे
वपरोधर्मइदमेवबृहत्तपः इदमेवपरंज्ञानंयत्प्रजानांसुरक्षणं २७ श्रीमहालक्ष्मी॰ इतितद्वचनंश्रुत्वासराजा
खिन्नमानसः प्रत्युवाचतदाधीरस्तन्मुनेस्त्वंनिशामय २८ इंद्रसेनउवाच अहोकथंभाग्यमुपस्थितंपुरोममा
ल्पभाग्यस्यमहत्कृतेनसः वाराणसीहाद्यकथंयत्रायधिकांत्यक्ताव्रजेदहंसकलार्थदामिमां २९ याम्याविमुक्तंकर
वीरकंपुरंप्राप्यापिजन्मांतरपुण्यपुंजैः अहोकथंत्याज्यमिदंविमुक्तिदंनिधानभूतंहिमहीकृतेमया ३० महीममै
वेतिमत्वैवमानिनोमनुप्रमुख्याबहवोयथामृताः कस्यापिनेयंहिभवेत्कदाचित्त्याज्यंतदर्थंकरवीरकंकथं ३१
भूमिर्हिचैषासहतेनृपान्वैजयेस्वकीयेनिरतान्विमूढान् इमेमदीयाहिसदाभवंतिपुनंतुचाहंनहिकस्यचित्कचित्
३२ लोकापुरंविसृजामीतिकोवामंदोब्रूयाद्दात्मघातीनरेषु हस्तप्राप्तेभुक्तिमुक्तीप्रहित्वाकोवाहीनोनारकंदुःखमु

कर॰म॰

ग्नं ३३ संसाराब्धौतारकंपोतमेतंमग्नानांवैकरवीरंहिलब्ध्वा योनोगच्छेत्परपारंभवाब्धेस्थित्वातस्मिन्सकथंनात्म
घाती ३४ निर्भाग्यानांजीर्यतेकिंसुधावैपीताप्यंते : श्राकल्लैर्मे : पुण्यपुंजैः प्राप्तापीयंयाम्यवाराणसीवैरुष्टेकिं
मेमंदभाग्यस्यनूनं ३५ निधानमेतत्करवीरकंपुरंहित्वाथपादेनकथंव्रजाम्यहं किंराज्यभोगेनसुखंपरंभवेद्दुःख
स्यमेक्षेत्रवियोगजातमलात् ३६ नैवाचीर्णंकरवीरेविमुक्ते : पैशून्यंवापालकंवामयाघ द्रव्येन्यदीयेचकलत्रकेवा
बुद्धिः कृतानैवकुएषपाकः ३७ विधायनित्यंमणिकर्णिकायांस्नानंचदानंचसकाशिकायां लक्ष्म्याः प्रदर्शनमहं
कृतवांस्त्रिकालंकोयंविपाकइहमेद्यसमुत्थितः पुरः श्रीरंकभैरवमहर्गलवीरयोश्चपूजाकृताप्रतिदिनंकिलदंड
पाणेः श्रीश्रुंबलीचकरवीरफलप्रदात्रीसंपूजिताप्रतिदिनंहिकुएषपाकः श्रीमहालक्ष्मी॰ विलयेवंनदाराजाघट
जन्मेत्तुदारधीः सांत्वितोमुनिभिः सर्वैः प्रपच्छायमुनीश्वरान् इंद्रसेनउवाच पश्यंतुममभाग्यंवैसर्वेयूयंमुनी
श्वराः करवीरवासहाचायंकथंविघ्नउपस्थितः भवद्भिर्यत्पुरागीतंतथ्यमेनहितदत्त्वः करवीरंसमुद्दिश्यतदेवाद्य

113

समुत्थितं करवीरंनमोक्तव्यंप्राणैः कंठगतैरपि बहुविघ्नाभविष्यंतिकरवीरनिवासिनां देवानामप्रियंयस्मा
त्संस्थानंकरवीरके तस्माद्विघ्नाभवंत्यस्मिन्याम्याविमुक्तवासिनां संकटंतुद्वितीयंमेधर्महानिकरंमहत् विरुद्ध
मिदसंप्राप्तंकिंकार्यमधुनामया राज्ञोयंपरमोधर्मः श्रूयतेवेदशास्त्रतः अपिसंत्यज्यवैप्राणान् प्रजाः संपाल
येदिति नातः परतरोधर्मोराज्ञांयद्भिरणार्जितं। विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंसदा यआहवेषुचध्यंतेप्रत्य
र्थमपराङ्मुखाः आकल्पंस्वर्गिनोयांतितेस्वर्गयोगिनोयथा पदानिक्रतुतुल्यानिभग्नेषुनिवर्तिनां राजास्कृतमा
मात्तेहतानांविपुलायिनां तथाहंवादिनंक्लीबंनिरतंपरसंगतं नहन्याद्विनिवृत्तंचयुद्धेप्रेक्षणकादिकां एवंयः
पालयेद्राजाप्रजाः प्राणैरपिध्रुवं सलभेद्वांछितंसर्वंऐहिकामुष्मिकंफलं उपेक्षेद्यः प्रजाः सर्वाः परचक्रादिपी
डिताः संपतेन्नरकेघोरेयावदाभूतसंप्लवं अन्यच्चश्रूयतेवेदेपुराणेचमुनीश्वराः यज्ञवद्भिः पुरास्व्यातंलोकानां
हितकाम्यया वाराणसीद्वयंचेदंदक्षिणंवातथोत्तरं नमोक्तव्यंनमोक्तव्यंसंसारार्णवतारकं वाराणसीद्वयंहित्वा

कर॰म॰ योन्यत्रकुरुतेरतिं संसारनरकेघोरेसपतेन्नित्यमेवहि संसारतरणोपायोनिर्मितोविष्णुनापुरा वाराणसीद्वयेवा
सोदक्षिणेचोत्तरेतथा वाराणसीद्वयंचेदंमुक्तिद्वारमपावृतं विसृज्योचसुमंदात्मासपतेन्नरकंध्रुवं विशेषतोनभो
क्तव्यंकरवीरंयवाधिकं भुक्तिमुक्तिप्रदंयस्माद्याम्यवाराणसीरितं करवीरंहिमंदात्मायस्त्यजेत्सपशुर्नरः यत्राति
दर्शनादेवभुक्तिमुक्त्यादिसत्फलं यत्फलेत्करवीरेवैस्वर्गमिंद्रादिकांक्षितं नलभेतन्नरोन्यत्र पूर्वराज्यमपिध्रुवं भु
क्तिमुक्तिप्रदंहित्वाकरवीरपुरंपुरं रतियोन्यत्रकुरुतेसपतेन्नरकेध्रुवं तस्माद्धर्मद्वयंचेदंयथास्यान्ममस्कृताः
वासोस्मिन्करवीरेवैप्रजानांचापिरक्षणं यूयंधर्मपराशांताः सत्यादिनियमैर्युताः शंसंतुकृपयाः सर्वेविनिश्चि
त्यंतथैवहि श्रीदेव्युवाच इत्थंतेमुनयःपृष्टाराज्ञाः सर्वेविवेकिनः वक्तुमारेभिरेधर्मंयेनस्यादुभयंशुभं मुन
यऊचुः धर्मोयंपरमोराजन्नृणांप्रोक्ताः सनातनाः येद्यात्स्वप्राणदानेवैपरोपकारणेपरं दधीचिश्चोञ्छवृत्ति
श्चशिविश्चैवतथावलिः उपकारंप्रकुर्वंतोत्यध्रुवेणध्रुवंगताः तस्मात्त्वंगच्छराजेंद्रकुरुराज्यंविधानतः प्रजानामु

114

पकारार्थंनशरीरविवृद्धये कृत्वाकर्माण्यनेकानिसमर्पयहरौपरे नबध्यसेतथाकुर्वन्पद्मपत्रमिवांभसि परो
पकृतयेनित्यंयोयत्रनिवसेन्नरः तत्रतस्यभवेत्काशीकरवीरंचद्वारका अथान्यत्संप्रवक्ष्यामिक्षेत्रवासफलप्र
दं माहात्म्यश्रवणान्नित्यंक्षेत्रवासीभवेन्नरः महात्म्यंकरवीरस्यशृण्वतःश्रद्धयान्वहं करवीरंवासपुण्यंसर्वं
भूयान्नसंशयः नरोयःक्षेत्रमाहात्म्यंतीर्थंयत्सेव्यतेयदि सएववासिनोज्ञेयोनतुभेकाजलेस्थितः यदाशिवोम
हालक्ष्म्याप्रेषितोदक्षिणांदिशं करवीरवियोगाग्निंशामयासासतत्स्मरन् महालक्ष्मी॰ इतिश्रुत्वावचस्तेषामिं
द्रसेनोमुदान्वितः पप्रच्छयन्मुनीन्सर्वान्तदिहैकमनाः शृणु इंद्रसेनउवाच किमर्थंप्रेषितोदेव्यामहालक्ष्म्या
सदाशिवः गत्वाचकृतवान्किंवातत्सर्वंकथयंतुमे देव्युवाच इतितत्प्रश्नसंतुष्टाः सर्वेतेमुनिपुंगवाः कथां
तेकथयामासुःसर्वपापप्रणाशनीं मुनयऊचुः ब्रह्मणोनिर्मिताःपूर्वंपूर्वदेवासुरास्तथा तेषांयुद्धमभूदुग्रंदिव्य
वर्षशतंपुरा देवसैन्यंपराभूतमसुरैश्चवरोर्जितैः इंद्रालयंसमासाद्यत्रिलोकींबुभुजुर्बलात् ततोदेवाः सहेंद्रे

पाञ्चत्माणंशरणंगताः अत्रापिसहदेवेंद्रैजगामशिवसंनिधौ सोपितैः सहतैः शंभुर्महाविष्णुपदंययौ सर्वैःसमीत्यविधिव
द्विचार्यचपुनःपुनः पुरुषान्मापेचम्रत्युरितिरत्नवरंपरं विज्ञायाथागताः सर्वेकरवीरपुरंप्रति विष्णुशक्तिंमहालक्ष्मीसंपू
ज्यविधिपूर्वकं श्रीरुद्रप्रमुखाः सर्वेतुष्टुवुः परमेश्वरीं विज्ञायाथमहालक्ष्मीः तेषामंतर्गतंज्वरं प्रोवाचजगतांधात्रीदे
वान्सर्वानिदंवचः संनद्धाः संतुयूयंवैसर्वेयुद्धार्थमाहृताः सन्नद्धास्तेतदाचासन्देवादेव्याज्ञयाक्षणात् श्रुत्वादेवान्
स्करसन्नद्धानस्कराः सर्वएवहि दक्षिणाब्धेस्तटाकेहिसंस्थितायुद्धकाम्यया सन्नद्धामस्करान्ज्ञात्वामहादेवीदयान्विताप्रे
षयामासदूतंवैतदादेवीसदाशिवं श्रीमहालक्ष्मीउवाच शिवंगच्छमहायुद्धेदैत्यानांसंन्निधौभवान् गत्वाचदास्करान्सर्वान्
वंमद्वचनंहितं इंद्रलोकंमहेंद्रायप्रददंतुममाज्ञया हविर्भागंतुदेवानांनगृण्हंतुकदाचन कृष्णाकुंजीवितार्थंवैवर्ततेय
दिहेच्छदि तदागच्छंतुपातालंस्व७स्थानंसर्वएवहि बलावगोच्चदाचेत्स्यादिच्छायुष्माकमाहवे तदीशीघ्रंसमायांतुसर्वए
गतायुषाः मुनयऊचुः इतिश्रुत्वावचोदेव्याजगामाथसदाशिवः विसृज्यकरवीरंवैदक्षिणाब्धेस्तटमहत् करवीरवियोगे

नसंतप्तस्तुसदाशिवः करवीरपुराख्यानंपठन्शृण्वन्नहर्निशं उवासकतिचिन्मासांस्यावदैत्यसमापनं शृण्वतस्तस्य
माहात्म्यंगतंदुखंवियोगजं जातंवासफलंचापिकरवीरपुरस्यहि शार्वाख्यातंवचः श्रुत्वादैत्यास्तेमर्षसंयुताः आगताःक
रवीरंवैयुद्धायकृतनिश्चयाः ततोदेव्याहताः सर्वेमृताश्चकरवीरके मुक्तिमेवात्रसंप्राप्याजन्ममृत्युविनाशिनीं तस्माद्
र्म्यामिराजेंद्रयद्दृष्टंकरवीरकं यद्दर्शनात्प्रपूयंतेदैत्याअपिखलाजयः वासश्चाप्यत्रसंजातोमासानांपंचकंतव तस्मा
त्वंनगरंगत्वाराज्यंकुरुसमाहितः करवीरसमाख्यानंशृण्वंनित्यमहर्निशं प्राप्यसेवासजंपुण्यंशिववत्तुष्टमानसः प्रजा
पालनजंचापिभवेत्तेसुकृतंपरं श्रीमहालक्ष्मीउवाच इतिश्रुत्वावचस्तेषामिंद्रसेनोर्मिंद्रसेनोमुदान्वितः गत्वासनग
रंदिव्यंराज्यमुच्चैश्चकारसः हत्वारिपूनदासर्वान्दस्यूंश्चापिमहामतिः योवैराज्येतथास्थाप्यस्वपुत्रंपुत्रवत्सलः स
यंहिनिस्पृहोभूत्वाकिंचिदासक्तमानसः मत्क्षेत्रस्यसमाख्यानंसदाशृण्वन्नहर्निशं पुराणश्रवणार्थंहिविप्रमेकंबहुश्रु
तं हस्तकर्णविभूषाद्यैर्विभूष्यचयथाविधि अन्नाच्छादनभूधेनुः सुवर्णैः परितोष्यच दत्वापुस्तकसंभारंनानारत्नसम

कर॰म॰ न्वितं हस्तकर्णविभूषाद्यैर्विभूष्यचयथाविधि दत्वासनंमहद्दिव्यंशिरोपकूषपाकेतथा द्विजंसंस्थापयामासजिताक्षं
तुष्टमानसं दत्वैकंहिमहोद्यानंतुलसीवनभूषणं अश्वत्थामलकैः पूर्णंसर्वपापप्रणाशनं पूजयामासतत्रैवशाल
ग्रामशिलास्वयं तुलसीबिल्वपत्राद्यैरुपचारैस्तथापरैः ध्यात्वाचानुदिनंराजातिलकंद्वारकामृदाः निर्माल्यतुल
सीमाल्यंधृत्वाकंठेसदैवहि श्टण्वन्गृणन्स्मरन्नित्यंस्तोत्रंवैसुसमाहितः कालेनमहताप्राप्तोमृत्युंवैसंस्मरन्
हरिं शोकदुःखविनिर्मुक्तः तद्विष्णोः परमंपदं जगामामृतसंज्ञंवैयद्गत्वाननिवर्तते तस्मात्वमपिवैगच्छ घटजन्म
षडाननं आगच्छेद्यदिसंतुष्टोविवाहार्थंतदानय सकथिष्यतिसर्वंतेमत्स्तोत्रस्यकथानकं तेनैवचासजंपुण्यंभवेत्त
वैतवानघ नारदउवाच इतिश्रुत्वावचोदेव्याघटजन्मामहामुनिः हित्वाशोकंसमस्तंवैषण्मासावधिलाभतः तथ
स्तुत्वामहालक्ष्मींप्रणम्यचपुनःपुनः समागतोमुनिःश्रेष्ठः समुनिर्मुक्तिमंडपं श्रुत्वाधर्मकथाःपुण्याः दृष्ट्वानी
राजनंविधिं प्रदक्षिणांमहदेव्याः कुर्वन्वैमुनिपुंगवः संध्याकर्तुंगतोयत्रसंध्यातीर्थमनुत्तरं संध्यातीर्थेनरःस्ना

116

त्वायः संध्यांसमुपासयेत् दिवारात्रिकृतात्पापान्मुच्यतेनात्रसंशयः संध्यायावंदनंकृत्वासंध्यातीर्थेघटोद्भवः
गतिवैस्वाश्रमंदिव्यंयत्रपूर्वंस्वसंस्थितः क्षेत्रवायव्यदिग्भागेक्रोशार्धांतरसंस्थितं अगस्त्यस्याश्रमंदिव्यंप्लावितंपं
चगंगयापूर्वमासीत्कृतंतेनतीर्थंचागस्त्यसंज्ञितं अगस्त्येश्वरसंयुक्तंसर्वपापप्रणाशनं प्लावितंपंचनद्यावैदृष्ट्वा
लिंगंसतीर्थकं तत्तटाकेस्थितस्तत्रकृत्वापर्णकुटिंमुनिः पंचयज्ञविधिंकृत्वाभोजयित्वातथातिथीन् यज्ञशिष्टंसभु
ज्याथसपत्नीकोमुदामुनिः सुष्वापाथसुखंकिंचित्क्षणमात्रंगतश्रमः उत्थायापररात्रौतेतीर्थनामान्यनुक्रमात् गृ
ण्हत्सतीर्थनामापिजगादस्त्वंतदामुनिः भर्तृनामांकितंतीर्थंश्रुत्वातन्मुखपंकजात् स्वविस्मिताननाकिंचिपतिंमप्र
च्छविस्मिता लोपामुद्राउवाच किंचित्त्वज्ञाप्यमिच्छामियदाज्ञास्वामिनोभवेत् ब्रूतेहियाननुज्ञातापत्यासापतिताभ
वेत् ऋषिरुवाच किंवक्तुकामादेवीत्वंब्रूहितथ्याविशंकिता नत्वादत्तीनांवाक्यंवैपत्युरवेदायकल्पते॥२९॥ छ ॥
॥छ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयसंवादेइंद्रसेनचरितेश्रीमहालक्ष्म्यासंवादेलोपामुद्राकृता

रकातीर्थमहिमावर्णनंनाम सप्तविंशोध्यायः ॥ २७ ॥ छ ॥ नारदउवाच ततः पप्रछसादेवीत्रपाम्पपतिमादृत
सर्वेषांचहितार्थायस्वसंदेहापनुत्तये १ लोपामुद्रोवाच भगवन्नामकिंतीर्थंयदत्रपठितंत्वया अत्रस्नानिसुती
र्थान्निपतत्तात्कथंभवेत् २ त्वमथैवहिसंप्राप्यः क्षेत्रमेतन्मयासह तावदेवस्कतीर्थेतेकथंजातंमहामुने ३ त
त्सर्वंकथयामास्कुकृपयादीनवत्सल संशयोयंमहानद्यदुनोतिममनानसं ४ नारदउवाच इत्थंत्वमानुपृष्टः सन्
षडजन्मामहामुनिः प्रोवाचसकलंवृत्तंयत्पूर्वंतत्तांप्रति ५ अगस्त्यउवाच आकर्णयवरारोहेयत्पृष्टंहित्वयामम
तदहंसंप्रवक्ष्यामिशृणुसर्वंहिसादरात् ६ पुराकल्पांतरेदेवीसंस्थितोहमिहैवहि ज्ञात्वाक्षेत्रस्यमाहात्म्यंत्यक्त्वा
काशीपुरीमपि ७ तपोमयामहत्तप्तंपत्रमूलफलाशनात् तेनतुष्टामहालक्ष्मीर्वरंदातुमिहागता ८ गृहाणवर
मित्युक्तेवृतोयंवैमयावरः मन्नाम्नाश्चपवेतीर्थंपावनंसर्वदेहिनां ९ लिंगंचापिभवन्नाम्नाममकेनातिपावनं देवा
स्करमनुष्याणांऋषीणामपिमामकं १० शुभमस्तुसमस्तानांमास्त्कुतेभ्यः पराभवः इत्थंवृतेवरेदेवीतत्सर्वंप्रददौमम

११ ततोत्रासीन्महातीर्थमगस्त्याख्यसलिंगकं प्लावितंतदिदानींवैवर्ततेपंचगंगया १२ महादेव्याः प्रसादेनलब्ध्वा
वरमनुत्तमं पीतोमयासमुद्रोपिमहागर्वोविमूढधीः १३ वातापील्वलनामानौदैत्यौचापिहतौमया कृतपाणिग्रहश्चा
पित्वदीयः परमःप्रियः १४ ततः काश्यांतथावासोविंध्याद्रिश्चाधरीकृतः प्राप्तंचापिपुनस्त्वेतत्करवीरमतिप्रि
यं १५ देव्यावरप्रभावेनजातोहंपूर्णकामनः अयमेवाश्रयः पूर्वंमदीयइतिवैप्रिये १६ संस्थितः पुनरागत्यम
तीर्थस्यैवसंनिधौ तदेववर्ततेतीर्थंसलिंगंलोकपावनं १७ पुराकल्पांतरेभूतंगंगायांतत्प्रदृश्यते नारदउवाच
इतितद्वचनंश्रुत्वाकिंचित्संदिग्धमानसा पतिंपप्रछसाभूयः सजातबहुविस्मया १८ लोपामुद्राउवाच कथंकल्पां
तरस्थंवैतीर्थमेतत्स्थिरंभवेत् कल्पांतेश्रूययच्चप्रलयेत्सर्वनाशनं १९ समुद्राप्लावयंत्येवजगतीप्रलयांतरे २०
पृथिव्याहिलयेजातेकथमेतत्स्थिरंत्वभूत् तत्सर्वंहिविशेषेणयथामेनिश्चलामतिः २१ तथाकथयसर्वंचेक्षेत्रा
ख्यानंमहामुने नारदउवाच इतितत्प्रश्नसंहृष्टः सतदाघटसंभवः २२ महात्म्यंकथयामासक्षेत्रस्यास्यमहामतिः

कर॰म॰ अगस्त्यउवाच अनंतकल्पसंभूतंकरवीरमिदंप्रिये २३ प्रलयाबहवोजातास्तदापीदंस्थिरंभवेत् करवीरमिदं
क्षेत्रमपिब्रह्मांडमध्यगं २४ ब्रह्मांडमध्येनभवेत्पंचयोजनसंमितं यथायथाहिवर्धेतजलमेकार्णवेमहत् २५
तथातथोन्नयोदेवीस्वक्षेत्रंप्रलयांतरे क्षेत्रमेतन्महादेव्याः कराग्रेविधृतंसदा २६ अंतरिक्षेनभूमिस्थेनक्षेत्रेमे
दबुद्धयः सौम्यायनंसदैवात्रसदाकृतयुगंतथा २७ महोदयःसदैवात्रसूर्यपर्वःसदात्रवै सदैवमंगलंचात्रयत्र
लक्ष्म्याःसदास्थितिः २८ यथाभूमितलेदेवीपूर्यःसंतिसहस्रशः तथेदंकरवीरंवैनमंतव्यंकदाचन २९ लोकोत्त
रमिदंक्षेत्रंविष्णुनानिर्मितंस्वयं ननाशोस्त्यपिकल्पांतेकरवीरपुरस्यहि ३० विष्णुनारचितस्यास्यकुतोनैवयथावि
धिः ततोयमःपुरातप्त्वाबहुकालंसुदुस्तरं ३१ त्रैलोक्याधिपत्यंप्राप्यःकरवीरपुरंविना प्रवेशोयमदूतानांन
कदाचिद्भवेदिह ३२ सदारक्षिष्यमाणानांयमधर्मेणसादरं अत्रापिकृतपापानांनियंतारंकभैरवः ३३ अत्रपाप
नकर्तव्यंदारुणागणयातनाः पापमेवहिचेत्कार्यंमहीअस्तिमहीयसी ३४ अपिकामातुरोजंतुर्यथारक्षतिमातरं

अपिपापकृतारक्ष्यंकरवीरंचमुक्तिदं ३५ परापवादशीलेनपरदाराभिलाषिणा विनसेव्यंकरवीरंवैतेनमुक्तिकरं
क्वचित् ३६ अभिलष्यंतियेनित्यंधनंचात्रप्रतिग्रहैः नसेव्यंकरवीरंतैः परखेलंपटैरपि ३७ त्यक्त्वादेवींमहालक्ष्मी
येन्यदेवपरायणाः तैरिदंनैवसंसेव्यंवैभवंकरवीरकं ३७ देवनिंदापरायेचद्विजनिंदापराश्चये नसेव्यंकरवीरंतैः
सदाचारप्रतीपके ३८ परद्रोहधियायेचकृतघ्नाश्चापियेनराः परापवादिनोयेचतेषांकोलापुरंकुतः ३९ तीर्था
भिलाषिभिर्मर्त्यैः सेव्यंतीर्थांतरंनवै अन्यत्रभूमिवलयेकरवीराद्धिमुक्तिदात् ४० यथांतरंसतिभवेद्राजसेवकयो
र्द्वयोः ४१ दृष्टांतमात्रंकथितंकरवीरान्यतीर्थयोः ४२ यस्यभाग्यवतस्त्वात्रतिष्ठत्यस्थीन्यपिप्रिये नतस्यदुःख
क्षेत्रोपिक्वापिजन्मनिजायते ४३ ब्रह्महत्यादिपापानांप्रायश्चित्तंचिकिर्षया करवीरंसदासेव्यंद्विजवाक्यान्नसंश
यः ४४ किंबहुक्तेनमेदेवीमहोदयमभीप्सुना संसेव्यंकरवीरंवैप्रकृष्टमवतीतले ४५ अनायासेनमुक्तिस्यान्मृता
नांकरवीरके भोगस्याज्जीवतांचापिनतीर्थामीदृशांक्वचित् ४६ संतिद्वीपाह्यनेकावैपारावारांतरस्थिताः जंबुद्वीपस्

कर॰म॰ मोद्वीयोनकाचिद्धरणीतले ४७ तत्रापिनववर्षात्विभारतंतत्रचोत्तमं कर्मभूमिरियंप्रोक्तादेवानामपिदुर्लभा ४८
योजनानांसहस्राणिनवविस्तारितंस्थितं भारतंप्रथमंवर्षंमेरोर्दक्षिणतस्थितं ४९ वाराणसीद्वयंतत्रभासतेज
नपावनं तत्केनवर्ण्यतेदेवीखंडंभैरवताभिधं ५० जंबुद्वीपाग्रिरोरत्नंकरवीरमिदंप्रिये स्मरणादेवशारीरंपापंहर
तितत्क्षणात् ५१ संतितीर्थान्यनेकानिपापत्राणकराणिच नत्रात्कान्यधिकंदीतुं कृतेनः परमुद्धितः ५२ जन्मांत
रेष्वसंख्येषुयः कृतः पापसंचयः दुःप्राणोद्योहिनितरांत्रेलेर्दानैस्तपोजपैः ५३ गंतुंसमुद्यतस्येह करवीरपुरं
प्रति अंगेषुवेपतेसोथरक्षोवातातहतोयथा ५४ ततः कांतार्धमार्गस्यकरवीरंप्रयास्यतः पुंसः शरीरान्नियांतुम
पेक्षेतपदांतरं ५५ करवीरंप्रतिष्ठस्यमहाभाग्यवतःप्रिये पलायंतेदूरतरंतमःसूर्योदयेतथा ५६ करवीरस्य
माहात्म्यमनंतंकल्पसंभवं कथितंविष्णुनाधात्रेशिवायचमाहीयसे ५७ शिवेनकथितंदेव्यैस्कंदायचततःपरं स
हस्रकल्पसंभूतंशिशिवेधारयामहि ५८ स्कंदेनविध्यतंदेवीसप्तकल्पसमुद्भवं तेनापिविध्यतस्वल्पमष्टागंशात

कल्पजं ५९ तस्यास्यकरवीरस्यमाहात्म्यंकेनवर्ण्यते तस्मादेतन्महीयंवैतीर्थंलोकमलापहं ६० विद्यतेपंचगंगायां
बाणयुग्मप्रमाणतः तन्मध्येबाणमात्रंवैभवेत्तीर्थंहितावकं ६१ आत्मनोर्धंयथात्वंमेतीर्थमर्धंतथाभवेत् येनेस्नास्यं
तिमतीर्थेतावकेचापिस्कंदरि ६२ सौभाग्यंपरमैश्वर्यंपुत्रपौत्रधनादिकं ऐहिकामुष्मिकंचापिफलमिंद्रतुलेनघाः
६३ नारदउवाच इतिश्रुत्वापतेर्वाक्यंप्रहृष्टवदनासती स्वनाम्नाविश्रुतंचक्रेतीर्थंतज्जनपावनं ६४ वंध्यापिजायते
पुत्रपुत्रिणीस्नानदानतः तत्तीर्थंद्वितयंविद्धिमार्कंडेयमुनेश्वरं ६५ हरिश्चंद्रोमहाराजाससपत्नीकोप्यपुत्रतः तीर्थसु
ग्मेपरेस्नात्वालभेपुत्रलभेपुत्रवरंमुने अगस्त्यस्यमुनेस्तीर्थेलोपामुद्राभिदंतथा नमयाशक्यतेवक्तुंघटजन्मवरोर्जि
तं ६७ सूतउवाच देवर्षेर्वाक्यमाकर्ण्यमार्कंडेयोमहामुनिः पुनःपप्रच्छतंविप्राः रूपंवैघटजन्मनः मार्कंडेयः ६८
व्याख्यायेनस्वपत्न्यैवैक्षेत्रमाहात्म्यमुत्तमं यश्चकारमुनिःपश्चात्मुनेराज्ञयाशुभे ६९ पिबतस्त्वंमुखांभोजच्युतंक्षेत्रक
थामृतं नतृप्तिमधियात्यंगशृणोमेश्रद्धयायुतं ७० सूतउवाच इत्थंपृष्टोमुनिनातेनविप्रादेवर्षिस्तंमानयन्वैमुनींद्रं

कर॰ म॰ आरेभेवैचक्रुमुख्यैर्मुनीन्द्रस्तुष्टः प्रस्थानंश्रद्धयामृष्टचेता ॥७४॥ छ ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनार
दमार्कंडेयसंवादेअगस्त्यलोपामुद्रातीर्थमहिमानामअष्टविंशोध्यायः ॥२८॥ छ ॥ नारदउवाच ततःसूर्योदयंज्ञा
त्वाघटजन्मामहामुनिः स्मृत्वादेवींमहालक्ष्मीविद्युरूपापरार्थदां १ विश्वेश्वरंतथास्मृत्वाभवानीतदनंतरं श्रीरंक
भैरवंस्मृत्वावीरंत्वापिमहार्गलं २ स्मृत्वाश्रीकुंडलेशंचकुक्कुटेशंतथैवच स्नात्वाचागस्त्यतीर्थेवैसमाप्याह्निकमा
दरात् ३ श्रीरंकभै॰रवंपूज्यवीरंचैवमहर्गलं स्नात्वाथमणिकर्ण्यांवैपूजाह्यस्तसमाहितः ४ विश्वेशादीनिलिंगा
निसंपूज्यविधिपूर्वकं महालक्ष्मींसुसंपूज्यदृष्ट्वानीराजनंविधिं ५ कृत्वाप्रदक्षिणंदेव्याःस्थित्वाचमुक्तिमंडपे अं
तर्गृहस्ययात्रायाःकृत्वासंकल्पमादरात् ६ देव्याश्चपूर्वदिग्भागेगतोब्रह्मेश्वरंमुनिः ब्रह्मतीर्थेसुसंस्नात्वाकृत्वाती
र्थविधिंतथा ७ अंतर्गृहाद्यलिंगंवैब्रह्मेशंपूज्यभक्तितः यात्रामंतर्गृहीकुर्वन्निर्गतस्तुप्रदक्षिणं ८ अग्नीश्वरादिलि
गानिरेणुकांतानिपूज्यच समाप्यांतर्गृहीयात्रांमहालक्ष्मींप्रणम्यच ९ दक्षिणंचोत्तरंचापमानसंकर्तुमुद्यतः आदा

176

यसर्वसंभारंब्राह्मणैःसहितोमुनिः १० मलापकर्षणंतीर्थंगतःपत्नीसमन्वितः क्षेत्राद्धेपश्चिमेभागेक्रोशार्धांत
रसंस्थितः मलापकर्षणंतीर्थंस्नानदानान्मलापहं स्नात्वातत्रतथापूज्यमलापकर्षणेश्वरं ११ विसृज्यमलवस्त्रा
णिधृत्वाथनूतनानिच आगतःकोटितीर्थंवैसर्वपापहरंमुनिः १२ गोमतीसंगमात्पूर्वेपश्चिमेमलकर्षणात् को
टितीर्थंचजानीयात्कोटिशांकरसंयुतं १३ दृष्ट्वातत्कोटितीर्थंवैदिव्यलिंगसमन्वितं माहात्म्यंतस्यपप्रच्छलोपामुद्रा
पतिंप्रति १४ लोपामुद्रोवाच किन्नामाकिमिदंतीर्थंकिंवामाहात्म्यमस्यहि तत्सर्वंहिसमाख्याहिपतेममयथाश्रुतं
१५ नारदउवाच इतिपृष्टोमुनिःपत्न्याप्रोवाचाथघटोद्भवः माहात्म्यंकोटितीर्थस्यमार्कंडेयमुनेश्वरात् १६
अगस्त्यउवाच पुष्कराख्यमिदंतीर्थंपूर्वमासीत्पतिव्रते श्रुत्वागतानितीर्थानिलोकत्रयगतानिच १७ आगत्य
पुष्करेतीर्थंह्यस्थितंकरवीरके तदेतत्पुष्करंतीर्थंपुष्करेश्वरसंयुतं १८ कोटितीर्थमिदंजातंपश्चाच्चलोकपावनं
कोटिशांकरसंयुक्तंकोटितीर्थफलप्रदं १९ सर्वपापहरंचैवसर्वकामप्रदंशुभं पितॄणांमुक्तिदंचापिदानपिंडसु

तर्पणैः २० अत्रकश्चित्त्वनिर्मुक्तोराजाभ्यानुरितीरितः कोटिजन्मकृतात्स्नानदानकृततर्पणैः तदिदंकोटितीर्थंवै
भद्रेजानीहिविश्रुतं स्नानदानरतान्जंतून्यत्पुनातिकिल्लांजसा २१ नारदउवाच इतिश्रुत्वापतेर्वाक्यंलोपामुद्रा
तिविस्मिता पुनःपप्रच्छतंसुभ्रुः कोटितीर्थकथानकं २२ लोपामुद्राउवाच पुष्करारव्यमिदंतीर्थंकोटितीर्थाभिधंक
थं जातंतत्सर्वमारव्यानमारव्याहिप्राणवल्लभ नारदउवाच २३ पत्न्यासंप्रार्थितोभक्त्याघटजन्मामुनेस्तदा कोटिती
र्थसमारव्यायानिदानंप्राहतांप्रति २४ अगस्त्यउवाच देवासुरमभूद्युद्धंयदापूर्वंपतिव्रते आगतास्तत्रतेदैत्याष
ट्षष्टिकोटिसंमिताः २५ त्रयस्त्रिंशत्कोटिमितादेवाश्चापिसमागताः चक्रुर्युद्धंपरंतत्रमहोग्रंरोमहर्षणं २६
पूर्वंदैत्यैर्जितंयुद्धं दृष्ट्वादेवीदयान्विता हन्यमानैःस्मृतादेवैरागतास्वगणैर्युता २७ रंकभैरववीराद्यैः कालवेता
लसंयुतैः श्रीसिद्धिवटुकाद्यैश्चयोगिनीगणसंयुतैः २८ नवकोटिसखीयुक्ताकात्यायिन्यादिभिर्युता तदाचक्रे
महालक्ष्मीर्युद्धंदैत्यगणैः सह २९ रंकभैरववीराद्यैः श्रीसिद्धिवटुकादिभिः हन्यमानास्तदादैत्याडुद्रुवुस्तेदिशोदिशः ३०

गतेषुसर्वदैत्येषुसंस्थिताः कोटिसंमिताः युद्धंचक्रुःस्तदादैत्यागणैसार्धंमहाबलैः ३१ महाबलांस्तदावीक्ष्यम
हालक्ष्मीस्तदासुरान् धृत्वाकेशेषुतान्सर्वानेकदैवमहाबलात् ३२ भ्रामयित्वाथचिक्षेपभूतलेरक्तलोचनान्
अस्त्रगर्वांस्तदावीक्ष्यमहालक्ष्मीर्दयान्विता प्रोवाचअसुरान्सर्वान्रूपयाभ्रष्टापीडितान् श्रीमहालक्ष्मीउवाच भो
भोस्करवराःसर्वेभवंतः शीघ्रमेवहि गच्छंतुभवतांनोचेद्धन्म्यांयुष्मानदागतः अगस्त्यउवाच इतिश्रुत्वावचोदेव्या
दैत्यास्तेमर्षपूरिताः प्रोचुस्तेथमहालक्ष्मीमक्लीबाःसर्वएवहि दैत्यउवाच जीवितान्नानचास्माकंशीघ्रंहनयत्तां
सुखं सुखेहिमरणंश्रेष्ठंशूराणामिदमीप्सितं जितस्यजायतेराज्यंमृतस्यापिसुरांगना अस्थिरंजीवितंयस्मान्नचिं
तामरणारणे नवाहंवादिनोजंतोर्निरयेवासशिष्यते तस्मात्त्वैवकर्मीदैहनशीघ्रंत्वमेवहि वहवोपिगतिलब्ध्वास्व
ह्स्तमरणेनयत् अस्माकंहितदेवास्तुजीवनादपिशोभनं अगस्त्यउवाच इतिश्रुत्वावचस्तेषांदेवीसंतुष्टमानसा वी
क्ष्यसारंपुनःप्राहसमस्तानसुरोत्तमान् श्रीदेव्युवाच पूर्वमेवशृणुध्वंहिवरंमत्तःसमीहितं भवतांदैवमाल्लोक्यसु

३५

कर०म० शीतापरदास्मितः अगस्त्यउवाच इतिश्रुत्वावचोदेव्यास्तेसुराः सर्वएवहि वरंविचिंत्यहृदयेप्रोचुर्लक्ष्मीगत
व्यथाः असुराऊचुः दीयतेयदिचास्मभ्यंवरः शीतावरानने तदेतत्पुष्करंतीर्थमस्मन्नाम्नाप्रथांव्रजेत् निहन्यते
त्वयादेवीदैत्यानांकोटिरत्रवै तदिदंकोटितीर्थाख्यंतीर्थमस्तुतवाज्ञया सर्वेभ्यःस्तीर्थवरेभ्यः श्रेष्ठंतीर्थमिदं
भवेत् अत्रयेषांपतेत्पिंडस्तेषामस्तुपरागति अगस्त्यउवाच इतिश्रुत्वावचस्तेषांमहालक्ष्मीर्दयान्विता तत्प्रार्थि
तंवरंदत्वादैत्यानांचगतिंददौ ततोदेव्याज्ञयाः सर्वेदेवाश्चापिमहर्षयः चक्रुस्तत्पुष्करंतीर्थंनाम्नावैकोटितीर्थकं
दिव्यलिंगंचतत्रैवकोटिशंकरनामकं स्थापयामासुरिंद्राद्यामंत्रघोषपुरःसराः वरंचापिददुस्तत्रसंतुष्टाः सर्वए
वहि येस्नात्वाकोटितीर्थेवैलिंगंचकोटिशंकरं पश्यंतिविधिवत्पूर्वंतेनिष्पापाभवंतुवै दत्तंहुतंतथाजप्यंयदल्प
मपिवैकृतं तत्कोटिफलदंभूयात्कोटितीर्थप्रभावतः आद्यमेतद्भवेत्तीर्थंदक्षिणेमानसेपरं तर्पणंपिंडदानंच
~~पित्रुद्दिश्ययेनराः~~ यन्नाम्नात्रभवेत्कचित् तेषांगतिः पराप्रस्यात्पुनरावृत्तिवर्जिता तर्पणंपिंडदानंचपित्र

१२२

नुद्दिश्ययेनराः कोटितीर्थेकरिष्यंतितेभवंत्यतिपावनाः अगस्त्यउवाच ततोदेवगणैः सार्धंमहालक्ष्मीः प्रहर्षिता
वर्षद्भिःपुष्पधाराभिः स्वगणैः परिवारिता कृत्वान्यत्पुष्कराख्यंहितीर्थंकलिमलापहं नृत्यगीतसुवाद्यैश्चसहिता
स्वपुरंययौ तदिदंचतवाख्यातंकोटितीर्थंसुशंकरं यत्रार्जितंनरैः पुण्यमेककोटिफलप्रदं आख्यातंसर्वमेततेयत्पृ
ष्टंहित्वयामम पुष्कराख्यस्यतीर्थस्यकोटिनामनिदानकं नारदउवाच माहात्म्यंचैवमाख्यायस्वपत्न्यैःश्रद्धयान्वितः
चक्रेतीर्थविधिंसर्वंस्नानदानसुतर्पणैः श्राद्धंहिरण्मयंकृत्वातथैवपिंडपातनं भूरिश्राद्धंततःकृत्वापुष्करेब्राह्मण
स्यच पूज्यकोटीश्वरंचापिगंधाक्षतसुपुष्पकैः ततोलिंगंशुभंतीर्थंकोटितीर्थस्यपश्चिमे तत्रस्नानादिकृत्वाथजयं
तीसंगमंततः सुवर्णंचार्घ्यमादायफलगंधाक्षतादिभिः रजतंचशिरःकृत्वामंत्रमेतमुदीरयेत् ब्रह्मलोकात्समायाता
तेवसिष्ठतनयेशुभे सर्वपापविशुद्ध्यर्थंददाचर्घ्यंचगोमती वसिष्ठदुहितेदेविशक्तिज्येष्ठयशस्विनी त्रैलोक्यवंदितेदे
विपापंमेहरगोमती वाचायच्चकृतंपापंमनसाकर्मणातथा तत्सर्वंविलयंयातिगोमतीदर्शनेनहि वसिष्ठेनसमानी

नीतामुनिनायत्रगोमती स्नातोभवतिगंगायांयत्रस्नात्वाकलौयुगे चक्रतीर्थेनरः स्नात्वाकृष्णंविस्पसन्नारदं नमोस्तुवि
ष्णुरूपायविष्णुचक्रेतिविश्रुत गृहाणार्घ्यंमयादत्तं सर्वकामप्रदोभव भक्त्याचार्घ्यंप्रदास्यामिदेवायपरमात्मने· त्राहि
मांनरकात्घोरात्नमस्तेजलरूपिणि रामतीर्थेनरः स्नात्वादृष्ट्वारामेश्वरंशिवं त्रिजटातीर्थकंचाथसीताकुंडेततःप
रं निर्गतोन्यानितीर्थानिकुर्वैवैमुनिपुंगवः प्रतितीर्थेषुविधिवत्स्नानंदानंचतर्पणं श्राद्धंहिरण्मयंचापिभूरिश्राद्धंतथै
वच ततस्तीर्थेषुलिंगानांपूजनंनमनंतथा कुर्वन्समागतः सोपतीर्थवैनारसिंहिकं हंसकारंडकाकीर्णंचक्रधैः सा
रसैरपि नानोद्यानश्रियाजुष्टंदिव्यदेवालयान्वितं ततीर्थप्रवरंदृष्ट्वालोपामुद्रास्वविस्मिता माहात्म्यंतस्यसकलंप
तिंपप्रच्छवैमुने लोपामुद्रोवाच किन्नामकमिदंतीर्थंकिंप्रभावंसदैवतं समाख्याहिपतेमह्यंकृपयासर्वमादरात्
नारदउवाच इतितत्प्रश्नसंहृष्टोघटजन्मामहामुने उवाचसर्वमाख्यानंसपत्न्यैसुष्ठमानसः अगस्त्यउवाच इदं
पद्मालयंनामतीर्थमासीत्पुरासती पद्मावत्यामहादेव्यासंयुतंसर्वकामदं यत्रपद्माभिधोराजातपस्तप्त्वातिदारुणं

123

लेभेभुक्तिंचमुक्तिंचतदिदंतीर्थमुत्तमं इदानीनरसिंहाख्यंतीर्थमेतद्धिपावनं सर्वार्थदमिदंतीर्थंत्वंजानीहिवरा
नने नारदउवाच आकर्ण्यपतिवाक्यंसामहदाश्चर्यकारकं लोपामुद्रामहाभागापुनः पप्रच्छतंपतिं लोपामुद्रोवा
च कथंपद्मालयंनामतीर्थमेतत्पुरातनं नरसिंहाभिधंजातंतत्सर्वंवदमेपते नारदउवाच इतिपृष्टस्तदापत्न्यास्व
प्रियायैमहामुनिः कथयामासमाहात्म्यंहृदिसर्वंविचिंतयन् अगस्त्यउवाच आसीद्युगांतरेदैत्योपुप्रल्हादोनामदैत्यरा
ट् वैष्णवः शीलसंपन्नः सत्यवाग्विजितेंद्रियः तत्पितासीत्हरिद्रोहीहिरण्यकशिपुः पुरा सवैष्णवंसुतंदृष्ट्वाप्र
ल्हादंहरिजापिनं ताडयामासबहुधाभल्लासीमुद्गरादिभिः तदाभक्तपराधीनोहरिस्तत्स्मरणात्क्षणात् स्तंभेषु
प्रकटः सत्रनरसिंहवपुर्धरः स्वभक्तपक्षपातेनाहिरण्यकशिपुंरुषा ददारसकराग्रेणतद्दयेदैत्यपुंगवं तद्राज्यं
चददौतस्यप्रल्हादायहरिर्बलात् सोपिराज्यंचकारोच्चैर्हरेराज्ञांहृदिस्मरन् देवद्विजपरःसाधुसर्वधर्मपरा
यणः बहुकालंचकृत्वैवंराज्यमंतेततोबुधः दत्वाराज्यंस्वपुत्रायस्वयंमुक्तिपदस्पृहः पितृद्रोहाच्चराज्यांतेज्ञा

कर॰म त्वावैनिरयेगतिं प्रायश्चित्तंचिकीर्षुर्वैजगाममुनिसंनिधौ तत्रदृष्ट्वामुनीसत्पनत्वाचभक्तिपूर्वकं पप्रच्छपरमंतीर्थं
पापहारिविमुक्तिदं प्रह्लादोवाच तारयंतुहिमांविप्राः सर्वज्ञाहीनवत्सलाः सर्वपापकरंमूढंराजानंपितृघाति
नं यत्रसर्वमघंगच्छेन्मुक्तिश्चापिभवेन्मम तादृशंतीर्थमेकंमेत्रवदंत्वितिपावनं अगस्त्यउवाच एवंसंप्रार्थितःस
त्यमुनयः स्तेनसर्वशः विचार्यहृदयेक्षेत्रंकरवीरमथाब्रुवन् ऋषिरुवाच याम्यवाराणसीक्षेत्रंयवाधिकमितीरि
तं तवयोग्यंतदेवात्रकरवीरंहिपावनं प्रह्लादतादृशंतीर्थंत्रिषुलोकेषुनक्वचित् विद्यतेवासनाहारिमुक्तिकारी
चसर्वदं यत्रलक्ष्मीस्वरूपेणसाक्षाद्विष्णुरहर्निशं सानुपात्कजनानांवैभुक्तिमुक्तिंचयच्छति आगतोवर्ततेयत्रगोक
र्णोशोतिपावनः माहात्म्यंकरवीरस्यविज्ञायसर्वदेवहि क्षेत्रस्यपश्चिमभागेयोजनांतरसंस्थितः पुनातिसकला
न्लोकान्दर्शनस्पर्शनादिभिः १०० त्र्यंबकोविद्यतेयत्रसर्वलोकमलापहः क्षेत्रस्योत्तरदिग्भागेक्रोशमात्रांतरस्थि
तः पूजितोबिल्वपत्राद्यैः सर्वमंगलवर्धनः ब्रह्महत्यादिपापानिहरतेयोजसेवहि विद्यतेगणकेशोहिश्रीकल्लेश्व

रसंयुतः क्षेत्रस्यपूर्वदिग्भागेयत्रगंगानुगंडकी पंचक्रोशादियात्रायांमुख्योयोवैगजाननः पूजादर्शनरूपाद्यैर्यः
पुनातिजगत्त्रयं यत्रपद्मावतीदेवीविद्यतेलोकपावनी क्षेत्रस्यदक्षिणेभागेश्रीपद्मालयसंन्निधौ दैत्यवर्येणकिंक्रिंवा
लभ्यतेकरवीरके यत्रपद्मालयंतीर्थंविद्यतेपापनाशनं तस्मात्वंगच्छदेवेंद्रकरवीरपुरंप्रति पापस्यनिष्कृतिर्भूया
त्मुक्तिश्चापिभवेत्पुरः अगस्त्यउवाच इतिश्रुत्वामुनींद्राणांवचोवैपरमंहितं आगतःकरवीरंवैप्रह्लादःस्वभुत
क्षणात् स्नात्वाथमणिकर्ण्यांवैमहालक्ष्मींप्रणम्यच कृत्वाचांतर्गृहीयात्रांदक्षिणोत्तरमानसे चतुर्भिर्दिवसैःपूर्वं
गयाकृत्यंविधायच अंतर्द्वारचतुष्कंवैकृत्वाचतदनंतरं पंचक्रोशात्मिकांयात्रांकृत्वाचापिविधानतः जलशायिचतु
ष्कंचदृष्ट्वाचतदनंतरं महाद्वाराणिचत्वारिकृत्वाचविधिपूर्वकं भक्त्यालिंगाष्टकंदृष्ट्वामहालक्ष्मींप्रपूज्यच अस्मिन्प
द्मालयेतीर्थेतपश्चक्रेतिदारुणं नरसिंहस्वरूपेणध्यायन्लक्ष्मींविचक्षणः सन्नियम्येंद्रियग्रामंमनाभक्तः कतिचित्स
माः एवमादिकृतंतेनतपउग्रंपतिव्रते तदान्नसिंहरूपेणमहालक्ष्मीपुरस्थितां तुष्टावतत्प्रसात्यर्थंकरुणाम्नतपूरि

कर०म० ता दृष्ट्वापवित्रयावीक्ष्यतमुवाचवरप्रदा श्रीनरसिंहरूपिण्यो० वत्सल्हादृभद्रंतेरुसिद्धस्तपसाभवान् तुष्टाहम
स्मिदेत्स्येंद्रवरंकामयकामितं पूतस्त्वंसर्वपापेभ्यः करवीरविलोकनात् मत्क्षेत्रदर्शनादेत्यहरतेसर्वपातकं ज्ञात्वैवं
क्षेत्रमाहात्म्यंयोवसेत्कृतनिश्चयः तंतारयाम्यहंदेत्यजीवंतमथवामृतं इत्थंनृसिंहरूपिण्यादेव्याप्रोक्तः सदैत्यरा
ट् नृसिंहरूपिणींलक्ष्मींततःप्रोवाचरुंदरी प्रह्लादउवाच नकामयेवरंत्वत्तोदारागारधनात्मकं यत्कालविहितं
देविविचलेसर्वयोनिषु स्करवमेंद्रियकंदेविदेहयोगेनदेहिभिः अवाप्यतेजसैवेहदुखवत्सर्वदैवाहि वरदायदि
मेमातस्त्वंमेदेहिवरंद्धणे त्वत्क्षेत्रवसतिंदेहिजंतूनांमुक्तिदायिनां अनेनैवस्वरूपेणातिष्ठात्रैवचसर्वदा पश्चाल
यमिदंतीर्थंनरसिंहाभिधंकुरु स्नानदानरतान्जंतून्सर्वपापरतानपि तीर्थेवैनरसिंहाख्येपुनीहिरुपणानिमा
न् अगस्त्यउवाच इतिश्रुत्वावचस्तस्यनरसिंहस्वरूपिणी तमाहदैत्यप्रवरंमहादेवीवरप्रदा श्रीनृसिंहरूपि०
वासस्तेसर्वदाचास्तुप्रार्थितोयस्त्वयानघ अत्रगेहेरुरवंतिष्ठयत्रतेमनसोरुचिः यत्रतेवसतिर्भूयात् तीर्थंतत्रस

125

गकं पवान्नाम्नेववियतांभवेत्सर्वार्थसिद्धिदं लक्ष्मीनृसिंहरूपेणातिष्ठाम्यत्रसदैवहि तीर्थमेतन्नृसिंहाख्यंभवेदा
चंद्रतारकं गंडकीतिरसंभूतारथैर्द्वादशसंमितैः शालग्रामशिलाः शुद्धाः समानीययथाविधिः अस्मिन्प्रआल
येदेहिपावनेजनपावनीः ततोप्रभृत्यान्नृसिंहाख्यंतीर्थमेतन्नसंशयः अगस्त्यउवाच इत्युक्त्वासामहालक्ष्मीः प्रह्ला
दंभक्तवत्सला लक्ष्मीनृसिंहरूपेणास्थितातत्रसदैवहि आनीयाथशिलाः शुभ्रारथैर्द्वादशसंमितैः प्रह्लादःस्थापया
मासनानापरदेवसंयुताः ततोप्रवन्नृसिंहाख्यंतीर्थमेतद्धिपावनं ततीर्थस्यपुरोभागेपश्चिमेचतथोत्तरे दक्षिणेचापि
विधिवत्नानामुनिगणान्वितः लक्ष्मीनृसिंहरूपंहिस्थापयित्वाथपावनं स्वनाम्नालिंगमेकेकंस्थापयामासदैत्यराट् व
रंचप्रददायत्रदेव्याःसंतोषितश्चसः तंवरंकथयिष्यामित्वमिहैकमनाःशृणु योनृसिंहाभिधेतीर्थेस्नात्वाभक्तिसम
न्वितः लक्ष्मीनृसिंहमूर्तिवैनिरीक्षेतदृढव्रतः आयुरारोग्यमैश्वर्यंधनधान्यंचसंततिं सनरःप्राप्नुयान्नित्यंऐहिका
मुष्मिकंफलं दिव्यरूपधरंचामुंनरसिंहंसमाहिताः पूजयेयुर्नराभक्त्या तेषांतुसर्वसंपदः इदमंत्रामकंचापिलिंगेयः

कर॰ म॰ पूजयेन्नरः तस्यभक्त्यान्महाभक्तिर्नरसिंहेविमुक्तिदा नरसिंहाभिधेचास्मिन्तीर्थेस्नात्वातुयोनरः पश्येत्पद्मावतींदेवीं
सयातुसर्वसंपदः मंदवारेतुयः स्नात्वातीर्थेवैनरसिंहके ग्रहबाधाविनिर्मुक्तः सयातुपरमांगतिं माधवेमासिशुक्लायां
चतुर्दश्यांतुयोनरः प्रयतः श्रद्धयायुक्तः स्नात्वातीर्थेनृसिंहके सहस्रनामभिः पूज्यनरसिंहंसमाहितः कुर्याज्जागरणं
भक्त्यासयातुपरमांगतिं शनिप्रदोषेयः पश्यन्नरसिंहंसमाहितः सर्वपापविशुद्धात्मासयातुमहतींगतिं अत्रयोभो
जयेद्भक्त्याविप्रमेकंसमाहितः सयातुफलमत्युग्रंकोटिभोजनसंभवं अगस्त्यउवाच एवंदत्वावरंदेविप्रह्लादोदैत्यपुंग
वः देव्याः पश्चिमदिग्भागेस्थितोमध्यासनात्पुरः तत्रप्रह्लादतीर्थंवैजातंलिंगसमन्वितं स्नानदानरतानांचशुद्धिंकृद्भु
क्तिदंहरौ एतत्प्रभावजंस्तोत्रंकिंवर्ण्यंकरवीरके तस्मात्पापहरंतीर्थमिदंप्रह्लालयंपुरा नरसिंहाभिधंतीर्थंजातंजानी
हिसुव्रते ॥१४९॥ छ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेकोटितीर्थादिनृसिंहती
र्थमहिमानामएकान्नत्रिंशोध्यायः ॥२८॥ छ॥ नारदउवाच इत्याख्यायकथांदिव्यांसपत्नीघटसंभवः कृत्वातीर्थ

विधिंसर्वंस्नानदानादिकंतथा १ संपूज्यविधिवद्भक्त्यानरसिंहंतथैवच प्रह्लादंचतथापूज्यलिंगरूपेणसंस्थितं २
पद्मावतीमहादेविंसंपूज्यचयथाविधिः कुर्वन्प्रदक्षिणंतीर्थंनिर्गतः समुनीश्वरः ३ तीर्थेतीर्थेचवैस्नानंदानंकुर्वन्यथा
विधिः समागतोमुनिश्रेष्ठेरंकतीर्थंमुनिर्महत् ४ कुमुदोत्पलकल्हारविचिकल्लोलशोभितं उच्छलन्मत्स्यसंचारंचल
त्पद्मश्रियान्वितं ५ सेवितंद्विजवर्यैश्चहंसकारंडकैर्बकैः चक्राख्यैः सारसैश्चैवजलकुक्कुटकैरपि ६ मधुमत्त
नद्भृंगचंद्रसंशोभितैश्चिरं सुगंधकमलैश्चैवभ्रमरैश्चमनोरमं ७ शोभिततीरजैर्वृक्षैः कदंबबकुलादिभिः उ
द्यानैःपुष्पवाणीभिः सुललस्यादिवनैरपि ८ ग्राहैश्चमकरैश्चैवकच्छपैर्जलहस्तिभिः सेवितंजलजैश्चापिजंतुभि
श्चसमुद्रवत् ९ दृष्ट्वापुरोमहत्तीर्थंपतिसापतिदेवता लोपामुद्रामुनिंप्राहमुनिवर्यंचविस्मिता १० लोपामुद्रोवा
च ॥ किंनामकिमिदंतीर्थंयत्पुरोबहुशोभितं किंप्रभावंकिमाख्यानंसर्वमेतत्पतेवद ११ दृष्टानिबहुतीर्थानिकर
वीरपुरेमया नदृष्टमीदृशंतीर्थंमनोहरजलान्वितं १२ नारदउवाच ततःप्रोवाचभगवान्घटजन्मामहामुनिः मा

कर.म हात्म्यंरंकतीर्थस्यपरमेतिहासंप्रियांप्रति १३ अगस्त्यउवाच शुक्लाब्धिरितिविख्यातंतीर्थमासीदिदंपुरा निर्मलंहिमहा
देव्यासर्वलोकहितायतत् १४ रंकतीर्थमिधंपश्चाज्जातंसलिलदेवहि स्नानदानरतान्जन्तून्यत्पुनातिसदैवहि १५
नारदउवाच इतिश्रुत्वापतेर्वाक्यंलोपामुद्रापुनर्मुने पप्रच्छमुनिशार्दूलंविस्तरेणकथानकं १६ लोपामुद्रोवाच देव्या
विनिर्मितंचैतत्किमर्थंतीर्थमुत्तमं लोकानांचहितार्थायकिंवाजातंमहामुने १७ आतंनामान्तरंकस्मात्तदिदंसर्वमा
दरात् समाख्याहिविशेषेणमाहात्म्यंममसुव्रत १८ नारदउवाच पत्न्यासंप्रार्थितोश्चैवंसमुनिर्घटसंभवः विस्तरा
त्कथयामासरंकतीर्थकथानकं १९ अगस्त्यउवाच कदाचिद्दैवयोगेनवृष्टिर्नासीत्पुरासती पीडितास्तुप्रजाः सर्वादुर्भिक्षे
पोशतंसमाः २० हव्यकव्यादिकंसर्वंकर्मापिविलयंगतं ततोदेवाः प्रजाः श्चापिब्रह्माणंशरणंगताः २१ ब्रह्मापिसहि
तैस्सर्वैर्महेशंशरणंगतः ब्रह्मादिभिर्महेशोपिसंयुतः करवीरकं २२ समागत्यमहादेवींसंपूज्यचयथाविधिः देवींवि
ज्ञापयामासस्तुत्वानत्वाचशांकरी २३ रुद्रायऊचुः पाहिदेवि।प्रजाः सर्वादुर्भिक्षेणप्रपीडिताः त्वंयतः सर्वजंतूनांजन

127

नीसर्वदायिनी २४ सर्वेवयंयज्ञभुजोयज्ञहीनाः क्षुधार्दिताः त्वमेवशरणंयाताः शरण्यामन्नदायिनीं २५ स्वाहास्वधा
वषट्रूपायतस्त्वंपरमेश्वरी तस्मात्त्वंरक्षफलाग्निजलभोजनदानतः २६ नारदउवाच एवंतैः प्रार्थितादेवैः महालक्ष्मी
र्दयान्विता आनयामासशुध्यब्धेर्जलंपातालमार्गतः २७ तीर्थमेतत्ततश्चक्रे शुक्लाब्धिरितिविश्रुतं पावनंसर्वलोकानां
देवानामपिजीवनं २८ तीर्थस्यास्यैवकुल्याभिः श्चक्रेनानावनानिच आनंदसंज्ञकंचैकंहरिद्वाख्यंतथापरं अन्यान्य
पितथाचक्रेवनानिपावनानिसा पनसाम्रकपित्थाद्यैर्नानाचलिगणैरपि ३० शोभितानिसुशाखानिरंभाजंबुयुतानि
च कृत्वाविशालेस्कमहन्महानसगृहंपरं ३१ अवृष्टिपतनेदेवीनवकोटिसखीयुता देवान्संभोजयामासशाकैरेव
निरंतरं ३२ ततः समागतादैत्या दृष्ट्वातीर्थजलंपरं तृषार्दिताजलंपातुंसर्वएवगणोद्धताः ३३ पीत्वाजलंसुधा
तुल्यंफलानिवृक्षजानिवै सर्वाणिभक्षयामासुर्दैत्येंद्रैस्तैस्तदार्जिताः ३४ ततोष्टभैरवैः सार्धमागतापरमेश्वरी दृष्ट्वा
युद्धंमहादैत्यादुद्रुवुस्तेदिशोदश ३५ जलगुप्त्यैततोदेव्यातीर्थेस्मिन्नष्टदिक्षुवै समंतात्स्थापिताश्चाष्टभैरवाः स्थूल

कर·म·लपाणयः ३६ क्षेत्रगुप्त्यैश्चसंस्थाप्यसमंताद्वारपालकान् पुनर्महान्नसंगत्वादेवान्शोकैरतर्पयत् ३७ ततःशाका
न्नरांतुष्टाः सर्वेदेवासवासवाः देव्याः संस्थापयामासुर्नामशाकंबरीतिच ३८ विशालदक्षिणेभा॰ गेरुद्रतीर्थाच्च
पश्चिमे शांकंबरीमहादेवीश्रीसिद्धवटुकात्पुरः ३९ स्थापयित्वापुरःशक्रः तीर्थंशाकंबरीशुभं वरंचापिददुस्तत्रस
र्वेसंतुष्टमानसाः ४० तंवरंकथयिष्यामिशृणुष्वैकमनाः प्रिये अगस्त्यउवाच स्नात्वाशाकंबरीतीर्थेयः पश्येत्पर
मेश्वरीं दुःखदारिद्र्यनिर्मुक्ताः सयातुपरमांगतिं ४१ मासेसपुष्पकेचात्रपूर्वपक्षेसमाहितः यः पूजयेन्महादेवीं
शाकैर्यज्ञजपादिभिः ४२ सयातिसकलान्कामान्नैहिकामुष्मिकानपि इतिदत्वावरंसर्वेमहेंद्रप्रमुखाःसुराः ४३ त
थंचाभिलषंतोवैशाकाब्जायतमानसाः पूजयित्वामहादेवींप्राप्नुवंत्विष्टमुत्तमां ४४ शुद्धाधोरस्थापितायेवभैरवाजल
रक्षणे तपश्चैकरतस्तपस्तेपेभैरवोजलसंस्थिता ४५ मुक्तिमिच्छन्महादेव्याः क्षेत्रेचवसतिंसदा जितेंद्रियोजितक्रोधो
धोनिरंकुशस्तुष्टमानसः ४६ ततस्त॰तपसातुष्टामहालक्ष्मीर्दयान्विता सर्वदेवगणोपेतावरंदातुंसमागता उवाच

तस्यसम्यगहृद्यंभैरवंसति ४८ श्रीमहालक्ष्मीउवाच उत्तिष्ठोत्तिष्ठभद्रंतेतपःसिद्धोसिभैरवा वरदाहमनुप्राप्ता
वरंवरयकामितं ४९ अगस्त्यउवाच ततःसभैरवः श्रुत्वावरदांपरमेश्वरीं संप्रणम्यमहालक्ष्मीवरमिच्छन्नुवाचह
५० भैरवउवाच वरदासियदादेवीतदेमंवैवरंवृणे देहिसेवांत्वदीयांवैसर्वदेवविमुक्तिदां ५१ त्वत्क्षेत्रेवसतिंचापिस
र्वजंतुसुखावहां तीर्थमेतत्पवित्रंचमन्नाम्नाप्रथितंकुरु ५२ स्नानदानपरास्तत्रत्वंपुनीहिसदानरान् अगस्त्यउवाच
तेनैवप्रार्थितादेवीभैरवेणासदासती तमुवाचवरंदातुंतत्तपस्तुष्टमानसा ५३ श्रीमहालक्ष्मीउवाच भैरवत्वंसदाभक्तिं
मदीयांकुरुचेप्सितां मद्गणानांत्वमष्टमस्त्वंरंकभैरवसंज्ञितः ५४ येकुर्वंतिमदीयेवैक्षेत्रेपापंनराधमाः कुरुतेषांमहा
दंडंपापिनांत्वंयथासुखं ५५ पालनंमज्जनानांचदेसानामपिदारूपं मत्क्षेत्रपालकोभूत्वासुखंतिष्ठसुपूजितः ५६
मत्क्षेत्रवासिनांदंडैर्नयमोपिप्रभुर्भवेत् अपिपापात्मनामंगकिंपुनः पुण्यवर्धिनां ५७ इदंशुद्धाब्धिविख्यातंतीर्थं
चमदनुज्ञया त्वंनाम्नाप्रथितंभूयाद्रंकतीर्थमितीरितं ५८ मद्रंकानामशेषाणांयतस्त्वंरक्षणेप्रभुः रंकभैरवविख्यातं

कर॰ म॰ तस्मान्नाम्नास्त्वलेसदा ५९ दिव्यरूपधरोभूत्वानानारत्नसमन्वितः तीर्थमध्येस्वयंतिष्ठसमंताद्भैरवैर्युतः ६० तदाके
पिभवेल्लिंगंत्वनाम्नाविलसत्युतः सर्वज्ञंसर्वजंतूनांपूजादर्शनकारिणां ६१ अंतर्गेहेपिसंतिष्ठदेत्यमार्गनिरोधकः
दक्षिणेदिग्विभागेत्वंवीरमार्गेस्वसंयुतः ६२ विनात्वत्पूजनंयेवैमत्पूजायांरताःनराः तेषांनैवफलंब्रूयान्मत्पूजाया
श्चिरार्जितं ६३ रंकतीर्थेनरःस्नात्वापश्येत्वांयःसमाहितः सर्वपापविशुद्धात्मालभेत्तद्वांछितंफलं ६४ भानुवारेवि
शेषेणमौनादिनियमैर्युतः यःस्नात्वातावकेतीर्थेसलभेत्पदमव्ययं ६५ आश्विनेमास्यनुदिनंयःस्नात्वारंकतीर्थ
कंपूजयेत्वांसदाभक्त्यासर्वसिद्धिमवाप्नुयात् ६६ वरकैःपापसांघेभ्यब्राह्मणःश्रद्धयान्वितः योरोगीपूजयेत्वां
वैसमुच्येद्याधिसंकटात् ६७ राजन्यादिप्रजाःसर्वाःपत्रपुष्पादिवादिभिः त्वांनित्यंपूजयंतीवैसर्वान्कामानवाप्नुयुः
६८ अगस्त्यउवाच इतिदत्त्वावरंदेवीसर्वदेवगणैर्युता दिव्यंदेवालयंकृत्वातीर्थमध्येतिसुंदरं ६९ श्रीरंकभैरवं
स्थाप्यतटाकोपितथैवच अन्यान्यपिचलिंगानिसमंतात्स्थाप्यवैमुदा ७० जगामस्वालयंलक्ष्मीस्तूयमानागणैःपृ

129

थक् श्रीरंकभैरवश्चापिलब्ध्वावरमनुत्तमं ७१ आधिपत्यंततस्तक्षेयथादेव्याप्रशिक्षितं तदिदंरंकतीर्थंवैयत्
वैविलसत्सुंदरी ७२ शुद्धाब्धिनामविख्यातंतदासीदेवनिर्मितं रंकतीर्थेतुयःस्नात्वापश्येद्वारंकतीर्थकं ७३ तद्दर्श
नामपूर्वंतेराक्षसाअयसंशयं अत्रार्थेकथयिष्यामितवदेविकथानकं ७४ तच्छ्रुत्वादुष्टयोनिभ्यामनुजोमुच्यते
जसा कान्यकुब्जेद्विजःकश्चिदासीद्वेदविशारदः ७५ अहंकारविमूढात्माशास्त्रविद्दुर्गवितः सजिग्येब्राह्मणा
न्वादेवद्दुर्न्यायतोधमः ७६ अपश्यद्धर्मशास्त्राणिधर्ममेमूर्च्छेजनायसः दृष्ट्वातस्यहिदौरात्म्यंमुनयोवेदपारगाः
७७ आशायन्कुपिताःसर्वेतंद्विजंब्राह्मणाद्विषं ब्रह्मद्विट्त्वंयतोलोकेतस्मात्त्वंब्राह्मणाधमः ७८ अरण्येनिर्जलेदेशे
भवत्वंब्रह्मराक्षसः ततस्तेप्रार्थितास्तेनमुनयस्तुकृपालयः ७९ शापनिर्हरणार्थंवैतमूचुःसर्वएवहि त्वंब्रह्मराक्ष
सोभूत्वा विचरन्नवनीतले यदायास्यभिपोविप्रकरवीरंमहापुरं रंकतीर्थगतंवारिसद्विप्रेणाभिमंत्रितं ८१ यदात्व
न्मूर्ध्निनिपतेत्तदामुक्तिंप्रयास्यसि ततःसराक्षसोभूत्वासोमग्रामोस्कमध्यमे ८२ विचरन्नवनींप्राप्यःकरवीरमिदंपुरं

कर॰ म॰ अत्रासीद्ब्राह्मणः कश्चित्सत्यवान्विजितेंद्रियः ८३ शिवधर्मेतिविख्यातोरंकतीर्थनिषेवकः स्नात्वाचतुः सर्वंचास्मिन्
रंकतीर्थविधानवित् ८४ श्रीरंकभैरवंपूज्यदेवीदर्शनतत्परः एकदानिर्गतोस्नात्वारंकतीर्थेद्विजोत्तम ८५ देवींद्रष्टुंत
दामध्येराक्षसः पुरतःस्थितः भीसयान्विविधाकारैराटालः खादितुंद्विजं ८६ ततोद्विजवरोमंत्र्यरंकतीर्थोदकेनवै॥
कमंडलुगतेनैक्षद्रक्षोमूर्ध्निसमाहितः ८७ तज्जलस्पर्शनादेवरक्षोदेहंविसृज्यच दिव्यंविमानमास्थायस्वर्गलोकं
क्षणाद्ययौ ८८ तदिदंरंकतीर्थंवैसर्वपापनिबर्हणं यज्जलस्पर्शनादेवविमुक्तोराक्षसोंजसा ८९ आख्यातंसर्वमत्त
तेरंकतीर्थकथानकं यत्पृष्टंहित्वायभद्रेयथापूर्वंमयाश्रुतं ९० नारदोवाच रंकतीर्थस्यमाहात्म्यमेवमाख्यायवैमु
निः चक्रेस्नानंसपत्नीकोद्विजग्राममधिगम्यच ९१ कृत्वाहिरण्मयंश्राद्धंपितृंदत्वायथाविधि संतर्प्यचपितृस्तत्र
संपूज्यरंकभैरवं ९२ अन्यान्यपिचलिंगानिसंपूज्यविधिपूर्वकं गंधधूपसदीपाद्यैरुपचारैःपृथक्पृथक् ९३ वि
निर्गततस्तस्माद्रंकतीर्थान्महामुनिः प्रतितीर्थेषुयः स्नानदानंकुर्वन्यथाविधिः ९४ लक्षतीर्थमनुःप्राप्तः सप

त्नीकस्ततोमुनिः दृष्ट्वातत्पुरतस्तीर्थंलोपामुद्रातिपावनं ९५ पृष्टंतितस्यमाहात्म्यमुवाचेदंपतिंप्रति लोपामु
द्रोवाच किंनामकिमिदंतीर्थंयद्दिष्टातिपतेपुरः समाहात्म्यंसमाख्याहिमुमनुष्येश्वातिपावनं ९६ नारदोवाच
इतितत्प्रश्नसंहृष्टोभगवान्कलशोद्भवः प्रियायैलक्षतीर्थस्यमाहात्म्यंसमुवाचह ९७ ॥ ९७ ॥ इतिश्रीकरवीर
माहात्म्येत्रिंशोध्यायः ॥ ३० ॥ छ ॥ अगस्त्यउवाच लक्षतीर्थमिदंभद्रेलक्षेशलिंगसंयुतं उत्तरेमानसेश्रेष्ठे
लक्षतीर्थफलप्रदं १ दक्षिणेमानसेयद्वत्कोटितीर्थपरंसति मानसेचोत्तरेतद्वल्लक्षतीर्थमिदंपरं २ पूर्वमासी
द्विमुक्तारव्यंतीर्थमेतद्विपावनं विमुक्तेश्वरसंयुक्तंविमुक्तिफलदंप्रिये ३ लक्षसंख्याहतायस्मात्अत्रदैत्यामहाबलाः
महालक्ष्म्यामहादेव्यामुक्तिंसर्वेगताः क्षणात् ४ तेषांतत्वारमालोक्यददौदेवीयदावरं हतस्तदामहादेव्यैवरायोलो
कपावनः ५ हन्यंतेत्रयतोदैत्यालक्षसंख्यास्त्वयानघ तस्मात्ख्यातिदंतीर्थंलक्षतीर्थाभिधंवरात् ६ लक्षेश्वराभि
धंचात्रलिंगंभूयात्सनातनं दर्शनस्पर्शनादेवलक्षतीर्थफलप्रदं ७ यःस्नात्वालक्षतीर्थेवैपश्येल्लक्षेश्वरंन्नरः ॥ ७ ॥

कर० म० लक्षतीर्थकृतंपुण्यंसर्वंप्राप्नोतिसेंजसा उत्तरेमानसेश्रेष्ठंलक्षतीर्थमिदंभवेत् ८ यन्नाम्नात्रपतेपिंडस्तेषांलोकोस्तिशा
श्वतः इत्थंचत्तामहादेव्येहन्यमानेर्यसाप्रिये ९ तथेत्युक्त्वामहालक्ष्मीस्वालयंसमगात्परं तस्मादिदंविमुक्ताख्यंती
र्थंयत्प्रथितंपुरा १० जातंवैलक्षतीर्थाख्यंमहालक्ष्म्याः प्रसादतः नारदउवाच स्वपत्न्यैतीर्थमाहात्म्यमित्याख्यायम
हामुनिः ११ लक्षतीर्थेततः स्नात्वाकृत्वाश्राद्धंहिरण्मयं तर्पणंपिंडदानंचकृत्वांचैवयथाविधिः १२ लक्षेश्वरं
चसंपूज्यनिर्गतः पुरतोमुनिः स्नात्वाशाकंबरीतीर्थेसर्वकामफलप्रदे १३ ॰पूज्यशाकंबरीदेवीहरिद्रांजनकंचु
कैः हरिद्रापिष्टतैलाद्यैर्विकीर्यागणभूमिकां १४ धूपदीपसुनैवेद्यैस्ताम्प्यशाकंभरीमुनिः पत्यासहमहाभागोत्य
श्वतीर्थेसमागतः १५ तीर्थंतत्प्रवरंदृष्ट्वालोपामुद्रामहासती पप्रच्छतीर्थमाहात्म्यंपतिंसामुनिपुंगव १६ लोपामु
द्रोवाच किंनामकिमिदंतीर्थंकिंप्रभावंविशेषतः समाख्याहिपतेमह्यंकृपयादीनवत्सल १७ नारदउवाच इतिपृ
ष्टस्तयापत्न्यासकृपालुर्महामुनिः कथयामासमाहात्म्यमश्वतीर्थस्यसत्वरः १८ अगस्त्यउवाच माकूटाख्यमिदंती

र्थंपूर्वमासीत्पतिव्रते स्नानमात्रेणयन्नृणांहरतेसर्वपातकं १९ अकार्यमपिवैपापंयन्नरैः समुपार्जितं तत्सर्वं
विलयंस्नात्वामाकूटेस्मिन्पतिव्रते २० कश्चिदश्वोविनिर्मुक्तोयस्मात्तत्रपुरासती तस्मादश्वाभिधंतीर्थमिदंजातंहिपा
वनं २१ नारदउवाच इत्थंपतिवचः श्रुत्वापुनः सापुनः सापतिदेवता पप्रच्छविस्मयाविष्टाह्यश्वतीर्थकथानकं २२
लोपामुद्रोवाच कथमश्वोविनिर्मुक्तः कस्यायंकथमागतः एतंक्ष्वसकलंयुक्तंहिपतेमम २३ नारदउवाच इति रा
तत्प्रश्नसंतुष्टोभगवान्सघटोद्भवः यत्पृष्टंहित्वयाचांलेगेतत्सर्वंसमुवाचह २४ अगस्त्यउवाच आसीत्कल्यांतरे
कश्चित्सुशर्मानामवैद्विजः वेदवेदांगतत्वज्ञः पंगुः कोरन्नवजीवनः २५ ब्रह्मचारीमिताहारः क्षेत्रवासपराय
णः त्रिकालंतुमहालक्ष्म्यानीराजनविधौरतः २६ तस्ययोद्विजस्यैकआसीदश्वपुरातनः तमारुह्यद्विजश्चक्रेस
दादेव्यानिरीक्षणं २७ मणिकर्ण्यांपंचनद्यांस्नानंचापिनिरंतरं कोरान्नंचापिनिरतंतीर्थयात्रादिकंतथा २८ एवन्नि
वसतस्तस्यप्रत्याब्दाश्विनकार्तिकौ मासौतौतीर्थयात्रायामुख्यौतोयासिनामिह २९ तदावैनिर्गताः सर्वेदेवाश्चमुनय

५९

कर॰म स्तथा पूजोपस्करसंयुक्तामहदानंदनिर्भरा: ३० पूज्यदेवींपुराभक्त्यास्कगंधैर्यक्षकर्दमैः नानासौगंधिकेद्रव्यैहरि
द्रांजनकंचुकैः ३१ नैवेद्यैराज्यैरिक्षुरसैर्हरिद्रारेणुरूपितैः गर्भागारेमहादेव्याः कृत्वावैकर्दमैः परं ३२ धूपानां
राशिभिर्दीपदीपानांपंक्तिभिस्तथा वटकैः पायसैश्चैवनानाभक्ष्यैस्तथैवच ३३ मुक्ताभिश्चणकोद्भूतैः खरिद्रारद्वारं
मितैः एवंपूज्यमहादेवीतीर्थयात्रार्थमादरात् ३४ निर्गतास्तेयदाभद्रे तदासोपिद्विजोत्तमाः निर्गतः स्वाश्वमारु
ह्यतैः सहैवसमाहितः ३५ कृत्वागर्भगृहीयात्रांतथैवांतगृहीततः कृत्वायथावकाशेन दक्षिणोत्तरमानसं ३६
आवांतराणिचत्वारिकृत्वाद्वाराण्यनुक्रमात् पंचक्रोशात्मिकांयात्रांकृत्वाचतदनंतरं ३७ जलशायिचतुर्थंचकृत्वा
चैवयथाविधि महाद्वारचतुर्थंचकृत्वाचतदनंतरं ३८ लिंगाष्टकमहायात्रांकुर्वतः सर्वएवते करतालसमायुक्तागी
तवाद्यसमन्विताः ३९ वदंतोनंतनामानिश्रीहरेर्भक्तिसंयुताः सिद्धामरेश्वरंपश्यन्कोपेशांचततः परं ४० वीरभद्रे
श्वरंपश्यन् सिद्धसांख्येश्वरंतथा अहंपूर्वमहंपूर्वमितितेवादिनोयदा ४१ अनेनैवयदाशुभ्रभोगेशांद्रष्टुमागताः

132

तदापंगोद्विजस्याश्वोबहुश्रांतः श्रमध्यमे ४२ भग्नश्चोरसिपुण्यात्मापथिश्रांतस्तृषार्दितः संतृषापीडितंज्ञात्वापंगु
नाथशनैःशनैः ४३ जलंसंपाययितंतेन समानीतोत्रसुंदरी निर्मलंजलमालोक्यतृषाक्रांतः सवैहयः ४४ पीत्वा
जलंस्नातश्चास्मिन्तीर्थेमाकूटसंज्ञके दिव्ययानमथारुह्यदिव्यरूपवसुर्धरः ४५ स्वर्लोकमगमत्तत्रपुण्यलोकवि
भूषितं ततोद्विजवरःसोपिनिर्विण्णहृदयेसती ४६ निरन्नंव्रतमादायसंस्थितः कतिचित्समाः अस्मिन्माकूटकेती
र्थेमृतोमुक्तोभवत्प्रिये ४७ ततोश्वस्यगतिंश्चात्रदृष्ट्वादेवाः प्रहर्षिताः अश्वतीर्थमिदंनाम्नाचक्रुर्लिंगसमन्वितं ४८
माकूटसंज्ञकंतस्मात्तीर्थमेतद्विपावनं अश्वतीर्थाभि- धंजातंप्रियेजानीहिनिश्चितं ४९ अश्वतीर्थेतुयः स्नात्वापश्येदश्व
श्वेश्वरंतुयः सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ५० नारदः अश्वतीर्थस्यमाहात्म्यपत्न्यैव्याख्यायवैमुनिः
स्नात्वातत्रविधानेनसंपूज्याश्वेश्वरंतथा प्रतितीर्थेषुयः स्नानंदानंकुर्वन्यथाविधिः गतोविश्रांतितीर्थेवैदेव्यामहानसा
लयं ५२ दृष्ट्वातत्तीर्थमतुलंसर्वलोकमनोरमं ततः पप्रच्छसासाध्वीतंपतिंपतिदेवता ५३ लोपामुद्रोवाच किंनाम

कूर॰ म॰ किमिदंतीर्थंब्रूहिसर्वंसविस्तरं सप्रभावंसलिंगंचकथयाममसुव्रत ५३ नारदः इतितत्प्रश्नसंतुष्टोमैत्रावरुणि
रग्रणीः माहात्म्यंकथयामासमार्कंडेयसतिंप्रति ५४ अगस्त्यः कोलासुरसुतः कश्चित्तुविशालाख्योमहासुरः
महाबलोतितेजस्वीनानायुद्धविशारदः ५५ तेनैकदासुराःसर्वेजितायुद्धेमहाबलाः ब्रह्मणासहिताः सर्वेवि
ष्णुंवैशरणंगताः ५६ विष्णुब्रह्ममहेशाद्यैः सहितोत्रसमागतः चक्रेयुद्धंविशालेनबलिनारोमहर्षणं ५७
सजघानयदादैत्योविष्णुंवैदृढमुष्टिना विष्णुस्तंपातयामास तदोत्तानंमहासुरं ५८ पतितंदैत्यमालोक्यपुनर्यु
द्धायबोधतं पादयोर्हस्तयोस्तस्यवृषणेचशिरस्यपि ५९ तत्पार्श्वयोस्थिताश्चापिनिश्चलाश्चमहासुराः ब्रह्म
विष्णुमहेशाद्याः समंतात्सुभुतत्क्षणात् ६० ततः सोचुर्विशालंतेमहाभारेणपीडितं भोविशालमहाबुद्धे वरंवृणु
महाबलं ६१ धन्योसिकृतकृत्योसियदस्मच्चरणाहतः इतिश्रुत्वावचस्तेषांसविशालोविचक्षणः ६२ वरंवृण्वं
स्तुवान्चेदंश्रीविष्णुप्रमुखासुरान् विशालउवाच वरदायदिमेयूयंभोविष्णुप्रमुखासुराः ६३ तदातिपावनंतीर्थ

मस्मन्नाम्नाभवेदिदं आघ्रतस्करसर्पाश्च हतशस्यागतात्मनां ६४ महापापात्मनांपुंसामूर्ध्वंतुचक्षमेवरं यन्ना
म्नात्रपतेपिंडंतेषांभूयात्परंपरं ६५ मन्नाम्नालिंगमेकंतुकृत्वात्रस्थापयंतुवै तथासर्वेपिमद्देहमाक्रम्यसंस्थि
तायथा ६६ विद्यतेत्रनिशंतद्वन्नाम्नोक्षदान्तणां पौष्पाममायांसर्वेषामगतीनांगतिर्भवेत् ६७ सर्वेषांभव
तामस्मांसांनिध्यंमद्याधायहि आतुंसुरामहाविष्णुशालयेत्रजिगीषया ६८ अगस्त्यउवाच तथेत्युक्तातदादेवीवि
शालस्यपरंपदं महानसेदुस्तत्रमहालक्ष्म्याः सुशोभिते ६९ तदाप्रभृतितत्तीर्थंविशालमितिविश्रुतं बभूव
चमहादेवीकिमन्यच्छ्रोतुमिच्छसि ७० सतोगमन्महागंगापातालतलसंस्थिता हाटकेश्वरसंयुक्ताजनानांपापना
शिनी ७१ नारदउवाच इतितत्प्रवरंतीर्थमाख्यायात्सघटोद्भवः विशालकेसुसंस्नात्वाकृत्वाश्राद्धंहिरण्मयं ७२ त
र्पणंपिंडदानंचगोदानादियथाविधिः हाटकेशंसुसंपूज्यत्युपचारैः पृथक्पृथक् ७३ तथावाचश्चदेवान्वैप्रदक्षि
णक्रमेणवै पूजयित्वाधूपदीपैर्नैवेद्यैश्चपृथक्पृथक् ७४ भूरिश्राद्धंततः कृत्वाब्राह्मणांस्तोष्यभक्तितः एवंसर्ववि

कर· म· ~~भूस्थिआउंत्तस्य कृत्वा~~धिं कृत्वापरांनिवृत्तिमापसः वृश्चिकस्थे गुरौदेवेविशालेयद्विधीयते विधानंमनुजैः सर्वैस्तत्कु
र्यात्सहितैश्शुभं ७६ यस्मिन्कालेवृश्चिकस्थोभवेच्चैवबृहस्पतिः तत्कालेसर्वलोकैश्च ब्राह्मणादिपुरःसरैः ७७
गीतवादित्रनृत्यैश्चदिव्योत्सवपुरस्कृतैः विद्भः पुरः सरंतीर्थमागंतव्यंततः परं ७८ प्रणामंदंडवत्कृत्वाभागीरथ्यै
ततः परं भागिरथ्यैनमोदेव्यैविशालशिववल्लभे ७९ महतीत्वंमहाभागेपंचगंगास्वरूपिणी स्वर्गारोहणसोपाने
महायुततरंगिणी ८० अधिकासर्वतीर्थानांविशालेत्तेनमोस्तुते दृष्ट्वाजयजयेत्युच्चैस्स्तुवंतः प्रणताम्मुहुः ८१
मात्रयासहितंस्नानंपूर्वकार्यंविचक्षणैः ततोद्विजांस्समागत्यविज्ञप्तिंकारयेत्तदा ८२ भवंतः कुरुतास्माकंप्रायश्चि
तमनुग्रहं तेपिकुर्वंतितंब्रूयुस्तदासंकल्पमारभेत् ८३ एवंगुणविशिष्टायांतिथौसंकल्पकीर्तनं आत्मनःशु
द्धिकामोवापितॄणांतृप्तिहेतवे ८४ विशालकारयाम्यद्यवपनंतवसंन्निधौ यानिकानिचपापानिब्रह्महत्यासमा
निच ८५ केशानाश्रित्यतिष्ठंतितस्मात्केशान्वपाम्यहं महापापोपापकेभ्यो केशालोमनखाद्विजाः ८६ क्षुरेण

च्छिन्नसर्वांगस्तेनदोषाः पतंत्यधः तीर्थोपवासः कर्तव्यश्शिरसोमुंडनंतथा ८७ शिरोगतानिपापानियांतिमुंड
नतोयतः ततः स्नानंप्रकुर्वीतमृत्तिकागोमयेनतु ८८ भस्मनापंचगव्येनदर्भोदैस्तीर्थवारिणा ततस्नानंप्रकुर्वीत
स्मृत्युक्तंविधिपूर्वकं ८९ नित्यकर्मततः कुर्याद्ब्रह्मयज्ञस्ततोभवेत् कुर्याद्धिरण्मयंश्राद्धंदद्याद्दानानिभूरिशः ९०
सवत्सांगांतिलांश्चैवयवगोधूमधान्यकं शय्यादीपान्करकांश्चजलपूर्णान्सदक्षिणान् ९१ कूष्मांडनारिकेलानि
जंबीरंबीजपूरकान् उपानच्छत्रवालानियथाविभवतोनरः ९२ तत्समेरुसमंप्रोक्तंनात्रकार्याविचारणात् पायसेना
थचरुणासक्तुपिंडेनवाबुधः ९३ पिण्याकेनगुडेनापिफलैर्वापिंडपातनं अश्वसूकररुमिभिः दुष्टंगिशाकराहताः
९४ भृग्वग्निदारुशस्त्राश्मविषोद्बंधजलैर्मृताः व्याघ्राहिजलभूपालचोरश्वापदकाहताः ९५ अपिशल्यमृताये
चयेचसंस्कारवर्जिताः विषूचिकान्नकवलैः भ्रमातीसारमोहिताः ९६ शाकिन्यान्वग्रहैर्ग्रस्ताविद्युत्पातहताश्चये
अस्पर्शास्पर्शसंस्पृष्टाः पतिताः पतिवर्जिताः ९७ पंचत्रिंशत्प्रकारैश्चप्राप्नुवंत्यगतिंमृताः चांडालाद्युदकान्स

पांन् ब्राह्मणाविद्युतस्तथा १५० दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां तर्पणंपिंडदानंचप्रेतेभ्योयः प्रयच्छति
१ नोपतिष्ठतितत्तेषांमंतरिक्षेविनश्यति पितरापिंडभाजास्तुः स्त्रयोलेपभुजः स्ततः २ ततोनांदीमुखाःप्रो
क्तास्त्रयोंगस्तमुखास्त्रयः द्वाद्शैवंपितृगणास्तर्पिताः संततिप्रदाः ३ गतिहीनास्तुतादीनांसंततिंप्रतिबाल
कं विषादीन्निहताश्चैतिरश्चास्तुद्वादशास्वपि ४ विशालेतत्क्रियांकृत्वाअनपत्यस्यपस्यवान् भवत्येवनसंदेहस्त्व
स्यतीर्थस्यगौरवात् ५ द्वितीयेह्नितत: श्राद्धंकर्तव्यंविधिपूर्वकं अकालेप्यथवाकालेतीर्थश्राद्धंस्मृतंबुधैः ६ अ
विलंबेनकर्तव्यंततोलक्ष्म्याश्चपूजनं कारयेच्चततोभक्त्याविलंबाख्यंविवर्जितः ७ दीनांधकृपणेभ्यश्चदेयंदेवा
नुसारतः वृक्षत्वंचगतायेचपिशाचत्वंचयेगताः ८ येचकीटत्वमापन्नास्तिर्यग्योनिगताश्चये नरकेयेनि
मग्नाश्चगच्छंतिपरमांगतिं ९ गयायोप्यधिकंप्रोक्तंविशालेविधिवत्कृतं हाटकेशंमहालिंगंमापातालात्समाग
तं १० भोगावत्यांमहानद्यांजंतूनांतारणायवै हाटकेशात्पूर्वभागेब्रह्मातद्दंडसंस्थिताः ११ आग्नेय्यांनारसिंह

स्तद्दक्षिणेकालभैरवः मल्लिकार्जुनतत्सामीप्येनैऋत्येचगणेश्वरः १२ भैरवः पश्चिमेभागेश्चुक्रेशगवायुकोण
के उत्तरेव्यासदेवस्तरोग्यांभद्रादिदेवताः १३ एवमाक्रम्यतंदेशंविशालस्यचसंस्थिताः तत्रपिंडप्रदानेनगया
श्राद्धफलंभवेत् १४ जान्हवीफलदागोदासिंहस्येचबृहस्पतौ जाह्नवीफलदाकृष्णाकन्यास्थेचबृहस्पतौ १५ तु
लास्थेतुंगभद्राचजाह्नव्यर्धफलप्रदा जाह्नव्यर्धफलाज्ञेयातथाकर्कस्थितेरवौ १६ जाह्नव्यर्धफलामेषेमला
पहारिणीरवौ जाह्नव्यर्धफलंज्ञेयंविशालंवृश्चिकेगुरौ १७ मुंडनंचोपवासंचश्राद्धंप्रोक्तंचतर्पणं वृश्चिकस्थे
गुरौकुर्याद्विशालेविधिवन्नरः १८ वाराणस्यांवर्षमेकंप्रातस्नानेनयत्फलं विशालेतुसकृत्स्नानेलभतेवृश्चि
केगुरौ १९ षष्टिवर्षसहस्राणिप्रयागेयत्फलंस्थितं विशालेयत्फलंज्ञेयंसकृत्स्नानान्नसंशयः २० नारसिंहं
हरिंरुद्रंब्रह्माणंकमलोद्भवं व्यासंचतीरसंस्थंवैपरपारेमनोरमे २१ ततोन्यानिचतीर्थानिकुर्वन्नीरेणभक्ति
तः पिंडदानंतर्पणंचदानशक्त्यापृथक्पृथक् २२ अगस्त्याख्यततोलोपामुद्रातीर्थद्वयंशुभं कृत्वाविनिर्गत

क्र॰म॰ स्तत्रमयूराख्यामहत्परं २३ तत्रकृत्वाविधानेनमज्जनेनविशुद्धधीः दशाश्वमेधकेस्नात्वानत्वाप्रत्येश्वरंविभुं
२४ दानानिद्विजवर्येभ्योदत्वाभारत्रालंतथा सर्वतीर्थेततः स्नात्वाकृत्वापिंडोदकक्रियाः २५ वराचपंचगं
गाथौवैपश्चिमाभिमुखीशुभा ततोर्धक्रोशमात्रेणत्र्यंबकस्यचतीर्थकं २६ स्नात्वानत्वाततोगच्छेत्बाणषष्ठि
प्रमाणतः तीर्थवर्यविधिंकृत्वात्मतीर्थपरायणः २७ पंचक्रोशांतरगतांत्रिस्थलीमगमन्मुनिः कृतकृत्यं
मन्यमानोनत्वादेवीपरार्थदां २८ अंतर्द्वारंचतुष्कंचमहाद्वाराण्यनुक्रमात् ज्योतिर्लिंगाष्टकंकुर्वन् ७ चतुष्कंजल
शायिनां २९ अनंतानिचतीर्थानित्वनंतादेवतास्तथा अनंतानिचलिंगानिकर्तुंकोपिनवैविभुः ३० तथापितीर्थ
वर्याणिसेतिहासानियानिच सर्वतीर्थेततः स्नात्वानत्वासर्वेश्वरंविभुं ३१ ततोव्रजन्दक्षिणेगौतम्यासहसं
गतां त्र्यंबकेश्वरसंयुक्तंपंचगंगापुरस्थितां ३२ दृष्ट्वातंसंगमंतीर्थंपुण्यंलोपामुद्रापतिव्रता माहात्म्यंतस्यसक
लंपतिंपप्रच्छसामुने ३२ लोपामुद्रोवाच संगतोयंकथंनद्यामुनेपंचनदीपुरः अत्रत्यंसर्वमाहात्म्यंसदैवंब्रूहि

मेपते नारदउवाच प्रश्नमेतमुपाकर्ण्यमुनिरामुनिपुंगवां कथयामासतत्पत्न्यैमाहात्म्यंहृदिसंस्मरन् ॥ ९३५ ॥ छं ॥
इतिश्रीपद्मपुराणेकरवीरमाहात्म्येएकत्रिंशोध्यायः ॥ ३१ ॥ छं ॥ अगस्त्यउवाच श्रीत्र्यंबकेश्वरश्चायंआगत्यस्वनिवा
सतः माहात्म्यंकरवीरस्यश्रुत्वातिष्ठतिसर्ववित् इयंचगौतमीगंगासर्वलोकमलापहा संगतापंचनद्यात्रमहापातकनाशि
नी गौतमोत्रमुनिर्भद्रेसर्वदातपउज्वलं कुर्वन्सतिष्ठतेद्यापिसंगमेसर्वसिद्धिदे गौतमीपंचनद्योस्तुसंगमेसंप्लुतोनरः॥
यः पश्येत्र्यंबकंदेविसयातिपरमांगतिं माघेकृष्णचतुर्दश्यांस्नायाद्योवात्रयोनरः पूजयेद्बिल्वपत्राद्यैस्त्र्यंबकंसविमुच्य
ते उमयासहितंदेवंत्र्यंबकंचसनातनं उमात्र्यंबकयोतीर्थेस्नात्वापुण्येसपुण्यभाक् अस्तिकश्चित्पुराभद्रेसर्वपापरतोशु
चिः मुनिभिः सहितश्चागात्कर्तुंवैकर्मनिष्फलं कर्मशर्मेतिविख्यातः पंचपातकसंयुतः गौतमीसंगमेचात्रद्विजबंधु
र्विगात्यसः माघेकृष्णचतुर्दश्यांनिरन्नः कृतजागरः त्र्यंबकंबिल्वपत्राद्यैः संपूज्यविधिपूर्वकं सर्वपापविनिर्मुक्तस्त्र्यं
बकस्यप्रभावतः गतोविमानमारुह्यशिवलोकमनुक्रमात् इत्युक्तवचाख्यानंयथामतिमयासति तीर्थस्यास्यसलिंग

कर॰ म॰ स्ययत्पृष्टंहित्वयामम नारदउवाच आख्यानंसर्वमाख्यायगौतमीसंगमस्यपरः उमात्र्यंबकयोः पूज्यांकृत्वाविधिवदं
वरः त्रियंयोरसहितः पत्न्यासमुनिर्मुनिपुंगवः लिंगतीर्थसलिंगंचयत्रास्तेपरमंशुचि : दृष्ट्वातत्परमंतीर्थसालिं
गंजनपावनं माहात्म्यंतस्यचाशेषंपतिंपप्रच्छसासती लोपामुद्रोवाच किंनामकिमिदंतीर्थंसप्रभावंसद्दैवतं स
माख्याहिपतेमह्यंकृपयायदिमन्यसे नारदउवाच इत्याकर्ण्यवचः पत्न्याप्रहृष्टवदनोमुनिः उवाचतीर्थमाहात्म्यं
सकलंपरयामुदा अगस्त्यउवाच लिंगतीर्थमिदंभद्रेसर्वतीर्थफलप्रदं अयंलिंगेश्वरः साक्षात्सकलाघहरोन्व
पां लिंगतीर्थेनरः स्नात्वालिंगेशंयोनिरीक्षयेत् सलभेत्सर्वलिंगानांपूजाफलमसंशयं अत्रार्थेकथयिष्यामि
पुराणंतेघनाशनं इतिहासमिदंभद्रेशृणुष्वैकमनासती असीदत्रपुरादेविस्त्रीकाचित्करवीरके नाम्नागुणवती
ख्यातायोगिनीशिवमानसा करवीरनिवासिन्याः कुर्वतीनित्यदर्शनं लिंगानांचाप्यशेषाणांक्षेत्रांतर्वर्तिनांसदा ति
लेतिलेवसंतीहयानिलिंगानिसर्वतः तानिसर्वाणिगंधाद्यैः पूजयत्यनुवासरं कार्तिकेमाघमासेचवैशाखेचत

थेयच प्रातस्नानंप्रकुर्वंतिक्षेत्रेमाघाभिधेन्वहं सरस्वतीमहागंगाशिवयायत्रसंगता समागमोमहापुण्योमा
घोयत्रविधिः प्रिये क्षेत्रेपश्चिमदिग्भागेवर्ततेयोजनांतरे परमाद्यंत्रयंक्षेत्रंसर्वपापप्रणाशनं माघत्रयविधिं
तत्रयतः कुर्वंतिदेवताः अतस्तत्प्रथितंक्षेत्रंलोकेमाघमितिप्रिये माघत्रयविधिंतत्रयेकुर्वंतिवरानन तेसर्वे
पापनिर्मुक्तायांतिविष्णोः परंपदं विदित्वेनंफलंभद्रेमाघक्षेत्रभवंतुसा स्नात्वाचानुवसंतत्रचक्रेलिंगप्रदर्शनं
एकभक्तेननक्तेनतथैवायाचितेनच स्वदेहंकर्षयंतीसामासोपवासव्रतादिभिः यस्मिंस्तिथौचवारेचविहि
तंयत्रयत्रयत् वसंतीस्नात्रकुर्वंतितत्सर्वंकरवीरके यद्दिनेसर्वलिंगानांदर्शनंनैवजायते तद्दिनेनैवचाश्नाति
वसेन्नियमशालिनी एवंबहुतिथंचात्रवसंतीचजठाभ्त्रां कदाचित्तीव्रतात्यर्थंज्वरदाहेनसायदा तदापिम
णिकर्णिक्यांस्नात्वादेवींप्रपूजयेत् दर्शनंसर्वलिंगानांकुर्वंतीपूजनंचसा पतित्वाचापिगच्छंतीवेपमानाज्वरार्दि
ता अशक्तापुरतोगंतुपदमात्रमपिप्रिये अन्नपानेनरहितालिंगानांदर्शनंविना ध्यायंतीसर्वलिंगानिकंठप्राणा

कर॰ म निरुद्धवाक् श्रियमाणांचतांज्ञात्वाशिवेनप्रहितास्तदा नेतुंसमागताः स्कंभुनंदिभृंगिरयादयः आसाद्यदिव्ययानंचघंटाघोषसमुज्वलं ऊचुः शिवप्रियास्तांतेशिवभक्तिपरायणां शिवदूताऊचु चलभद्रेगमिष्यामः शिवलोकंसनातनं वयंशिवगणाः सर्वेनेतुंत्वांतरसागताः अस्मिन्विमानप्रवरेशिवेनप्रहितेशुभे उपविश्यसमागच्छयत्रदेवसदाशिवः अगस्त्यउवाच वचनंशिवदूतानांइतिश्रुत्वावरानने शिवदूतानिदंप्राहततोगुणवतीवचः गुणवत्युवाच यद्यप्यहंपूर्णकामकरवीरनिवासतः कामक्लेशास्तथाप्यस्तिमहितंप्रवदाम्यहं यावज्जीवंमयासर्वलिंगानांदर्शनंविना नास्थितंकरवीरेतुभुक्तंनापिमयाक्वचित् व्रतभंगोभवेन्नैवयथाममयथाचिरं दर्शनंसर्वलिंगानांकारयित्वातुमांततः यूयंशिवप्रियाःशांताः सदासर्वहितेरताः नीयतांशिवलोकंवैयत्रदेवउमापतिः अगस्त्यउवाच इतितद्वाक्यसंतुष्टाः शिवदूताःस्तथाप्रिये चक्रुर्दयास्तथादातीर्थसलिंगमिदमद्भुतं अंशोरानियतीर्थानि लिंगानिचयथाविधि लिंगतीर्थमिदंचक्रुर्लिंगेश्वरसमन्वितं ततोगुणवतीचास्मिंल्लिंगतीर्थे

विधानतः स्नात्वालिंगेश्वरंपूज्यपूर्णकामाबभूवह लिंगतीर्थेचयःस्नात्वालिंगेशंपरिपूज्यच लभेत्साशेषलिंगानांपूजाफलमनुत्तमं स्वनाम्नाप्रथितंचान्यं कृत्वालिंगंसतीर्थकं दिव्यदेहयुताभद्रेपरिपूर्णमनोरथाः दिव्यमाल्यांबरधरादिव्ययानोपरिस्थिता ५० गताः शिवगणैः सार्धंशिवलोकंसनातनं तदिदंलिंगतीर्थंतुसतीजानीहिपावनं आख्यातंसर्वमेतत्तेयथासत्तितथातव नारदउवाच माहात्म्यमेवमाख्यायसपत्नीकस्ततोमुनिः स्नानदानविधिंकृत्वालिंगेशंपरिपूज्यच अन्येषुसर्वतीर्थेषुस्नानदानविधिंचरन् दक्षिणंचोत्तरंचापिमानसंप्रसमाप्यसः सपत्नीकस्ततोगत्वामार्कंडेयमहामुने गयाक्षेत्रंजगामाशुकर्तुरुद्रगयाविधिं चतुर्भिर्दिवसैसर्वंगयाक्षेत्रंविधिंमुनिः चकारलोकशिक्षार्थंयथोक्तंमुनिपुंगवः मार्कंडेयउवाच किंवाविधिंचकारात्रेः प्रथमेदिवसेमुनिः द्वितीयेचतृतीयेचचतुर्थेदिवसेपिच स्वायंभुवमहाभागकृपयादीनवत्सल ब्रूहिमेश्रद्दधानायकृपयायदिमन्यसे तवनाविदितंकिंचित्तस्मात्पृच्छामितेनघ ॥ ५८ ॥ छं ॥ ॥ इतिश्रीपद्मपुरा

कर० म० णेकरवीरमाहात्म्ये द्वात्रिंशोध्यायः ॥ ३२ ॥ छ ॥ ॥ सूतउवाच इतितत्प्रश्नसंहृष्टोभगवान्ब्रह्मसंभवः उवा
चपरयाप्रीत्यामार्कंडेयमुनिंप्रति नारदउवाच प्रविश्यचगयाक्षेत्रंप्रथमेह्निमहामुनिः गयायाश्चोत्तरेभागेसि
द्धेशाच्चैवदक्षिणे पर्वताग्रेविजानीयाच्छिलांप्रेताभिधांमुनिः संतर्प्यविधिवत्पूर्वंपितॄन्वैफल्गुतीर्थके प्रेतती
र्थेततः स्नात्वामुनिः प्रयतमानसः गतः प्रेतकिशिलांपुण्यांप्रेतानांमुक्तिदायिनीं क्रोशार्धांतरमानेनप्रे
ततीर्थस्यसंन्निधौ वर्ततेरुमहापुण्यंरुद्रतीर्थंसुपावनं ततः प्रेतशिलायाश्चमहात्म्यंपरमद्भुतं पत्नीनावेद
यामासपृच्छतेसमुनीश्वरः अगस्त्यउवाच सेयंप्रेतशिलाभद्रेप्रेतानांमोचयेत्क्षणात् अधोगतिंगतान्प्रेता
न्यस्यांपिंडप्रपातनैः अत्रार्थेकथयिष्येहमितिहासंपुरातनं भगीरथस्यराजर्षेः संवादमृषिभिः सह क
पिलेनपुरासर्वेसगराभस्मसात्कृताः कोपप्रज्वलशापेनप्रेतत्वंतेसमाययुः तांविज्ञायगतिंराजापूर्वजानांभ
गीरथः गत्वामुनिमथोवाच गतिंतेषांविचिंतयन् १० भगीरथः भोभोमुनिगणायूयंसर्वज्ञाहिदयालवः अ

तः पृच्छाम्यहंकिंचित्युष्मान्प्रतिविमूढधीः मदीयात्पूर्वजायेवैमुनिकोपाग्निनाम्हताः तेषांकथंभवेन्मुक्तिः प्रेतत्वा
द्धिकथ्यतां श्राद्धानिशतसंख्यानिदत्तान्युद्दिश्यतानिह तेषांनैकोपिनिर्मुक्तः प्रेतत्वान्मुक्तिदस्तथ प्रेतत्वान
भवत्तेषांमुक्तिरद्यापियत्नतः अतोयथाभवेत्तेषांमुक्तिस्तद्वक्तुमर्हथ अगस्त्यउवाच इतितत्प्रश्नसंहृष्टामुन
यः कश्यपादयः तमूचुः परमप्रीताविचार्यकरवीरकं ऋषयउचुः भगीरथमहाबुद्धेत्वंपुत्रप्रवरोयतः अ
तोयतसिनिर्मुक्त्यैपितॄणांपितृवत्सल पुत्रः सएवविज्ञेयोयः पितॄंस्तारयेत्स्वयं औरसोपिनचान्योवैपुत्रस्या
कुलतारणः यतस्त्वंश्रद्धयास्माकंआदरात् परिपृच्छसि वदामोतः सुगोप्यंतेपितॄणांमोक्षसाधनं आश्रुयात्तु
विमुक्त्वंदक्षिणंकरवीरकं प्रेतत्वाद्विविनिर्मुक्तिंपितॄणांयदिचेच्छसि गयायाश्चोत्तरेभागेसिद्धेशात्पूर्वतोनघे
तत्रप्रेतशिलाराजन्विद्यतेयोजनांतरे सजलंकुंभमास्फोट्यश्राद्धंकृत्वासपिंडकं गोभूतिलहिरण्यानिदत्वाक्षपाद
त्वायथाविधि येकेचिदितिमंत्रेणश्रद्धाभक्तिसमन्वितः सक्तुपिंडंतिलैर्मिश्रंरूर्ध्वेतत्रविनिक्षिपेत् ततोरुद्रग

क.र.म यायांचकृत्वाश्राद्धंसपिंडकं संतर्पयेत्पितॄस्तत्रदुग्धादिभिरतंद्रितः ततःसप्तकुलोद्धारेस्नात्वाचैवयथाविधिः
श्राद्धंसपिंडकंकृत्वापितॄणांसद्गतिर्भवेत् विधिनैवंविधंकुर्यात्तुयःक्षेत्रेकरवीरके कुलानांसप्तकंसत्यंउद्धरेत्स
नसंशयः भगीरथमहाबुद्धेतस्माद्गच्छस्वमाचिरं यदीच्छसिगतिंतर्हिपितॄणांकरवीरके अगस्त्यउवाच मुनीनांव
चनंचेत्थमाकर्ण्यसभगीरथः चकारागत्यतत्सर्वंविधानंचात्रभामिनी यदुक्तमृषिभिः प्रीत्येतत्सर्वंश्रद्धयान्वितः
कृत्वात्रतारयामासप्रेतत्वात्सगरान्बहून् सेयंप्रेतशिलायत्रप्रेतत्वात्सगराः प्रिये निर्मुक्ताहिगतिंप्राप्ताःसाशि
लाकेनवर्ण्यते अस्याःप्रेतशिलायाश्चमाहात्म्यममलंप्रिये शक्यतेनहिपूर्णंवैमयावक्तुंचिरादपि नारदउवाच
माहात्म्यमित्थमाख्यायशिलायाश्चततोमुनिः चक्रेसल्लोकशिक्षार्थंशिलायांसकलंविधिं रुद्रतीर्थेततःस्नात्वा
देवादींस्तर्पयेन्मुनिः कृत्वाश्राद्धंसपिंडंचप्रयतोहिमुनेतदा सक्तुपिंडंतिलैर्मिश्रंनिक्षयोर्ध्वंसमाहितः येकेचिदि
निमंत्र्यफल्गुतीर्थंतोगतः द्वितीयेदिवसेचापिस्नातःश्रीधर्मतीर्थके धर्मारण्यंगतोयत्रधर्मोयागमकारयत्।

140

गयायाःपूर्वदिग्भागेजयंत्याःपश्चिमेतटे धर्मारण्यंहिविज्ञेयंबाणयुग्मांतरेणहि पूज्यधर्मेश्वरंपत्न्यामहाबोधि
तरुंनयेत् गंधाक्षतस्रक्पुष्पाद्यैर्मार्कंडेयमहामुने तृतीयेब्रह्मशिरसिगत्वावैदिवसेमुने स्नानंकृत्वाविधानेनश्राद्धं
कृत्वासपिंडकं ब्रह्मप्ररोपितानाम्रान्संसिच्यचयथाविधिः यमतीर्थंगतस्तस्मात्सपत्नीकोमहामुनिः स्नात्वातत्रविधा
नेनश्राद्धंकृत्वासपिंडकं यमायचबलिंदत्वाश्वभ्यामपियथाविधिः कालायचबलिंदत्वास्नात्वाश्रीरुद्रतीर्थके फल्गु
तीर्थेचतुर्थेह्निस्नात्वादानादिकाःक्रियाः गयाशिरस्यथश्राद्धंकर्तुंश्रीमुनिरागमत् रुद्रेश्वरंसमभ्यर्च्यगदापाणिंत
थैवच पंचामृतस्रग्गंधाद्यैरुपचारैःपृथक्पृथक् ततोरुद्रपदंदृष्ट्वासकलाघनिबर्हणं दंडवत्प्रणिपत्याथविधिंक
र्तुमुपस्थितः दृष्ट्वातदद्भुतंतीर्थंलोपामुद्रायवैमुने पतिंपप्रच्छसुहृष्टारुद्रपादनिरीक्षणात् लोपामुद्रोवाच किंना
मकिमिदंतीर्थममरेंद्रनिषेवितं सप्रभावंवदस्वामिन्कृपयाहिपतेमम स्वप्रभावमहंमन्येसर्वेनादेवसांप्रतं संति
तीर्थान्यनंतानियद्यप्यत्रपतेमम अथाप्यत्रमनोलग्नंनजानेकिमितिप्रभो नारदउवाच इतितत्प्रश्नसंहृष्टोमु

नेसकलत्रोद्भव: उवाचसकलंसोम्पोगयायाश्चकथानकं अगस्त्यउवाच अविमुक्तमिदंक्षेत्रंयन्नाम्नाप्रथितंपु
रा सेयंरुद्रगयापुण्यापितॄणांमुक्तिदायिनी रुद्रादिभिर्हतौयत्रपितापुत्रौमहासुरौ कोलासुरोमहाबाहु: कर
वीरस्तत्सुत: एतत्संज्ञाभिधंक्षेत्रंअविमुक्तंपुरासति कोलासुरमितिख्यातंकरवीरमितीरितं नारदउवाच
इतिनिगदितवचोनिशम्यपतिनासाधमुनेपुनर्मुनींद्रं पृच्छतीपतिनाचदेसनाम्नीमनिदानंसकलायदृष्यंतं
लोपामुद्रोवाच कुत: कोलासुरोब्रह्मन्सपुत्रोविनिपातित: दैवैर्दैत्यैर्युतै: सर्वैस्तत्सर्वंप्रवदस्वमे किंप्रभाव:
स:दैत्येय: किमाचारस्यकिंबल: तन्नाम्नाप्रथितंचापिकुत: क्षेत्रमिदंप्रभो अत्रचेन्निहतोदैत्य: कोलास:क
रवीरक: गयानाम्नाकुतश्चैतत्तीर्थंलोकेषुविश्रुतं एतच्चान्यच्चसकलं पृच्छत्याममसुव्रत समाख्याहिविद्वे
पेणाकृपयायदिमंप्रसे नारदउवाच इतितत्प्रश्नसंहृष्टमुनिराट्मुनिपुंगव: उवाचपरयाप्रीत्यासतीप्रश्नानु
रंवच: अगस्त्यउवाच विष्णोर्नाभ्यंबुजाज्जातोब्रह्मलोकपितामह: विष्णुनोक्त: प्रजा: सर्वंचकारचमहामति: सो

141

मनस्यादिभावेनदेवान्सृष्ट्वाथविश्वसृक् ससर्जमानसान्पुत्रान्तमसात्रीन्महासुरान् ज्येष्ठोगयासुरस्यैकस्तथा
न्योलवणासुर: कोलासुरस्तृतीयश्चकनीयानुग्रविक्रम: गयासुरोमहाबाहुस्तपसाराध्यवेधसं वरदंवरदामा
स॰ वरंलोकहितप्रदं देवेभ्योपिपितृभ्योपितीर्थेभ्योपितथैवच स्वदेहस्यपवित्रत्वंवरंप्राप्यचसन्मति: लोका
न्संतारयामासस्पर्शनादेवपापिन: ततोयमोयमोकोपात्ब्रह्माणंप्रतिसुव्रते शून्यंममपुरंजातंनदंडोस्तिममप्र
भो गृहाणेमंत्वयादत्तंदंडंदंडविवर्जितं ततस्तद्वचराकर्ण्यब्रह्माविष्णुमहेश्वर: विचार्यसुदृढंतत्रअजेयंतंग
यासुरं यज्ञार्थमर्थयामासुस्तद्देहमतिपावनं सोपिदेहंस्वकंतेषांददौयज्ञार्थमुत्तमं कृमिविट्भस्मनिष्ठांतंआसु
गंप्रसमीक्ष्यच ततोब्रह्मादयोदेवा: पात्यचावासुरंगयं यज्ञंतत्पृष्ठदेशेतुकृत्वामुनिगणान्विता: इतिप्रोचुर्गयं
सर्वेसंतुष्टहृदयासती वरंवरयभद्रंतेवरदास्मावरंतव ततोगयासुरोभद्रेवरमित्थमुवाचह गयासुरउवाच
वरदायदिमेदेवा: तर्हियच्छंत्वमुंवरं इयंसपर्वतापृथ्वीयावच्चंद्रार्कतारकं तावत्तिष्ठतुमद्देहेयूयंब्रह्मादयोसुरा:

५८

क॰र॰म॰ मन्नाम्नैव भवेद्यत्र क्षेत्रं त्रैलोक्यविश्रुतं पितॄणां मुक्तिदं चापि पिंडदानादिना भवेत् गयासुरवचः श्रुत्वा प्रोचुर्विष्ण्वा
दयः सुराः त्वया यत्प्रार्थितं सर्वं तद्भविष्यत्यसंशयं आत्मना सहिता लोकाः पितॄणां सकलं कुलं श्राद्धादिना गमिष्यं
ति ब्रह्मलोकमनामयं इति लब्धवरो दैत्यो हर्षितोत्यस्तान्निश्चयः यद्देहसंस्थिताः संति देवा ब्रह्मादयो न्वहं बंधुसपा
दितं श्रुत्वा गयं दैवीस्तुतोनुजौ कोलश्च लवणश्चापि संक्रुद्धौ तिग्मतेजसौ संनद्धौ निर्गतौ दैत्यौ युद्धार्थमतिवेगिनौ श्रा
पंतौ विविधालापैर्ब्रह्मादीनिति होचतुः भो भो देवाधमा यूयं बंधुं मुंचत माचिरं विश्रब्धं पातितं साधुं याचया कुह
काचिरं नो चेद्देवा हनिष्यावो युष्मान्बंधुघ्नचादितो त्वजीव धावतः प्राणान्बंध्वर्थमतिचंचलात् इत्युक्तौ नौ महा
दैत्यौ देवान्हंतुं विनिर्गतौ दृष्ट्वा देवगणाः सर्वे चकंपुर्दंदिशंकिताः दृष्ट्वा देवगणान्भीतान्गयो दैत्यो महामुनिः
उवाच सांत्वयन्बंधुं नानाशास्त्रस्य युक्तिभिः गय उवाच भो बंधुप्रवरामामाहन्यं तांयाचकामिमान् कार्यं हि पौरुषं का
ले बलवत्स्कमा॰ भिक्षुषु स्वर्गं नैव मया दत्तं शरी॰ रं न पुनर्बलात् हतमेभिरतो नेमे वधमर्हंति भिक्षवः ये नित्यम

142

९

मत्तांस्तवादैर्देविभिवस्कुफलवे न चरंति नराधर्मान्कालस्तान्हंसते जगान् मत्वेदमाशुगं देहं जलबुद्बुदसंनिभं कालमस्यमत्तो
दत्तं मया तेषां स्वर्गे न वै न विनष्टं भजानीतामद्देहमतिपावनं यद्दृष्ट्वादिपदैर्नित्यं गृध्रीपमतिपावनं इत्यैवातिप्रियं देहं द
ध्यज्जुष्टिरलोचलिः जीवंस्तत्यापि ते लोके यशो देहैश्चिरं तनैः मृग्यते यत्पदं विष्णोर्नानायोगसमृद्धिभिः तन्मये हांजसाल
ब्धं ततो धन्यतमोस्म्यहं यदंगुष्ठाग्रसंभूता गंगा लोकं पुनाति हि तत्पादलांछितं चित्तं बंधुमामतिपावनं तगच्छतां स्वर्कंस्था
नं भवंतावन्गणौ मम भावमास्कुरुष्व मुच्य भजेताहरिमच्युतं वैरेणाप्यथवा भक्त्या भजतामाप्रदं हरिं न भजेद्यस्तु मंदा
त्मा स पशुर्नात्र संशयः अथान्यत्प्रवदिष्ये हं भवतोश्शुद्धिकारणं मद्देहस्पर्शनं कृत्वा ततोशुद्धौ भविष्यथः यदि बंधुमम
प्रीतौ भवंतौ करुणान्वितौ प्रार्थयिष्ये त्यहं तर्हि किंचिद्दायदिदास्यथः यत्रोभयोर्मृतीभूयात्तत्र तीर्थं हि पावनं मन्नाम्नात्र
थितं कार्यं भवतुभ्यां दत्तभाषया तथेत्युक्त्वा समानसरतति दैत्योग्र संगतो लवणः कोलदैत्यश्च स्वर्गमासतुरन्वहं क
दाचिल्लवणो मद्देहद्विशाख्यमिवस्मरन् देवान्प्रति कृतामर्षो नारदेन प्रचोदितः युक्तो नैतैर्महादैत्यैश्चतुरंगबलान्वितः

कर०म० विद्वेषंपरमंचक्रेगोभूदेवसुरादिषु निर्जित्यसकलान्देवान्युद्धेयुद्धविशारदः कुर्वन्नुपद्रवंतेषांत्रिलोकींबुभुजेब
लात् ततोदेवाविनिर्धूताब्रह्मरुद्रादयोखिलाः विष्णुंशरणमाजग्मुर्वैकुंठनिलयाश्रितं नत्वातंविविधैस्तोत्रैस्तुत्वाचापि
विशेषतः विज्ञापनंप्रकुर्वंतोविष्णुमूचुरितिप्रिये तवनाविदितंकिंचित्विष्णुस्त्राताहियद्यपि तथापिब्रूमहेकिंचित्
कृपणाबहुपीडिताः लवणेनपराभूतावयंदैत्येनविद्विषा स्मरतानुदिनंदेवगर्यदैत्यविनिग्रहं निर्गत्यसकलानस्मा
न्त्रिलोकान्चशुशासनः स्वयमेवानुसंशास्तिद् कस्मादपिबिभेतिन अत्यतेनुदिनंयस्तुकोविष्णुरितिमंदधीः स
त्वयाचाशुहंतव्योदुष्टोमरलोचना अविजेयोयतः सोस्मात् अतस्त्वांशरणंश्रिताः त्वांविनान्यंनजानीमोहंता
रंतंसुरद्रुहं रक्षतस्मान्महादैत्यात्कृपयायदिमन्यसे अगस्त्यउवाच इतीदंवचनंश्रुत्वाकृपयाभ्यापीडितः वि
ष्णुर्विनिर्गतोभद्रेहंतुंलवणासुरं चक्रेदेवगणोपेतस्तेनसार्धंमहारणं तदासोनबिभेतिस्मदैत्योयुद्धविशारदः॥
अथविष्णुरुपालक्ष्यतमजेयंरणेसुरं स्वशस्त्यालवणंमोस्यजयन्नभवयुधरः म्रियमाणस्तदाभद्रेनपराभूतापी

143

उवाचलवणोविष्णुस्त्वत्पदस्पर्शोसन्मतिः यत्त्वत्पदस्पर्शमात्रेणपूतागौतमकामिनी किंचित्रंतत्पदस्पर्शात्लवणस्यासन्
न्मतिः लवणासुरउवाच एतेहमंजसाविष्णोस्त्वत्पदस्पर्शमात्रतः नान्यंवरंवृणेत्वत्तोवरदात्पूर्णमानसः यदिदासीशम
कामंवरंतंवरसत्तम मद्वचोमानयंस्तर्हिवरमेनंवृणेविभो यतोहंनिर्गतोस्म्यंगपादस्पर्शनवैत्वया अतोत्रप्रभवेती
र्थंपावनंसर्वदेहिनां नाम्नामद्देहजस्यापित्वदीयेनापिविश्रुतं आचंद्रतारकंख्यातुकुरुमद्वचनाद्विभो अगस्त्यउवा
च इतितद्वचनात्प्रेमहाविष्णुरथप्रिये चक्रेतीर्थंमहत्तत्रख्यातंविष्णुगयेतियत् विद्यतेद्यापितत्तीर्थंदैत्यसङ्मा
सरसंयुतं। गोदायाश्चोत्तरेदेशेविरजंलोकविश्रुतं तत्तीर्थप्रवरंकिंतुवर्ण्यतेविरजंमया विष्णुनैवहतेदैत्येलवणस्याग
जेसती शुचान्वितोमरुच्चक्रेदुःखंकोलासुरस्ततः आहचैवरुषारक्तनयनोदष्टरच्छदः शोकाश्रुसंधुतान्यक्षैरम
शृण्वन्मर्दयन्नुषा बंधुर्मेनिहतोविष्णुयतोदैवैर्महात्मभिः अतश्चैतान्निहत्याद्यैततस्माद्राज्यमाहरेत् अत्युग्रतपसाचै
दसाधयिष्येमनोरथं कालात्मनश्चानित्यत्वात् बहुजन्मांतरेरपि इतिनिश्चित्यचेतसक्षुभितः कोलासुरश्चिरं सचक्रा

क॰र॰म रतपश्चोगंगगिरौकालाहलाभिधे ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनि जितप्राणोनिराहारोवशीकृतमहेंद्रियः
स्वयंचैवतपः कर्तुंगतोदिव्यशतंसमाः तस्मिन्नवसरेरक्तभ्रूरक्तकेशीनामराक्षसः हेतिप्रहेतिपुत्राभ्यांसहितःश्चंद्र
शासनः राजधानींविधायात्रचक्रेराज्यंपुरापुरे राज्ञोविज्ञत्पनिः शेषान्चंडक्रमंडलस्थितान् आसिंधुवलयांपृ
थ्वीएकछत्रांप्रशासतः स्वनाम्नेदंमहाक्षेत्रंप्रथयित्वाथदुर्मतिः राक्षसंपुरमित्येवंचक्रेधर्मनिषेधनं ततःप्रेक्ष्यरा
क्षसान्दिक्षुमुनिर्देवालयानिच भंजयामाससर्वाणितीर्थानिविविधान्यपि मुनीन्संपीडयामासधार्मिकांश्चतथाः
प्रजाः गोविप्रांश्चविशेषेणयज्ञादिनिरतान्प्रिये ततः प्रजाबहूद्विग्नामुनिदेवगणान्विताः अन्यत्रालब्धशरणाःश
रणंद्रुहिणंययुः दंडवत्प्रणिपत्याथस्तुत्वास्तोत्रैःप्रयामाते भार्त्तंनिवेदयामासुः सकलंराक्षसोकृतं ३ मुनयऊचुः
रक्षरक्षप्रजाब्रह्मन्रक्षसाबहुपीडिताः सुकेशिनातिवीर्येणहरलब्धवरेणहि तेनतीर्थान्यनंतानितथादेवालयानि
च भग्नानिबहुधाब्रह्मन्मुन्याश्रमयुतानिच तेनभक्षयताञ्जीवान्प्रजास्तेबहुपीडिताः अन्यत्रालब्धशरणाःश

१५५

रणंत्वामुपागताः त्वंवैपिताखिलोकानांमाताबंधुः परायणं अतःत्रयाहिनोब्रह्मन्प्रपन्नान्यदिमन्यसे अगस्त्य
उवाच इतिश्रुत्वावचोदीनंतेषामाशुपितामहः यदाविनिर्गतोहंतुंराक्षसंतंशुचिस्मिते तावदग्निमयःप्रांशुः
कोलासुरतपोद्भवः तिर्यगूर्ध्वमधोलोकान्दीपयन्नंतकाग्निवत् ततोदेवाः समग्रावैसंतप्तास्तेतपोधनाः आः
किमेतदकांडेभूदित्यूचुर्द्रुहिणंप्रति ब्रह्मोवाच माभैष्टसप्रजादेवानायमग्निर्यतोंतकः ज्ञातंमयाहृदैवास्यनि
दानंजातवेदसः कोलासुरोमहादैत्यश्चरतेदुश्चरंतपः कर्तुकामोमहीराज्यमस्मद्वेषेणभूयसा तस्यमूर्ध्नःस
मुद्भूतःसधूमोग्निस्तपोमयः तिर्यगूर्ध्वमथालोकान्दहतेविश्वगीरितः दत्वातस्यमहीराज्यंराक्षसंतंसुकेशि
नं तेनैवनिहनिष्येहंकंटकंकंटकेरिव दत्तंतस्यमहीराज्यंकालोदैत्यमवैरिणः परस्परंविनिंक्ष्यंतियुद्धेतादैत्य
राक्षसौ इतिविज्ञाप्यतत्सर्वान्भगवानात्मभूः प्रिये परीतोभृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमं तपंतंतपसा
लोकानाच्छिन्नंत्तणकीचकैः विलक्ष्यविस्मितःप्राहहसंसांहंसवाहनः उत्तिष्ठोत्तिष्ठभद्रंतेतपःसिद्धोसिदे

कर॰ म॰ त्वरात् वरदोहमनुप्राप्तोध्रियतामीप्सितोवरः नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यंतिचापरे निरंबुरुदरियेप्राणान्कौवेरिय
ज्ञात्तेसमाः व्यवधानेनतेनैवदुःकरेपामनस्विभिः तपोनिष्ठेनभवताजितोहमजितोस्करः ततस्तआशिषःसर्वाःददाम्य
सुरपुंगव मद्दर्शनंयतस्तेघजातंमर्त्यस्यनाफलं अगस्त्यउवाच इत्युक्तोदिभवोदेवः कमंडलुजलेनतं दिव्येनोक्षन्म
हादैत्यभक्षितांगंपिपीलिकैः सच्चकीचकवल्मीकात्ताहसांनिर्गतोमुनिः सर्वावयवसंपन्नोवज्रसंहननोभवत्।।
संन्निरीक्ष्यांबरेदेवंहंसवाहनमस्थितं ननामशिरसाभूमौतद्दर्शनमहोत्सवः कौलास्करउवाच नमस्तेब्रह्मणे
नंतरात्रायेपरमात्मने चिदचिच्छक्तियुक्तायव्यापिनेविश्वमूर्तये नमोविश्वस्पसंहर्त्रेविधात्रेपालकायते कूटस्था
यात्मनेतुभ्यंनमस्तेविश्वसाक्षिणे नमस्तेवेदबीजायपरेशायवियोनये अरूपबहुरूपायमायिनेसुखदायिने नमो
विश्वप्रकाशायपंचभूतात्मनेनमः सत्वादिगुणयुक्तायत्रिमूर्तिधारिणेनमः नमोलक्ष्यस्वरूपायपंचतन्मात्ररू
पिणे शब्दब्रह्मस्वरूपाय ॰ नमस्तेसर्वदायते यद्दिदास्यत्यभिमतावरदोत्तममेवरान् भवविष्णुमहेशेभ्योदेवेभ्योपि

तथैवच त्वयानिसृष्टभूतेभ्योमज्जातिभ्योद्विजोत्तम पुरुषेभ्योतिचित्रेभ्योमामत्युर्मेभवत्कचित् इहलोपाश्चमे
राज्यमशेषायाश्चिरंततं तपसायदितुष्टोसिमदीयेनत्वदाविधे अस्तुदेहंमदीयंचवज्रसारसदाममजरादिरहितं
चापिशास्त्रास्त्रहनमोक्षमं अगस्त्यउवाच अगस्त्यउवाच एवंदत्तोविधिस्तस्यवरंप्रादात्सदुर्लभं प्रीतस्तपेतरास्य
र्थेदुर्बुद्धिधिषणप्रियं दैत्यमेदुर्लभान्नृणांयान्वृणीषेवरान्मम वितरामितथाप्यंगतवतुष्टिकरान्वहं यद्यद्दत्तंत्वयाम
तस्तत्तथैवास्तुतेनघ वचनान्ममदैत्येंद्रकुरुराज्यंयथासुखं याचेयिष्याम्यहंकिंचित्त्वत्तोदैत्ययदल्पकं तदातत्वं
त्वयामत्यंकुरुमावचनंमृषा विसृज्यसकलंद्वेषंभजगोदेवभूसुरान् तथाचसकलासिद्धिर्भवेत्तवचनान्यथा गच्छ
दैत्यवराद्यत्वंमविमुक्तेहिरक्षिपां सुकेशीराक्षसंहत्वातत्रराज्यंकुरुष्वभो अगस्त्यउवाच तथेत्युक्त्वाततोदैत्योब्रह्मा
णमभिवाद्यच अंतर्भूतमुपालस्यनिर्गतःस्वगृहंप्रति आहूयसकलान्दैत्यान्आत्मीयान्तिमानवः आगतःकौ
लदैत्येंद्रःशतपुत्रैःसमन्वितः ९ वीक्ष्यदैत्यबलंचोग्रमकस्माद्देवभामिनिः भीतोंतर्हृदयेचौत्रैः सुकेशीनामराक्ष

क र॰ म स: हेतिप्रहतिपुत्राभ्यांसमवेतोतिकोपित: युद्धार्थमाययौशीघ्रंचतुरंगबलान्वित: तत: प्रववृतेयुद्धंमभवद्दैस
राक्षसै: पश्यतांदिविदेवानामतिहर्षप्रदंप्रिये अनंतबलसंयुक्तोलनुजोरक्षस: प्रिये युयुधातेतिसंरब्धौदैत्यस्यश
तस्यानुभि: ततोदैत्यसुता: सर्वेमहाबलपराक्रमा: रक्षस्तनोर्बलंसर्वंनिजघ्नु: शस्त्रपातनै: स्वसैन्यंनिहतंवीक्ष्य
रक्ष: पुत्रोततोरुषा कुर्वंतौतुमहद्युद्धंदैत्यपुत्रौविजघ्नतु: तत: कोलासुर: श्रुत्वास्वसुतान्प्रतितान्मृधे युद्धार्थंनि
र्ययु: शीघ्रंक्रुद्ध:कालरूपापरा: पुत्रशोकपरीतात्मासंदष्टदशनच्छद: रक्षसांसकलंसैन्यंनिजघानक्षणान्महत्
निहतंस्वबलंवीक्ष्यततोरक्षसुतौप्रिये युध्यमानस्ततोदैत्य: क्षणादेवबलंमहा युद्धेनिपतितोश्रुत्वास्वसुतौअतिवि
क्रमो स्ककेशीराक्षस: श्रुत्वायुद्धेकर्तुमथागत: निहत्यस्वपुराद्दैत्यरत्नंचामितविक्रम: विव्याधसमहावेगकोला
सुरमथोरसि तत: कोलासुर: क्रुद्धोधृत्वाकेशिपुराक्षसं अछिन्नधृतधारेणखड्गेनतत: छिर: क्षणात् निहतंस्व
पतिंवीक्ष्य—— यंदैत्यरक्षयो: प्रहृष्टवदनांभोजा: सहतेदुंदुभिस्वनै: गीतवादित्रनृत्याद्यै: दिव्यस्त्रीनर्तनै: प्रियं

ववर्षपुष्पधाराभि: कोलासुरमभीक्ष्णश: तत: कोलासुरश्चक्रेराज्यमंत्रनिरंकुश: राज्येभिषेचितंभद्रेप्रजाभिर्मुनि
संयुतै: विसृज्यसकलंशेषंगोभूदेवसुरादिषु ब्राह्मणोवचनाच्चक्रेतेषांसंपूजनंमतं प्रजाश्चपालयामासनान्यंतंकरमा
ददत् बिमुच्यनापिनि: शेषंतासांभूत्येप्रिय: प्रजा: सुरालयानिजीर्णानितीर्थानिविविधानिच पुनश्चोद्धारयामाससो
द्यानानिमहासुर: एवमत्रवसन्दैत्य: पुत्रार्थीमुनिवाक्यत: सेव्यदेवींमहालक्ष्मींलेभेपुत्रचतुष्टयं॰ करवीर:प्रथ
मजोविशालाक्ष: सुतोनुज: उज्ज्वासुरस्तृतीयोथकनीयांस्तुकुलांधक: दिनेदिनेप्रशोभानांसुतानांवर्धतांप्रिये च
कारयाच्चसंस्कारान्चतुर्णामतिसंभ्रम: ज्येष्ठंविज्ञायकुशलंकरवीरमथासुर: अभिषिच्यसुतंराज्येस्वयंवनमुपावि
शत् नि:संगोमुक्तिमन्विच्छन्निल्पेवयसिसोसुर: वसतिस्मवनेघोरेतप: कुर्वन्नहर्निशं कोलासुरेवनंयातेकरवी
रेमहासुर: राज्यंचकाररुचिरंबांधुभिस्त्रिभिरावृत: ततोराज्यात्रियालुब्धेव्यसनेष्वतिलालस: देवर्षिवचनाच्चक्रे
द्विषंविप्रसुरादिषु पितृव्यघ्नान्सुराश्रुत्वाबंधुनाचप्रचोदित: तीर्थान्यासंबलान्यासरूपादेवालयानिच यज्ञादिसक

कर॰म॰ लंधर्मंनिषिषेधसुरप्रिये स्वधर्मैरभितांन्विप्रान्प्रजास्त्वाथमहामुनीन् भद्रेसपीड्यामासकरवीरोविमूढधीः तमजे
यमुपालक्ष्यदेवीवरसुतंततः ब्रह्माणंशरणंजग्मुर्देवान्मुनिगणान्वितः ब्रह्माचापिसुरैः सार्धंजगामशरणंशिवं ज
गामाथशिवोविष्णुंसहतैः शरणंप्रिये स्व तंनत्वापादयोः सर्वेदेवास्तेवासवादयः प्राजिसपन्नथोधीराअपिसर्ववि
दुंसति पाहिनोखिलदेवारेप्रपन्नानतिपीडितान् करवीरासुरेणोग्रेदेवीवरसुतेनभो रक्षितोविमुक्तकेयाम्पिराजधा
नीविभायसः कौलासुरसुतोभुक्तेयज्ञभागान्सुरान्प्रियान् तमजेयंमहाविष्णोबंधुभिः स्त्रिभिरन्वितं हत्वादेवग
णान्पाहिप्रपन्नान्पादिमन्यसे अगस्त्यउवाच इतितेषांवचः श्रुत्वाब्रह्मविष्णुमहेश्वराः निहंतुंकरवीरंतेसदेवानिर्ग
ताःक्षणात् मरालवाहनोब्रह्माविष्णुर्गरुडवाहनः रुद्रस्तुवृषभारूढोगणैर्भृंग्यादिभिर्वृतः वासवाद्यास्तथान्येपि
देवाः सर्वेमनस्विनी स्वस्वयानंसमारुह्यअविमुक्तमिदंययुः अथागतानुपावीक्ष्ययुद्धकामान्सुरान्प्रिये करवीरो
पियुद्धार्थीनिर्ययौसैन्यसंवृतः ततस्तत्बांधवाः क्रूराशास्त्रास्तेमितविक्रमः चतुरंगबलोपेतायुयुधुः स्त्रिदशैः

१४७

समं हन्यमानान्सुरान्वीक्ष्यतैश्चतुर्भिर्महासुरैः स्वयंयुयुधिरेदेवी ब्रह्मविष्णुमहेश्वराः विष्णुनानिहतोयुद्धेविशा
लाक्षोमहासुरः रुज्ञासुरोपिनिहतोरणेदेवोविरंचिना विडौजसाहतोयुद्धेकुलांधकमहासुरः नागायुतसमंत्राणो
वज्रेणशतपर्वणा एवंबंधून्हतान्वीक्ष्यत्रिलयामितविक्रमः करवीरोरुषायुध्यन्सहदेवैर्महाबलैः आवीक्ष्यविजितान्
देवान् अपिब्रह्मपुरोगमान् करवीरसुरेणाजौरथरुद्रश्चकोपह प्रकुर्वंरुद्रमावीक्ष्यतद्गणाः शूलपाणयः अयुध्यन्
करवीरेणनंदीभृंग्यादयः सह तानथापतितान्वीक्ष्यागणान्रौद्रान्महासुरः तदायुद्धान्निवाणौघैः छित्वांतर्हिदिता
उयत् ततोवर्द्दितान्वीक्ष्यस्वगणांस्तेनपाप्मना उद्यम्यतरसाः शूलंरुद्रः क्रुधाविनिर्ययौ रुद्रमप्यथचायंतमधार
यतसोसुरः शरजालैर्घनैस्तीक्ष्णैरभ्रैः सूर्यमिवप्रिये शूलेनशितधारेणतच्छित्वाशरजालकं हननंदैत्यहृदयेरु
द्रश्चामितविक्रमः एवंनिहन्यमानोपिमहारुद्रेणभूरिशः पुनःपुनः समुत्तस्थौकरवीरोमहासुरः बली एवंनिह
न्यमानोपियदामृत्योनसोसुरः तदाकुर्वन्महाचिंतांभद्रेदेवगणाचिरं ततः श्चिंतातुरान्वीक्ष्यदेवान्नुद्गीतिकोपनः

८२

कर॰ म॰ पातयामासतंदैत्यंशूलेनाहत्यवक्षसि शूलेनाभिन्नहृदयंम्रियमाणमथासुरं प्रोवाचसदयोरुद्रस्तच्छौर्येतुष्टमानसः
रुद्रउवाच तुष्टोहंतवयुद्धेनकरवीरमहासुर वरयाशुवरोमत्तोदास्पियदभिकांक्षितं अगस्त्यउवाच करवीरस्ततोभ
द्रे रुद्रेणैवमुदीरितः रुद्रस्यवाविश्रुत्यास्मायाचेश्वरमुवाचतं करवीरउवाच धन्योहंकृतकृत्योस्मित्वत्प्रसादान्नरुद्रपावनः
पूर्णकामोविमुक्तत्वान्नयाचेन्यंवरंमनाक् अथापिवरदश्चेत्त्वंमन्यसेवरदर्षभ मन्नाम्नैवभवेत्क्षेत्रमाचंद्रंविश्रुताभुवि
त्वयासंनिहतोदेहोयत्रयत्रपतेन्मम तत्रतत्रभवेत्तीर्थमन्नाम्नाविश्रुतंशुचिः अगस्त्यउवाच तथा— तिवरंदत्वारुद्रोदे
वैः सर्वैर्युतः शूलेनशितधारेणतच्छिरः शतधाच्छिनत् पतितंतच्छिरोवेगादग्निकुंडाच्चदक्षिणे तत्राप्यभवत्परंतीर्थंक
रवीरमितिश्रुतं यतेनपातितस्तस्यकबंधोत्रैवभामिनि अतोत्रासीत्पुरातीर्थंकरवीरमितिश्रुतं अतोस्मिन्करवीराख्ये
तीर्थेकोलासुरोहतः अतश्चात्रैवसंजातागयारोद्रीतिविश्रुता नारदउवाच इतिसातद्वचःश्रुत्वाभर्तारंपुनरेवहि पृ
प्रछविस्मिताकिंचिन्मार्कंडेयमहामुने लोपामुद्रोवाच योगतोराज्यमुत्सृज्यतपसेहिवनंचिरं सर्वेकोलासुरश्चात्रकुतो

148

यानिहतासुरैः एतन्मेब्रूहिसकलंकृपयाप्राणवल्लभ पिबंत्यास्त्वन्मुखांभोजच्युतंक्षेत्रकथानकं ॥ ॥ छ ॥ इतिश्री
पद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेत्रयस्त्रिंशोध्यायः ॥ छ ॥ ॥ नारदउवाच इतितत्प्रश्नसं
हृष्टोमैत्रावरुणिरात्मवान् यदुवाचमुनेसर्वमाख्यानंतन्निबोधमे १ अगस्त्यउवाच करवीरंहतंश्रुत्वास्वपुत्रंमम
रैः प्रियं कोलासुरः सुरेभ्यस्तपपर्यंतध्यद्रुपासुरः २ सर्पः यदाहतइवश्वसन्यरः रमसारूणः स्मरन्पूर्वोद्भवंदुखंउ
वाचैवमनस्विनी ३ कोलासुरोवाच अहोपश्यतदौरात्म्यंदेवानामपिविद्विषो मद्बंधुर्निहतोयैस्तुविश्रद्धावलितेज
सो ४ शतंपुत्रास्ततश्चापियदर्थेषुप्रियान्मम तैरेवनिहतायौश्चोचत्वारोपिसुताप्रियाः ५ असुरान्निर्जयंत्ये
तेकुहकान्निर्जराः सदा महालक्ष्मीमुपाश्रित्यकरवीरनिवासिनीं ६ विजित्यतपसापूर्वंतामच्याहंतपः प्रियंहनि
ष्येसकलान्देवान्सबलान्असुरद्विषः ७ यद्यप्येषादुराधर्षारणेलक्ष्मीर्महाबला तत्क्षेत्रार्जिततपसाजीयतेतथा
पिसासुखं ८ तस्यांजितायांदुष्टायांछिन्नमूलेवनस्पतौ विटपाइवशुष्यंतिदेवाः सर्वेनसंशयः ९ अगस्त्यउवा॰

कर॰म॰ इतिकृत्वामतिंभद्रेततः कोलासुरोवनात् आगत्यास्तुतपःश्चक्रेक्षेत्रेस्मिन्सकलार्थदे १० क्षेत्रस्योत्तरदिग्भागे
पंचक्रोशांतरेणहि सत्यमुन्याश्रमेशुद्धेभद्रेपर्वतसंनिधौ १२ यत्रसप्तर्षयःकृत्वातपस्तीव्रमथोसितं ज्ञानंचभू
तभव्यादिवस्तूनांलेभिरेवरं १३ यत्रसप्ततीर्थानितदाश्रमयुतानिच सर्वसिद्धिप्रदान्युच्चैः संत्यद्यापिमनस्विनि
१४ तत्रकोलासुरश्चक्रेतपः परमदारुणं निरुध्यसकलान्प्राणान्मूर्ध्निभद्रेशतंसमाः १५ अपक्षः कतिचिन्मासा
न्कतिचिद्वायुभोजनः जितेंद्रियोनिराहारोनिश्चलोदृढमानसः १६ ततस्तत्तपसावीक्ष्यपीडिताः सकलाःप्रजाः
महालक्ष्मीवरंदातुंययौतमसुरेश्वरं १७ पंचाननसमारूढानवकोटिसखीयुता एकाग्रपंचपंचाशत्कोटिदेविभि
रन्विता १८ योगिन्याश्चचतुःषष्टिः संमिलाभिरहर्निशं सेव्यमानामहालक्ष्मीवरदाप्राहचासुरं १९ श्रीमहा
लक्ष्मीउवाच कोलासुरमहाबुद्धेवरंवरयकामितं तपसानेनतेतुष्टास्म्यहमतिदुर्लभं २० नैतच्चक्रुःपयश्चक्रु
र्नेकरिष्यंतिकेचन यदेतदसुरश्रेष्ठत्वयाचीर्णंमहत्तपः २१ अगस्त्यउवाच श्रुत्वेतिवचनंदेव्यास्ततः कोलासुरः

151

प्रिये नत्वादेवीमहालक्ष्मीस्तुत्वाचापियथामतिः २२ मनस्विनीमहादेव्यामोहितोविष्णुमायया वरमिच्छन्नुवाचेतिदे
वीमथविमूढधीः २३ कोलासुरउवाच वरश्चेदीयतेदेवीत्वयाममवरानने गच्छक्षेत्रवरादस्मान्मातिष्ठात्रशतंसमाः
२४ मत्तःपराभवोभूयादेवानांसमरेतथा वरद्वयमिदंयाचेनान्यत्किंचिदतःपरं २५ अगस्त्यउवाच तस्मैवरद्व
यंदत्वाततोलक्ष्मीर्मनस्विनी अगामहिमवच्छृंगंक्षेत्रविश्लेषकर्षिता २६ स्वदत्तमवधिंतत्रवीक्षंतीतुहिनाचले पुन
रागंतुकामासाचरतिस्मात्रभामिनी २७ मानयंत्येकदिवसंशतवर्षसमंप्रिये क्षेत्रस्यास्यवियोगेनत्यक्ताशेषमहत्सु
खं गतायांहिमहालक्ष्म्यामथकोलासुरःप्रिये चक्रवर्तीबभूवात्रस्वयमेवनिरंकुशः २८ अहंचेदंरुषाघूर्णसंद
ष्टदशनच्छदः स्थलमुच्चम्पुसदसिस्थानवानितिभामिनी २९ भोभोदानवदैतेयारक्षोभूतोरगादयः क्रियतांवचनंस
र्वैर्मदीयंमदनुज्ञया ३० सर्वैर्मेघातितोदेवैर्भ्रातरोदयितोमम ब्रह्मणाविष्णुनावापिपार्ष्णिग्राहेणसेवनात् ३१ च
त्वारोपिहताशुद्धेसूनवोमेतितेजसः रुद्रेणामितवीर्येणचिताभस्मानुलेपिना ३२ तेषांमच्छलभिन्नानांभूरिपारुधि

कर·म· रेणाहि अस्तकप्रियांस्तर्पयित्वामद्धधून्स्यांगतव्यथः ३३ तेषुकूटेपुनश्चैतुकृतमूलेषुशाखिषु शारवाड्वविनत्र्यं
तितप्राणास्त्रिदिवौकसः ३४ तावत्स्वयंभुवंयातब्रह्मक्षत्रादिभिर्युतां स्वदयध्वंसपोयज्ञस्वाध्यायव्रतदानिनः ३५
यत्रयत्रद्विजागावोवेदावर्णाश्रमक्रियाः ततंजनपदंयातसदीपयतमाचिरं ३६ अगस्त्यउवाच नैर्ऋतास्तेसमा
दिष्टाभर्त्रेवैशूलपाणयः ताम्रदंष्ट्रकरालस्यांताम्रश्मश्रुशिरोरुहाः ३७ नदंतोभैरवंनादंछिंदिभिंधीतिवादिनः
प्रजानांकदनंचक्रुभद्रेथकदनप्रियाः ३८ केचित्वग्निंत्रेबिडेभिः सेतुप्राकारगोपुरान् प्राज्वलंछरणानन्येप्र
जानांज्वलितोल्मुकैः ३९ आजीव्यान्विछिदुर्वृक्षान् केचित्खङ्गादिधारिणः कोचिदुत्स्वनयामासुतीर्थदेवाल
यान्यपि ४० एवंचिह्निकृतेलोकेदेत्यैंद्रानुचरैर्मुहुः दिवंदेवाः परित्यज्यभुवन्वेरुरलक्षिताः ४१ सद्रज्य
मानः क्रतुभिः वर्णैश्चैवतथाश्रमैः अगृहीच्चहविर्भागान्दृत्यः स्वेनैवतेजसा ४२ सप्तद्वीपावतीपृथ्वीतस्या
सीदमितद्युतेः अरुष्टपच्यानिरत्तंचेपमानान्तुर्शासनात् ४३ एवमैश्वर्यमतोसोदृप्यश्चोधारस्नमार्गगः द

धारलोकपालानांएकएवपृथग्गुणान् ४४ माराजकन्यकालोकेरूपवत्योमहागुणाः आनीयगिरिदुर्गस्थेरक्षया
मासंसर्वशः ४५ तस्योग्रदंडसंविग्नाः सर्वेलोकाः सपालकाः अन्यत्रालब्धशरणाः शरणंद्रुहिणंययुः ४६ ब्र
ह्मापिसहितैः सर्वैर्जगामविष्णुसंनिधौ विष्णुरप्यमरैः सार्धंजगामशिवमंदिरं ४७ श्रुत्वातद्वचनंक्षुब्धोमहारुद्रोपि
भामिनि लक्ष्म्याधिवसतिस्थानंजगामतुहिनालयं ४८ निवेद्यसकलंलक्ष्म्यैकोलासुरविचेष्टितं रुद्रः कोलवधार्था
यसमरंप्रार्थयत्तदा ४९ प्रार्थितावहुधादेवैस्ततोलक्ष्मीर्दयान्विता कोलासुरवधार्थायनिर्गतापरमेश्वरी ५० न
वकोटिसखीयुक्ताचामुंडागणमंडिता खगणैः कालवेतालश्रीसिद्धिवटुकादिभिः ५१ रंकभैरववीराद्यैः सेव्यमा
नासमंततः त्रयस्त्रिंशत्कोटिमितैर्देवैर्यानसमुत्थितैः ५२ नानायुद्धधरैर्युक्तावाहिनीगणमंडितैः वादित्राणिवि
चित्राणिवादयद्भिरनेकधा ५३ जयोदयः स्वनामुच्चैःकुर्वद्भिश्चपुतानरैः आयांत्येवमनुः प्राप्तास्करवीरेकरहा
टकं ५४ उषित्वाकतिचित्कालंक्षेत्रेतस्मिन्मनोरमे दुरितारव्यंमहादैत्यंत्रास्तंकोलासुरस्यहि ५५ हत्वानामत्वयाप्रा

क्र॰ म॰ सेदुरितापहन्तेतिच आगत्यसंस्थितापश्चान्महालक्ष्मीश्रियालये ५६ दैत्यदत्तावधिंतत्रप्रत्यर्यंतिकतिचित्समाः गिरा
वेलाभिधेतत्रकश्चित्आसीन्महाबलः ५७ कोलासुरस्यदौहित्रोदेविलासुरविश्रुतः निहत्यैलाभिधेयुद्धे दिव्यरूपध
रागिरौ ५८ एलाजानामविख्यातावसतिस्मश्रियालये पर्वताग्रेकश्चिदासीत्क्षेत्रमार्गनिरोधकः ५९ महिषाख्योम
हादैत्यः कोलासुरनिरूपितः तमजेयंबलंदेवीनिहत्यमहिषासुरं ६० वसंतिस्मगिरौतस्मिन्महिषीरूपधारिणी
क्षेत्रगुप्त्यैः समंताद्ये स्थापितास्तेनयेसुराः ६१ तेसर्वेनिहतादेव्याक्षेत्रमार्गनिरोधिनः निहतानसुरान्श्रुत्वा
क्षेत्रमार्गनिरोधकान् ६२ चतुरः प्रेषयामासततः कोलासुरोसुरान् रक्तकालंरक्तबीजंरक्ताक्षंरक्तभोजनं ६३
महासैन्यंसमायुक्ताप्रतिद्वारंयथाक्रमात् ततः समागतान्वीक्ष्यद्वारपालसुरैरितान् ६४ देवीहिप्रेषयामासस्वगणा
न्युद्धकाम्यया पूर्वद्वारस्थितंदैत्यंरक्तकालंमहाबलं ६५ निहत्याशुसमातस्थावुज्वलंबामहाबला दक्षिणंद्वारयंदै
त्यंरक्तबीजंमहाबलं ६६ निहंतुंप्रेषितोदेव्याभैरवोबलसंयुतः रक्तबीजेनमहतानिर्जितोभैरवः स्वयं ६७ कात्या

15|

यनीससंस्मारसर्वासुरनिबर्हिणी पातालतलमुद्भिद्यतत्क्षणात्परमेश्वरी ६८ कात्यायनीनिहत्याशुसमातस्थौमहा
बला पश्चिमद्वारयंदैत्यंरक्ताक्षमतितेजसं ६९ निजघ्नंतुमहावेगोश्रीसिद्धबटुकेश्वरो उत्तरद्वापरपंचापितथैव
रक्तलोचनं ७० निहत्याशुसमातस्थौतत्रैवरवलेश्वरः हतान्वीक्ष्यमहादैत्यान्क्षेत्रमार्गनिरोधकान् ७१ विविशुः
क्षेत्रमसुरैर्देवाः सर्वेरणार्थिनः ततोदेवगणैः सार्धंयुयुधेदैत्यसैनिकाः ७२ नानाशस्त्रप्रहरणायुद्धलाघव
शारदाः तान्निजघ्नुस्ततोदैत्यान्देवाश्चेंद्रादयः प्रिये ७३ वज्रादिशस्त्रसंघातैरमितैरमितौजसः अथवीक्ष्य
स्वकंसैन्यममरैर्निहतंबहु ७४ भद्रेकोलासुरोदेवान्हंतुंक्रुद्धोविनिर्ययौ चतुरंगबलोपेतोगिरम्णाकंपयन्म
हीं ७५ दिव्यंरथंसमारूढोविव्याधत्रिदशान्शरैः अतस्तत्प्रहितान्बाणान्देवाअपिमहाबलाः ७६ मंत्रपूर्वमु
पोत्सृष्टैर्बाणजालैर्विचिच्छिदुः पुनस्तत्प्रहितान्बाणांश्छित्वाबाणैरनेकशः ७७ निशितैर्वेगतोत्सृष्टैर्निजघ्नु
र्दैत्यसैन्यकान् अथवीक्ष्यहतंदैवैः स्वसैन्यमसुरेश्वरः ७८ अस्त्रैश्चापितथाशस्त्रैरर्दयत्तामरेसुरान् अश्वशाला

कर॰म॰ पिचास्त्राणिचास्त्राणिविचिच्छिदुः ७९ अस्त्रैश्चापितथास्त्रैर्दैवाः शास्त्रास्त्रकोविदः उत्सृष्टानिततोदेवैःशास्त्राण्य
स्त्राणिचासुराः ८० तरसाक्षिप्यसर्वेषांजगर्जसमहाबलः ब्रह्माभिधेनचास्त्रेणचिमोत्थरसकलान्यपि ८१ ब्र
ह्मविष्णुमहेशांश्चनिजघानमहत्सुरान् हतान्वीक्ष्यततोरोषात्सुरान्युद्धेतिकोपितः ८२ निजास्त्रेणतमाकृष्यपात
यित्वानदीतले दैत्यारसिपदंतस्यताडयामासयद्यपि ८३ शूलेनाथापिसक्षोणीनसोव्यस्करजायत ततोब्रह्माश्च
१॰ विष्णुश्चदैत्यारिमहाबलौ निश्चलार्थंस्कन्धयनेसायुद्धेदरुः पदे शिरःकृत्वोत्तरेदेवोपादौकृत्वातुदक्षिणे ८५
नैर्ऋतिंदिशमाश्रित्यपातयित्वाकरंस्करैः हन्यमानंपतिंवीक्ष्यततस्तस्यनुजीविनः ८६ निहंतुंनिर्ययुर्दैत्याब्रह्मवि
ष्णुमहेश्वरान् शरव्रातसच्छन्नान्ब्रह्मविष्णुमहेश्वरान् ८७ सुरान्वीक्ष्यतुसालक्ष्मीतत्रयुद्धार्थमाययौ नव
कोटिमिताः सर्वाः कात्यायिन्योमहारवनः ८८ हत्वासुरान्महादेवीतदसङ्‌नियुर्जगु एकाग्रपंचपंचाशत्को
टिचामुण्डकागणाः ८९ दैत्यास्त्वस्यानसंदृष्ट्वाननर्तसमरेसती ततःसशक्तिकानांवैदेवानांकोपतोमहान् ९०

152

अविराशीङ्कृतनाथोभीषणःपांशुरुक्षकैः युयुधेसमरेदैत्यैभूतनाथोमहाबलः ९१ ममर्दसमहादैत्यान्शरैर
त्यन्तदारुणैः रंकभैरववीराद्याः कालवेतालसंयुताः ९२ हत्वाश्चत्वामरेदैत्यान्दशदिक्षुविनिक्षिपुः ततोलक्ष्मी
महादेवीह्यष्टादशभुजासती ९३ धारयंतीयथाशास्त्राण्युत्तराधः करक्रमात् कमंडलुंपानपात्रंचापंखेटंचपट्टिशेः
९४ शक्तिंपाशंचघंटांचजलजंपरशुंतथा त्रिशूलंचतथाचक्रंगदांकुलिशमेवच ९५ खड्गंशालीमुखंचैवकमलं
चाक्षमालिकां आयुधैर्भूषितांगेभ्यकंठीरववरवाहना ९६ तन्मस्तुशिरसिज्ञात्वाकोलेदैत्यानुजामुखात् भवदुष्टे
शिलाचेतिशस्वातामनुग्रत्वच ९७ हंतुंकोलासुरंदेवीनिर्ययौसुतनुःक्षणात् दृष्ट्वातिकोपाद्भृकुटीमुखांतांआ
सन्नमृत्युंवरदाग्रणीः प्रिये ९८ तदाहतंश्रीलमनामहेशोलोकासुरंप्राहदयार्द्रचित्तः रुद्रउवाच किंवर्ण्यतेतव
बलंखलुतानिहस्मांस्त्रीणप्यहोध्वतवतोप्यणुवत्वदेहे ९९ येषांहिरोमविवरेविलुठंतिदेव्य ब्रह्मांडकान्यणुगणा
इववायुमार्गे तुष्टोहमादरयुतः प्रददेवरंतुसारंविलोक्यसमरेसुरवर्यनूनं १०० त्वत्कामयाशुपदमीप्सितमस्ति

यतसंत्यज्यकल्मषमशेषमुदारचित अगस्त्यउवाच रुद्रेणभद्रेसमरेणचैवमुक्तोपिकोलासुरउग्रमानसः १ रुद्रादिपा
दग्रह्रुतिमनष्टमनोमलोव्यक्तपरात्मदर्शनः लोकंपरंचामुमुपेक्ष्यविद्वान्ज्यायास्कृतार्थादिकमुग्रपदुः त्वं २ विहायसर्वं
खलुकालमेश्वरंनित्यंचिरंलोकहितंयथाचे कोलासुरउवाच नाहंयाचेलोकमेनंनचोर्ध्वंतन्नः शंभोपूर्णकामोवरंहि ३
स्वात्म्यामोहान्मोहाद्दथावाजीश्वरत्वंकालग्रस्तंचंचलंभूरिदुःखं नोराजायापुत्रमित्रादिवृंदंदुःप्राप्येदंबहुदुःखप्रदायि
४ नाष्टैश्वर्यंभूरिदोषाय। धीमांसर्वंकोशंलेशंबीजंपरंयत् यद्धेयंतेश्चिंत्यंतेयोगिसंघैः पादांभोजंब्रह्मविष्णीश्वराणां
५ तन्मेप्राप्यंकिंनुयाच्यंत्वितोपिश्रेयोयस्मात् ब्रूहितांभोजगत्यां मन्येमत्तुबीजमाद्यंवपूर्वंलक्ष्मीरेतांसंनिधौतु
ऋदीये ६ यत्संध्यांतेवहवोप्यत्रमुक्ताः संसाराब्धिमग्नुजन्मादियुक्तं यत्कांक्षितंमेतपसाचिरेणसंसारतापाभिविमोच
नंमे ७ तदत्रजातंकिमतोनुयाच्यंत्वत्तोविमुक्तेरपियत्परंस्यात् अथापि० याचेवरदाभवंतोयद्यधुनायाचिमदृग्जेन
८ विज्ञायतेतद्धवेताखिलंचेदेव्याश्रुतंमेवरदासिमेयदि क्षेत्रादयुष्मादतिवल्लभायाविघ्नेसियान्यत्रमयाहिलक्ष्मीः ९

सेयंप्रकुर्यास्तिममोपरिप्रभोतस्माद्विमंमोक्षकरीकुरुष्वमे अगस्त्यउवाच इतिसंप्रार्थितस्तेनमहारुद्रोमनस्विनी
१० मदुवाचमहालक्ष्मीसांत्वयस्तांनिबोधमे ११ महारुद्रउवाच देव्यस्यासुरवर्यस्यकृपणस्यदयापरे विसृज्यस
कलंकोपंचरदाभवमत्कृते १२ त्वंलोकजननीसाक्षात्तमभित्रारिंममध्यमे लोकानास्वस्त्यथापिकोपत्वंकुरुषेसुरे १३
यस्याः कोपाक्षुविक्षेत्रैपतंतिभुवनान्यपि तस्मान्नैवप्रयुज्येतकोपोस्मिन्नसुरेत्व्यके १४ भूतानामत्रराशित्वंभुक्तिमुक्तिं
चयन्त्रणां अतोत्रास्यवरंदत्वापश्चान्मुक्तिंप्रयच्छभो १५ अगस्त्यउवाच रुद्रवाक्यमुपाकर्ण्यततोदेवीदयान्विता विसृ
ज्यसकलंकोपंकोलासुरमुवाचह १६ श्रीमहालक्ष्मीउवाच दैत्यतेवृणुवरंचरदात्तमत्ततेहृदिप्सवेद्यदभीप्सं हास्य
हंयदपिदुर्लभंसुराणांसंतुष्टातवचरणाद्विचानुतापात् १७ अगस्त्यउवाच इतिश्रुत्वावचोदेव्यास्ततः कोलासुरप्रियं
वरंकोलहितायैवचरदांप्रत्युवाचह १८ कोलासुरउवाच वरदासियदाममदेवितर्हिदेहिपरमंवरमुत्तमं कुरुतीर्थ
मिदंममदेहंगयनाम्नैवविभूषितभुवि १९ यावदस्तिमहीसपर्वताद्वीपसप्तकयुतास्ससागरा तावदस्तुसुचिरंममती

कर० म० र्थसकलाघौघहरंविमुक्तिदं २० यावदस्तिखलुचंद्रमास्त्वयंयावदस्तिगगनेगभस्तिमान् सर्वतीर्थसुरसंघसमेतस्तावदह
महेश्वरश्चिरं २१ यन्नाम्नामवेत्कश्चिदेवश्राद्धतर्पणसुपिंडपातनं गतिरस्तुपरास्वकुलेपांपुनरावृत्तिविवर्जितान्नृणां २२
यत्रकुर्युरसकृत्सकृच्चपिंडपातनविधिंपितृणांवै तेनयंतुपवित्रतांकुलाः स्वात्मसप्तकुलानिवांजसा २३ यःकुर्या
दिहहिनरःस्वपितृणांसुपिंडपातनं सोलभेत्सुकृतंफलमुग्रं ब्रह्मविष्णुगययोरपियत्स्यात् २४ यत्कुर्यादिहन
रोनकदाचिच्छ्राद्धतर्पणसुपिंडपातनं ब्रह्मविष्णुगययोरपिनित्यं कृतपात्रापितृकृतत्तद्भवेत् ब्रह्मविष्णुगययोरपियत्तु
वर्ततेसकलतीर्थकदंबः २५ सहिभवेदिहलोकेपितृणामुक्तिदस्तववरप्रभावतः तिष्ठदेविवरदेममनित्यंनिकटेचे
तद्गुपुषैवनिश्चला २६ प्रपुनंतिजनमेनमंजसासप्रजत्यादासकलपातकात्क्षणात् क्षेत्रमेतदनंतनामकंकुरुचारुचं
द्रवरोमदाद्यं २७ कुरुमातःपुरमामनामकंवरदामेयदिचोद्यतासिमे प्रतिवर्षहिमन्नाम्नाकूष्मांडफलमर्धवे
मेदनीयंत्वयादेविमत्कीर्तिस्थापनापिच अगस्त्यउवाच एवंवृतामहादेवीस्तेनदैत्येनभोप्रिये २८ तथास्त्वितिवरंदत्वा

स्वपदाथममर्दतं चिभेदतच्छिरोत्यर्थंवारंवारंविभागशः ३० असिनातिग्मधारेणकूष्मांडमिवसत्वरं तस्थिरःसकला
याशुसमीक्ष्यचपुनःपुनः ३१ शिरःकुर्वंत्यथापूर्वंतच्छिन्नमिवाभवत् ततःस्वपादमूलेनसंममर्दततःस्थिरः
३२ ममर्ददेवीरोपेणमत्कुणंहिशिशुर्यथा सोपितत्रवृकसच्छेदुःखभोगहताशुभः ३३ ब्रह्मविद्वीशपादाब्ज
सर्वदोषहतःक्रियः कोलासुरश्च रोहस्तीर्तिस्तूयमानोमरादिभिः ३४ यद्भूत्वाननिवर्ततेतद्धामपरमंययौ हत्वे
वमसुरंदेवीत्रैलोक्यमस्तकज्वरं ३५ कात्यायनीगणोपेतात्यानिवामृतवाहिनी ब्रह्मविष्णुमहेन्द्राद्यैस्तूयमानाज
यस्वनैः तयासंजीवयामासदैत्ययुद्धेमृतान्सुरान् तयासंजीविताद्देवावाहिन्यमृतरूपया ३७ तांनथावाहिनीच
क्रेजीवंतीनामविश्रुता ततोलक्ष्मीमहादेवीत्वष्टादशमहाभुजा ३८ गयायांदक्षिणेभागेसंस्थितावरयंत्रिता लक्ष्मी
तीर्थमभूत्तत्रसर्वदेवविनिर्मितं ३९ अष्टादशभुजायावैदृष्टतःसर्वसिद्धिदं लक्ष्मीतीर्थेनरःस्नात्वाप्यष्टादशम
हाभुजां ४० पूजयेद्योमहालक्ष्मींनसपापैर्विलिप्यते गयायाःपूर्वदिग्भागेफल्गुतीर्थस्यसंनिधौ ४१ गदाधरःस्व

कर॰ म॰ रूपेणविष्णुस्तिष्ठतिचान्वहं तस्यैवपूर्वतोदेवीपदंविष्णोर्महात्मनः ४३ विद्यतेसर्वपापघ्नंदर्शनस्पर्शनादिभिः ग
यायादक्षिणेभागेब्रह्मतीर्थस्यसंनिधौ तिष्ठत्यनुदिनंचाथब्रह्मापिचरयंत्रितः तस्यैवपूर्वतोभद्रेब्रह्मणः पदमद्भुतं ४४
सर्वपापघ्नंपूजास्पर्शनवीक्षणैः गयायाश्चोत्तरेभागेरुद्रोपिवरयंत्रितः ४५ दिव्यलिंगस्वरूपेणसंतिष्ठतिचिरंसति
संतिलिंगान्यथान्यानियथालोकेषुभामिनि ४६ तथैवनैवमंतव्यंलिंगंरुद्रेश्वराभिधं लोकांतरमिदंलिंगंश्रीरुद्रस्य
महात्मनः ४७ विद्यतेकरवीरेस्मिन्सत्यंसत्यंवदाम्यहं इदमेवसदासेव्यंलिंगंश्रीकरवीरके ४८ यन्नाम्नाप्रथि
तंश्चैतत्क्षेत्रंरुद्रगयेतिहि येनरुद्रेश्वरंलिंगंरुद्रपादसमन्वितं ४९ करवीरेणवैदृष्टंतस्यजन्मनिरर्थकं यथारु
द्रप्रियंचैतत्क्षेत्रंलिंगंचभामिनी कैलासंचस्वरूपंचनतथाप्रियमस्यहि यथादेहेषुसर्वेषुशिरएवमहत्तरं ५१ त
थालिंगेषुसर्वेषुलिंगंरुद्रेश्वरंमहत् सौराष्ट्रेसोमनाथंचश्रीशैलेमल्लिकार्जुनं ५२ उज्जयिन्यांमहाकालमोंकारंत्वम
रप्रियं वैजनाथंविदर्भस्यानागेशंदारुकावने ५३ सेतुबंधेचरामेशंत्र्यंबकंगौतमीतटे वाराणस्यांचविश्वेशंडाकि

न्यांभीमशंकरं ५४ केदारंहिमवत्पृष्ठेघुश्मेशंतुशिवालये पंपायांचविरूपाक्षंरुद्रेशंकरवीरके ५५ गोकर्णेशंसमु
द्रांतेदिव्यलिंगान्यनुक्रमात् चतुर्दशमहालिंगान्येतान्यास्थाप्यसर्वतः ५६ रुद्रोरुद्रेशरूपेणकरवीरेस्वयंस्थितः
निबद्धोयंमहारुद्रः कोलासुरवरेणहि ५७ श्रीरुद्रेशस्वरूपेणवसतेत्रिदिवानिशं रुद्रेश्वरोयममलेकरवीरकेस्मि
न्नन्यौश्रुतोप्रतिगृहंप्रसमस्तकाले श्रीतारकंप्रतिगृणातिप्रगीतमास्तेधुनापिसकललोकमलंविधून्वन् ५८ यत
श्चायंविशालक्ष्मीरुद्रोरुद्रेश्वरः स्वयं तस्मादेतत्समानंवैलिंगमन्यन्नभूतले ६० करवीरमुपागत्यरुद्रतीर्थेनिमज्य
च रुद्रेश्वरंसमभ्यर्च्यततः प्रयतमानसः ६१ दद्यात्प्रथमतः पिंडान्पदेरुद्रस्यपृथक्पृथक् ततः समंततोदद्या
न्विष्ण्वादीनांविदेष्वपि ६२ ईशानविष्णुकमलासनभार्गवात्रिचंद्रेंद्रकश्यपसुपर्णगजाननाग्निं वह्नित्रयार्कगुह
वेदचतुष्टयानामगस्त्यगर्गस्यचत्रपदानिसंति ६४ त्रिः सप्तचैतानिपदानिभद्रेकोलस्यपृष्ठेगयरुद्रपादे शि
लातलेभांत्यखिलदेवतानांमुक्तिप्रदान्येवजगत्पितॄणां ६५ यः श्राद्धकालेप्रयतः पठेत्त्रिः सप्तचैतानिपदानिदे

कर॰म॰ वी त्रिः सप्ततेनेहकुलानित्सिंप्राप्यात्रमुक्तिंगमितानिवसुः ६६ लोपामुद्रोवाच पदानियानिमेभर्तस्त्रिः सप्तकथि
तानिहि तानिसर्वाण्यथाव्याहि संत्वत्रेतिस सर्ववित् ६७ अगस्त्यउवाच ईशानस्यपदंभद्रेसमंतादेकविंशकं पूर्वा
द्वितोथचैस्कम्भुविज्ञेयंहियथाक्रमात् ६८ गयायाः पूर्वदिग्भागे फल्गुतीर्थस्यसंनिधौ तत्रविष्णोः पदंदिव्यंविज्ञेयं
द्विवराननें ६९ दत्वाविष्णुपदेपिंडंआत्मानंसहपूर्वजैः तारयेत्सपितॄन्सर्वान्दशपूर्वान्दशापरान् ७० तस्य
दक्षिणदिग्भागे जमग्निमुनेः पदं तत्तीर्थनिकटेदेवीविद्यतेजनपावनं ७१ जमदग्निपदेपिंडंदत्वालोक कमक
मकल्मषं नयेत्पितॄन्नरोनित्यंभद्रेसत्यंवदाम्यहं ७२ तस्यैवदक्षिणेभागेब्रह्मतीर्थस्यसंनिधौ ब्रह्मणः पदम
त्युत्तमंविद्यतेब्रह्मलोकदं ७३ दत्वाब्रह्मपदेपिंडंकुलानामेकविंशतिः तारयेन्मनुजः सुभ्रूनात्रकार्याविचारणा ७४
तस्यैवचोत्तरेभागेह्यात्रेयंपदमुत्तमं गयानैरृत्यदिग्भागेसर्वपापप्रणाशनं ७५ दत्वात्रेयपदेपिंडंमनुजः सुभ्रू
पुण्यवान् तारयेत्स्वपि॰तॄन्सर्वान्पिडु॰ गतिगान्क्षणात् ७६ तस्यैवचोत्तरेभागेगयायाश्चैवपश्चिमे पदंवै

156

विद्यतेचांद्रंसर्वपापहरंप्रिये ७७ दत्वाचांद्रपदेपिंडंसर्वपापप्रणाशनं सर्वपापविशुद्धात्मासोमलोकंनयेत्पितॄन् ७८
तस्यैवचोत्तरेभागेगयायाः पश्चिमोत्तरे पदमिंद्रस्यवैस्कपन्नविद्यतेखिलऋद्धिदं ७९ महेंद्रस्यपदेदत्वापिंडंलोकोत्तरंस
ति नरः पुनातिसकलान्स्वपितॄन्भिरचांजसा ८० तस्यैवचोत्तरेभागेजयंत्याश्चैवसत्तटे कश्यपस्यपदंदिव्यंविद्य
तेजनपावनं कश्यपस्यपदेपिंडंदत्वाचमनुजोंजसा तारयेदुर्गतिगतान्स्वपितॄन्नात्मनासह ८२ तस्यैवपूर्वदिग्भा
गेजयंतीतिरएवहि गरुडस्यपदंदिव्यंविद्यतेजनपावनं ८३ गरुडस्यपदेदत्वापिंडंकल्मषनाशनं नयेत्पितॄन्दु
र्गतिकान्सर्वलोकंहिमानवः ८४ तस्यैवपूर्वदिग्भागेजयंत्यादक्षिणेतटे गणेशस्यपदेभद्रेविद्यतेविघ्ननाशनं
८५ गणेशस्यपदेयस्तुपिंडंदद्याद्विचक्षणः सर्वविघ्नविनिर्मुक्तः स्वपितॄन्तारयेदिह ८६ तस्यैवपूर्वदिग्भा
गेजयंत्याश्चैवसत्तटे आहवनीयपदंदिव्यंपापेधनविदाहकं ८७ आहवनीयपदेपिंडंदत्वाभिज्ञनरोंजसा अग्नि
लोकंनयेत्सर्वान्स्वपितॄन्नथशाश्वतान् ८८ तस्यैचपूर्वतोदेवीजयंतीतिरएवच गार्हपत्यपदेदिव्यमस्तिसबोधना

कर॰ म॰

ज्ञानं ८९ गार्हपत्यपदेभद्रेपिंडंदत्वाघवर्जितः उद्धरेत्सपितॄन्सर्वान्नरोनरकसंस्थितान् ९० तस्यैवपूर्वतोभद्रेज
यंत्यास्तिरएवहि दक्षिणाग्निपदंदिव्यंविद्यतेसुकलार्थकं ९१ दक्षिणाग्निपदेदत्वापिंडंवैमनुजः प्रिये अग्निष्टोमफ
लंप्राप्यतारयेत्सकलान्पितॄन् ९२ तस्यैवपूर्वदिग्भागेजयंत्याएवसत्तटे आदित्यस्यपदंसुभ्रं विद्यतेतन्महत्फलं ९३
आदित्यस्यपदेविप्रपिंडंदत्वाविधानतः नरकस्थादिवंयांतिदिवस्थास्वर्गमान्पयुः ९४ तस्यैवपूर्वदिग्भागेजयंत्या
श्चैवसत्तटे कार्तिकेयपदंदिव्यंविद्यतेजनपावनं ९५ कार्तिकेयपदेभद्रेदत्वापिंडमकल्मषः पितॄस्तारयतेसर्वानपिदु
र्गतिमांनरः ९६ तस्यैवपूर्वदिग्भागेजयंत्यास्तीरएवच ऋग्वेदस्यपदंदिव्यंविद्यतेसर्वलाभदं ९७ ऋग्वेदस्यपदेद
त्वापिंडंवेदविशारदः पितॄन्नयेद्ब्रह्मलोकंनरः कल्मषवर्जितः ९८ तस्यैवपूर्वदिग्भागेजयंत्यास्तीरएवच यजुर्वेदप
दंदिव्यंविद्यतेघृणिकर्मनं ९९ यजुर्वेदपदेदत्वापिंडंवैश्रद्धयान्वितः मनुजस्तारयेत्सर्वान्पितॄनत्रनसंशयः २०० त
स्यैवदक्षिणेभागेजयंतीतिरएवच सामवेदपदेदत्वापिंडंवैप्रयतोनरः सनयेच्छाश्वतंलोकंस्वपितॄन्नितिनिश्चितं २

157

तस्यैवदक्षिणेभागेजयंत्यास्तिरएवच अथर्वणपदंदिव्यंविद्यतेलोकविश्रुतं ३ अथर्वणपदेदत्वापिंडंवैसततंनरः
तारयेत्सकलानाशुपितॄन्नितिनसंशयः ४ तस्यैवपूर्वदिग्भागेजयंतीतिरएवच परमागस्त्यमत्रास्तिसर्वापत्तिविनाश
नं ५ अगस्त्यस्यपदेभद्रेपिंडंदत्वासकृन्नरः सर्वापद्ऋणमुक्तिश्चाप्यपितॄनुद्धरतेक्षणात् ६ तस्यैदक्षिणेभागेज
यंत्यास्तिरएवच परंगार्ग्यमुनेरस्तिसर्वतीर्थफलप्रदं ७ दत्वात्पिंडंगर्गपदेयोनरः श्रद्धयान्वितः पितॄस्तारयतेस
र्वान्दशपूर्वान्दशापरान् ८ एवंप्रोक्तामयाभद्रेपदानामेकविंशतिः पुनंतिसकलांल्लोकान्दर्शनस्पर्शनादिभिः ९
रौद्रींगयांयमभितोनरपादवंदद्वैः सलांछितपदैरपिसंपरीता दृष्टाश्रुतापरिनुताकुलसंस्मृतावासद्यः पुनातिज
नतापमशेषवीजं १० योमूढधीनरपशुर्नभजेतलब्ध्वामनुष्यमर्थमहथास्फरसंभवांते रौद्रींगयासकथमुत्तरतेभवा
ब्धिंपैश्यंऋणंचपदपायभवप्रदंहि ११ सत्यंब्रवीमिसुभगेपरमूर्ध्वबाहुर्योग्येनरोनखलुरुद्रगयांप्रयाति संप्रा
नुयादिहपरत्रफलंनकिंचित्पुत्रसनामकिलतस्यभवेपदार्थः १२ नरुद्रपादात्परमंपवित्रंतीर्थंकिलास्तीहपरंप्र

७२

कर॰म॰ थिर्मा यत्राधदैत्यः खलुकोलनाम्नामुक्तिप्रदेपेविबुधायलब्धा १३ आनंदकाननमहोतिपवित्रमेतदेव्याविमुक्तिफ
लदंकरवीरकंहि यत्रातिभातिबिबुधर्षिपदानिस्कंभुपुण्यानिशाश्वतपदप्रतिबोधकानि १४ पदानिदृष्ट्वान्पथयेनदृष्ट्वा
कोलासुरेतद्गतिरेवपुण्या वक्षार्पितान्यान्यफलप्रदात्रीस्कलक्षणापिप्रतिजन्मनिस्यात् १५ सालंकृतांयः प्रददाति
कन्यांयुलंतथाभूरिसरस्वतीच पृथ्वीमथांभोनिधिवेष्टितांतत्फलंलभेद्रुपदाभिमर्शी १६ यत्पिंडदानंकिलरुद्रपादे
देवर्षिपित्रादिवितृप्तिदंहि तथातपोदानमहामखादितथैवतेवेदविदोवदंति १७ गायंतिदेवाः किलगीतकानिधन्या
नरास्तेकरवीरभूमौ येरुद्रपादेजलपिंडदानैःसंतर्पयंतीहपितृन्यथेष्टं १८ द्वारंहरेःपुण्यतरंकृतेयुगेपुण्यंतथास्था
नमिदंहिनैमिषं द्वापारकेक्षेत्रमतीचपुण्यंकलौहिकार्न्येपचपुरीनचान्यत् १९ चतुष्कपादंकिलपावनंप्रियेयुगेषुको
लासुरमेवसर्वदं विशेषतोप्युत्तमतरंकलौयुगेतस्मादमुष्मादधिकंनकिंचित् २० स्वर्गापवर्गप्रदमत्रनान्यःक्षेत्रेस
तीर्थंसुसदेवतंच विचार्यचैकंकरवीरकेस्मिन्नागतिदेवर्षिस्कतीर्थसंघः २१ यस्यास्तिकामःकिलभुक्तिमुक्त्येको

158

लापुरंतेननिरीक्षणीयं नयत्रवैदुर्मरणंमृतानांसंजायतेतत्परमंपवित्रं २२ गृहेश्मशानेप्यथचांतरिक्षेमहापथे
वाप्यथवान्यगेहे मृताभजंतीहनतद्धिचित्रंविष्णोःपदंमुक्तिप्रजनाचकीर्णं २३ गयायादक्षिणेभागेपदंरामस्य
विद्यतेत तत्रामस्यगयांवीक्ष्यरामतीर्थस्कमध्यमे २४ पुरतोरामतीर्थस्यसीतातीर्थमनुत्तमं जयंत्यामेवतत्रास्ति
पितृणांकिलमुक्तिदं २५ यत्रचायंदशरथोवालुकापिंडमुत्तमं सीताहस्तगतंप्राप्यलेभेपरमनुत्तमं २६
एवंसर्वाणिचैभद्रेकथितानिपदानिते आसमंतात्पवित्राणिकिंभुवःश्रोतुमिच्छसि २२७ ॥ छ ॥ ॥ इतिश्रीश्री
पद्मेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेरुद्रगयाख्यानेचतुस्त्रिंशोध्यायः ॥ ३४ ॥ छ ॥ लोपामुद्रो
वाच कदाहिपरभूयस्त्वंगयायांपिंडदानतः कालंतमेसमाख्याहिलक्षणादिविभेदतः १ नारदउवाच इत्थंत
यासमापृष्टोमहामुनिरतंद्रितः कालंसलक्षणंभाकुर्मार्कंडेयमहामुने २ अगस्त्यउवाच अर्धोदयःसदैवा
त्रराङ्कुपर्वशतंसमाः सदासौम्यायनंस्कंभुकरवीरेदिनेदिने ३ तीर्थकोटित्रयंसार्धंनिवसत्याराङ्कुपर्वणि यदस्ति

तस्दिहाप्यस्तिकरवीरेदिनेदिने ४ गयायांसर्वकालेषुपिंडंदद्याद्विचक्षणः अधिमासेजन्मदिनेचास्तेपिगुरुशुक्रयोः
५ नत्यक्तव्यंगयाश्राद्धंसिंहस्थेचबृहस्पतौ अथापिसकलंकालंवक्ष्येकोलहितायवै ६ ततोपिफलभूयस्त्वेपु
ण्यकालस्यकारणं नित्योविभुःस्थितःकालोव्यवस्थास्तस्यहेतुजा ७ निमित्तादिविशेषैःसलोकेपुण्यफलप्रदः
निमिषैश्चाष्टदशभिःकाष्ठाज्ञेयाकलापुनः ८ त्रिंशत्काष्ठाकलाभिश्चत्रिंशद्भिःस्यान्मुहूर्तकं अहोरात्रंमुहूर्तानां
नृणांत्रिंशतुवैस्मृतं त्रिंशतातैरहोरात्रैपक्षोद्वौमासउच्यते तैःषड्भिरयनंवर्षंद्वेतुतोदक्षिणोत्तरे १० तद्देवानाम
होरात्रंदिनंतत्रोत्तरायणं देवकार्याणिपूर्वाण्हेमनुष्याणांचमध्यमे ११ पितृणामपराण्हेचकार्याणीतिविनिश्चयः शा
तमिंदुक्षयेदानंसहस्रंतुदिनक्षये १२ विषुवेशतसाहस्रंव्यतीपातेत्वनंतकं दर्शेशतगुणंदानंतच्छतघ्नंदिनक्षये
१३ शतघ्नंतस्यसंक्रांतौशतघ्नंविषुवेततः युगादौतच्छतगुणंमन्वादौतच्छताधिकं १४ सौम्यग्रहेतच्छतघ्नंत
च्छतघ्नंरविग्रहे असंख्येयंव्यतीपातेवैधृतावपिनिश्चितं १५ तच्छतघ्नंगजच्छायेतच्छतघ्नंद्विपक्षके अधोदये

शतघ्नंस्याच्छतघ्नंकपिलेस्मृतं १६ योगस्तुसप्तदशमोव्यतीपातःप्रकीर्तितः सप्तविंशतिमोयोगोवैधृतिःपरिकीर्ति
तः १७ वृद्धधायंव्यतीपातेलक्षणैःपरिलक्ष्यते पुण्यकालःससर्वोपिविज्ञेयःस्वभुमानवैः १८ श्रवणाश्विधनि
ष्ठाह्वायमदैवतमस्तके यद्यमारविनारेणव्यतीपातःसउच्यते १९ मीनस्थोगुरुभूमिपुत्रौमेषेरविस्याद्यदिशुक्ल
पक्षे पाशाभिधानाकरभेणयुक्तातिथिर्व्यतीपातइतीहयोगः २० अस्मिन्हिगोभूमिहिरण्यवस्त्रदानेनसर्वपरिहृ
त्यपापं सुरत्वमिंद्रत्वमनामयत्वंमर्त्याधिपत्यंलभतेमनुष्यः चंद्रार्कयोनयनवीक्षणजातमूर्तिः कालानलद्युतिनि
भःपुरुषोस्थरुद्रैः २१ शस्त्रोद्यतोभुविपतंश्चनिरीक्ष्यमाणः संघातयोहमितिव्यतीपातयोगः संक्रांतिसाम्य
समयःसमीरितःसूर्यपर्वसदृशोमुनीश्वरैः २२ तत्रदत्तहुतभुक्प्रपूजनंकोटिपुण्यफलभार्गवः गंगोतराधां
व्यतिपातपूर्वाश्रुनाधितोवैधृतसंभवस्यात् २३ स्वार्धेषुयत्तत्स्वयनेषुनेष्यतेपर्वद्वयंतत्कृतसाधनंवै धृतौव्य
तीपातेच्चदत्तंस्यांतोनविद्यते २४ व्यतीपातेविशेषेणसाहिसूक्ष्मःप्रकीर्तितः चंद्रस्ययदिवाभानोराहुणासहसंगमः २५

क॰र॰ म॰ उपरागइतिख्यातः सदानंतफलंस्मृतं इंदोर्लक्षगुणंपुण्यंरवेर्दशगुणंभवेत् २६ गंगातोयेतुसंप्राप्तेइंदोः
कोटिरवेर्दश रविवारेरवेर्ग्रासः सोमेसोमग्रहस्तथा २७ चूडामणिरितिख्यातः तत्रानंतफलंस्मृतं चंद्रसूर्योप
रागेचयत्कर्तव्यंतदुच्यते २८ सर्वंहेममयंदानंसर्वेब्रह्मसमाद्विजाः सर्वंगंगासमंतोयंराहुग्रस्तेदिवाकरे २९
संक्रांतेपुण्यकालस्तुषोडशोभयतः कलाः चंद्रसूर्योपरागेतुयावद्दर्शनगोचराः ३० संक्रांतौयानिदानानिहव्यक
व्यानिदातृभिः तानिनित्यंददात्यर्कः पुनर्जन्मनिजन्मनि ३१ रविसंक्रमणेपुण्येनस्नायाद्योहिमानवः सप्तज
न्मांतरेरोगीदुःखगामीसंभवेत् ३२ अयनद्वयंविषुवेचचतस्रः षडशीतयः षडशीत्ययनंचापिद्वयुकन्या
वृषेभवेत् तुलाजौविषुवंविष्णुपदंसिंहालिगोघटे याम्यायनेविष्णुपदेचाद्यामथासुलाजयोः षडशीत्यानने
सौम्येपरानाप्नोतिपुण्यदाः चतस्रोविषुवत्येश्चसंक्रांतोद्वादशस्मृताः ३३ ध्रुवककर्कटसंक्रांतीह्येतूदकदक्षि
णायने विषुवेचतुलामेषेगोलमध्येतथापरः ३४ विशाखानांयदासूर्यश्चरत्यंशात्तृतीयकं तदाचोर्ध्वंविजानीया

त्कृतिकाशिरसिस्थितं ३५ तदेवविषुवाख्योचेकालपुण्योविधीयते तदादानानिदेयानिदेवेभ्यः प्रयतात्मभिः ३६
ब्राह्मणेभ्यः पितृभ्यश्चमुख्यमेवतदुदाहृतं दत्तदानस्तुविषुवेकृतकृत्योभिजायते ३७ कन्यायांमिथुनेमीनेधनु
ष्यपरवेर्गतिः षडशीतिमुखाप्रोक्ताः षडशीतिगुणाः फले ३८ वृषवृश्चिककुंभेषुसिंहेचैवयदारविः एतद्वि
ष्णुपदंनामविषुवादधिकंफलं ३९ संक्रांतिसमयः सूक्ष्मोदुर्ज्ञेयः पिशितेक्षणैः तद्योगाच्चाप्यधश्चोर्ध्वंत्रिंश
न्नाड्यः प्रकीर्तिताः ४० आसन्नसंक्रमंपुण्यंदिनार्धंस्नानदानयोः त्रिंशत्कर्कटकेनाड्योमकरेविंशतिस्मृताः ४१
वर्तमानेतुलामेषेनाड्यस्तूभयतोदश षडशीत्यांव्यतीतायांषष्टिरुक्तास्तुनाडिकाः विष्णुपद्यांधनुर्मीनेद्वयुकन्या
स्कंधेयदि पूर्वोत्तरगतेरात्रौभानोः संक्रमणंभवेत् ४३ पूर्वाण्हेपंचनाड्यस्तुपुण्याः प्रोक्तामनीषिभिः अपराण्हे
तुपंचैताःश्रौतस्मार्तेचकर्मणि ४४ अर्कसंक्रमणेपुण्यमहः कृत्स्नंप्रकीर्तितं रात्रौसंक्रमणेपुण्यंदिनार्धंस्ना
नदानयोः ४५ अर्धरात्रादधस्ताच्चेन्मध्याह्नस्योपरिक्रिया ऊर्ध्वंसंक्रमणेचोर्ध्वंउदयात्प्रहरद्वयं ४६ पूर्णेवे

कर॰म॰ नार्धरात्रेतुसदासंक्रमतेरविः आद्युर्दिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ ४७ रात्रावप्ययनेकुर्यात्स्नानादिचोपरागव
त् अन्यसंक्रमणेरात्रौनिषिद्धंतर्पणादिच ४८ विषुवेतन्मुहूर्तंस्यात्षडशीतिमुखेद्वयं तथाविष्णुपदेत्रीणिपुण्या
निमुनयोविदुः ४९ षडशीत्यांतुयद्दानंतद्दानंविषुवद्वये दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यते ५० सूर्यसंक्रम
वद्योयोग्रहनक्षत्रसंक्रमः पुण्यदः सर्वलोकानांदानश्राद्धादिकर्मसु ५१ नक्षत्रराश्योरविसंक्रमेषु– भौम्यर
स्ताविश्वरसेंदुनाड्यः पुण्यास्तदासोपिवरापलेयुगेरेकेतुनाडीमुनिभिः प्रणोक्ता ५२ नाड्यः चतस्रः सफलाः
कुजस्यबुधस्यतिस्रः फलविश्वयुक्तः अभ्यर्धनाड्यः फलसप्तयुक्तागुरोश्चशुक्रोसफलाश्चतस्रः ५३ द्विनाग
नाड्यः फलसप्तयुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः आद्यंतमध्येजपदानहोमंकुर्वन्नवाप्नोतिसुरेंद्रधाम ५४
अमावास्याव्यतीपातोग्रहणंचंद्रसूर्ययोः मन्वादयोयुगादिश्चसंक्रांतिर्वैधृतिस्तथा ५५ दिनद्वयंदिनच्छिद्रमवमं
चतथापरं अयनेविषुवयुग्मंषडशीतिमुखेतथा ५६ चतस्रोविष्णुपद्यश्चपुत्रजन्मादिवासरं आदित्यादिग्रहाणांच

नक्षत्रैः सहसंयुगे ५७ विज्ञेयः पुण्यकालोयंजपदानफलप्रदः मंदेचापिगुरौचापिवारेष्वेतेषुचात्रिषु त्रीण्येतानि
चऋक्षाणिस्वयंप्रोक्तानिब्रह्मणा ५८ अश्वमेधादिकंपुण्यंस्नानदानादिकर्मसु एकस्मिन्वासरेश्चैवतिथीनांत्रिल
यंतदा ५९ तदादिनक्षयः प्रोक्तः स्तत्रसाहस्रिकंफलं तिथिर्वारत्रयेप्येकादिनवृद्धिस्तुसास्मृताः ६० सापिपुण्यत
मास्मेयापिंडदानादिकर्मसु तिथ्यर्धतिथियोगर्क्षच्छेदादिराशिपर्वणः सदृशोदिवसः छिद्रसमाख्योत्राहभार्गवः
छेदादिकालः कथितस्तिथिकृत्योर्यदिद्वयं ६२ नागवल्लिफलोपेतंलड्डुतत्वफलैर्युतं फलैः षोडशभिर्युक्तंनाडि
काकादिसंयुतैः ६३ छेदादिः समयः प्रोक्तोदानेनंतफलप्रदः ग्रहसेष्टिव्यतीपातौरविवासरसंयुतौ पद्मकंनामत
स्मिःप्रोक्तमयनाच्चचतुर्गुणं ६४ वैशाखमासेयापुण्यास्तृतीयाशुक्लपक्षजा अनंतफलदातासुस्नानदानादिकर्मसु
६५ बुधश्रवणसंयुक्तास्तृतीयाशुक्लपक्षजा तस्यांस्नानोपवासश्चाक्षयंफलमाप्यते ६५ त्रिवाद्गंतास्तस्याश्चेति
चतुर्थीत्रिविधास्मृता मासेभाद्रपदेशुक्लाशिवालोकेषुपूजिता तस्यांस्नानंतथादानमुपवासोजपस्तथा भवेत्त

क.र.म. हस्तयुपितः प्रसादाद्देदंतिनः माघेमासेतथाशुक्लायायाचतुर्थीप्रजायते ६७ साशांताशांतिदानित्यंशांतिंकुर्या
त्सदेवहि स्नानदानादिकंसर्वमस्यामक्षयमश्नुते ६८ यदाशुक्लचतुर्थ्यांतुवारेभौमस्यवैभवेत् तदासासुखदा
ज्ञेयासर्वपापक्षयंकरी ६९ स्नानदानादिकंसर्वमस्यामक्षयमश्नुते सोमवारेत्वमावास्याभानुवारेचसप्तमी
७० अंगारकदिनेप्राप्तेचतुर्थीचचतुर्दशी यत्किंचित्क्रियतेदानंनचतस्यास्तिकिल्बिषं ७१ षष्टिवर्षसहस्राणि
सस्वर्गेविंदतेफलं शुक्लमार्गशिरेमासिश्रावणेयाचपंचमी ७२ स्नानदानेबहुफलानागलोकप्रदायिनी येयंभा
द्रपदेमासिषष्ठीभवति वैशुभे ७३ स्नानदानादिकंसर्वमस्यामक्षयमुच्यते याषष्ठीशुक्लपक्षस्यमार्गशीर्षेह
रिप्रिये महाषष्ठीतिसाख्यातायस्यांद्रोनेकृतादानः शुक्लपक्षस्यसप्तम्यांसूर्यवारोभवेद्यदि सप्तमीविजया
नामतत्रदत्तंमहाफलं शुक्लपक्षस्यसप्तम्यांनक्षत्रंपंचतारकं यत्रवास्यात्तदाज्ञेयाजयानामेतिसप्तमी स्नान
दानादिकंतस्यांभवेच्छतगुणंसति रोहिणीकृत्तिकाश्लेषामघाहस्ततथैवच ७८ पंचतारकमेतद्धिकथितंमुनि

मिःप्रिये मार्गशीर्षस्यमासस्यशुक्लपक्षस्यसप्तमी ७९ नंदासाकथितानित्यंसर्वानंदकरीस्मृता सर्वकोटिगुणंतत्रभा
स्करस्यवचोयथा रेवतीयदिसप्तम्यामादित्यदिवसेभवेत् तद्दानंशतसाहस्रमितिमाहदिवाकरः ८१ यदातिष्येयुती
पातेभानुवारेणयुज्यते पद्मकंतत्परिज्ञेयमयनाच्चचतुर्गुणं ८२ यस्यामिन्वंतरंस्यादौरथेनायंदिवाकरः माघमास
स्यसप्तम्यांतस्मात्सारथसप्तमी ८३ पौषमासियदादेवीशुक्लाष्टम्यांबुधोभवेत् तदातुसामहापुण्यामतारुद्रेतिकीर्ति
ता ८४ तस्यांस्नानंतथादानंतर्पणंविप्रभोजनं मत्प्रीतयेकृतंदेवीशतसाहस्रकंभवेत् ८५ पुनर्वसुबुधोयेतेचैत्रे
मासिसिताष्टमी स्नातःसुविधिवत्तस्यांवाजपेयफलंलभेत् ८६ सिंहगेकेचरोहिण्यांयदाकृष्णाष्टमीभवेत् त
स्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं ८७ मार्गाद्यपरपक्षेतुपूर्वमाध्यातुशा६ ब्रिता फलंचतुर्थकास्तिस्रःसप्त
म्यादिष्वनुक्रमात् ८८ अष्टकासुचयद्दत्तंतदनंतमुदाहृतं ज्येष्ठेमासिसितपक्षेदशमीहस्तसंयुता ८९ हरतेदश
पापानितस्माद्दशहरास्मृता कार्तिकस्यतुमासस्यदशमीहस्तसंयुता ९० तस्यांस्नानादिकुर्वाणोलभतेदशधाफ

कूर्म. म. लं ज्येष्ठस्यशुक्लदशमीसंवत्सरमुखीस्मृता १९ तस्यांस्नानंचकुर्वीतदानंचैवविशेषतः एकादश्यांसितेपक्षेपुष्यार्को
यत्रजायते तिथौभवतिसाप्रोक्ताविष्णुनापापनाशनी जपोदानंतथाहोमस्तत्सर्वमक्षयंभवेत् १३ षष्ठीभाद्रेचकृष्णा
गरजकृत्तियुगारोहिणीपातयुक्ता वारेभानौचभौमेप्यथचमृगशिरेदैवपूज्येविधिस्थे शुक्रेस्वातौचहस्तेसवितरि
चगतेपावनायकचित्स्यात्सैषाकपिलाभिधानामरमुनिगणैर्जायतेयत्रदत्तं मासेभाद्रपदेशुक्लाद्वादशीश्रवणान्वि
ता महतीद्वादशीज्ञेयाउपवासेमहाफलं दत्तंजप्तंकृतंवापितस्यांलक्षगुणंभवेत् द्वादशीषुचयद्दत्तंशुक्लासुचविशे
षतः २०॰ श्रवणेनतुयुक्तास्तत्रापिचविशेषतः ततोपिबुधयुक्ताश्चपक्षांतेविलयस्तथा १ गार्ग्यर्क्षसंयुता
चैत्रेद्वादशीस्यान्महाफला हस्तयुक्तातुवैशाखेज्येष्ठेतुस्वातिसंयुता २ ज्येष्ठयाचतथाषाढेस्त्वलोपेताचवैद्दमवे न
थाभाद्रपदेमासिश्रवणेनतुसंयुता ३ आश्विनेद्वादशीपुण्याअजपादर्क्षसंयुता कार्तिकेरेवतीयुक्तासौम्येक्तृतिक
यायुता ४ पौषेमृगशिरोपेतामाघेचादित्यसंयुता फाल्गुनेपुण्यसहिताद्वादशीपावनीपरा ५ नक्षत्रयुक्तास्वेता

श्चस्नानंदानमुपोषणं ४ सकृत्स्कृतंमनुष्याणांअक्षय्यफलदायकं यस्त्वेतत्रयोदश्यांमाघइंदुकरेरविः ५ वैशा
खीकार्तिकीमाघीपौर्णिमात्रमताफला पौर्णिमासीतिसाप्रोक्तामहापूर्वामनस्विनी ६ स्नानंदानंतथाजप्यंमक्षय्यंप
रिकीर्तितं पौर्णिमासीषुसर्वासुमासर्क्षसहिताश्च ७ दातॄणामिहदानानांफलंदशगुणंभवेत् अमार्कश्रवणोपे
तायुक्ताचेत्पुष्यमाघयोः ८ अर्धोदयः सविज्ञेयोराकूप८ वेशताधिकः आग्नेयंतुयदाऋक्षंकार्तिक्यांभवति
कचित् ९ महतीसातिथिर्ज्ञेयास्नानदानेषुचोत्तमा यदायाम्यंतुभवतिऋक्षंतस्यांतिथौकचित् तिथिः सापिमहा
पुण्याऋषिभिः परिकीर्तिता प्राजापत्यंयदाऋक्षंतिथौतस्यांमनस्विनि १० सामहाकार्तिकीप्रोक्तादेवानामपिदु
र्लभा अमावैसोमवारेणरविवारेणसप्तमी चतुर्थीभौमवारेणविषुवत्सदृशंफलं ११ अमावास्यातुसोमेनस
प्तमीभानुनासह चतुर्थीभूमिपुत्रेणसोमपुत्रेणचाष्टमी १२ चतस्रस्तिथयः श्चैतास्तुल्यास्कग्रहणादिभिः स
र्वमक्षयमप्रोक्तंस्नानदानजपादिकं १३ अमासोमेतथाभौमेगुरुवारेयदाभवेत् तत्पर्वपुष्करंप्रोक्तंसूर्यपर्वशता

कृ·र·म· धिकं १४ अमावास्यायदामैत्रेविशाखाऋक्षयोगिनी श्राद्धेपितृणांतृप्तिंचतदाप्नोत्यष्टवार्षिकीं १५ अमावास्याय
दापुष्येरौद्रर्क्षेचपुनर्वसू द्वादशाब्दंतदातृप्तिंप्रयांतिपितरोर्चिताः १६ वासवाजैकपादर्क्षेपितृणांतृप्तिमिच्छता
वारुणेवापिदैवत्येदेयंदानंमनस्विनि १७ माघासितेपंचदशीकदाचिदुपैतियोगंयदिवारुणेन ऋक्षेणकालःस
परःपितृणांनह्यल्पपुण्यैःपरिलभ्यतेसौ १८ युगारंभास्तुतिथयोयुगाद्यास्तेनकीर्तिताः फलंतत्रकृतानांचता
स्वनंतफलंस्मृतं १९ नवम्यांशुक्लपक्षस्यकार्तिकेनिर्गतंकृतं त्रेतासीतत्तृतीयायांमाधवेसमपद्यत २० दर्शेतु
माघमासस्यपर्वतद्द्वापरंयुगं कलिःकृष्णत्रयोदश्यांनभस्येमासिनिर्गतः २१ युगाद्यःस्मृतास्त्वेतादत्तस्याक्ष
यकारकाः युगारंभादितिथयोयुगाद्यास्तेनकीर्तिताः २२ फलंदत्तकृतानांचतास्वनंतफलंस्मृतं एताश्चतस्रस्तिथ
योयुगाद्यास्तेनकीर्तिताः २३ दत्तंकृतंचाक्षयमाशुदद्यात्युगेयुगेवर्षशतेनतेन गुंजेयुगेवर्षशतेनतपोयुगादि
कालेदिवसेनतद्भवेत् युगादिषुयुगांतेषुस्नानदानजपादिकं यत्किंचित्क्रियतेतस्ययुगाकाः फलसाक्षिणं सूर्यस्य

सिंहसंक्रांतामतःकलियुगस्यच तथावृश्चिकसंक्रांत्यामतस्त्रेतायुगस्यच देयस्तुविषुसंक्रात्यांद्वापरांतस्तुसं
ख्यया २५ तथाचकुंभसंक्रांत्यामतःकृतयुगस्यच दिनक्षयेवर्तीयत्रगमनंचैवराशिषु युगांतदिवसंविद्धितत्रदान
मक्षयं ग्रहोपरागेविषुवेसौम्येवाहिवितोयदि २८ सप्तमीशुक्लकृष्णावायुगांतदिवसंविदुः युगादिषुयुगांतेषुस
हस्रगुणितंभवेत् २९ कर्मश्राद्धादिकंचैवतथामन्वंतरादिषु अश्वयुक्शुक्लनवमीद्वादशीकार्तिकस्यतु ३० चैत्र
स्यतुतृतीयायांतथाभाद्रपदस्यतु फाल्गुनस्यत्वमावास्यापौषस्यैकादशीतथा ३१ श्रावणस्याष्टमीकृष्णातथाषाढस्य
पूर्णिमा आषाढस्यतुदशमीमाघमासस्यसप्तमी ३२ कार्तिकेफाल्गुनेचैत्रेज्येष्ठेपंचदशीतथा मन्वंतरादयश्चैतादत्तस्या
क्षयकारकाः ३३ स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणं सर्वमेवाक्षयंविद्यात्कृतंमन्वंतरादिषु ३४ ब्रह्मणोयो
दिनादिश्चकल्पादिःसाप्रकीर्तिता ब्रह्मविष्णुमहेशाश्चसंस्मरंतिवतांपुनः ३५ यत्रकल्पेचयत्कर्मप्रकरोतिजनार्द
नः तत्संज्ञः सपरिज्ञेयोयतरुक्तसंख्ययाश्रुतः ३६ वैशाखस्यतृतीयाचकृष्णास्यात्फाल्गुनस्यच पंचमीचैत्रमा

कर॰म॰ सस्पतथैवांस्यात्तथापराः ३७ शुक्लत्रयोदशीमाघीकार्तिकस्यचसप्तमी नवमीमार्गशीर्षस्यकल्याद्याः परिकीर्ति
ताः ३८ कल्यानामाद्यश्चैताः सर्वाश्चाक्षयकारकाः स्नानदानादिकस्यस्पपेल्पकस्यविशेषतः ३९ आहारंमैथुनंनि
द्रांसंध्याकालेतुवर्जयेत् कर्मचाध्ययनंचैवतथादानप्रतिग्रहौ ४० रात्रौस्नानंनकर्तव्यंकदाचिदपिकेनचित् हरंतिरा
क्षसायस्मात्तस्माद्रात्रुभयावहं ४१ विशेषतोनिशीथेतुनस्नुभंकर्मशर्मणे अतोविवर्जयेत्प्राज्ञस्नानादिषुमहानि
शं ४२ स्नानंचैवतदानंस्वाध्यायःपितृतर्पणं प्रथमेद्वेनकुर्वीतमहागुरुनिपातने ४३ मांगल्यमभिषेकंचमल
मासेविवर्जयेत् वापीकूपतडागादिप्रतिष्ठादशुरवारवौ ४४ दक्षिणाशामुखंकुर्वन्नतत्फलमवाप्नुयात् अन्वाधान
प्रतिष्ठाचयज्ञदानव्रतानिच ४५ वेदव्रतवृषोत्सर्गचूडाकरणमेखला मांगल्यमभिषेकंचमलमासेविवर्जयेत् ४६
प पथिकंप्रात्यपाश्वेष्ठंवचनंत्विदमब्रवीत् ६ दिनद्वयंत्वमेवात्रविश्रांतिंकुरुभोद्विज ततोहमपियात्रार्थेया
गमिष्येनसंशयः ७ ममापितीर्थयात्रावैभवत्संगेनवैभवेत् इत्युक्त्वानंनमस्कृत्यदिनत्रयमयापचत् ८ कृताव
काशकेविप्रेतीर्थयात्राविधानकं निषादेनावसंपृष्टेतीर्थयात्राविधिक्रमात् ९ यातोथविप्रवर्योसौप्रोक्तवान्तप
सत्तम उपोषणंपुराकार्यंपारणंविप्रभोजनं १० सम्यक्संपूज्यविधिवत्विघ्नेशंविघ्ननाशनं ततोगच्छेत्तुशुभं
तीर्थंभक्तिभावसमन्वितः ११ तीर्थयात्राविधानेनकृत्वापापात्प्रमुच्यते श्रुत्वेत्थंतस्यवाक्यंतुतीर्थयात्रागमेविधिं
१२ कृत्वासकलसंभारंस्वस्यतस्यापिचश्रुवं वस्त्राणितस्यदत्त्वाथस्वयंगृहीतवांस्तदा १३ अश्वोत्तमंसमानीय
सर्वोपस्करसंयुतं ददौतस्यचविप्रायस्वयमन्यत्गृहीतवान् १४ इत्थंवर्कतरंचापिगृहीत्वानिर्ययौगृहात् गृ

करम· हांनिर्गमनेकालेपत्निकाप्यमुवाचह १५ अहमप्यागमिष्यामिभवत्संगेनभोप्रिये पुत्रश्चाप्युक्तवान्तातममापित
वसंगतः १६ यात्राप्यद्यान्ममप्राप्ता त्वत्प्रसंगेनभोपितः इत्युक्तेचस्वपुत्रेणभार्यापुत्रादिभिर्युतः १७ ग्रामान्नि
र्गमंकृत्वापथिगच्छन्शनैः शनैः प्रयागंप्राप्तवान्पुण्यंब्राह्मणेनसमन्वितः १८ प्राप्तिः प्रयागकेतीर्थेतीर्थराजे
तिविश्रुते तत्रस्नंचविधिंकृत्वाब्राह्मणोक्तंयथाविधिः १९ काशींसंप्राप्यथविधिंब्राह्मणोक्तंतदाकरोत् ततोगयां
प्रगत्वाथतत्रपंचविधिक्रमात् २० कृत्वाजगामचैकाशींब्राह्मणान्संप्रतोषयत् पांथोपिद्विजवर्योपि विश्वेशंसंप्र
पूज्यच २१ दंडवत्प्रणिपत्याथस्तुतिंचक्रेमहामतिः विश्वेश्वरविरूपाक्षविश्वरूपसदाशिव २२ शरणंभवभूते
शाकरुणाकरशंकर हरशंभोमहादेवविश्वेशामरवल्लभ २३ शिवशंकरसर्वात्मन्नीलकंठनमोस्तुते मृत्यु
जयायरुद्रायनीलकंठायशंभवे २४ अम्पतेशायशर्वायमहादेवायतेनमः इत्यादिवचोभिः स्तोत्रैस्तुत्वाकाशी
पतिंशिवं २५ ब्राह्मणान्भोजयित्वातुदक्षिणाभिः प्रतोष्यच दृष्टंसर्वंसदातत्रनिषादेनमहात्मना २६ सर्वंकृत्वा

विधानेनब्राह्मणान्संप्रतोष्यच पुनः प्रयागमायातः स्नानादिकृतवांस्तदा २७ तत्रत्रिदिनवासार्थंमतिंकृत्वाखिल
स्तदा स्थितेनतेनवैदृष्टुंकेनचित्क्षुधमिच्छतः २८ प्रयागेपरमेपुण्येदेहत्यागेकृतेसती तंदृष्ट्वाब्राह्मणान्पृच्छन्
अत्रकिंपातकेनहि २९ दृष्टेथब्राह्मणोवाचअत्रपापंनविद्यते वेदशास्त्रप्रमाणंवैविद्यतेपरमंमहत् ३० इति
तंफलमाप्नोतिदेहत्यागेनचात्रहि तस्मादत्रमहापुण्यंस्थानेपापंनविद्यते ३१ इतिश्रुत्वावचस्तस्यब्राह्मण
स्यमहात्मनः तदंभः प्रविशेयाथममराज्यंभविष्यति ३२ नारदः इतिनिश्चित्यमनसाप्रविवेशजलंमहत्
तेनाकर्मविपाकेनप्राप्तराज्यंत्वयानघ ३३ तेनयात्राकृतातेनपापंमेगतंइत्यपि पापशेषेश्चसंमीरस्यविषा
णंमूर्ध्निलेभवत् ३४ अतस्त्वयातीर्थयात्राविषाणंपतनेच्छया कार्यात्वयाप्रयत्नेनविलंबंमाकुरुष्वहि ३५ ज
न्मांतरकथांश्रुत्वाराजाविस्मयमागतः ३६ ५ ५ इतिश्रीपद्मपुराणेकरवीरमहात्म्येनारदमार्कंडेय
महामुनिसंवादेभृंगणराज्ञोपाख्यानेएकपंचाशत्तमोध्यायः ५१ ५ ५ अगस्त्यउवाच इत्थंतद्वचआक

कर॰ म॰ एर्वनारदस्यमहात्मनः श्रंगणोनामवैराजाइदंवचनमब्रवीत् १ राजोवाच साधुसंगेनवैयात्राकृतेतिभवतिश्रुतं
तेनसर्वगतंपापंपापक्लेशाः कथंस्थिताः २ इतिसर्वंसमाचक्ष्वदेवर्षेस्फुसगंमहत् ममसंदेहनिर्वृत्तिर्भवेयेनतथा
कुरु ३ नारदउवाच भोभोराजन्प्रवक्ष्यामितवसंदेहनाशकं येनवैकथ्यमानेनसद्यस्तेनाशमाप्नुयात् ४ श्रृणु
राजनवहितोउच्यमानंमयाप्रभो अस्मिन्नर्थेचभवतश्चरितंप्रवदाम्यहं ५ यदात्वयाप्रयागेवैदेहत्यागः पुराकृ
तः तदात्वयाफलप्राप्त्यैसंकल्पोमनसाकृतः ६ सएवायंमूलफलोअंशशिष्टत्वाश्चकारणं अतस्त्वंतीर्थयात्रा
याः संकल्पंकुरुसत्वरं ७ अगस्त्यउवाच इत्युक्तेनारदेनाथसंकल्पंकृतवांस्तदा तीर्थयात्रांकरिष्यामियावघं
गंपतेरधः ८ इतिसंकल्प्यमनसावचसाचैवभामिनी अतः परंजगामाशुनारदोराजमोदितः ९ गृहीत्वाज्ञां
ततोराज्ञोतलोराज्ञागतेदेवर्षिसत्तमे २ राजासर्वान्समाहूयसचिवानिदमब्रवीत् १० राजोवाच भोभोवैस
चिवाः सर्वेश्रृणुध्वंवचनंमम ममवाक्यानुसारेणवर्तितव्याप्रजाः सदा ११ इतिराज्ञोवचः श्रुत्वासर्वेवैसचिवाः

प्रिये राज्ञोस्याज्ञांप्रकुर्वाणाः प्रोचुस्तेराकदैवहि १२ प्रधानाउवाच भोस्वामिन्भवताज्ञांचपालयामोदिवानिशं इ
तितेषांवचः श्रुत्वासचिवानांतदाप्रिये १३ तस्मिन्नवसरेतेषांनिरोपंदत्तवान्प्रभुः दत्ताज्ञास्तुतदातेवैजग्मुः स्वभु
वनंप्रति १४ गतेषुतेषुसचिवेषुराजामतिंचकाराशुदयालुवर्यः विचार्यमाणेघथतत्प्रवृत्तिस्वहृद्विचार्याथमतिंच
कार १५ विचार्यमाणेसचिवेषुतेषुसुबुद्धियुक्तोप्यथचंद्रनामा अन्येषुयुक्तेषुतथापियुक्तोभातिचैवंममतत्सरोज्ञे
१६ अतश्चास्यैवमद्दत्तेपुत्रोदेयोमयाधुना तेनैवराज्यकार्यंवैयोजनीयंमयात्रहि १७ अन्येचतत्सहायार्थंयो
जितव्यामयाधुना अगस्त्यउवाच इतिसर्वंविचार्याहस्त्रियंपुत्रांश्चभामिनी १८ तीर्थयात्रामयाकार्यातवाज्ञांचकथं
वद इत्युक्तेराजपत्नीचकिंवाच्यंवाच्यमेवच १९ सर्वंजानासिभोराजन्मयाकिंब्रूयतेत्रवै इतिपत्न्यावचः श्रुत्वापुनः
प्राहप्रियान्नृपः २० राजपत्नीतदाप्राहराज्यंकस्यप्रदीयते राजाप्याहतदादृष्टोपत्नीराज्याधिकारिणी २१ राजोवाच
श्रृणुष्वावहितासाध्वीपुत्रंतवसुभाषणी राज्यासनेस्थापयिष्येशीघ्रंराखंतवप्रिये २२ तस्यबुद्धिंप्रदंचैकंसचिवंयो

कर·म· जयाम्यहं चंद्रदत्तेतिनाम्नावैविख्यातंबलपौरुषं २३ विश्वासकंच राजस्यअतस्तंयोजयाम्यहं अन्येचतत्सहायार्थंयो
जयिष्येनसंशयः २४ इतिराज्ञाचसंप्रोक्तंश्रुत्वाराज्ञीउवाचह राज्ञउवाच भोस्वामिन्भवतोयच्चहितंतद्वैकुरुष्वहि अग
स्त्यउवाच २५ इतिएकांतिकंकृत्वाविचारंचप्रियान्वितं प्रातः सदसिसचिवान्समाहूयेदमब्रवीत् २६ राजोवाच भोस
चिवचरायूयंकुर्वतांवचनंमम इत्युक्तेथनृपेणाथप्रधानाउचुस्त्वरं २७ प्रधानउवाच स्वामिनोज्ञांवयंसर्वेशिरस्या
धारयामहे अगस्त्यउवाच इतितेषांवचःश्रुत्वाएकांतेतानिदंवदत् २८ पुत्रंचैवसमाहूयतेषांहस्तेचार्पयेत् अहंवै
तीर्थयात्रार्थंगमिष्येभवतोमया भवतांचकरिष्येहंएकमाज्ञाप्रवर्तकं अन्येसर्वेभवंतोहिवैअज्ञांतस्यप्रकुर्वतां ३० इति
तेषांप्रवदतांतेश्वोक्तंहिकथिष्यते तेषुचैवप्रवदत्सुराजातामस्यभाषत ३१ राजोवाच चंद्रदत्तंचसचिवंभवतांचप्र
बोधकं मत्पुत्रंतेनसहितंमत्स्थानेमन्यतांगतः ३२ अगस्त्यउवाच इतिचाज्ञापयामाससचिवान्राजसत्तमः स्वयं
यात्रार्थमत्युत्कोनिर्जगामपुराद्बहिः ३३ दैवज्ञान्समाहूयदृष्ट्वातान्सुमुहूर्तकं तैश्चोक्तंसुमुहूर्तंवैशुभकालंत

247

देवाहि ३४ तस्माद्विनिर्गतोग्रामान्सचरन्शुभकाम्यया तस्माद्पिपुरोगच्छन्उपतोवैन्नृपोयदा ३५ तदाप
त्नीन्नृपप्राह अयास्यभवतांसह तदाराज्ञाचाह भिहितंयथेच्छसितथाकुरु ३६ इत्युक्तेतेनराज्ञाथराज्ञीसाप्याज
गामह दिनेदिनेपुगच्छत्सुतीर्थयात्राक्रमेणहि ३७ तीर्थान्यक्रम्यापिबहून्करवीरमथागमत् आगत्यकरवी
रंतुमहालक्ष्मीनिरीक्षिता ३८ अंतर्गृहीन्चयात्रावैकृत्वाचैवयथाविधिः दक्षिणंमानसंकृत्वाकृतवानुत्तरंततः
३९ क्रियमाणेचोत्तरेन्चविगलंचगवांततः शुक्लतीर्थकृतस्नानोशुद्धोभूत्पापलेशतः ४० ततोगच्छन्विशा
लंलंहारकेश्वरसंनिधौ तत्रापतद्विषाणंतत्यावत्स्नानार्थमुद्यतः ४१ यस्मिन्स्थानेस्थितंश्रृंगंचिह्नंतत्रनृदृश्य
ते स्नात्वाविशालकेतीर्थेवासस्थानंतदाकरोत् ४२ कृतवासस्ततोराजातीर्थयात्रांपुरः करोत् लिंगतीर्थसमा
प्याथगयाकृत्यंविधायच ४३ विघ्नेशंपूजयित्वाथसर्वाभीष्टप्रदायकं महाकालींपूजयित्वासरस्वतीमथाय
जत् ४४ कालवेतालकौपूज्यसिंहवाहनमेवच महालक्ष्मींप्रणम्याथसंपूज्यविधिपूर्वकं ४५ त्र्यंबुलींचततः

कर॰म॰ पूज्यद्वाराण्यालोक्यभामिनी मध्यद्वाराण्यथालोक्यलिंगाष्टकमतः परं ४५ इतिसर्वाणितीर्थानिकृत्वाचैवयथावि
धिः महालक्ष्मींनमस्कृत्यस्तुत्वाचैवयथाविधिः ४७ वासस्थानंविशालेचा कृत्वायज्ञान्समारभेत् यज्ञांश्चबहवःकृ
त्वास्वमूर्तिंस्थापयत्ततः ४८ जीर्णोद्धाराणिकृत्वातुतीर्थानांचातिभामिनी देवालयानिसर्वाणिजीर्णोद्धृत्याथवैपुनः
४९ जीर्णोद्धारविधिंकृत्वानिजराज्यमथाव्रजेत् निजराष्ट्रंगतोराजाश्रु॰त्वामात्याःपुरोययुः ५० अमात्यापुरतश्चै
त्यश्चात्स्वामिविलोक्यच स्वानीतंचकरंदत्वावस्त्रपुष्पादिभूषणं ५१ स्वकीयस्थानमायातोनिजराष्ट्राधिपोभव
त् गतश्चकालमारभ्यपुनश्चैवागमावधि ५२ वर्षद्वादशकंजातंतीर्थयात्रार्थमेवहि मस्तकोयद्विपायंतत्सर्वै
र्नागरिकैर्जनैः पतितेतिष्कृतंतैश्चकरवीरेविशालके सर्वेसन्मानयामासुः करवीरंमहत्तरं ५४ कतिचि
द्दत्वोपेतातीर्थयात्रार्थमागताः केचित्कुर्युःस्वसंकल्पंकरवीरंचयामहे ५५ राज्ञोनाम्नाभवंनामतस्य
राष्ट्रस्यभामिनी श्रृंगणद्वीपमित्याख्यंश्रृंगोत्पत्याचश्रृंगिणं ५६ पुरानामांतरेचासीत्कराष्ट्रइतिनामतः

249

अतिविख्यातबलवान्स्वराज्यंकृतवान्पुनः ५७ नारदउवाच इत्थंचाख्यायमहिमाअगस्त्योथमहामुनिः अस्मिन्विशाल
केतीर्थेस्नात्वाचैवयथाविधिः ५८ पुरोगच्छन्तयापत्न्यासार्धंवैसघटोद्भवः केदारंयाम्यविख्यातंदृष्टवान्तत्रपर्वतं ५९
॥ छ ॥ छ ॥ इतिश्रीपद्मपुराणेकरवीरमहात्म्येनारदमार्कंडेयमहामुनिसंवादेश्रृंगणराजस्योपाख्यानेअगस्त्यप्रोक्तंवि
शालतीर्थमहिमावर्णनंनामपंचाशतमोध्यायः ॥५२॥ छ ॥ छ ॥ नारदउवाच दूरात्दृष्ट्वागिरिवरंलोपामुद्रामुदा
न्विता पतिंपप्रच्छसकलंगिरेर्नामसकारणं १ लोपामुद्रोवाच भोस्वामिन्कःप्रियतरोपुरोवैदृश्यतेमहान् अतिरम्योवि
शालश्चशोभमानोनगेश्वरः २ अस्यनामचकिंस्वामिन्विस्मृतंघटसंभवात् अतस्त्वंनामचास्यापिकथयस्वमहाम
ते ३ अगस्त्यउवाच प्रियेशृणुमहाप्राज्ञेनामचास्यशुभव्रते रत्नालयमितिख्यातंतस्यवासान्मनस्विनी लोपा
मुद्रोवाच तस्येतिचमहाख्यातमिदानींघटसंभव रत्नानाम्नास्तिकोसौवैतन्ममाचक्ष्वविस्तरात् ४ विस्तरंश्रवणेच्छा
मेविद्यतेकलशोद्भव नारदउवाच इतिपत्न्यावचःश्रुत्वासतदाघटसंभवः ५ कथयामाससर्वंवैआख्यानंमहदद्भु

क्र·म· राजनामकसंज्ञस्यपर्वतस्ययथामति: ७ अगस्त्यउवाच प्रियेश्रृणुमहाप्राज्ञेपूर्ववृत्तकथानकं त्वत्प्रियेकथयिष्या
मिसर्वपापहरंपरं ८ यदापूर्वंमहालक्ष्मीर्निर्गतावैहिमालयं तदाकोलासुरेणास्मिन्स्थापितोरक्षणायवै ९ रत्नासु
रोमहाबाहुर्दैत्यसैन्यावृतोबली तेनचात्रस्थितेनाथरक्षितादिशमुत्तरा १० तेनसरक्ष्यमाणोचदूतोतस्यदुरात्मनः यु
द्धार्थमागतोदृष्ट्वादेव्याकृतवधंतयो: ११ दूतवाक्येनरुश्चावतदारत्नासुरोबली अन्यदैत्यंविनिहतंदैत्यविलाख्यंमहासु
रं १२ कालरात्रींप्रेषयित्वादैत्यविलस्यवधंतदा श्रुत्वातथैवमहिषंनिहतंचाकरोत्तमं १३ समहिषस्यास्तुकश्चावदुरात्मा
सोमहाबल: किमेतदितिवैप्राहदेव्याकृतवधंतदा १४ स्वसैन्ययासमाविष्टोयुद्धार्थंपुरतोययौ क्रोधाद्धयंपुरोयातो
देव्यायुद्धार्थमादृत: १५ ततश्चैवमहालक्ष्मीस्वसखींचर्पटाभिधां प्रेरयामासयुद्धार्थंरत्नासुरवधेच्छया १६ प्रेषि
तासामहालक्ष्म्याचर्पटांबासखीकृता आयातांदृष्टवान्दैत्योमहाबलपराक्रम: १७ दृष्ट्वातांचर्पटांबाख्यांदेवींपरमशो
भितां उवाचदैत्यसुभगेकिमर्थंत्वमिहागता १८ त्वयास्माकंकथंयुद्धंकार्यंचैवहिभामिनी अतस्त्वंगच्छसुभगेकथं

2-49

युद्धंमयासह १९ करिष्यसिशुभश्रोणीस्त्रीत्वभावासुमध्यमे इत्थमुक्तेप्रकुप्यासीद्देवीभगवतीहिसा २० त्वमेवसु
भगस्तिष्ठयुद्धार्थेयदिचेच्छसी यद्यशक्तश्चयुद्धेतुगच्छशीघ्रंनिजालयं २१ अगस्त्यउवाच इत्युक्तश्चतदादैत्यो यु
द्धायैवव्यवस्थित: इमांहत्वाचचान्याश्चघातयिष्येनसंशय: २२ इतिकृत्वामतिंतेनचापारोपश्चवैकृता आह्वया
मासदुष्टात्मायुद्धायैवमुहुर्मुहु: २३ पर्यवर्षत्सदुर्धर्ष: शरधारा: सहस्रश: सैनिकाश्चपिसकलादैत्यानी
नसमवाकिरन् २४ उग्रशार्ङ्गसमुद्भूतैर्बहुभिर्मर्मभेदिभि: चर्पटांबारुषाविष्टाववर्षशरपुंगवै: २५ सचापि
परम:क्रुद्धोदैत्यापसदोबली अप्यवर्षत्तदुर्धर्ष: शरधारा: सहस्रश: चिक्षिपु: समरेवीरास्तदैत्यस्यसैनि
का: २६ अच्छिन्नास्तेरदृश्यंतदेव्यानुचरगाशरै: २७ तत:साचर्पटाक्षुब्धा: शरणामयुतान्बहून् अमंत्र्या
पर्वविधिनादिव्येनविधिनाक्षिपत् २८ तत्कार्मुकविनिर्मुक्तादानवानांमहारणे अंगेषुरुधिराक्लिन्नाविविशु:शा
रपंक्तय: २९ ततोहलहलाशब्दोदैत्यसैन्येप्रवर्धता विध्यतांविविधैस्तीक्ष्णै: पततांचमहार्णवे ३० तेनिकृत्त

कर· मभुजस्कंधाः कबंधाः कृतिदर्शनः नदंतोभैवनादंतिपतंतीस्मदानवाः ३१ दृष्ट्वानिदंनिपतितांस्तत्ररक्तदैत्योमहासु
रः मायायुद्धेनमहतायोधयामासचर्पटां ३२ मायिकाबहुलाशाखाः शक्तिशूलपरश्वधाः पट्टिशाश्चभुशुं
डीश्च चर्पटांप्रापतन्निशं ३३ तान्सर्वान्माययोचाशुप्रतिगृह्यनसंशयः तस्यांहतायांमायायांगिरिशृंगैरपोथयत्
३४ ततोभवतभमस्तंवत्प्रभावत्इवचाभवत् दुर्दिनंरुदिनंचैवशीतमुष्णंचभामिनी ३५ एवंमायावित
त्वाथयोधयंतंमहासुरं विहायचर्पटासर्वमाययैवमनाशयत् ३६ शतचंद्रसमाकीर्णसहस्रायुततारकं त
तोनुछायत६ तदाहिवारात्रंतथानिशः ३७ ततःसंमोहमापन्नाप्रज्ञास्त्रंसमयोजयत् ततस्तदस्त्रमस्त्रेण
विधूतंशतस्तूलवत् ३८ एवंसमभवद्युद्धंतुमुलंरोमहर्षणं क्रुद्ध्वालोकंचशत्रुघ्नापुनःशत्रुमपोथयत् ३९
हत्वासैन्यंचबहुधाचर्पट्याचमहामृधे रक्तासुरंमहाबाहुंखड्गेनापोथयद्रिपुं खड्गेभिन्नाथसच्छिन्नोदेहस्त
स्यापतद्भुवि पतितेचमहादैत्येहतःशेषायदुर्दिशं ४१ ततःसाचचर्पटांबाचदेवीविख्यातपौरुषा स्वालयंस

चसमायातामतिक्रांतेयदाशुभे ४२ तावत्कोलासुरेणाथरक्तभोजनसंज्ञितः प्रेषितश्चाययौतावत्तयावदाया
तिचर्पटा ४३ रक्तभोजननामासौदैत्यदुष्टोमहाबलः ततःसाचर्पटानाम्नीकोशमात्रंपुरोययौ ४४ ५ ५
॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेत्रिपंचाशत्तमोध्यायः ५३ ५ ५ ५
नारदउवाच रक्तभोजनमायातोरक्ताक्षयमितीरितं रक्तालयेप्रविष्टेतुरक्तभोजननामनि १ ततःकेचित्समाया
तादैत्याश्चैवास्ततव्यथाः तान्दृष्ट्वाविस्मितःप्राहकिंजातंचेतिभामिनी २ स्वदूतान्प्रेषयामासज्ञातुंतत्कार्यलाघवं
दूताश्चनिर्ययुःशीघ्रंस्वामिनःकार्यसिद्धये ३ दूताअगरूपदृश्युः चर्पटांबासखीहतां तादृष्ट्वास्वामिनंप्राप्य
सर्वविस्तरशोब्रुवन् ४ महालक्ष्म्यादशाज्ञातंरक्तासुरवधेकृते चर्पटांबाशमंप्राप्तादैत्योन्यश्चैवस्वागतः ५
इतिज्ञात्वामहालक्ष्मीःकिंकार्यमितिचिंतयन् इत्थंचिंतातुरेलक्ष्म्याःकेशरोवाक्यमब्रवीत् ६ केशरोउवाच
अद्यकिंत्विहभोमातःचिंतांवैक्रियतेधुना तांचिंतांप्रहरिष्येहंमह्यमाज्ञांप्रदीयतां ७ विरवलेश्वरेणैवमुक्तेमहा

१६५

कर॰ म॰ लक्ष्मीर्दयान्विता उवाचैवंतदादेवीगच्छकेदारसत्वरं महालक्ष्म्योक्तमाकर्ण्यस्वगणैः परिवारितः केदारः प्रययौ
शीघ्रंयात्रांवाचर्पटांभिधां ९ समागत्यतदादेवोकेदारोरवलेश्वरः उवाचांचेतिमप्येहिमयासार्धंशुभव्रते १० अ
गस्त्यउवाच इत्युक्तेनतदातेनकेदारेणचभामिनी चर्पटांबाचकेदारोमिलित्वागंतुमुद्यतौ ११ तावत्सोपिससैन
ध्योरक्तभोजनसंज्ञितः स्वसेनयासमायुक्तः आगतः पुरतोमहान् १२ पुरश्चागत्यसहसाकेदारंवाक्यमब्रवीत्
रक्तभोजनउवाच कस्त्वंचेहसमायातः कुतः कस्माच्चमेवद १३ भवत्स्थानंचमेब्रूहित्वयोयत्क्रियतेकुरु इत्थंत
स्यवचः श्रुत्वारक्तभोजनसंज्ञितः १४ ए॰ कः किमर्थमायातोएतद्ब्रूह्यधुनामय अगस्त्यउवाच इतितेनाथपृ
ष्टोवैः केदारोचकुमारभे १५ केदारउवाच अहंहिमालयाद्वासोमहालक्ष्म्याः सहायवान् ममनामत्वंचवि
द्धिकेदारंरवलेश्वरं १६ एषांवैचर्पटांवारव्यांमहालक्ष्मीसखीप्रिया तयेयंप्रेषितादैत्यरत्नाकरवधेच्छया १७
अनयाचहतोदैत्योरलोनाममहाबलः मत्वंचापिमहादैत्यंतद्वधार्थंचप्रेषितं १८ इत्थंज्ञात्वाचतंतिष्ठयुद्धार्थं

251

ममसन्मुखं अनयावात्वयायुद्धंकार्यंचैवमहामते १९ अगस्त्यउवाच इतिश्रुत्वावचस्तस्यकेदारस्यमहात्मनः कोपावे
शेनसंयुक्तोयुद्धार्थंप्रययौपुरः २० सैनिकांश्चापियुयुजेयुद्धायैवमहाबलः तदायुद्धंमहच्चासीत्तुमुलंरोमहर्षणं २१
युद्धेतस्मिन्महाघोरेबाणवृष्टिंमुमोचह बाणवृष्टिः कृतातेनतयाछन्नंचभवन्नभः २२ व्यथिताश्चतयावृष्ट्यारवले
श्वरसैनिकाः व्यथितान्सैनिकान्दृष्ट्वाकेदारश्चमहात्मनः २३ धनुर्गृहीत्वादीप्तंबाणांश्चिच्छेदसानुगान् दैत्यां
श्चापिधनुश्छित्वापातयामासभूतले २४ ततोतिकोपपूर्णश्चदैत्योवैरक्तभोजनाः सैनिकांश्चतदार्डचकिंपन्यतम
हाबलः २५ शीघ्रंत्वस्यशिरश्छित्वापातनीयंमयाभुवि इत्थमुक्तेनदैत्येनतदासर्वेपिदानवाः २६ जीविताशांजहु
स्तेवैयुद्धायैवमनोदधुः तदातुतुमुलंयुद्धंदेवानांविस्मयावहं २७ केदारस्यगणैश्चापिकृतंयुद्धंसुभैरवं ततोदैत्या
न्बहुतरान्घातयामासभामिनी २८ घातितेषुचदैत्येषुकेदारणमहात्मना ततोवाचमहादैत्योरक्तभोजनसंज्ञितः
२९ रक्तभोजउवाच केदारत्वंमहाबाहोअन्येषांबलगर्वितः मत्वंत्वमेवयुद्धस्वयद्यस्तितवपौरुषं ३० अहमेवाभि

कर॰म॰ युद्धेहं तवसार्धंमहाभुज त्वमेवशक्तियुक्तश्चास्थिरोभवमयासह ३१ अगस्त्यउवाच इत्युक्तोचमहाक्रुद्धोरक्तभोज
ननामकः खड्गमुद्यम्यतरसाकेदारंप्रययोरुषा ३२ तावत्तस्याशुतत्खड्गं बाणैश्छित्वापिपोथयत् सत्खड्गंविफलंदृष्ट्वा
पट्टिशंजगृहेततः ३३ तद्वैचिच्छेदखड्गेनप्रवरोदानवांतकः पट्टिशंचाथवैछिन्नंतदाशक्तिंसमाददे ३४ शक्तिमस्य
करस्थांवैतदाचिच्छेदसोस्करः शक्तिंचैविफलंदृष्ट्वामुष्टिमुद्यम्यवेगवान् ३५ आयांतंपुरतोवीक्ष्यखड्गेनचशिरोछिन
त्। छिन्नेशीर्षेततस्तेनअन्येचैवनिपातिताः ३६ स्वामिनंपतितंवीक्ष्यअन्यांश्चपतितान्भुवि पलायचगताःसर्वे
दिक्षुसर्वासुभामिनी ३७ तदाजहृषुश्चसर्वेशक्राद्यादेवतागणाः हर्षेणचतदासर्वेआकाशस्थैश्चदेवतैः ३८ स
त्यक्कारवृष्टिश्चपुष्पाणांजयोदयमहस्वनैः ततोरत्नालयंप्राथकेदारश्चपर्पटासह ३९ उवाचसगिरावस्मिन्स्वात्मनः
प्रियकाम्यया ४० वासस्थानंचकृतवान्सर्वेषांपुण्यकारकं तस्यैवनिकटेस्कशुआत्मनःप्रीतिवर्धनं ४१ स्थानं
चकारसुमहत्तच्चपर्पटांवामनोरमं कृतवासौतदातत्रभक्तानाभिष्टदायिनो ४२ आत्मनःपूजनार्थायलिंगंवैस्था

252

पयत्तदा केदारलिंगंविख्यातमानीतंवैहिमालयात् ४३ तस्यपूजांसमाचक्रेकेदारोखलेश्वरः तस्यागतः कृतंती
र्थंकेदारेतिचविश्रुतं ४४ चर्पट्याचकृतंतीर्थंस्वनाम्नाविश्रुतंभुवि अमरघ्निश्चतत्रास्तितपःकुर्वन्सुदारुणं ४५
एकांबिकाचरामश्चस्थितोत्तत्रशुभव्रतो तेषांतीर्थानिविद्यंतेविख्यातानिशुभव्रते ४६ अस्माद्वैपर्वतवरात् द्वेगंगे
निर्गतेशुभे गौतमप्रार्थितस्तस्मात्गौतमीतिसुभामता ४७ यावैनिर्गत्यसहसापंचनद्यासमागताः द्वितीयेचो
त्तरेभागेपुण्याहेमवतीनदी ४८ निर्गम्यपर्वतादस्माद्वारुण्यासहसंगता कर्पूरगौरमित्याख्यंविद्यतेचिरकालिकं
४९ दिव्यलिंगंमहच्चात्रचिरकालविराजिते तस्यैवनिकटेचास्तितीर्थंवैपरमंमहत् ५० कर्पूरवापिकानाम
विख्यातंपरमंमहत् इतिस्वपत्न्यैकथयघटजन्मामहामुनिः ५१ संप्राप्तश्चमहास्थानंकेदारस्यमहात्मनःस्ना
त्वाकेदारकेतीर्थेकेदारंज्योतिर्लिंगकं ५२ संपूज्यपरयाभक्त्याचर्पटांबांततोगतः चर्पटांबांचसंपूज्यगतोवैखव
लेश्वरं ५३ खलेश्वरंचसंपूज्ययथाविभवशक्तितः कर्पूरगौरंततोगच्छन्पूजांकर्तुंचभक्तितः कर्पूरवाथांसंस्ना

कर·म· त्वापत्नासहमहामुनिः ततः संपूजयामासभक्तिभावसमन्वितः ५५ कर्पूरगोरंमहालिंगंविख्यातंजनपावनं तंसं
पूज्यमहाभक्त्याजमदग्नीश्वरंगतः ५६ जमदग्नेर्महातीर्थेस्नात्वाचैवयथाविधिः जमदग्निसमभ्यर्च्यरामेशंचत
तःपरं ५७ रामतीर्थेचसुस्नातोरामेशंचसुपूजयन् रामेशंचसुसंपूज्यएकवीरांततोययौ ५८ एकवीरान्सुरं
पूज्यभक्तिभावेनचैवहि एतेषांसमयेचैवब्राह्मणांश्चैवभोजयेत् ५९ सुवासिनीश्चसंपूज्यतांबूलंचददौतदा ते
भ्यश्चदक्षिणांदत्वापुण्यस्यास्त्येचभामिनी ६० विज्ञाप्यमथतान्भक्त्याब्राह्मणान्सुसमाहितः इतितीर्थविधिंकर्तुं
गंतुंवैपंचरात्रिकं ६१ षष्ठेह्निप्रातरुत्थायस्नात्वाचैवयथाविधि केदारंज्योतिर्लिंगंचनमस्कृत्यगतस्ततः ६२
चर्पटांबांचसंनम्यकेदारंरवलेश्वरं साष्टांगंप्रणनामाथक्षमाप्यचसुभक्तितः ६३ ततोगच्छन्स्वर्गांगेसिद्धेशं
पर्वतेस्थितं सिद्धेश्वरंसमासाद्यसतीर्थंलोकपावनं ६४ सिद्धकुंडेसुसंस्नात्वासिद्धेशंपरिपूज्यच कल
कुंडेचसुस्नात्वाकल्लेशंपरिपूज्यच ६५ विषकुंडेकृतस्नानोनागेशंपरिपूज्यच तदापप्रच्छसातत्रपतिंचैवपति

व्रता ६६ लोपामुद्रामहाभागामनसाल्हादकारिणी लोपामुद्रोवाच एतेषांमहिमास्वामिन्वदसर्वंममाग्रतः तयेत्थं
समपृष्टस्तुघटजन्मामहामुनिः ६८ अगस्त्यउवाच एतेषांमहिमापूर्वंनागाख्यानेमयेरिता जलशायीचतुर्कोणां
कल्लेशानांतथैवच ६९ यात्रांसकल्पयामासततोगच्छन्शनैः शनैः महालक्ष्मीप्रणम्याथगच्छन्पूर्वेमहातरं
७० पूर्वेचौदुंबरेतीर्थेपूर्वाब्धिरितिविश्रुते शेतेनंतस्सुपर्यंकेक्षेत्ररक्षातचक्रकः ७१ तत्रगत्वासुसंस्नात्वाद
ष्ट्वान्जलशायिनं तंसंपूज्यमहाभक्त्याकल्लेशंपूजितंततः ७२ तस्यैवदक्षिणेभागेक्रोशमात्रांतरेणहि वि
द्यमानंचकल्लेशंसंपूज्यविधिपूर्वकं ७३ ततोगत्यमहालक्ष्मीप्रणम्यचमहामुदा ततोगमद्दक्षिणस्यांदिशिस्थं
जलशायिनं ७४ याम्योन्यग्रोधकेतीर्थेदक्षिणाब्धिरितिश्रुते शेतेनंतस्सुपर्यंकेक्षेत्ररक्षातचक्रकः ७५ स्नात्वा
स्थं न्यग्रोधमूलस्थंजलशेषशायिनं संपूज्यपरयाभक्त्यापरमानंदनिर्भरा ७६ तस्यैवदक्षिणेभागेबाणयुग्मां
तरेणहि कल्लेशंनामवैलिंगंसंपूज्यचमहामुनिः ७७ ततोगमन्महालक्ष्मीनत्वाचैवयथाविधिः ततोगमत्स

कर॰म॰श्चिमायांदिशिस्थंजलशायिनं ७८ अस्यचधातालकेतीर्थेपश्चिमाब्धिरितिश्रुते शेतेनंतस्कपर्यंकेक्षेत्ररक्षात्तच
क्रकः ७९ स्नात्वान्यग्रोधकेतीर्थेअत्रस्थंशेषशायिनं संपूज्यपरयाभक्त्यापरमानंदनिर्भरः ८० तस्यैवदक्षिणे
भागेबाणयुग्मांतरेणहि कल्लेशंनामवैलिंगंसंपूज्यचमहामुनिः ८१ ततोगमत्पश्चिमायांदिशिस्थंजलशायिनं
८२ अस्यपातालकेतीर्थेपश्चिमाब्धिरितिश्रुते शेतेनंतुकपर्यंकेक्षेत्ररक्षात्तचक्रमः ८३ स्नात्वापलाशकेतीर्थे
जलशायिनमव्ययं संपूज्यपरयाभक्त्यापरमानंदनिर्भरः ८४ आगतश्चमहालक्ष्मीनत्वाचैवयथाविधिः ततोग
मंतुतरस्यांजलशायिनमव्ययं ८५ उत्तरेश्वत्थकेतीर्थेउत्तराब्धिरितिश्रुते शेतेनंतरुकपर्यंकेक्षेत्ररक्षात्तचक्र
कः ८६ तंसंपूज्यमहाभक्त्यापरमानंदनिर्भरः तस्यैवदक्षिणेभागेबाणयुग्मांतरेणहि कलेश्वरंचसंपूज्य
आगतः करवीरकं ८७ महालक्ष्मीप्रणम्याथस्तुत्वाचैवयथाविधिः ८८ पुनःपुनः प्रणम्यैतिमहाभक्त्या
यथाविधिः एतावतीमहायात्रांकर्तुंवैमासपंचकं ८९ गतंचैवमहाभागमार्कंडेयमहामुनिः ९० छ छ छ

254

॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेपंचतुःपंचाशत्तमोध्यायः ॥ ५४ ॥ छ ॥ मार्कंडेय
महाउवाच ततः किंकृतवानृषिकलशोत्थोमहामुनिः देवर्षेतन्ममाख्याहियदितेचकृपामयि १ नारदउवाच मार्कं
डेयमुनेप्राज्ञसर्वभूतोपकारकं यन्मामपृच्छसेविप्रतदाख्यास्येशुभंचतत् २ महालक्ष्मीप्रणम्याथस्तुत्वाचैवयथाविधिः
महाद्वारचतुष्टंचकर्तुंवैनिर्गतोमुने ३ पर्वतोपरिपूर्वेचलिंगंरामेश्वराभिधं तद्दृष्ट्वापूजयामासपत्न्यासहमहामुनिः
४ रामलिंगंचसंपूज्ययथाविधवभक्तितः महालक्ष्मीतथायात्तः प्रणनामसभक्तितः ५ कृतप्रणामोथमुनिः
पत्न्याचैवसहायवान् दक्षिणेचविभागेचलिंगंचक्रेश्वराभिधं ६ तंदृष्ट्वापूजयामासभक्तिभावसमन्वितः भ
क्तिभावेनसंपूज्यआत्मनःशुभकाम्यया ७ ततोलक्ष्मीजगामाशुसपत्नीकोमहामुनिः आगत्यलक्ष्मीस्कभगान
नामकलशोद्भवः ८ कृत्वाभिवादकोविप्रपत्न्यासहमहामुनिः ततोगच्छत्पश्चिमायांदिशिस्थंलिंगमादरात् कु
लहेमंमहालिंगंस्थितंपश्चिमभागके तंदृष्ट्वाविधिवत्पूज्यततःसंतुष्टमानसः ९ महालक्ष्मीततोविद्यामागतो

कर·म· हृष्टमानसः महालक्ष्मींनमस्कृत्यस्तुत्वाचैवस्वभक्तितः ११ ततोगच्छन्नुत्तरस्यांदिशिस्थंलिंगमुत्तमं उत्तरेपितथा
भागेश्रीगुल्यंमल्लिकार्जुन १२ तस्यापिचमहापूजांकृत्वाचैवस्वभक्तितः ततोगमन्महालक्ष्मींनत्वाचैवयथाविधिः
१३ महाद्वारचतुष्कस्ययात्रासंपूर्णहेतवे ब्राह्मणांश्चसमाहूयभोजयामासभक्तितः १४ भुक्तेषुविप्रवर्येषुदत्वा
तांबूलवीटिकाः दत्वाचदक्षिणांतेभ्योयथात्रान्त्यानुसारतः १५ स्वयंचतत्रबुभुजेपत्न्यासहमहामुनिः कृत
भोजनवेलायांकृतसंध्योमहामुने १६ नीराजनविधिंदृष्टुंपत्न्यासहमहामुनिः नीराजनविधिंदृष्ट्वाहर्षयुक्तो
महामतिः १७ ततस्तुत्वामहालक्ष्मींप्रणनामस्वभक्तितः तस्मिन्निशिसुषुष्वापब्रह्मचर्यादिनाशुभे १८ प्रा
प्रातः प्रबुद्धश्चततोपत्नीमाहशुभव्रतः इतोगतव्यमस्माभिर्लिंगाष्टकस्यदर्शनं १९ इत्युक्त्वास्नानकंकृत्वामु
निकृत्यसमाहितः महालक्ष्मींसमागत्यसंकल्पंकृतवान्मुनिः २० महालिंगाष्टकीयात्रांकरिष्यामीतिचेमुने
कृत्वासंकल्पकंतत्रमहालक्ष्मींप्रणम्यच २१ दिव्यलिंगाष्टकंयात्रांकर्तुंचैवनिर्गतोमुनिः अमरेशाभिधंलिंगंपू

र्वेकृष्णातटेस्थिते २२ ततोदृष्टंशुभंलिंगंअमरेशंमहामुनिः तंसंपूज्यमहाभक्त्यामहालक्ष्मींततोययौ २३ महा
लक्ष्मींततोनत्वापत्न्यासहमहामुने ततोगच्छंद्वितीयंतुलिंगंवैपरमंशुभं २४ कोपेश्वराभिधंलिंगंअग्निकोणेषु
संस्थितं तंदृष्ट्वाप्रणनामाथसपत्नीकोमहामुनिः २५ कृष्णावेण्यांस्वसंस्नात्वापितॄन्संतर्प्यवारिणा कृष्णावेणीं
नमस्कृत्यसपत्नीकोमहामुनिः२६ ततस्तांपूजयामासभक्तिभावेनभोमुने पूजयित्वाविधानेनमहालक्ष्मींसमा
ययौ २७ महालक्ष्मींप्रणम्याथतृतीयंगंतुमारभे तृतीयंतुमहालिंगंवीरभद्रेतिविश्रुतं २८ दक्षिणेदिग्विभा
गेवैकृष्णातीरेमनोरमे तत्रगत्वामुनिःश्रेष्ठः स्नानंकृत्वाविधानतः २९ वीरभद्रंमहालिंगंपूजयामासभक्तितः
तत्रसंपूज्यविधिवत्प्रणामंकृतवान्सुधीः ३० कृतप्रणामश्चमुनिर्महालक्ष्मींततोययौ महालक्ष्मींप्रणम्याथ
साष्टांगंप्रणनामच ३१ नमस्कृत्यमहालक्ष्मींचतुर्थंप्रययौततः सिद्धंसांख्येश्वरंलिंगंनैऋत्यांदिशिसंस्थि
तं ३२ तत्रगंगामहापुण्यानवनीतामहामुने स्नानंकृत्वानुविधिवत्सिद्धसाध्येश्वरंगतः ३३ तंसंपूज्यमहा

क.र.म. भक्त्यापरंहर्षमवापह अथागमन्महालक्ष्मींदृष्ट्वान्नजगदीश्वरी ३४ तांचैनत्वामहाभक्त्यापंचमंप्रययौततः श्री
योगेशंमहालिंगंपश्चिमेतुसुसंस्थितं ३५ तत्रगत्वाचतंदृष्ट्वापूजयामासभक्तितः पूजांकृत्वाविधानेनभक्तिभा
वेनचैवहि ३६ तस्याः पश्चिमभागेचसर्वपापप्रणाशिनी भद्रानाम्नीमहागंगाकासारीतिचविश्रुता ३९ तत्र
गत्वामुनिःश्रेष्ठः स्नानंकृत्वाविधानतः आगत्यभक्तिभावेनतंसंपूज्यपुनर्मुने ४० ततोगच्छन्महालक्ष्मींप्रणि
पातंचकारह प्रणम्यमन्त्रसाधपात्वाषष्ठंचैवागतस्तदा ४१ वटेश्वराभिधंलिंगंवायुकोणेषुसंस्थितं तंगत्वापू
जनंचक्रेसुदृढंभावपूर्वकं ४२ कृतपूजनकोविप्रः पत्न्यासहस्तुभंततः ततोगमन्महालक्ष्मींदेवानांत्वधिकारि
णीं ४३ प्रणम्यपुरतःस्थित्वासप्तमंगंतुमुद्यतः उत्तरेशंचरामेशंकृष्णातटसुसंस्थितं ४४ तंगत्वाप्रणना
माथसपत्नीकः सदंडवत् ततः पूजांचकारोसौरामेशस्यसुभक्तितः ४५ लक्ष्मणेशंसुसंपूज्यसीतांचैवततोर्च
येत् वायुपुत्रंचसंपूज्यकृष्णयाजलमध्यगे ४६ ततस्तुप्रययौलक्ष्मींसखिभिः संवृतांबिकां ततस्तांप्रणतिंच

क्रेमित्रावरुणिसंभवः ४७ कृत्वाप्रणामंचततोअष्टमंगंतुमुद्यतः ईशान्येसंगमेशंचकृष्णावरुणसंगमे ४८ तंगत्वा
सुमहाभक्त्याकृत्वाचार्चनमादरात् कृतापूजामहेशस्यसंगमेशस्यवैमुने ४९ ततःपश्चान्महाप्रीत्याकोलापुरनिवा
सिनीं कोलापुरस्थितांदेवींनत्वाचैवसुदंडवत् ५० ततःस्ववसतिस्थानंप्रययौप्रीतिपूर्वकं इतिलिंगाष्टकीयात्रा
कृत्वाचैवमहामुनिः ५१ यात्रासंपूर्णतांसिध्यैब्राह्मणान्भोजयेत्तदा ब्राह्मणेषुचभुक्तेषुवीटिकान्दत्तवान्मुनिः ५२
क्रमुकस्यचखंडानिसकर्पूराणिवैददौ दक्षिणांश्चापिवैदत्वातेभ्यश्चैवप्रणामह ५३ ब्राह्मणाश्चापिसंप्रीतातस्मै
विप्रायधीमते आशिषंचददुस्तेथसांगमस्त्वितिभोमुने ५४ पत्न्यासमंसभुक्त्वाथसायंसंध्यांकृतोद्यतः नीराज
नविधिंदृष्ट्वाविश्रमार्थंगतोमुनिः ५५ छ छ इतिश्रीपद्मपुराणेकरवीरमहात्म्येनारदमार्कंडेयसंवादेपं
चपंचाशत्तमोध्यायः ५५ छ छ नारदउवाच ततः प्रभातेसंप्राप्तेमार्कंडेयमुनेशृणु पत्न्यासहमुनिश्रे
ष्ठस्ततोलक्ष्मींप्रणम्यच १ एवंप्रतिदिनंकुर्वन्ततोन्यस्मिन्दिनेशुभे भृगोर्वासरकेप्राप्तेमहालक्ष्म्याश्चपूजनं २

कर॰म॰चकारविधिवद्भक्त्यापंचामृतरसैः शुभैः श्रीसूक्तेनाभिषेकंचकृत्वाचैवसुभक्तितः ३ शुभ्रवस्त्रैश्चसंपूज्य॰ चंदना
दिसुगंधिना कुंकुमांजनकैश्चैवहरिद्राचूर्णकैस्तथा ४ केतक्यादिसुपुष्पैश्चपूजयामासभक्तितः कृष्णागरुसु
धूपैश्चकृत्वाधूपार्पणंतथा ५ गुग्गुलादिमहाधूपैः संतोष्यजगदंबिकां घृतवर्त्यादिभिर्दीपंसमर्प्यचयथावि
धिः ६ नैवेद्यैर्भक्ष्यभोज्यैश्चशालीतंदुलसंभवैः लेह्यैश्चतां — — देवींनानाखाद्यैश्चभक्तितः ७ समर्प्यथि
त्वाचततः तांबूलंसुमनोरमं क्रमुकेणसमायुक्तंकर्पूरावासितेनतु ८ पूजाफलमवाप्यात्रदक्षिणांप्रसमर्प्यच
नीराजनविधिंचैवपंचार्तिक्यविधानतः ९ कर्पूरेणाप्यआर्तिक्यदीपंवैप्रसमर्प्यच भक्त्यापुष्पांजलिंचैवस
मर्प्यभक्तितोमुनिः १० नारदउवाच कर्पूरदीपंप्रसमर्प्यभक्त्यापुष्पांजलिंचैवसमर्प्यभक्तितः सर्वोपचारांश्च
समर्प्यभक्त्यास्तुतिंचकाराथपुरेवचोक्तां ११ स्तुतिंकृत्वामहालक्ष्मींवासस्थानमयाचत ततोब्रवीन्महालक्ष्मी
ह्यगस्त्यंप्रहसन्निव १२ महालक्ष्म्युवाच भुक्त्वागंतुमिहागच्छततोहंप्रवदाम्यहं नारदउवाच इत्युक्तोम

हालक्ष्म्यासपत्नीकोमहामुनिः १३ महाकालींचसंपूज्यसोपस्कारांयथाविधिः महासरस्वतींपूज्यतथैवभक्तिभाव
तः १४ वाग्देवींप्रणनामाथस्तुतिंकृत्वायथामतिः संपूज्यपरयाभक्त्यासर्वोपस्करसंयुतः १५ गत्वावैस्वाश्र
मंपुण्यंब्राह्मणांश्चयथाविधिः भोजयामासविधिवत् भक्ष्यभोज्यैरनेकशः १६ भुक्तेषुतेषुविप्रेषुविटिकान्
सर्वांस्तदा क्रमुकस्यचखंडानिकर्पूराणिददौततः १७ दक्षिणाश्चापिदत्वाथआशिषश्चापिगृह्यत दत्वाज्ञांस्त
ततः स्तेभ्यः स्वयंभुंजीतवाग्यतः १८ लोपामुद्रापिसंभुक्ताउपविश्यक्षणंतदा संध्यावंदनकंकृत्वामहाल
क्ष्मींपुनर्ययौ १९ पुनरागत्यमतिमान्सपत्नीकोमहामुनिः नीराजनविधिंदृष्ट्वासाष्टांगंप्रणनामह २० प्रण
म्योत्थायचमुदामहालक्ष्मींदयानिधिं मातश्चाज्ञांप्रयच्छस्वयदितेस्तिकृपामयि २१ श्रीमहालक्ष्मीउवाच
किंब्रूषेविप्रवर्यस्त्वंवारंवारंविमूढधीः अथकिंतेब्रवीम्यंगपूर्वंचोक्तंमयातव २२ अतस्त्वंगच्छसुभगेविख्या
तंचषडाननं षडाननमुखात्वंचक्षेत्रयोर्महिमांश्शृणु २३ वाराणसीद्वयंचैवमहिमांचषडाननात् श्रुत्वावास

कर॰ म॰ फलंचैवप्राप्स्यसेत्वंनसंशयः २४ मयातवाविधिर्दत्तोषण्मासानांमहामुने सोपिजातः पक्षमेकंअधिकं
चगतंकिल २५ अनंतानिचतीर्थानिह्यनंतादेवतास्तथा अनंतानिचलिंगानिकर्तुंकोपिनवैविभुः २६ त
थापितीर्थवर्याणिसेतिहासानियानिच देवताकरवीरेत्रत्यसंख्यातामहामुने २७ षण्मासावधिमध्येचक
र्तव्येतित्वयेरितं सर्वात्रयाकृतायात्राममाज्ञानात्रसंशयः २८ अथतेअवधिर्नास्तिगच्छशीघ्रंचदाम्मिते नो
चेत्तवअहंदास्मिशापंचैवसुदारुणं २९ नारदउवाच इतिश्रुत्वावचस्तस्यामहालक्ष्म्याशुभव्रताः ततः प्रभातेवि
मलेस्नानार्थंप्रययौमुनि ३० पंचनद्यांततः स्नात्वामहालक्ष्मीययौपुनः तांप्रणम्यपुनर्भक्त्यासपत्नीकः सदंडव
त् ३१ महालक्ष्मीचसंप्रीत्याउत्थाप्याथवदत्तदा श्रीरुवाच मुनेगच्छसुशीघ्रंत्वंमत्यंन्नैवाथविस्मर ३२ म
मविस्मरणात्तेचैवक्लेशायैवभविष्यति अतस्त्वंसर्वदाविप्रमदीयंस्मरणंकुरु मदीयंस्मरणाच्चैवनैवक्लेशोभवि
ष्यति नारदउवाच इतिलक्ष्मीवचश्श्रुत्वानिर्गतोस्मात्पुराद्बहिः ३४ कृतकृत्यमथात्मानंमन्यमानोमुनीश्वरः

संस्मृत्वाथमहालक्ष्मीक्षेत्रंकृत्वाप्रदक्षिणं ३५ अगस्त्योमुनिशार्दूलः प्रविश्यदक्षिणंपथं करवीरंतीर्थ
संघंमनसासंस्मरन्परं ३६ ततोव्रजन्सुखाविष्टोमूर्छितोनिपपातह ततोमुहूर्ताच्चमुनेस्मरणंसमपद्यत
३७ महालक्ष्मीचसंस्मृत्यपुनश्चैवययौपुरः एवंदिनैर्बहुतरैश्रीशैलंसमपद्यत ३८ श्रीशैलेसुमहत्पु
ण्येदृष्ट्वैवमल्लिकार्जुनं नमस्कृत्वासपत्नीकः स्नानार्थंनिर्ययौततः ३८ तत्रपातालगंगावैविद्यतेजनपावनी
कृतक्षौरादिविधिनास्नात्वाचैवयथाविधिः ४० तीर्थश्राद्धंचकृतवान्पितृसंतृप्तिकारकं तिलयुक्तैर्जलैश्चै
वपितॄन्संतर्प्यवारिणा ४१ ततः स्नात्वासपत्नीकोघटजन्मामहामुनिः मल्लिकार्जुनमभ्यर्च्ययथोक्तविधिना
मुनिः ४२ तत्रस्थांचमहायात्रांकृत्वाचैवयथाक्रमं विरूपाक्षंद्रष्टुकामोनिर्गतोथमहामुनिः ४३ तुंगभद्रांम
हापुण्यांतत्रगत्वाथदृष्टवान् स्नानंकृत्वाथविधिवत्पितॄन्संतर्प्यवारिणा ४४ पिंडदानंतर्पणंचकृत्वातत्रविधा
नतः पूजयित्वाविरूपाक्षंभक्तिभावेनचेतसा ४५ विरूपाक्षंप्रणम्याथकृतकृत्योमहामुनिः कार्तिक्यांकृत्तिकायोगे

कर.म. यावद्दापतितत्रैव ४६ वासंकृत्वाविधानेनविरूपाक्षस्यसंन्निधौ ततः षण्मुखमभ्येत्यकार्तिकेकृत्तिकान्विते ४७
तत्रत्यांविधिवद्यात्रांकृत्वाचैवस्कंभक्तितः यात्राकालेगतेपश्चात्षडाननमथाब्रवीत् ४८ अगस्त्यउवाच षडा
ननमहाप्राज्ञामदीयंवचनंश्रृणु महालक्ष्म्यामहादेव्यात्वद्वीप्यनिकटेशुभे ४९ प्रेषितोषिमहाभागतेनत्वा
महमागतः महद्वैकारणंमत्यंविद्यतेत्वत्समीपके ५० स्कंदउवाच विप्रवर्यमहाप्राज्ञकिंकारणमतोवद महा
देव्याकिमर्थंतेप्रेषितस्तद्वदाधुना ५१ नारदोवाच इतितस्यवचः श्रुत्वाअगस्त्योथमहामुनिः वक्तुमारेभिरे
विप्रदेव्यावचनमादरात् ५२ अगस्त्यउवाच श्रृणुष्वावहितः सद्योदेव्याउक्तंषडानन न तस्यापिपूर्ववृत्तांतंसं
क्षिप्तंतेवदाम्यहं ५३ पूर्वंमयाकृतवतीवासंकार्त्यांषडानन ततोदेवैश्चसंमील्यविंध्यस्यदमनायवै ५४ तैः
सर्वैःप्रहितश्चाहंविंध्यवृद्धिंनिवर्हया अंतरायेणचैतेनकाशित्यश्चममात्यतं ५५ ततश्चाहंसमाविष्टःपतित
श्चमहामधि ततोमुहूर्त्तेसंजातेस्मृतिर्ज्ञाताममप्रभो ५६ दक्षिणस्याविमुक्तस्यकरवीराभिधस्यच तुष्टेह

259

तेनसंजातोदृष्ट्वादेव्यातयामम ५७ ततोतयाममपृष्टंसंतोषस्यचकारणं मयावैमध्यमानेचदृष्टंतत्कर
वीरकं ५८ दृष्ट्वाचैवमहाक्षेत्रंमहालक्ष्मींप्रणम्यच पूजादिकृत्वाचमयातत्रवासंचयाचितं ५९ ततस्तयाम
हालक्ष्म्यावासोनैवप्रचोदितः षण्मासावधिमेदत्तोः तीर्थयात्रार्थमेवच ६० तस्याज्ञयामयास्कंदतीर्थयात्राकृ
तातथा ततश्चैवमयापृष्टंदेव्यैसावार्थमादरात् ६१ तदातयाममप्रोक्तंनैववासोभवेदिह ततस्त्वयैवचोक्तं
मेषण्मुखंगच्छभोद्विज ६२ तत्रतस्यमुखाज्ञातुक्षेत्रयोर्महिमाश्रृणु कृतेतुश्रवणेविप्रक्षेत्रयोर्वासजंफलं
६३ लक्ष्मीमदीयवचनात्प्राप्स्यसेनात्रसंशयः ततोहंतेसमायातःश्रवणंकर्तुमादरात् ६४ अतस्त्वंमेम
हाभागक्षेत्रयोर्महिमांवद नारदउवाच इत्थमुक्तंतदातेनअगस्त्येनमहात्मना ६५ ततस्तंविप्रवर्यंचप्रवक्तु
मुपचक्रमे स्कंदउवाच श्रृणुष्वावहितोब्रह्मन्मन्मुखात्श्रृणुसुव्रत ६६ क्षेत्रयोर्महिमांविप्रसंक्षिप्तंवर्णयामि
ते शंभुनोक्तंपुरादेव्यैकल्यानामेकविंशतिः ६७ देव्यामत्यंचतत्प्रोक्तंमाहात्म्यंबहुविस्तरं तावन्मयानेवधृत

कर॰म॰बुद्धेः स्वल्पतयामुने ६८ ख्यातेसनत्कुमारायकुमारोनारदायवै नारदेनाचधर्मायप्रोक्तंविप्रशुभंमहत् ६९ तच्चाहंते
समाख्यास्येसंक्षिप्तंचैमहत्तुशुभं नारदउवाच इतिश्रुत्वावचस्तस्य हृष्टश्चैवमहामुनिः ७० ततस्तस्मैप्रणम्याह
दासोहंतेभवाम्यहं अगस्त्यवचस्यवचः श्रुत्वास्कंदोवाक्यमथाब्रवीत् ७१ स्कंदउवाच यत्वयाप्रश्नयुक्तंमेतच्चसे
वेकरोमितं नारदेनचयत्प्रोक्तंधर्मायचकथानकं ७२ याकथास्कंदवर्यायवेदव्यासोमहामतिः प्रोक्तवान्मुनिशार्दू
लहितायजगतःपुरा ७३ तांकथांतन्मुखाच्छ्रुत्वासूतश्चैवमहामतिः शौनकादीन्मुनीश्चैवसूतश्चैवावदत्तदा ७४
तदहंतेवदिष्यामिशुभाख्यानंमुनीश्वरं अगस्त्यउवाच क्षेत्रयोर्महिमामध्येकरवीरकथाशुभां ७५ पूर्वंब्रूहिततःका
श्यामहिमावदस्कंद इत्युक्तेब्रह्मणेनाथस्कंदोवक्तुंसमारभे ७६ स्कंदउवाच शृणुधावहितः साधोसंवादमृषिध
र्मयोः परंपरागतंयद्वैतच्छृणुष्वयथातथा ७७ मदीयवचसात्वंवैश्रुत्वाचैवस्करवीभव मदीयनिकटेचैवसदातिष्ठ
स्कंदेनवै ७८ नारदउवाच इतिश्रुत्वावचस्तस्यततस्तंनिकटेस्थितः ७९ ९ ९ इतिश्रीपद्मपुराणेक

रवीरमहात्म्येनारदमार्कंडेयमहामुनिसंवादेषट्पंचाशत्तमोध्यायः ५६ ६ ६ सूतउवाच पांडवः शीलसं
पन्नः सत्यवान्विजितेंद्रियः सर्वभूतहितः साधुधर्मपुत्रोयुधिष्ठिरः १ जितोदुर्योधनेनासौधूर्तैर्निर्वासितःपु
मान् समंपार्थैर्ययावत्तंद्वादशाब्दवनेचरन् २ गतकामोबभौराजावनेसिंहादिसेवितेः श्वापदैर्विविधाकारैःशा
र्दूलैर्मृगकुंजरैः ३ पुरान्निर्गच्छतस्तस्यजनाःपुरनिवासिनः रुरुदुःशोकसंपन्नाचक्रुदुःखेनदुःखिताः ४ क
रुणापूरसंपूर्णानगरेकुलयोषितः कुररीरिवचाक्रोशोरुदंसाः खगहेपुनः ५ पुरात्राजागतोदूरंश्रेयोर्थीचध्वनत्र
तः गजस्यपुरतः स्थित्वाप्यंत्रांतव्यंत्रधोमुखः ६ वत्सद्राज्यंपुरात्तंपुनर्यास्यतिनिश्चितं कालप्रतीक्षणंकार्यंसत्य
संधेनधीमता ७ इतिखानांवचः श्रुत्वावनंयातोयुधिष्ठिरः वनंप्रतिगतंश्रुत्वाऋषयोयोगवित्तमाः ८ आगताद्र
ष्टुकामास्तंधर्मपुत्रंयुधिष्ठिर येवसंतिकुरुक्षेत्रेगंगाद्वारेचसंगमे ९ अन्येष्वपिचतीर्थेषुवनेषुगहनेषुच गौतमोगाल
वोगार्ग्यः कश्यपश्चांगिरस्तथा १० याज्ञवल्क्योवसिष्ठश्चभृगुर्नारदएवच पराशरोमुनिश्रेष्ठस्तथावैजकुरेवच ११

१५५

कर॰ म॰ बंधुश्चैवस्कबंधुश्चविप्रबंधुस्तथैवच द्वैपायनोगोपायनोलोपायनमुनिस्तथा १२ एतेचान्येचबहवोराजानंद्रष्टुमागताः
अर्घ्यपाद्यैश्चसंपूज्यमधुपर्कादिभिःक्रमात् १३ क्षमापयित्वातान्सर्वान्प्रणिपत्यपुनःपुनः उवाचाथमुनिश्रेष्ठान्धर्मो
धर्मपरायणः १४ वनेप्रविष्टोभद्रंनोधर्मज्ञाय्वक्तुमर्हथ तीर्थानियानिपुण्यानिवेदशास्त्रविशारदाः १५ वंचानि
मुनिभिर्यानितानिशंसंतुसुव्रताः इतितस्यवचःश्रुत्वाधर्मयुक्तंसमान्वितं १६ ऋषयोनारदस्यास्यपश्यतस्तरसु
रंजसा ऋषीणांज्ञातवृत्तांतोनारदोभगवान्स्वयं १७ प्रत्युवाचनरश्रेष्ठंधर्मपुत्रंयुधिष्ठिरं नारदउवाच तीर्थानि
कथयिष्यामिशृणुष्वैकाग्रमानसः १८ वाराणसीमहातीर्थंमहादेवाधिष्ठिता तत्रस्नात्वानरोराजन्मुच्यतेब्र
ह्महत्यया १९ प्रयागमतुलंतीर्थंयत्रदेवोहिमाधवः कल्पवृक्षाश्चतत्रास्तेगंगायमुनसंगमे २० तस्मिंस्तीर्थेच
राजेंद्रस्नात्वाविष्णुपरंव्रजेत् नैमिषंचातुलंतीर्थंतत्रनैमिष्यवीर्यत २१ ब्रह्मणास्थापितायत्रमुनीनांपश्यतां
सदा नरनारायणौस्तत्रसर्वपापहरस्थितः २२ तत्रस्नात्वाहरिंदृष्ट्वासर्वज्ञोजायतेक्षणात् गयातीर्थंमहातीर्थं

221

पितृणांप्रीतिवर्धनं २३ तत्रपिंडप्रदानेनतृप्यंतिपितरोध्रुवं विख्यातंचकुरुक्षेत्रंयत्रदानानिनित्यशः २४ कुर्व
तिनरनार्योवात्यन्यस्मादेयतत्रहि प्रभासंकथितंतीर्थंशंभुस्तत्रप्रतापवान् २५ नित्यंतिष्ठतिदीनानांदोषाणाम
नुपत्तये तत्रस्नात्वानरोराजन्कृतार्थःपुण्यकृद्भवेत् पुष्करंपरमंतीर्थंयत्रदेवःस्वयंविभुः तंत्रपूज्यचसर्वोपि
परांसिद्धिमवाप्नुयात् २७ विमलेशंमहातीर्थंतत्रदेवोमहेश्वरः गौर्यासहविवाहंवैचक्रेविमलमुत्तमं २८ तत्र
स्नात्वाशिवंदृष्ट्वासौभाग्यमतुलंभवेत् अट्टहासमहातीर्थंवसिष्ठस्यकमंडलुं २९ दृष्ट्वाहरेणापतितमट्टहा
सःकृतस्तदा तेनशंभुश्चकारेणमट्टहासाभिधानकं ३० तत्रस्नात्वानरोराजन्नपुनर्भवतामियात् युधिष्ठि
रउवाच त्वयानारदचोक्तानिविख्यातानीहभूतले तानितीर्थानिपुण्यानिमहासौख्यकराणिच तत्रतत्रयदिमेव
सतिस्यात्ज्ञास्यतीहममसर्वविचेद दूरचारसुमुखेनकौरवास्तेनतत्परतरंचदस्वनः ३३ विधिसंज्ञमुविप्र
धरोमहान्यत्रतिष्ठतिमहत्परिसेव्यः तत्पुरोवदमुनींद्रसुव्रतश्रीमहेश्वरसमीपकेस्थितं ३४ तीर्थवर्यनि

७६

कर∙म चयोर्हियोभवेत्सारतांगतइतीवानिश्चितः तंरूपापरिमुक्तेनचेतसान्नृहिनोनिखिलतोषकृद्भवः ३५ विंध्यपर्व
तपुरः पुरोहियान्यत्युत्तमानिपरिसेवितानिचे सागरांतभुविसंस्थितानिनोन्नृहितत्वपरिकोविदोभवान् ३६
श्रुत्वापांडवभाषितंमुनिवरोजातोत्कलाद्युध्मकेभ्राजन्वकुमिवोडुयोह्युडुगणेचंद्रेमुनीनांमहान् संबोध्येनमवो
चप्रभूमिपवरंसंसारपंकाविलं कारुण्यामृतपूरपूरितदृशापश्यन्मुरः संस्थितं ३७ नारदउवाच यानिदु
र्गेषुदेशेषुकांतारगहनेषुच तानिसर्वाणिवक्ष्यामितनराजान्युधिष्ठिर ख्याततीर्थवरंपुण्यदेवदानववंदितं से
वितंमुनिसिद्धैश्चतीर्थकोटिभिरावृतं ३९ पंचविंशतिसाहस्रंतीर्थानांसमुदाहृतं तत्रस्थितस्यतेकालंस्वल्पा
यांस्पतिपांडव ४० गोकर्णप्रवरंतीर्थसमुद्रांतेव्यवस्थितं तत्रासौरावणः सिद्धिंकुंभकर्णश्चलब्धवान् ना
नाधर्मविबोधकाभुविगतावेदाचिरंकालतस्तस्मिन्नेयस्तुचिव्रतः स्वभवनात्प्रत्याचचारव्रतं तुष्टःसोन
दृष्टोशिवस्वनिगमान्यत्राधुनापिस्थितोदेवंतीर्थवरंतदेतदुदितंगोकर्णसंज्ञंतव ४२ त्रिकूटाख्यमहातीर्थकाम

262

लोयत्रतस्थवान् समुद्रसंन्निधौनित्यंनानासिद्धिप्रदायकं ४३ कामोठमक्षयंतीर्थकामोटस्तत्रवानुरा समाराध्यकृतं
गौरीरूपंलब्धामनोरम ४४ आराधयन्महादेवींवरंप्राप्यततः परं प्राहतांपरितुष्टात्माभवानींविश्वमातरं ४५ परि
तुष्टासिचेद्देविवरमेकंप्रयच्छमे त्रिभुवनगणितंमहत्तरेनिगमगणैर्गुणितंपरंहिरूपं तदिदमविधेहिकिंकरेयद्दिपूर्णा
करुणातवांबिके ४६ इतितस्यवचः समीक्ष्यदेवीपरितुष्टाप्रददौवरंयथेष्टं सचतंपरिगृह्यतत्परोभुविनिष्पस्यननी
मदंडवत् ४७ अतिकौतुकरूपभूषितोदद्दशोतत्क्षणमेवशंभुना निजसेवनकृत्सुरांबिकामहिमानमतुलेस्मविस्मिता
४८ नरैनतेकधाविष्णोः शरः स्वस्यपृथकपृथक् कृतभाकोटमेतद्देव्यकोटिप्रतिमेनतत् ४९ अन्यत्कोलागिरि
स्तीर्थंत्रैलोक्येपिचविश्रुतं योगियोगीश्वरीयुक्तंश्मशानंपरिगीयते नारदस्यवचः श्रुत्वाप्रत्युवाचयुधिष्ठिरः युधि
तीर्थे ष्ठिरउवाच सर्वतीर्थवरंतीर्थैर्बहुभिरावृतं ५१ यत्रालोममहादेवः स्तत्रसंतिविनायकाः आधयोव्याधयश्चैवस्त
थावेधोरुदारुणाः माकोयादिषुतीर्थेषुतदान्यतीर्थमुत्तमं ५३ स्वल्पकालाश्रितेलोकेपुरुषार्थप्रदस्तने तस्मात्तीर्थैर

कर॰ म॰ नेकैश्चपुण्यैश्चपरिवारितं ५४ विनायकैर्नोपहतंसर्ववाधविवर्जितं तत्रस्थित्वामुनीन्देवान्पूजयामिविधानतः ५५
प्रियेस्तावत्कालएवंगतोव्यर्थोविनारदैनेः किंचित्कालंविनोदेनद्रौपद्यासहभार्यया ५६ लोकपालैसर्वैःसार्धंभ्रातृभि
श्चार्जुनादिभिः द्रौपद्यासहधर्मात्माविचचालमहीतले ५७ भोगसंभोजनेनाशुरिपूणांविजयेनच विविधभोगवि
भोजनलंपटेमयितेनसमयः परिलंपटः यदिहसारतयाहृदिसंस्थितंपरमतीर्थवरंपरिसंशायपरिगण्यभूपव
चनंस्फुभद्रंहृदिचिंतयन्मुनिवरः प्रबभौपरिचिंत्यनिश्चितवरंभुविकोटितीर्थानिचयेनदृढधीः ६० नारदउवा
च प्रवक्ष्येसर्वजंतूभ्यः तीर्थमाहात्म्यमुत्तमं तीर्थसप्तशतैर्युक्तंनानासिद्धिप्रदायकं ६१ भुक्तिमुक्तिप्रदंतीर्थं
क्षेत्रंचगिरिसंस्थितं घुटिकाखड्गसिद्धानांयोगिनांसंश्रयासनं ६२ जपादिधर्मसक्तानांदेवतार्चनकारिणा
दंभलोभविहीनानांमदक्रोधप्रजापुनः स्थानंमहत्तरंतद्धिप्रसितंमुनिभाषितं हिताहराज्ञितानगायेप्रपन्ना
महेश्वरं ६४ वेतालनीलजंघैश्चराक्षसैः परिसेवितं पिशाचभूतयोगींद्रसिद्धचारणसेवितं ६५ सप्तकल्प

स्थितंदिव्यंसंज्ञाभिश्चपृथक्पृथक् पूर्वकामालयंनामपश्चात्पद्मगिरिस्तथा ६६ शिवालयंततःपश्चाद्ब्रह्माख्यं
यायथाभवेत् पुनर्यक्षगिरिश्चासीद्राक्षसानामतत्परं ६७ सप्तमेतुपुनःकल्पेनाम्नाकोलापुरीतथा नास्तितीं
तीर्थराजस्यसमंतीर्थमिहकुत्रचित् ६८ युधिष्ठिरउवाच अहोनारदतीर्थस्यमाहात्म्यंसमुदाहृतं अत्याश्चर्यकरं
त्रैलोक्येनवाकथितंपुरा ६९ कथंवाआगतंतुभ्यंरहस्यंपापनाशनं यथातथ्येनसर्वंहिवक्तुमर्हसिनारद ७० ना
रदउवाच प्रवक्ष्येनिखिलंतुभ्यंयथापूर्वंश्रुतंमया कैलासशिखरेरम्येनानाधातुविचित्रिते ७१ तत्रासीनस्तु
भगवानुमयासहितःप्रभुः विविधवस्तुविचित्रपाषाणैर्हिमवतस्तनयांपरितोषयन् निजचरित्रविचित्रतया
बभौभुवनमंडलपालनलंपटः ७२ स्तुवंतिनिजगणवृंदेसेवनसंपादितेमरानंदे वंदितपादारविंदेनिरवि
लभवछेदनेमंदे ७३ एषोदेव्यानिखिलजनमानातापसंततीशांत्ये संप्रीत्यानागिरिवरकृतामंजुलैर्वाक्प्र
पूरैः ७४ नानातीर्थेषुपुण्यप्रचुरतरगुणंतीर्थमेतत्प्रशस्तं ब्रह्माद्यैरपिसेवितंचदिविजैर्यन्भुक्तिमुक्तिप्रदं ७५

क.र.म. दैवेनकथितंदेवैर्देव्याः स्कंदस्यभाषितं कुमारस्यतेपिनापिकुमारश्चमयाश्रुतं ७६ ततेहंकथयिष्यामिशृणुराज
युधिष्ठिर किंतेस्तुबहुभिस्तीर्थैर्गंगासागरसंगमे ७७ शृणोतिपरयाभक्त्यापुराणंशिवभाषितं वक्तानुमोद
कोवापिपालकस्तस्यमोदकः ७८ मुच्यतेसर्वपापेभ्योशिवलोकंसगच्छति नारदस्यवचः श्रुत्वासत्येहंकरुणा
न्वितं ७९ युधिष्ठिरमुवाचेदंभक्त्यानत्वाकृतांजलिः कस्मात्वामालयाज्ञातंततः पद्मालयंकुतः ८० कथं
शिवालयंचैतत्कथंब्रह्मगिरिस्मृतं कुतोयस्तुगिरिर्भूयोराक्षसानांकथंद्विज ८१ कस्मात्कोलागिरिश्चासीद
तदिच्छामिवेदितुं त्वयानिगदितंतीर्थंसर्वजविधिविस्तरं ८२ अधुनाकथयस्वामिन्कृपयाकरुणार्णव ८३
७ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयसंवादेसप्तपंचाशत्तमोध्यायः ५७ ७ ७ नारदउ
वाच प्रवक्ष्येनिखिलंतुभ्यंतीर्थमाहात्म्यमुत्तमं गंगादितः परंतीर्थंतीर्थैश्चबहुभिर्वृतं यत्तीर्थंहिमहाभागतत्
शृणुष्वमहामुने १ विनायकेनोपहतंसर्वबाधाविवर्जितं एवंतीर्थंचतेतुक्तंनानासिद्धिप्रदायकं सप्तकल्पस्थितं

२८५

दिव्यंसंज्ञयाचपृथक्पृथक् ३ पुरातस्मिन्शरीरेणकामः किलकृतालयः वसतिस्मिमहाराजपुत्रामात्यैश्चसंवृतः
४ तीर्थयात्राप्रसंगेनकण्वोनाममहामुनिः पृथ्वींप्रदक्षिणंकुर्वन्क्रमादिहसमागतः ५ तंदृष्ट्वामुनिमायांतं
कामोदैवेनमोहितः कृतंहास्यमविज्ञायतेनशप्तोमनीषिणा ६ सप्तरात्रात्परंराजन्यदिचात्रवसिष्यसि क्षे
यंस्कंवशंयासिसपुत्रबलबांधवः ७ तस्यशापात्परित्रस्तः कामः परपुरंजया शीघ्रंगृहीत्वाभृत्यांश्चपुत्र
दारपुरःसरः ८ उत्तरंकुरुमासाद्यसुखंतिष्ठतिनिर्भयं एतस्मिन्नंतरेराजापद्मोनाममहाबलः ९ प्रविष्टसह
सैन्येनअनुज्ञातश्चबांधवैः कल्पमेकंपुरातस्थौमुदयापरयायुतः १० तेनपद्मावतीदेवीकदाचिदवमानिता
कृतंचनगरंशून्यंपद्मराजविवर्जितः ११ तंदृष्ट्वावृषभारूढौदेवदेवौविनिर्गतौ कृतौगणचनैर्देवौक्षणात्प्राप्तौ
नरोत्तमात् १२ तस्मात्कल्पांतरेतीतेह्यन्यकार्यांतरंत्वभूत् स्वबसश्चमहातेजाब्रह्मात्विहसमागतः १३ तस्मि
न्नंतरंदृष्ट्वासेव्यंपुण्यनगोत्तमं तत्रलिंगंप्रतिष्ठाप्यनाम्नाब्रह्मेश्वरंविभुं १४ संनिधौतस्यलिंगस्यतपश्चक्रे

कर·म· चतुर्मुखः कल्पमेकंस्थितस्तत्रलिंगार्चनरतस्तथा १५ ततः सतपसातुष्टोज्ञातः सर्वमनोरथः आविर्भूयमहा
लिंगाच्छिवोदात्ब्रह्मणेवरं १६ अणिमादिगुणैश्वर्यमनसायत्प्रकल्पितं अविच्छिन्नंसदाब्रह्मन्मत्प्रसादाद्भवि
ष्यति १७ देवंवरप्रदंदृष्ट्वादेवींवचनमब्रवीत् वरंवृणीष्वभोब्रह्मन्यत्तेमनसिवर्तते १८ अनेनैवस्वरूपेणदेव्य
त्रवसतिंकुरु एवंभवतुभोब्रह्मन्स्थितातस्मिन्शिवालये १९ प्रतिष्ठाप्यमहादेवींसंज्ञांचक्रेयथार्थतः अलक्ष्मु
पहतायस्मात्लक्ष्मीर्वांप्राप्तवानहं २० महालक्ष्मीतिनाम्नात्वंख्यातादेविभविष्यति वरदासर्वसत्वानांभक्तानां
शरणांबिका २१ कल्पमेकंस्थितायस्मात्ब्रह्मातस्मिन्शिवालये तेनब्रह्मगिरिः प्रोक्तंपूर्वमासीच्छिवालय २२
दक्षिणांदिशिमास्थाययोब्रह्मगिरिसत्तमः वेदांस्तांश्चिंतयामासमोहाद्येविस्मृताःपुरा २३ धनदोनामयक्षे
द्रः क्रमात्ब्रह्मालयंगतः अतिरम्यतमंदृष्ट्वामनोज्ञंनिरुपद्रवं २४ शून्यागारंप्रसन्नंचमनोल्हादकरंशुभं
ज्ञात्वागिरिवरंरम्यंकुर्वंतिष्ठतिनिर्भयः २५ यस्माद्यक्षेश्वरस्तत्रसंस्थितोवैधनेश्वरः तद्यक्षगिरिरित्यासीद्रा

265

क्षसानांततःपुनः २६ राक्षसाकल्पमेकंतुसंस्थितानगरोत्तमे तस्माद्राक्षसनाम्नोतत्प्रथितंभुविसर्वतः
२७ राज्यंसंधा। प्राप्तवांस्तत्रकोलानाममहारौये। कल्पांतरेनिरस्याथराक्षसान्दुष्टवर्त्मनः २८ ततोदेवासु
रैर्यक्षैर्मानुषैर्मुनिभिस्तथा कोलाभिषिक्तस्तद्राज्येधर्मनिष्ठोजितेंद्रियः २९ ~~ततोदेवासुरैर्यक्षैर्मानुषैर्मुनिभि~~
स्तथा तदादिकल्पांतरसंस्थितंहिप्रियंचदेवासुरमानुषाणां पापापहंसिद्धिकरंप्रसन्नं कोलस्यदिव्यंगिरिमुत्तमं
च ३० नारदउवाच आसीद्वाराहकल्पेतुकोलोराज्येभिषेचितः ततःप्रभृतिशैलोसौनाम्नाकोलागिरिःस्मृतः ३१
विशालंचायतनंकृत्वासर्वेतत्रनिवेशिताः तत्रपुत्रशतंदग्धंत्रिभिरूनस्तुकावालं ३२ यत्रतेचात्मजाःसर्वेविशालेचा
पिनिष्ठिताः विशालंनामतत्तीर्थंलोकेख्यातंयुधिष्ठिर ३३ अन्यञ्चपृष्टेराजातेषांचैवोदकक्रियाः उत्तमंसर्वती
र्थानांकथयस्वमहामुने ३४ यस्मिन्पिंडप्रदानेनराज्यंयास्यंतिमेसुताः मुनिरुवाच तीर्थानांपरमंतीर्थमिहलोकेप
रत्रच नाम्नासप्तकुलोद्धारंत्रिसप्तकुलपावनं ३५ न्यस्ततोयंचयांकस्यजठरांतर्गलितंजलं रथेनपतितंभानो

कर॰म॰ पीउिभ्तमहद्भुतं ३७ सूर्यस्तुत्वामहात्मानमचापरुरूपमन्नतः कोल्लोपिवचनंश्रुत्वामुनेः कात्यायनस्यच ३८
स्तोत्रितंपरमेशानंजयाचेतंदिवाकरं सूर्यउवाच ब्रूहिदानवराजेंद्रकिंकर्तव्यंमयानघ कोल्लोवाच यदितुष्टोसि
मेनाथममत्वंवरदोभव यत्तुतीर्थंमहापुण्यंरहस्यंशिरसश्रुतं दीयतांतुममादित्यगमागर्भसनातनं अस्मिन्
कोल्लगिरिनित्यंसांनिध्यंभवतोयथा ४९ यथात्वयाप्रकर्तव्यंवरमेकंश्रृणोम्यहं नाम्नासधकुलोधारंदीयतां
परमेश्वर ५२ एवंभवतुतत्तीर्थतस्मिन्गिरिवरोत्तमे सान्निध्यंपरमंमेस्तुपि.दृणांपापहारियत् ५३ तस्मि
न्तीर्थेनरः स्नात्वाकृत्वापिंडोदकक्रियाः दद्याद्धिरण्यकंवस्त्रंपितृणांप्रीतिकारकं ५४ तत्रपिंडप्रदानेनपित
रस्तुर्वरप्रदाः भवंतुसर्वजंतूनांतथ्यंब्रूयाद्दिवक्षणः ५५ एवंकोल्लागिरोरम्येयेमत्ताः साधकोत्तमाः यान्तेःश्रि
वपुरंयातुत्सपरोगपासंकुलेः ४५ कात्यायिन्योवाच तीर्थंतेकथयिष्यामिदेव्यादेहोद्भवंवरं पुत्रसोभाग्यदंपुण्यं
नाशनंविघ्नपापयोः ५८ पुण्यसौभाग्यदंपुण्यमिहलोकेपरत्रच मृतवत्सातुयानारीपुत्रसोभाग्यवर्जिता ५९ न

266

तस्यांप्रेषजंकिंचित्तुस्नातुमणिकर्णिके मार्गेनष्टंमहारत्नंगत्वातस्मिन्शिवालये ५० पूर्वभागमकालेतुद्योत्स
क्याद्भुतनिर्मितं पतितंकुंडलंकर्णात्तस्मिन्शुभेशिलातले ५२ दृष्ट्वाचैवगृहीत्वावागंतव्यंनचनान्यथा देव्यास्ते
यवचः श्रुत्वागतास्तेपर्वतोत्तमं ५३ गृहीत्वातेगताः सर्वेयत्रदेवीमहेश्वरी खनितंचमहादिव्यंकृतवान्मणिमुत्तमं
५४ निवेदितंमहादिव्यंरत्नंदेव्याअतिप्रियं दृष्ट्वामणिंमहादिव्यंमहार्घ्यंयत्तुङ्गार्धिकं ५५ ततस्तुष्टामहादेवीस
र्वेषांवरदाभवत् तीर्थंचतत्कृतंश्रुत्वातेननाम्नाचकारह ५६ तस्मान्मणिमयंदिव्यंतस्मिन्लब्धंहिनष्टवान् तस्मा
द्भविष्यतेतीर्थेनाम्नावैमणिकर्णिका ५७ कार्तिकाख्येमहामासेतत्रस्नात्वाविधानतः आचम्यनियतः सम्यक्देवी
मत्स्याप्रपूजयेत् ५८ गंधपुष्पादिभिर्द्रव्यैस्ततः पश्चात्क्षमापयेत् कुंडलेश्वरसांनिध्यंकृत्वात्स्यास्तथोत्तरे ५९
गोरान्धीरानतान्श्रुत्वासंग्रामेष्वनिवर्तितान् पितातेषांचतुर्वर्णान्गोदानंकर्तुमिच्छति ६० वेदोक्तेनविधान
नेनपुत्राणांहितकाम्यया अगस्त्यमानयामासमुनिर्मुनिगणैर्युतं ६१ गोदानंकृतवान्यत्रकरवीरस्यधीमतः अ

८१

क०र०म गस्त्योभगवत्प्रीत्यापवित्रेपर्वतोत्तमे ६२ अत्रास्तागोमतीयत्रनदीपापप्रहारिणी यस्यानजायतेपुत्रोवंध्याचभवतेंगना
६३ तत्रस्नात्वालभेत्पुत्रंरूपवंतंचिरायुषं कुष्टव्याधिहरतोयरक्तस्मिन्नतीर्थेसमाहितः ६४ स्नानंसमाचरे
न्नित्यंतस्मिन्नतीर्थेसमाहितः सर्पःकंचुमिवसत्क्वात्ततोभवतिनिर्व्रणः ६५ ततोगर्भाष्टमेतस्याअगस्त्योमुनिस
त्तमः मोंजीबंधनकंकुर्यादेदृष्टेनकर्मणा ६६ तस्मिंस्तीर्थेकृतस्तस्यकरवीरस्यधीमतः लिंगेचैवतुसंपूर्णो
व्रतंसंपादितंस्तथा ६७ तस्मिन्कुंडलेश्वरोदेवोविश्वरूपोमहेश्वरः तंलिंगतीर्थमित्युक्तंदेवेलिंगेश्वरस्तदा ६८
गायत्रीजपयान्यत्र।तीर्थेषुमुनिपुंगवः गायत्रीनामतत्तीर्थलोकेख्यातंयुधिष्ठिर ६९ संध्याचकृतवान्यत्रत
तीर्थेषुसमाहितः संध्यातीर्थमितिख्यातंविघ्नपापप्रणाशनं तावत्कालांतरेदेवीरुद्रीलोकविश्रुता कुक्कुटंज
नयेत्पुत्रंकरवीरस्यधीमतः ७१ ७ ७ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवा
देअष्टपंचाशत्तमोध्यायः ५८ ७ ७ नारदउवाच ज्येष्ठंविवेकिनंश्रेष्ठंकुक्कुटंनामनामतः सत्तपोतप्यत

२६७

त्युग्रंतीर्थेदेवस्यसंन्निधौ १ कुक्कुटेश्वरइत्येवंजातोदेवोमहीतले तस्मिन्तीर्थेमहायोगीस्थाप्यलिंगमनुत्तमं २
पूजयित्वास्थितोयस्मात्तस्मिन्नारिवरोत्तमे अगस्त्येश्वरइत्येवंख्यातंतीर्थमहीतले ३ तत्रस्नात्वाशिवंपूज्यजा
यतेविमलेकुले तस्मिन्संनिहिताकोटीरुद्राणांमहाबलाः ४ तत्कोटितीर्थमित्युक्तंलोकपापप्रणाशनं तीर्थ
शुकस्यविख्यातंअतिरम्यंसुशोभनं ५ शुकतीर्थस्योत्तरेणविशालस्योत्तरेणतु वालखिल्याश्रमंपुण्यंस्नात्वा
मुच्यंतपातकैः ६ तस्यैवपूर्वभागेतुच्यवनस्यमहात्मनः तस्यैवपूर्वभागेतुच्यवनस्यमहात्मनः ७ तीर्थंपापह
रंपुण्यंतत्रस्नात्वायुधिष्ठिर मुच्यतेपातकैर्घोरैर्जन्मांतरकृतैरपि तस्यापिपूर्वदिग्भागेतीर्थंदिव्यंबृहस्पतेः ८
तत्रस्नात्वाविशुद्धात्माब्रह्मलोकेमहीयते तस्माच्चपूर्वभागेतुतीर्थंसुधोदकंविभो ९ तत्रशुध्यतिदुष्टात्मास्ना
नमात्रेनसंशयः तत्रापिपूर्वतःपुण्यरोहिणीतीर्थमुत्तमं १० यत्रसारोहिणीतेपेसौभाग्यार्थंमहत्तपः तत्रस्ना
त्वावरोराजन्यशोवान्जायतेनरः ११ तस्यापिपूर्वतःपुण्यंकुबेरस्यमहात्मनः तीर्थंधनप्रदंपुण्यंजीवंतीयत्र

क.म.

संगता १२ तस्यापिपूर्वदिग्भागेखरदूषणयोर्महत् तीर्थंपापहरंपुण्यंतत्रमुक्तिहितत्परं १३ तस्यापिपुरतोगत्वाती
र्थमंगारकस्यतु तस्मिन्स्नात्वाविशुद्धात्माग्रहपीडाविवर्जितः १४ तस्यापिपूर्वदिग्भागेतीर्थमन्यत्प्रचक्षते विश्वा
मित्रस्यतत्पुण्यंतीर्थंपापप्रणाशनं १५ तस्यापिपूर्वदिग्भागेमार्कंडेयमहात्मनः तीर्थंपापहरंपुण्यंतत्रस्नात्वा
विशुध्यति १६ ततोपिपूर्वतः पुण्यंतीर्थंत्रैलोक्यविश्रुतं अगस्त्यस्यमुनेःपुण्यंसर्वपापप्रणाशनं १७ तस्या
पिपूर्वतःपुण्यमादित्यस्यमहात्मनः तीर्थंपापहरंपुण्यंगोमतीयत्रसंगता १८ करवीरमिदंपुण्यंतीर्थंपावनं
सर्वदेहिनां भविष्यतिनसंदेहोमत्प्रसादात्तवाधुना १९ करवीरेश्वरोदेवः सर्वपापप्रणाशनः लोकानुग्रह
कर्ताचसर्वसिद्धिप्रदायकः २० पद्मासनाभियुक्तस्ययस्तंपूजयतेद्विज सिध्यतेनात्रसंदेहोमयावैकथितंत
व २१ तंदृष्ट्वापरयाभक्त्यापूजयित्वाविशेषतः मुच्यतेपातकैःसर्वैः सप्तजन्मकृतैरपि २२ यस्मिन्देशे
महातेजाः शूलेननिहतोरणे पतितोभूत्तलेश्रीमान्करवीरोमहाबलः २३ तत्तीर्थमभवद्दिव्यंशूलेननिहतो

268

ग्रयः तच्छूलकुंडमित्येवंलोकाख्यातंयुधिष्ठिर २४ तत्रस्नात्वानरोराजन्सर्वपापैःप्रमुच्यते तत्रस्नानंतथा
दानंसर्वंभवतिचाक्षयं २५ लिंगरूपेश्वरस्तत्रसर्वसिद्धिप्रदायकः तस्यकुंडस्यमध्येतुयल्लिंगंतिष्ठतेन
घ २६ अप्सरोभिःस्थापितंचविराजेचिद्रसुलभं तस्यवायव्यदिग्भागेश्रीमुखद्वारमुत्तमं २७ अलक्ष्यं
चैवतत्सर्वस्त्रीणांसंभोगकारकं जीवंतीसंवितान्वेयंनदीपापप्रणाशिनी २८ तत्तीर्थंसुखवत्पुण्यंनाम्ना
विष्णुपरच्युतं तत्रस्नात्वानरोराजन्विष्णुलोकेमहीयते तस्यापिपूर्वतोभागेचक्रतीर्थमवस्थितं चक्रंप्र
क्षालितंतत्ररक्कलिसंमहात्मना ३० तत्रस्नात्वानरोराजन्मुच्यतेसर्वपातकैः तस्मात्पुरतरंगत्वापरं
तीर्थमहद्भुतं ३१ गयातीर्थंतुयत्पुण्यंसर्वपापप्रणाशनं एवंत्रिविष्टपन्नामकुरुक्षेत्रंपरंस्मृतं ३२ त
स्यापिपुरतोगत्वाशृणुराजन्युधिष्ठिर तीर्थमाप्सरसंपुण्यंस्थितंधन्वांतरेःस्त्रिभिः ३३ धन्वंतर
शतंसाग्रंतीर्थमन्यत्प्रचक्षते तत्रवाचस्पतेःपुण्यंतीर्थंपापप्रणाशनं ३४ तत्रापिपुरतःस्थित्वाशृणुरा

जन्युधिष्ठिर तीर्थंसप्तऋषीणांतु कोटितीर्थस्यसंन्निधौ ३५ तत्रस्नात्वानरोराजन्सर्वलोकेमहीयते तस्यापि
चोत्तरेभागेतीर्थंकात्यायनस्यच ३६ दिव्यंपापहरंपुण्यंसर्वापद्विनिवर्तनं तस्यापिपुरतस्तत्रशृणुराजन्युधि
ष्ठिर ३७ तीर्थंविश्वावसोः पुण्यंसंगमस्यसमीपतः तीर्थंचान्यत्प्रवक्ष्यामिशूलकुंडस्यसंन्निधौ ३८ कपाल
स्थापितंयत्रकरवीरस्यधीमतः उत्कृत्यतुमहेशेनहितार्थंतस्यवेदृढं ३९ कपालगमनंतीर्थंकपालेश्वरसं
न्निधौ तत्रस्नात्वानरोराजन्मुच्यतेब्रह्महत्यया ४० नाशायेद्रुधिरंसर्वंकल्मषादविनिर्गतं तत्संस्पृश्यद्विजा
नीयात्तदृश्यद्धोविधीयते ४१ तत्रस्नानंजपोहोमः सर्वंभवंभवतिचाक्षयं वाराणसीइयंपुण्यंनिर्मितं
परमेष्ठिना तस्मिंस्तीर्थेमहाराजयः कश्चित्कृतसमाहितः शिवलोकेव्ययाधीरः प्राणत्यागंकरिष्यति ४३
मतः शिवपुरंगछेद्विमानेः सर्वकामिकैः अथापिचकिंवर्णितेनबहुक्तेनपुनःपुनः काश्यामर्द्धेनयत्पु
ण्यंतत्पुण्यंप्राप्यतेनरैः तत्सर्वंप्राप्यतेचेहहरशैलार्देवचाक्षयं ४५ श्रीनदीतत्रविख्यातानदीपापप्रणा

शिनी हेमपंकजसंछन्नासिद्धकुंडाद्विनिर्गता ४६ सिद्धकुंडेनरस्नात्वाह्यर्चयेत्परमेश्वरं सर्वपापविनिर्मु
क्तः शिवलोकेमहीयते ४७ तत्रैवपूर्वतः पुण्यंतीर्थंपापप्रणाशनं सोमेश्वरंचविख्यातंतत्रासोत्तपवीस्त
पः ४८ तत्रस्नात्वानरोराजन्सोमलोकेमहीयते तीर्थंचान्यत्प्रवक्ष्यामियत्रवैश्वानरः स्वयं ४९ तप्तवा
न्सुमहातेजाअग्नितीर्थंतदुच्यते तत्रस्नानंप्रकुर्वीतह्यग्निकार्यविशेषतः कुष्टरुग्विनिर्मुक्तः चाग्निलो
कमवाप्नुयात् सिद्धतीर्थंपुराप्रोक्तंसर्वपापप्रणाशनं ५१ तत्रस्नात्वादिवंयातियमराजभयाभ्रशं लिंग
तीर्थमितिख्यातंसर्वपापहरंपरं ५२ तत्रस्नात्वानरोराजन्अश्वमेधफलंलभेत् तस्यापिपश्चिमेभागेती
र्थंविघ्नविनाशनं ५३ तत्रस्नातस्यराजेंद्रविघ्नशांतिर्भविष्यति मल्लालपामितिख्यातंमलापहरणंपरं ५४
विश्रुतंत्रिपुलोकेषुसुवर्णपंकजान्वितं तत्रस्नात्वामहालक्ष्मीयः पश्यतिनरः सकृत् ५५ दुःखदारिद्र्यनि
र्मुक्तः सर्वान्कामानवाप्नुयात् शिवशक्तिस्तुविज्ञेयालोकानुग्रहकारिणी ५६ दृष्ट्वायातितथैश्वर्यंसर्वं

सर्वेपिमानवाः महाशक्तिर्महामायासर्वलोकहितैषिणी ५७ मांयेपश्यंतिमनुजाः तेनयांतिपराभवं विंद
न्तिचतथाभुक्तिमुक्तिंचैवनसंशयः ५८ वायव्यांलिंगतीर्थस्यनाम्नावैघटकेश्वरं तत्रस्नात्वानरोराजन्मुच्य
तेसर्वपातकैः शिवलोकमनर्घेणाविमानेनसगच्छति ५९ स्थानेश्वरंमहापुण्यंतीर्थंत्रैलोक्यविश्रुतं तत्र
स्नात्वानरोराजन्मुच्यतेसर्वपातकैः ६० तस्मात्तीर्थंहुतंजप्यंसर्वकोटिगुणंभवेत् इदंतीर्थपरंचान्यंना
म्नावैचोत्तरेश्वरं ६१ जीर्वंत्याउत्तरेतीरेगौतमोनापिपूजितं कृतोपवासंसंपूज्यसर्वपापैःप्रमुच्यते ६२
सर्वान्कामानवाप्नोतिचोत्तरेश्वरपूजनात् नाम्नापंचनदीतीर्थंसर्वपापहरंपरं कश्यपोगालवोगार्ग्योवसि
ष्टश्चमहामुनिः विश्वामित्रोमहातेजाः पंचनद्याः प्रवर्तकाः ६४ अपित्वाचचरुंतत्रभक्षयित्वायथेष्ठ
या संनिधौपंचनद्यास्तुपरांसिद्धिंचतेगताः ६५ श्रीनदीचैवगंगाचशिवाकुंभीसरस्वती एताः पुण्या
तमान्नित्यंपंचनद्याः प्रकीर्तिताः ६६ तीर्थपंचनदीतुल्यंनभूतंनभविष्यति तत्रस्नानजपोहोमोब्राह्मणानांचत

र्पणं ६७ कर्तव्यंविधिवद्भक्त्याभुक्तिमुक्तिफलार्थिना भद्राकुंभीशिवानांचतिसृणांचैवसंगमे ६८ स्नात्वावैव
नरोराजन्मुच्यतेसर्वपातकैः प्राणान्परित्यजेद्यस्तुतिसृणांसंगमेबुधः ६९ कांचनप्रभवैर्यानैर्मत्तोविष्णु
पुरंव्रजेत् शिवलोकान्ब्रह्मलोकान्नागलोकांस्तथैवच ७० तपोजनमहासत्यसर्वलोकनिवासिनः भुवो
लोकान्चभूर्लोकांस्स्कंदलोकांस्तथैवच ७१ अचलाहिमवान्मुख्याः कल्पवृक्षादयोनगाः स्नातुंप्रयागमा
यांतिमाघेमास्यरुणोदये ७२ दिव्यंगनाःपार्थयंतियत्प्रयागानिलानपि तेपिनःपूतयिष्यंतिकिंकुर्मः
पंगवोवयं अश्वमेधादियागाश्चप्रयागस्यरजःपुनः तुलितंब्रह्मणापूर्वंनतेतद्रजसासमाः ७४ धर्म
तीर्थमिदंसम्यगथतीर्थमिदंपरं कामिकंतीर्थमेतच्चमोक्षतीर्थमिदंध्रुवं ७५ ब्रह्महत्यादिपापानितावत्ति
ष्ठतिदेहिषु यावन्मज्जंतिनोमाघेप्रयागेदक्षिणेपरे ७६ कुंभीचैवारजोरूपातमोरूपाशिवालयं भद्रा
चसत्वरूपायेनयंतिब्रह्मनिर्गुणं ७७ इयंवेणीहित्रिश्रोणीब्रह्मणोवर्त्मयास्यतः जंतोर्विशुद्धसत्वस्य

श्रद्धाभक्त्यापुलस्त्यच ७८ पापीनांयांतिपापाणिप्रसह्यक्षालितान्यहो लब्धुंद्धौसेव्यतेतीर्थैः प्रयागोदक्षि
णोखिलैः ७९ प्रकृष्टसर्वयोगेभ्यः प्रयागोहियोहिदक्षिणः लभतेपुण्यसंभारैर्नान्यथार्थशतैरपि ८०
यत्राक्षय्यवटोप्यस्तिसप्तपातालमूलवान् प्रलयेयंसमारुह्यमकुंडलनयोवसेत् ८१ हिरण्यगर्भोविज्ञे
योयंसाक्षाद्विष्णुरूपध्रुक् तत्समीपेद्विजान्भोज्यजायतेयक्षपुण्यभाक् ८२ यत्रलक्ष्मीपतिः साक्षाद्वै
कुंठादेत्यतिष्ठति श्रीमाधवस्वरूपेणप्रयागेदक्षिणेचिरं ८३ माहात्म्यंचास्यविज्ञायकरवीरपुरस्यवै आ
गत्यसंस्थितश्चात्रप्रयागःपुण्यवर्धनः ८४ पूर्वमासीत्प्रयागाख्यंकुंडमेवयथाश्रमं स्कंदतीर्थस्यतत्रास्ति
गंगाभिःप्लाविततलः ८५ अस्मिन्याम्यप्रयागेवैयसेवंतिनरोत्तमाः तेषांपुण्यप्रवक्तुंनसहस्रवदनः
प्रभुः ८६ स्कंदतीर्थेनरःस्नात्वापूजयित्वाषडाननं मताः शिवपुरीयांतिस्कंदतीर्थप्रभावतः ८७ त
स्यैवपूर्वतःपुण्यंतीर्थमत्यद्भुतंश्रृणु कंदर्पेणपुराप्रोक्तंतीर्थरूपप्रदंपरं तत्रासौतप्तवान्पूर्वंकृत्वाराज्य

मकंटकं ८८ तीर्थंतेकथयिष्यामिअलक्ष्मीविघ्ननाशनं यत्रासौतप्तवान्पूर्वंसिद्धिदोविघ्ननायकः ८९ त
द्विघ्ननाशनंतीर्थंलोकानांचहितावहं ५९ ॥ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयम
हामुनिसंवादेनवपंचाशत्तमोध्यायः ५९ ॥ ॥ नारदउवाच तीर्थंतेकथयिष्यामिनाम्नावैत्रिपुरां
तकं योगिन्यः संगतास्तत्रकिंचित्कार्यंचिकीर्षया १ तीर्थंविनिर्मितंतत्रयोगसिद्धिप्रदंपरं यत्रयोगेश्व
रंतीर्थंतस्यदेवस्यसंनिधौ २ यत्रयोगीभवेत्क्षिप्रंयोगाभ्यासरतस्त्वयः अन्यदप्यद्भुतंतीर्थंयत्स्पष्टंब्र
ह्मणापुरा ३ हितार्थंसर्वजंतूनांनाम्नावैऋणमोचनं तत्रस्नात्वाचदृष्ट्वाहैस्वर्णलिंगसंनिधौ ४ मु
च्यतेसऋणैःसर्वैः सप्तजन्मकृतैरपि ऋणैर्मुक्तश्चपापेभ्योब्रह्मलोकेमहीयते ५ अयोनिसंभवान्ना
मनिर्मितंलोककर्तृणा तत्रस्नात्वाशिवंदृष्ट्वानयोन्यांजायतेपुनः ६ तत्रपित्नमुखंकृत्वादद्याधेनुशतं
पुनः सौवर्णराजतंवापिनयोन्यांजायतेनरः ७ कुरभयमिदंतीर्थंत्रिषुलोकेषुविश्रुतं वृषभस्यक्षुरोभग्नो

क॰ म॰ यत्रतस्येश्वरस्यहि ८ स्नानदानरतोयस्तुसर्वपापैः प्रमुच्यते शिवलोकंसमाप्नोतिमृतस्तस्मिन्नरोत्तमः
९ मात्मणांपरमंतीर्थंकपालेश्वरसंन्निधौ उत्तरस्यांनरस्तत्रस्नात्वापापैप्रमुच्यते १० रुद्रतीर्थंमहापु
ण्यंशिप्रालीयत्रलब्धवान् गोदानस्यसहस्रंवैइहजन्मप्रभावतः १२ ब्रह्महत्यागतास्तत्ररुद्रस्यापिमहात्म
नः तत्रस्नात्वाततोगच्छेच्छिवलोकंसनातनं १२ तीर्थमन्यत्प्रवक्ष्यामिनाम्नानागेश्वरंपरं गंधपुष्पंबलिंत
त्रनागानांशंकरस्यच १३ पंचरात्रंप्रकुर्वीतनचदंशंतिपन्नगाः तीर्थंदेवकृतंपुण्यंनाम्नारुद्रमहालयं १४
तत्रस्नात्वानरोराजन्रुद्रलोकेमहीयते सन्निमित्तंप्रवक्ष्यामितीर्थंत्रैलोक्यविश्रुतं १५ करवीरहतेपूर्व
भूमौनिपतितेसदा कृतः कोलाहलोदेवैः परितुष्टैर्महाहवे १६ तन्निमित्तमिदंतीर्थंनाम्नाकलकलेश्व
तत्रस्नात्वाचकृत्वाचदेवानांवल्लभोभवेत् १७ रामलक्ष्मणयोस्तीर्थंनिर्मितंपापनाशनं पुण्यंजगत्त्रयेख्यातं
नाम्नारामेश्वरंपरं १७ तत्रस्नात्वाविशुद्धात्मामुच्यतेब्रह्महत्यया तत्रैवराक्षसंतीर्थंसुकेशोयत्रतस्थवान् १८

272

तत्रपिंडप्रदानेनयास्यंतिपितरोगतिं उपोष्यरजनीमेकांपुत्रदायान्वितस्तथा १८ लभतेविपुलान्भोगान्पैशा
च्यंचापिगच्छति पश्चिमेरामतीर्थस्यसीताकुंडमहत्तरं २० तत्रस्नात्वानरोराजन्सर्वपापैः प्रमुच्यते तस्यै
वचोत्तरेभागेहनुमत्तीर्थमुत्तमं २१ स्नानदानरतानांवैहनुमान्सर्वदास्थितः हनुमांस्तपवान्यत्रजितक्रो
धोजितेंद्रियः २२ तत्रस्नात्वानरोराजन्सोपवासोजितेंद्रियः मुच्यतेपातकैः सर्वैः पुनर्योनौनजायते २३
तत्रैवविद्यतेचान्यद्ब्रह्मतीर्थमनोरमं ब्रह्मेशलिंगसंयुक्तंसर्वपापप्रणाशनं तस्यैवपश्चिमेभागेपिंगलेती
र्थमुत्तमं पिंगलेश्वरसंयुक्तंमहापापहरंपरं २४ पिंगलानामवेश्यावैयत्रमुक्तातिकिल्बिषात् तत्तीर्थस्नान
मात्रेणपुनातीदंजगत्त्रयं २५ तीर्थमन्यत्कथिष्यामिनाम्नापापप्रणाशनं तत्रशंकाविनिर्मुक्तोजातोसौ
परमेश्वरः २६ तत्रस्नात्वाविशुद्धोभूत्तेनपापप्रणाशनं तत्रस्नात्वापितॄणांचदत्वास्वर्गेमहीयते २७ त
तः कालांतरेब्रह्मन्समृद्धोजायतेकुले वेदवेदांगतत्वज्ञोभवेजातिस्मरोनरः २८ तीर्थमन्यत्प्रवक्ष्यामि

कृ.म. महापातकनाशनं इंद्रःपुरकिलावृत्रंहत्वासंग्राममूर्धनि २९ ब्रह्महत्याविशुध्यर्थंतस्मिन्तीर्थेस्करोत्तमः
बहुधाचतपस्तप्त्वापरांसिद्धिमवाप्नुयात् ३० अमीवनाशनंनामतीर्थमासीत्पुराहितं इंद्रेणाथकृतंय
स्मात्तस्तत्पनिहुस्तरं ३१ इंद्रकुंडमितिख्यातंतस्मादमीवनाशनं इंद्रतीर्थेनरः स्नात्वापूजयित्वामहेश्व
रं ३२ सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् तीर्थमन्यत्प्रवक्ष्यामिनाम्नावैवरुणालयं ३३ देवानांचसु
राणांचसंग्रामोह्यियदाभवेत् नीतंतदासुरैः सर्वंजलंक्षेत्रगतंपरं ३४ प्रार्थितस्तुयदादेवैर्वरुणोहिजला
धिपः तत्रासौतप्तवान्पूर्वंमूर्तिमान्वरुणस्तपः ३५ क्षीराब्धेरानयामासवारिपूर्णंतपोबलात् आनीय
चान्यतीर्थानितीर्थंचक्रेतिपावनं ३६ तदादेवाःप्रहृष्टास्याः तीर्थंतद्वरुणालयं नाम्नातस्यैवसंचक्रु
र्वरुणेशविभूषितं ३७ तत्रस्नात्वानरोराजन्स्वर्गलोकेमहीयते महालयस्यतत्रैवतीर्थंपरमदुर्लभं ३८
तत्रस्नात्वाविशुद्धात्माशिवलोकेमहीयते वृषभावसतेतत्रस्वर्नदीपापनाशनी ३९ नचाहंतुविशेषेण

273

पवित्रंतज्जगत्त्रये सतत्रस्नात्वानरोराजन्शिवलोकेमहीयते ४० तत्कृतंचाश्विजेमासिजपदानस्करार्च
नं सन्निधोहिमहाकल्पात्तदक्षय्यंभवेत्फलं ४१ तत्रैवतीर्थमाख्यातंधर्मराजस्यपावनं यमकुंडमितिख्या
तंदिव्यंपापहरंपरं ४२ तत्रस्नातस्ययोदेवंपूजयित्वाविधानतः नपश्येद्वदनंघोरंयमस्यासौकदाचन ४४
तत्रतीर्थंपुनर्वक्ष्येकेदारंनामपावनं कार्तिकस्यतुमाघस्यपौर्णमास्यांसमाचरेत् ४५ तपोनिरंतरंमासंब्र
ह्मचर्यसमान्वितः कृत्वास्नानंविधानेनकुर्याद्ब्राह्मणभोजनं दद्याद्गोभूमिथुनंशुक्लंविधिवद्धंकरस्यच हे
मंदद्यात्तथावस्त्रांश्रृणुतस्याथयत्फलं मोक्षंतुलभतेक्षिप्रंरुद्रलोकेमहीयते तत्रैवरुक्मिणीकुंडंविष्णो
र्यत्प्राणवल्लभा तत्रतीर्थेनरः स्नात्वाविष्णोर्भवतिवल्लभः विष्णुलोकेवसेन्नित्यंविष्णुतुल्यपराक्रमः ४९
अथान्यत्परमंतीर्थंविष्णुकुंडमितीरितं तस्मिन्तीर्थेनरः स्नायात्एकादश्यांविशेषतः ५० विमुक्तःपा
तकैः सर्वैर्विष्णुलोकेमहीयते तत्रैवपुष्करंनामतीर्थंत्रैलोक्यविश्रुतं ५१ ब्रह्मणानिर्मितंपूर्वंपवित्रंपाप

१८८

क· म· नाशनं पुष्करेयत्फलंस्नात्वातत्रतत्सकलंभवेत् ५३ तीर्थमन्यत्प्रवक्ष्यामिबलभद्रस्यपावनं द्वादश्यामा
चरेत्स्नानंतीर्थेतत्राजितेंद्रियः ५४ सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते शंखचक्रगदापाणिर्यथाविष्णुस्त
थैवसः ५५ दशकोटीतिविख्यातंतीर्थपापप्रणाशनं तत्रस्नात्वाशुचिर्भूत्वादत्वादानंविशेषतः ५६ गोहि
रण्यंतथैवाज्यंवस्त्रंचलवणादिकं धान्यंचैवगुडंचैवदशकोटिफलंलभेत् ५७ निवर्तनमिताम्भूमिंद्रोण
त्रयमितास्तिलाः निष्कत्रयंसुवर्णंतु धान्यंसप्रस्थमात्रकं ५८ सूक्ष्मवस्त्रद्वयंचैवगुडंप्रस्थत्रयंभवेत्
सार्धकारिद्वयंव्रीहीन्लवणंसार्धखारिकान् ५९ निष्कषट्कैमितंरौप्यंदशदानेमितःपुरा नाम्नासरस्व
तीकुंडंअन्यत्तेकथयाम्यहं ६० तत्रस्नानंचदानंचहोमंकृत्वायुधिष्ठिर मेधावीवेदसंपन्नस्त्विहलोकेपर
त्रच ६१ सर्वेभवेन्नरःश्रेष्ठतीर्थस्यास्यप्रभावतः गायत्र्याश्चापिवैतीर्थंतत्रैवकथयाम्यहं ६२ विश्वा
मित्रस्यजातावैयत्रसिद्धिसुपावनी तत्रस्नात्वानरोनित्यंगायत्रीजपतत्परः ६३ लभेद्ब्रह्माद्वितीयंसती

274

र्थस्यास्यप्रभावतः अन्यदहंप्रवक्ष्यामिसावित्रीकुंडमुत्तमं ६३ नारीणांचनराणांचस्नानसौभाग्यदंपरं नाम्ना
भृंगिरिटीकुंडंप्रवक्ष्यामिमहत्तरं ६४ यत्स्पर्शोकोभवेद्देहोभुक्तंचापिनजीर्यते तत्रस्नात्वातुषण्मासंभवेद्व्या
धिविवर्जितः ६५ दृढःशरीरतेजस्वीरुद्रस्यानुचरोभवेत् कथयिष्येपरंतीर्थंतारकंनामनामतः ६६
तारकंचोपदिष्टंवैयत्रास्तितारकेश्वरः तत्रस्नात्वानरोराजन्उपवासःपरायणः ६७ दानंदत्वायथाशक्त्या
पूजयित्वामहेश्वरं पुनर्नजायतेघोरेसंसारेनरकेक्वचित् ६८ स्वर्गद्वारमितिख्यातंनराणांपापनाशनं त
त्रस्नात्वाजपंकृत्वादानंदत्वाद्विजायते ७० स्वर्गलोकेवसेन्नित्यंपुनरागत्यभूमिपः तीर्थमन्यत्प्रवक्ष्यामि
मोक्षद्वारमितीरितं ७१ तत्रस्नात्वाजपेन्मंत्रंवेदसिद्धांतनिर्मितं महासिद्धिप्रदंपुण्यंजीवेद्वर्षशतंद्विजः
स्ततश्चलभतेमोक्षंभोगान्भुक्त्वाखिलान्नरः बाणाख्यंनामविख्यातंतीर्थपापप्रणाशनं ७३ तत्रस्नात्वाशु
चिर्भूत्वाअर्चयेत्परमेश्वरं बाणाख्यासंस्थितंदेवंसर्वसिद्धिप्रदंशुभं ७४ पूजयित्वामहादेवंशिवलोकेस

गच्छति यन्मयाकथितंराजन्सुपवित्रंपापनाशनं ७५ शिलाकपाटदुर्भेद्यमसाध्यंत्रिदशैरपि लभ्यतेदेवदे
वेशप्रसादाच्छंकरस्यतत् ७६ महालक्ष्म्याप्रसादेनयदेतच्चाप्यतेनरैः करवीरेपुरेनित्यंसत्यंसत्यंवदाम्य
हं ७७ तत्रैवचांबिकातीर्थंपावनंसर्वदेहिनां तस्मिन्स्नात्वाशुचिर्भूत्वाशिवलोकेमहीयते ७८ तत्रैवचा
परंतीर्थंशंखतीर्थमितीरितं तत्रस्नात्वानरोराजन्नप्सरोभिः समोदते ७९ विमानैर्गच्छतिस्वर्गंसर्वाभ
रणभूषितः भूतेश्वरमितिख्यातं सर्वपापप्रणाशनं ८० भूतानिनिवसंत्यस्मिन्पिशाचाराक्षसैः सह स्था
पिताब्रह्मणापूर्वंवरंदत्वामनोरमं ८१ पुण्यंकुंडमितिख्यातंयदासीत्पूर्वमद्भुतं स्नात्वापूतानिभूतानिस्थि
तानितत्रसर्वदा ८२ भूतकुंडमितिख्यातंतस्मात्तदतिपावनं गंधपुष्पासनासम्यक्योभूतेश्वरपूजकः
८३ भूतकुंडेषुचिस्नात्वानभवेत्प्रेतयोनिषु अन्यच्चपरमंतीर्थंकपोतंनामविश्रुतं ८४ स्नानंकृत्वाजपंहो
मंब्रह्मलोकेमहीयते मल्लितीर्थमितिख्यातंगणेदैवेमहोत्सवे ८५ तस्मिन्कालेसमागत्यततोदेवोजनार्दनः

चकारमल्लुतीर्थंतुलोकख्यातंलोकख्यातंयुधिष्ठिर ८६ स्वर्णपंकजाक्रांतिनानाद्विजमनोरमं तस्मिंस्तीर्थे
नरः स्नात्वामहालक्ष्मींप्रणम्यच ८७ दत्वाजस्रायथाशक्त्यादेवताचलभोभवेत् ईदृशंतुपरंतीर्थंनाम्नावेता
लयंविदुः ८८ तस्मिन्किलमहादेवोयदाकल्पंव्यवस्थितः उपोष्यभगवद्भक्त्यातेनप्रेतालयंस्मृतं ८९ तत्रो
पवासनंकृत्वासंपूज्यपरमेश्वरं पुनर्नजायतेदेहः प्रेतयोनौकदाचन ९० लोकेचविदितंतीर्थंअनंदंनामना
मतः तत्रस्नात्वार्चयेद्देवंशंखचक्रगदाधरं ९१ ब्राह्मणान्भोजयेत्पश्चात्ततोदद्याच्चदक्षिणां अनेनविधिना
यस्तुयः कुर्यात्तीर्थसेवनं ९२ कृतकृत्योनरोभूत्वाविष्णुलोकेमहीयते वृषनादंतुनाम्नावैशूलकुंडस्यसं
निधौ ९३ तत्रासौतत्ववान्पूर्वंवृषादेवः खयंतपः वृषनादंतुतत्प्रोक्तंश्वेतलिंगंचशोभनं ९४ तत्रस्ना
त्वानरोराजन्जायतेस्करनायकः विमुक्तः पातकैः सर्वैरुद्रलोकेमहीयते ९५ तस्यापिचोत्तरेभागेष्ट
पुराजन्युधिष्ठिर आदित्यस्यपरंतीर्थंआदित्यस्तप्तवांस्तपः ९६ सर्वपापहरंदिव्यंसर्वव्याधिविनाशनं॥

९७

क॰म॰ तत्रस्नात्वानरोराजन्जायतेदिव्यरूपधृक् व्रजेच्चभास्करंलोकंमनोरमं अन्यच्चपरमंतीर्थंकामतीर्थमि
तीरितं ९८ यत्रासीत्तपसावान्पूर्वंकामदेवोमहातपः नानासिद्धिप्रदंपुण्यंसर्वमंगलवर्धनं ९९ तत्रस्नात्वा
भवेद्विप्रोमेधावीमंगलान्वितः अन्यच्चपरमंतीर्थंचक्रतीर्थमितीरितं १०० दैत्यावैनिहताःसर्वेसंख्येचक्रे
णविष्णुना यत्रप्रक्षालितंचक्रंतज्जातंचक्रतीर्थकं १ तत्रस्नात्वाचदत्वाचपुमान्नार्हतियातनाः प्रवक्ष्येद्य
तुलंतीर्थंश्रीतीर्थमितिचश्रुतं तत्रस्नात्वानरोराजन्सर्वत्रसुभगोभवेत् अन्यत्कुल्यवरंतीर्थंमुत्तागणाकृ
तंपुरा ३ योगिनीतीर्थंपूर्वेणतत्रस्नात्वाशुचिर्भवेत् ४ शृणुराजन्प्रवक्ष्यामिश्मशानंकेनहेतुना सत्यस्मिंव २
हवोदग्धाःलक्षकोटिसहस्रधाः ५ ज्ञात्वासर्वंचमुनिभिःश्मशानंपरिकीर्तितं प्रमाणंतस्यवक्ष्यामिक्षेत्रस्या
मिततेजसः १०५ ६७ ६७ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेषष्टितमो
ध्यायः ६० ६७ ५ पंचक्रोशमितंक्षेत्रंपवित्रंपरमंस्मृतं तत्राप्यतिपवित्रंहिपंचायतनसंज्ञितं १ रक्षि

276

तंक्षेत्रपालैश्चयथातथ्येनवेष्टथक् गणाध्यक्षोमहातेजानायकोविघ्ननायकः २ कृतःसहस्रैःद्वात्रिंशैःपूर्वद्वा
रेसुरक्षितेः दक्षिणेरक्षतेद्वारंवेतालोभीमनायकः ३ सार्धसहस्रेस्त्रिंशाद्भिः सोपिदेवोविनायकः नाम्ना
पंचशिखोयोगीसर्वभूतनमस्कृतः ४ वायव्यामग्निरुद्रस्तुपरिवारणसंयुतः रक्षतेसततंयोगीतस्मिन्द्वारेव्य
वस्थितः ५ वेतालमुत्तरेरक्षेत्ज्वालाजिह्वेनविश्रुतः दीर्घग्रीवोमहाकायःशिवेनप्रेरितोमहान् ६ ब्रह्मस्था
नंहरिर्ब्रह्माशिवोराक्षन्तिसर्वदा अनलंनामविख्यातंतीर्थंचंडेश्वरस्यतु ७ तत्रस्नात्वाशुचिर्भूत्वाचंडेश्वरपु
रंव्रजेत् १ बुधांमारकयोस्तीर्थंअंतर्वेद्यास्तुदक्षिणे ८ तत्रस्नात्वानरोराजन्ग्रहपीडाविवर्जितः रूपवान्ध
नवान्वीरःकुलेमहतिजायते ९ द्वादश्यांबुधयुक्तायांबुधतीर्थेसमाहितः स्नानंसमाचरेत्तत्रमहापुण्यमवा
प्नुयात् १० अंतर्वेद्यांतुसकृत्स्नात्वामुच्यतेसर्वपातकैः अंतर्वेद्याःप्रमाणंचशृणुसर्वविशेषतः ११ अंगुली
यकतीर्थस्ययावत्पूर्वंतुपर्वते द्वाभ्यामंतेचयत्तोयंगच्छतेतुबलाबलं १२ अंतर्वेदीतितत्प्रोक्तंतत्रस्नानसमा

क॰म॰ चरेत् तत्रस्नानंकृतंजप्तंसर्वंतच्चाक्षयंभवेत् ९३ अंतर्वेद्यांसुपुण्यायांस्नात्वापापैःप्रमुच्यते अन्यच्चोत्तंप्र
वक्ष्यामितीर्थंवेदोत्कटकंविदुः ९४ सिद्धिदंसर्वलोकानांसर्वपापप्रणाशनं कार्तिकेसततंस्नात्वाविप्रांश्चैवतुभो
जयेत् ९५ कृत्वाचैवंविशेषेणशिवलोकेमहीयते शुक्रस्यपरमंतीर्थंतत्रस्नात्वायुधिष्ठिर ९६ मुच्यतेस
र्वपापेभ्योशुक्रस्यानुचरोभवेत् गंगाचपरमंतीर्थंसर्वेषांकलियोगिनां ९७ आनीतासामहेंद्रेणतीर्थैर्देव
ताभिःसह आनीताविष्णुनापूर्वंलोकानांहितकाम्यया ९८ तत्रस्नात्वानरोराजन्सर्वतीर्थफलंलभेत् ती
र्थंकिंपुरुषंनामकृतंकिंपुरुषैःसह ९९ तत्रस्नात्वाव्रजेत्स्वर्गंयत्रकिंपुरुषालयं गंधर्वतीर्थंतत्रैवस्नात्वा
मुच्येतपातकैः २० यक्षतीर्थंमहाराजधनदोयत्रलब्धवान् तदाख्यानंमहापुण्यंतत्रस्नात्वायुधिष्ठिर २१
धनदोजायतेश्रीमान्धनदानुचरोभवेत् अन्यच्चपरमंतीर्थमस्तिविद्याधराह्वयं २२ तत्रस्नात्वाविशुद्धा
त्माविद्याधरपुरंव्रजेत् तस्यैवचोत्तरेभागेशुभोन्यग्रोधपादपः २३ शोभनश्चविशालश्चअनाद्यंतोविष्णु

277

हरिः पापहासाधकेंद्राणांस्थापितोविष्णुनापुरा २४ कल्पवृक्षइतिख्यातः मुक्ताभीष्टप्रदायकः अक्षय्य
वटरूपुरुः क्षेत्रस्यास्यचरक्षकः २५ सिद्धिदः सर्वलोकानांसाधकानांविशेषतः अग्निरुद्रस्यतत्तीर्थंसन्निधौ
तत्रविद्यते २६ तत्रस्नानंचदानंचसर्वंभवतिचाक्षयं स्नानंकृत्वाजपेद्रुद्रान्नवम्यांशुक्लकृष्णयोः २७ गंध
पुष्पादिभिःपूज्यवृक्षंसंधायशिवपरः निश्चितंहिलभेत्सिद्धिंसाधकस्तुनसंशयः २८ तस्यभक्तिश्चयःकु
र्याद्देवाश्चैवविशेषतः तस्यसिद्धिर्भवेच्छीघ्रंराजंस्तेकथितंमया २९ मुच्यतेसर्वविघ्नेभ्यःसप्तजन्मकृतैरपि
शृणुचान्यत्प्रवक्ष्यामितस्यनैऋत्यसंस्थितं ३० तीर्थंपापहरंपुण्यंनाम्नावाराणसीस्मृतं सर्वपापहरंपुण्यं
ब्रह्महत्याविशोधनं ३१ तत्रस्नानंचदानंचसर्वंभवतिचाक्षयं पितृपापहरंपुण्यंपिंडदानात्तथैवच ३२
कृत्वाहिरण्मयंश्राद्धंपितृणामनृणोभवेत् तीर्थंवाराणसीचेदंकाशिकुंडमितीरितं ३३ यत्रस्नात्वानरोरा
जन्दृष्ट्वाविश्वेश्वरंतथा सर्वपापविशुद्धात्माकृतकृत्योभवेन्नरः ३४ अन्यत्तत्रचतीर्थंवैस्थितंलक्ष्म्याःसु

कु. म. मीपतः नाम्नायोगेश्वरंदेवंसर्वपापप्रणाशनं ३५ सर्वसिद्धिकरंदिव्यंयोगसिद्धिप्रदायकं तंदृष्ट्वातुनरोराज
न्सिद्धयोगीश्वरोभवेत् ३६ तस्यापिदक्षिणेभागेयोगेशस्यतुसंनिधौ नाम्नाकनककुंडंवैसर्वपापहरं
परं ३७ सप्तभास्करवारेषुयोनरःप्रयतःशुचिः स्नानंसमाचरेत्तत्रविधिवद्विजितेंद्रियः ३८ पंचरत्नं
क्षिपेत्तस्मिन् कुर्याद्ब्राह्मणभोजनं सुभगोदिव्यदेहस्तुदिव्यास्थानव्यवस्थितः ३९ गच्छेच्छिवपुरंदिव्यंस
र्वपापविवर्जितः अथान्यत्संप्रवक्ष्यामितीर्थमप्सरसांपरं ४० तत्रस्नात्वानरोराजन् अप्सरोभिःसमीरते
गोरंभानामयादेवीतत्तीर्थंपापनाशनं ४१ तत्रस्नात्वानरःसर्वंलभतेवांछितंफलं तीर्थमन्यत्प्रवक्ष्यामि
नाम्नाकपिलतीर्थकं ४२ देव्यास्तुपश्चिमेभागेसंस्थितंपापनाशनं मुनिर्वैकपिलोयत्रतपस्तेपेमहातपाः
४३ तीर्थस्याग्नेयभागेतुकर्दमेश्वरसंज्ञितं तस्यदर्शनमात्रेणप्राजापत्यफलंलभेत् ४४ तीर्थस्यदक्षि
णेभागेकर्दमेशाच्चपश्चिमे देवहूतीश्वरंलिंगंदर्शनात्सर्वकामदं ४५ मात्रेचकथयामासपरब्रह्मापिनिर्मलं

278

महातापसस्तस्यसंतुष्टोहिमहेश्वरेः ४६ स्वयंसमागतस्तत्रभवान्यासहितःपुरा तुष्टोहंतापसाब्रह्म
न्वरंकामयसुव्रत ४७ तत्वयापेक्षितंकिंचित्श्रीविष्णुरूपधारिणी तथाप्यहंवरंदास्येलोकानुग्रहकारणात्
४८ इत्युक्तःपरमप्रीतोवरंवव्रेमुनीश्वरः स्थिरोभवत्वमात्रैवसगणोममसंन्निधौ ४९ दिव्यरूपधरोभक्
त्यालोकांस्तारयदर्शनात् तीर्थेपिमामकेधेहिस्वनदीमूर्ध्निसंस्थितं ५० तीर्थेचमामकेस्नात्वायोमांपश्येत्त्व
यासह यमबाधाविनिर्मुक्तोयातुविष्णोःपरंपदं ५१ इत्थंवृतोमहादेवःकपिलेनमहात्मना सर्वम
स्तत्थेषुकारयंतत्रैवसंस्थितः ५३ उमामहेशरूपेणपर्श्वयोःस्तस्यसंस्थितः संस्थितंहिहरंदृष्ट्वा
गणैःसर्वैः समंततः ५४ संस्थितःसर्वदानॄणांदर्शनस्पर्शनादिभिः नंदिस्कसंस्थितस्तत्रपूर्वतःकपि
लेश्वरात् ५५ तस्यदक्षिणभागेपिस्थितोविघ्नेश्वरोमहान् पूजितःसकलान्कामान्विघ्नान्हंतिनसंशयः
५६ तस्यैवदक्षिणेभागेनृसिंहोभक्तवत्सलः विद्यतेसकलानरः पूजितःसकलार्थदः ५७ उत्तरेसं

कृ॰म॰ संस्थितस्तत्रभोगस्वामीफलप्रदः प्रार्थितश्चोमयादेव्याविवाहार्थीषडाननः ५८ मयूरपृष्ठमारुह्यधावमानोगतस्त
दा मयूरश्च ततः श्रांतोधर्मंवैमुक्तवान्बहु ५८ सामयूराभिधागंगाज्जातावैलोकपावनी स्वामीमयूरकोना
मस्थितस्तत्रैवसंगमे ५९ मयूराख्येमहातीर्थेतत्रवायव्यसंस्थिते पूर्वकुंडंस्थितंतत्रमयूराख्यंयुधिष्ठिर ६०
प्लावितंपंचनद्यावैमयूरीःसंगमेमहत् तीर्थमेवपरापूतंततोगंगातिपावनी ६१ संगताचमयूर्यावैतस्माद्गं
गाधिकंपरं तीर्थमेतन्मयूराख्यंपावनंस्नानदानतः ६२ मयूरस्वामिनंपश्येत्तीर्थेस्नात्वातदीयके सर्वपाप
विनिर्मुक्तःशिवलोकेमहीयते ६३ पुनश्चप्रार्थितोदेव्याविवाहार्थेयदातदा कपाटान्निर्गतःस्कंदोगिरिवैसं
न्निधौततः ६४ स्कंदतीर्थमभूत्तत्रवालखिल्यस्यसंन्निधौ कपाटस्वामिनंपश्येद्यःस्नात्वास्कंदतीर्थके ६५
संसारबंधनिर्मुक्तःशिवलोकेमहीयते कार्तिक्यांकृतिकायुक्तःशिवयोगोयदाभवेत् ६६ स्कंदत्रयमिदं
प्रोक्तंतदापश्यतियोनरः सप्तजन्मसुविप्रेंद्रोजायतेधनसंयुतः ६७ वेदशास्त्रकलाविज्ञश्चांतेशिवपुरंव्र

279

जेत् दंडकाष्टंचकौपीनमुपवीतंतथैवच ६८ मौंजीचतिलकंचैववस्त्रयुग्मंसमर्पयेत् पूजयेदुपचारैश्चस्वा
मित्रयमतंद्रितः ६९ ब्राह्मणांश्चापिसंपूज्यप्रागुक्तंफलभाक्भवेत् कपिलेशस्यचाग्नेयांस्थितःसोमेश्वरो
महान् ७० पतितश्चंद्रमौलेस्तुमस्तकाशीघ्रगामिनः कपिलेशावरंदातुंभागतस्याविशांपते ७१ गंधपुष्पा
दिनायस्तुसोमेशंनित्यमर्चयेत् सकामःसकलान्कामान्निष्कामोमोक्षमाप्नुयात् ७२ भृंगीश्वरःस्थितःस्त
त्रवायव्येकपिलेश्वरात् पूजितःसर्वदान्नृणांदर्शनात्पापनाशनः ७३ तस्यनैरृत्यकोणेतुनृसिंहःसंस्थितो
महान् आगतश्चतपोद्रष्टुंकपिलस्यमहामुनेः ७४ नरसिंहंतुयःपश्येत्संपूज्यविधिपूर्वकं संसारशोकनि
र्मुक्तोगच्छेद्विष्णोःपरंपदं ७५ ईशान्येसंस्थितःस्तत्रजटाजूटेश्वरःपरः स्वापितस्वर्नदीकुंडेजटामुक्ताह
रेणवै ७६ जटाजूटेश्वरोजातोयत्रैकापतिताजटा जटाजूटेश्वरंयस्तुपूजयेद्भक्तिसंयुतः ७७ लभतेपर
मैश्वर्यंमहादेवप्रसादतः एवंसर्वगुणैर्युक्तोमहेशःस्तत्रसंस्थितः स्वाप्यभागीरथीगंगातीर्थेवैकपिलामि

क॰म॰ धे तीर्थेवैकपिलेस्नात्वाय:पश्येत्कपिलेश्वरं उमामहेशसंयुक्तंनयातियमयातनां नभस्येमासिषष्ठ्यांवैक
पिलायांन्तपोत्तम ८० तीर्थेस्मिन्कपिलेस्नायात् तस्यपुण्यमनंतकं दशायोगयुताषष्ठीकपिलाख्यायदाभवे
त् ८२ स्नातव्यंयदियङ्गस्यात्तीर्थेकपिलनामनी विदित्वाचतथाभूतांषष्ठींवैकपिलाभिधां ८३ क्षेत्रेभ्यो
पिसमागत्यस्नातव्यमिहमानवै: कपिलायांतथाषष्ठ्यांनस्नायादिहयोनर: ८४ तस्यजन्मगतंव्यर्थंपापि
नोनहिसंशय: षष्ठीयंकपिला॰लोकेप्रसिद्धापापनाशनी ८५ क्रतुकोटिसमाह्येषा॰ तीर्थायुतसमात
था अयुतंकपिलानांवैयोददातिद्विजोत्तमे ८६ तत्फलंसमवाप्नोतिस्नात्वातीर्थेतुकापिले रत्नकोटिसह
स्राणिदत्वायत्फलमश्नुते ८७ कपिलायांनर: स्नात्वातीर्थेतत्कपिलेभवेत् करवीरगतेचास्मिन्तीर्थेवैकपि
लाभिधे ८८ कपिलायांतुय: स्नात्वातत्पुण्यंकेनगण्यते जन्मजन्मार्जितंपापंसंचितंयत्सदाजनै: ८९ ती
र्थेवैकपिलेस्नात्वातत्सर्वंप्रविलीयते षष्ठ्यांय: कपिलायांवैतीर्थेस्मिन्कपिलाभिधे ९० गरवीरगतेस्नाया

त्सलभेद्वांछितंफलं विधिवद्योनर: स्नायात्तीर्थेस्मिन्कपिलेवरे ९१ तस्यपुण्यंप्रवक्तुंचसहस्रवदन:
प्रभु: योनर: श्रद्धयायुक्त: करवीरेविधानत: ९२ तीर्थेस्मिन्कपिलेकुर्याद्व्रतंकपिलषष्ठिजं सर्वसिद्धिप्र
दंचैवसर्वपापप्रणाशनं ९३ सलभेद्वांछितंसर्वमैहिकामुष्मिकंफलं ९४ ५ ५ इतिश्रीपद्मपुराणे
करवीरमाहात्म्येनारदमार्कंडेयमहामुनिसंवादेकपिलेश्वरमहिमावर्णनंनामएकषष्ठितमोध्याय: ६१
युधिष्ठिरउवाच सर्वपापक्षयकरंसर्वदारिद्र्यनाशनं तद्व्रतंवदविप्रेंद्रकृपयाममसुव्रत १ विज्ञेयाचक
थंषष्ठीकपिलालक्षणंविना अतस्तल्लक्षणंब्रूहिविधिनासहितंमुने २ नारदउवाच षष्ठीभाद्रपदेक
कृष्णारोहिणीपातसंयुता कपिलानामसाप्रोक्ताभानुभौमेनवायुना ३ मृगशीर्षेगुरौशुक्रेरवांतौहस्ते
रवौस्थिते एवंदशात्मकंयोगोगरजाकरणंयदि ४ उपप्लवेशीतभानुभान्वोरर्धोदयेवाकपिलाख्यष
ष्ठ्यां नवाविरोपेनचमोव्यदोषेनचाधिमासेनचसूतकंस्यात् ५ आसाद्येवंमहाषष्ठिंकपिलांनरपुंगव

गत्वावैकपिलेतीर्थेकपिलेश्वरसंनिधौ ॥ ६ व्रतमेतत्प्रकर्तव्यंषष्ठीकपिलसंभवं सूर्यमंडलमध्यस्थंविष्णुमुद्दिश्य
पाक्तितः ७ प्रातरुत्थायसंकल्पमेवंकुर्यान्नराधिप निराहारोद्यदेवेशत्वद्भक्तस्त्वत्परायणः ८ पूजयिष्याम्य
हंभक्त्यात्वारर्णांतवभास्कर इतिसंकल्प्यराजेंद्ररथंकुर्याद्धिरण्मय ९ अनुरुणाचसंयुक्तामश्वैसप्तभिरन्वितं विष्णु
मूर्तिसमाक्रांतंभानुमंडलशोभितं १० तामादायनरःस्नात्वातीर्थेस्मिन्कपिलाभिदे कुंकुमंचैवचोशीरंदेवदा
रुःमनःशिला ११ पत्रकंपद्मकंचैवषष्टिमध्वाज्यसंयुतं उद्वर्त्यतेनसर्वाणिगात्राणिमंत्रपूर्वकं १२ स्ना
याच्चकपिलेतीर्थेकुशगोमूत्रगोमयैः शुचौदेशेष्टपत्रंचैपद्ममालिख्यकुंकुमैः १३ तत्कर्णिकासुसंपूज्यदे
वताभास्करादयः भास्करस्तपनश्चैवखगःपूषागभस्तिमान् १४ मार्तंडार्कस्तमित्राद्याःपूज्येतादेवताक्र
मात् मध्येसंपूजयेद्विष्णुंसूर्यमंडलमध्यगं १५ सौवर्णरथमारूढंगंधपुष्पादिभिःक्रमात् ध्येयंचापिमु
मुक्षूणांनिर्वाणमपियोगिना १६ मार्तंडमंडलंश्रीमन् गृण्हात्वर्घ्यमिमंपरं सवित्रेनेनदत्वार्घ्यंजप्त्वासौर

मनुक्रमात् १७ नैवेद्यंपायसंदत्वाशर्कराघृतसंयुतं तांबूलंदक्षिणायैश्चतोषयित्वाविधानतः १८ ततोहो
मंप्रकुर्वीतसमिच्चर्वकपर्वभिः अष्टोत्तरशतंद्रव्यैराकृष्णेनेतिमंत्रतः स्वर्णनिर्मितांधेनुंसवत्सांचसदक्षि
णां संपूज्यविधिवद्भक्त्याब्राह्मणायनिवेदयेत् २० ततस्तुकपिलांसाक्षात्सवत्सांशुभलक्षणां स्वर्णशृंगींरौ
प्यखुरीताम्रपृष्ठींसदक्षिणां मुक्तापुच्छांकांस्यदोहांदद्याद्वेदविदेहिगां कपिलेसर्वदेवानांपूजनीयासिरो
हिणी तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमे नमस्तेकपिलेदेवीसर्वपापप्रणाशिनी २३ संसारार्णवमग्
नांभोमातस्त्रातुमर्हसि सावित्रींप्रभुवस्तुश्चेगोदानफलदायिनी १२४ इत्यादिप्रायविदुषेकपिलांजनपा
वनीं रात्रौजागरणंकुर्याद्गीतवादित्रमंगलैः २५ ततःप्रातःसमुत्थायनित्यकर्मविधायच इत्यादिप्रायतां
मूर्तिंस्वर्णरथनिर्मितां २६ ब्राह्मणान्भोजयेत्पश्चात् भूरिदानैःप्रतोष्यच अनेनविधिनाषष्ठिंकपिलांकरवी
रके ॥ २७ ॥ तीर्थेयःकपिलेकुर्यात्सपुण्यफलंश्रृणु अश्वमेधसहस्राणिवाजपेयशतानिच २८ स्नाय

कृ॰ म॰ फलमाप्नोति सतस्याष्टगुणं भवेत्॥ तस्मात्कुरुष्वभूपालषष्टीकपिलनामका २९ प्राप्स्यसे त्वं स्वराज्यं च अंते वि
ष्णुमवाप्स्यसि कपिलाख्यस्य तीर्थस्य करवीरगतस्य च ३० माहात्म्यं न मया वक्तुं शक्यते नरपुंगव यत्र संस्नानमात्रे
पायमयातनभागपि ३१ हरिदूतैर्दिवं नीतं कलिंदो नाम दुर्जनः युधिष्ठिर० कः कलिंदो महाप्राज्ञ किं कृतं तेन
पातकं ३२ याम्यं च यातनं तेन किं वा भुक्तं महामुने कथं वा हरिदूतैश्च दिवं नीतो मुने यथा ३३ तत्सर्वमेव दस्वा
मिन् कृपया परया भवान् पीतात्त्वमुखांभोजच्युतं तीर्थकथानकं ३४ न तृप्तिमधियात्यंग मनो मे तीव सादरं
नारद उवाच ब्रह्मबंधुः कलिंदाख्यो भ्रूणहा गुरुतल्पगः ३५ स्तेयी सुरापो मित्रध्रुक् सर्वपापयुतः सदा॥
वृषलीपतिरस्पृश्यो दर्शनात्पापदो नृणां तस्य पापानि सर्वाणि चित्रगुप्तेन मानद ३७ ।लिखितान्निपटेनेक्षत्त
दंतं हि महामतिः कदाचित्पर्यटन्पापः कानने कुटिलः शठः ३८ अन्यैश्च बहुभिर्व्याधैर्वधार्थं प्राणिनो बहू
न् क्षुत्तृष्णामार्दितः पापो मध्याह्ने तु प्रपीडितः ३९ जलमाकांक्षमाणो गात् कपिलं तीर्थमुत्तमं निमः स्वे

ददुष्टांगः पपौ तोयं सुनिर्मलं ४० उषित्वाश्वत्थमूले तु मुहूर्तं नृपसत्तम कपिलेशं विलोक्याथ नृसिंहं च तदग्रतः
४१ देवकन्या महाभागा नरसिंहं भयापहा नीराजनैरर्चयंती कोटिशः कमलाननाः ४२ ताभिः समर्पितं भक्त्या
नैवेद्यं षड्रसान्वितं विलोक्य तदाहारार्थी ह्यपश्यन्हरिपूजनं ४३ नरसिंहस्य देवस्य सहस्राभिः प्रमाणतः
पापघ्ने परितः क्षेत्रे विचचार इतस्ततः ४४ विलोक्य सकलं पूजां कृत्वा देव्या विनिर्गताः अभक्षयंश्च नैवेद्यं
हृतात् धृत्वा समर्पितं ४५ स्वनिवासगतो गेहं भारभूतो भुवो निशं तस्यैवं वर्तमानस्य वर्षपूगान्बहून्यथा आ
गतो मृत्युः स्फुरत्खड्गकरालवदनः प्रभुः चित्रगुप्तः स्वकान्दूतान्प्रेषयामास तत्क्षणात् ते समागत्य तं दुष्टं नि
बध्य पाशैर्भृशं नीत्वा यमालयात् पर्यपातयामास करम्भके ४८ मुद्गरैर्बहुधा ताड्य रौरवे योजितो यदा तदा
तीर्थप्रभावेन हरिर्नाम जजाप सः ४९ तच्छ्रुत्वा खिद्यमानस्य हरिर्नाम मुखांबुजात् शंखचक्रगदाहस्ता वि
ष्णुदूताः क्षणाद्ययुः ५० प्रसभं यमदूतांश्च संताड्य भृशपीडितं समारोप्य विमानाग्र्ये कलिंदं चाथ निर्ग

क॰ म

ता: ५१ पापोयमितिजल्पंतंचित्रगुप्तंचप्रष्टत: कुतोस्यपातकंचेतिविष्णुदूता: समब्रुवन् ५२ विलोक्याशु
दुर्बुद्धेचित्रउ गुप्तपटंतव किमस्यपातकंचेतिदर्शयास्माकमोजसा ५३ विष्णुदूतैश्चसंपृष्टश्चित्रगुप्तसुखा
स्तदा इत: स्तत: पटंसर्वंविलोक्यभ्रशापीडित: ५४ कलिंदेनकृतंपापंलिखितंहिपटेमया नांतंतस्यविजा
नेहंगणयंहिममाज्ञया ५५ अथास्मिंश्चपटेसौम्याबहुधाचित्रितेमया निरीक्षतेपिबहुधारेखामात्रंनदृश्य
ते ५६ विष्णुदूता: पुन: प्रोचुश्चित्रगुप्तंविलज्जितं चित्रगुप्तमहाबाहोलिखितानित्वयापटे ५७ अक्षराणिन
दृश्यंतेदृश्यतेकिंनिरीक्ष्यतां ओमित्यादेशमादायपुनरेषमहामति: ५८ ददर्शतत्रदेशेनालिखितंयन्महाम
ते अनेनयत्कृतंपापंब्रह्महत्यादिकंबहु ५९ तत्सर्वंविलयंयातंजन्मांतरगतंतथा प्रसंगेनतथातीर्थेकपिले
चनिमज्जनात् ६० दृष्ट्वातत्कौतुकंराजन्चित्रगुप्तोगृहंययौ निर्भर्त्स्यचततस्तंतु विष्णुदूता: पुन: पुन: ६१
कलिंदंचसमादाययर्युवैकुंठमंदिरं तस्मात्कपिलतीर्थस्यमाहात्म्यंपरमाद्भुतं ६२ शक्यतेनमयावक्तुंशास्त्रको

283

टिशैलेरपि दक्षिणेतुविशालस्यास्थितोगिरिवरोत्तम: ६३ यत्रतावग्निरुद्रौतुक्षेत्रपालौव्यवस्थितौ निर्मितं
ब्रह्मणातत्रतीर्थंवैबिंदुसंज्ञितं ५४ शतबिंदुकोटिबिंदुबिंदुसाहस्रसंयुतं एकैकंबिंदुमादायतीर्थेभ्य: सर्व
शश्चिरं ६५ निर्मितंबिंदुतीर्थंतत्पवित्रंपापनाशनं तस्मिंस्नात्वाविशुद्धात्मासर्वतीर्थफलंलभेत् ६६ अथान्य
त्परमंतीर्थंवराहंनामविश्रुतं गिरिंगलसमीपेतुदक्षिणांदिशिमाश्रितं ५७ तत्रस्नात्वानरोराजन्जायतेसि
द्धिसंयुत: मुच्यतेसर्वपापेभ्य: तस्यादेव्याप्रभावत: दृष्ट्वाचदानवान्सर्वान्रुद्रोदेवै: समाहित: संतोषंगत
वांस्तत्रतीर्थंतत्कृतवान्परं ६९ कलामेकांस्थितास्तत्रयतोदेवोमहेश्वर: तत:तिपवित्रंवैजातंतत्तीर्थमुत्तमं
७० तत्रस्नात्वानरोराजन्रुद्रस्यानुचरोभवेत् दीर्घग्रीवोमहाकायोवेदविद्भीमविक्रम: ७१ तस्मात्तीर्थं
महापुण्यंतत्रस्नात्वाविशुध्यति बिभीषणत्रिजटयोस्तत्रतीर्थद्वयंपरं ७२ तत्रतप्तंतपोयस्मात्ताभ्यांतदतिपा
वनं तत्रस्नात्वाविशुद्धात्मानगच्छेद्यमसंसदंतु ७३ अविमुक्तंपरंतीर्थंयत्कृतंशंभुनापुरा एकंवर्षशतंयावत्

रेवदेवेनधीमता ७४ अविमुक्तेश्वरंनामलिंगंचापिप्रतिष्ठितं अविमुक्तंस्मृतंतेनसर्वपापहरंपरं ७५ तत्र
स्नात्वाविशुद्धात्माशिवलोकेमहीयते अन्यच्चपरमंतीर्थंब्रह्मावर्तमितिस्मृतं ७६ आगत्यपंचभिर्मंत्रैस्नातःक्रि
लमहेश्वरः कुर्यात्तत्रपितॄणांवैपिंडदानोदकक्रियाः ७७ पितरस्तस्यतुष्यंतिदेवाअपिभृशंतथा गंगायांपिं
डदानेनगयायांचतथैवच ७८ यत्फलंलभतेमर्त्यस्तत्फलंसकलंभवेत् तस्यपूर्वोत्तरेभागेकोटितीर्थस्यसंनिधौ
७९ भगोस्तीर्थमितिख्यातंसर्वतीर्थसमुच्चयः तत्रस्नात्वानरोराजन्मुनीनांजायतेकुले ८० श्रुतंचार्थद
यंचान्यत्कोटितीर्थस्यसंनिधौ वीणातीर्थमितिख्यातंसर्वपापप्रणाशनं तत्रस्नात्वानरोराजन्ब्रह्मलोकंव्रजे
त्परं तस्यापिपूर्वतश्चासीदुज्वलंतीर्थमुत्तमं ८२ समृद्धंसर्वतीर्थानांनानापुण्यकरंपरं दुर्गमंसिंहशार्दू
लैः सेवितंत्रिदशैरपि ८३ तत्रस्नात्वानरोराजन्दृष्ट्वाचपरमेश्वरं मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति
८४ कृष्णपक्षेत्रयोदश्यांअष्टम्यांवासमाहितः पूजांयःकारयेद्देव्याः सभोगीजायतेनरः ८५ अथान्यत्सं

प्रवक्ष्यामिजीवंत्याःपूर्वतस्स्थितं नाम्नानागालयंपुण्यंसर्वपापप्रणाशनं ८६ तत्रस्नात्वानरोराजन्पंचम्यांतुसमा
हितः पूजयेच्चसदाभक्त्यानागान्विद्विवराम्सहं ८७ नविषैर्बाध्यतेसोपिसर्वैश्चापिनदृश्यते जीवंतीपश्चिमंती
रंश्रीनद्याः पूर्वतस्थितं ८८ एतत्पुण्यप्रदंवीक्ष्यब्रह्मणाकथितंपुरा करवीरपुरश्चैतत्कात्यायिन्याग्रहंतथा
८९ तत्रस्यानिर्गतापुण्यजीवंतीदेवनिर्मितं नागतीर्थंसमासाद्यकोलासुरगिरिस्तथा ९० वहतेमृतरूपावै
रसायनसमन्विता तत्क्षेत्रनिर्मितंपुण्यंमृत्युनामुक्तिदंपरं ९१ तद्विष्णोःपरमंयांतिपदंक्षेत्रमृतानराः ती
र्थेवैकरवीराख्येसत्यंसत्यंवदाम्यहं ९२ जीवंतीभुक्तिदाचैवमृतानांचैवमुक्तिदं करवीरपुरंनान्यन्नभूतंन
भविष्यति ९३ युधिष्ठिरउवाच सप्तकल्पसमाख्यातंविस्तरेणमयानघ अधुनाकथयस्वामिन्सेतिहासंवि
शेषतः ९४ कोलापुरकथांपुण्यांत्वद्वक्त्रांबुजनिसृतां पुनातिसकलंलोकंमयासहमुनीश्वरः ९५ ६५
॥ ६५ ॥ इतिश्रीपद्मपुराणेकरवीरमाहात्म्येनारदमार्कंडेयमाहामुनिसंवादेद्विषष्टितमोध्यायः ६२ ६५

कर॰ म॰ नारदउवाच पुरेतस्मिन्स्वरूपेणकामःकिलकृतालयः वसतीहमहाराजन्पत्न्यापत्न्यासहैवच १ ततद्या
पिदेवेशोविदेहंकुरुतेतनुं तदासौसहपत्नीभिः सभ्यस्यवल्लबांधवः २ वसतीहमहाप्राज्ञदृश्वरेणपुराजि
तः अद्यापितत्कृतंसर्वंसर्वकामप्रदंभुवि ३ रूपंकृतंहिराजेंद्रकथयिष्यामितेनघ कैलासपर्वतेदक्षाम
लयेमेरुपर्वते ४ आनीताः कामदेवेनक्रीडार्थंचात्मनः स्तथा पारिजातकवृक्षाणांसगिरिर्वेष्टितोवनेः ५
कर्पूरागरुवृक्षाणांतिलकानांसमान्वितं नारिंगैर्नारिकेलैश्चपुन्नागैर्नागकेसरैः ६ चंपकैर्बकुलैर्बिल्वैर्मु
चुकुंदैः समाहितः अश्वत्थैश्चवनिंबैश्चकदंबैः कदलीवनैः ७ बिभीतकैः कपित्थैश्चमल्लिकानांवनेकु
चित् शालतालैस्तमालैश्चखर्जूरार्जुनचूतकैः ८ बिभीतकैः कपित्थैश्चमल्लिकायुथिकावनैः प्रवालाशो
कचंदैश्चकुंदैकनकचंपकैः ९ एतैश्चान्यैश्चबहुभिः व्याप्तमासीन्नगोतमः कोकिलारावसंघुष्टोहं
सकारंडवादितैः १० चक्रवाकस्वनैरम्यैर्मयूरस्वननादितैः एवंनगोत्तमेरम्येकामस्तिष्ठतिलीलया १२

सहरत्यातथापत्न्यासखयान्वखयंसखी कालेगतेबहूनितत्रमहेश्वराज्ञासंप्रेरितोमुनिगणात्किलएवना
म यत्राभिषेणानिखिलंप्रपुनानएषपुण्याभुवविचरतीवविवेशातत्र ः १३ प्रदक्षिणीकृत्यभुवंमहामतिः
कण्वोहिनामामुनिपुंगवाग्रणीः दृष्ट्वाद्रुमैश्चित्रफलैः प्रकीर्णगिरिंहिनुष्टंपरिविस्मितंपुनः अतिरम्यैः स्क
शोभैश्चस्वर्गमार्गेप्रतिष्ठितैः वृक्षैरमीभिः सत्याहोनागएषविराजते नगविलोकनचंचलस्लोचनोमुनि
वरोन्मुदमाषमहायशाः अपरमेरुरिवेहविशोभतेविविधशाखिविभूषणभूषितः तत्रस्थान्परिपप्रच्छमुनिर्जा
तमहोत्सवः केनेदंरचितंत्वत्रस्वर्गलोकस्थितेद्रुमैः वचनंनिशम्यस्कभत्त्वांहिमुनेः परिवासिनोगिरिवरे
त्यवदंस्तदाते: निखिलंहिकामकृतमेतदभूदितितत्पुरः प्रणतिनम्रगिरः स्थापतिर्निवसतिचिरंकामदेवो
त्यजस्त्रंनिर्मायैः तद्विविधफलैपादपोश्चात्रपुष्पैः मेरोश्शृंगागिरिशागिरिनश्चापिनायरैमेशानापरिवृतःसे
वितश्चाप्सरोभिः तेषांवचः समाधिगम्यमुनिः परमापविस्मयमुपेत्यपुरः अधुनामयात्त्वभयामेतदहोकि

कर॰ म॰ लब्धकः पदत्तयाप्यकृतं इतिचेतसिचिंतयन्मुनीशः प्रययो कामगिरिंगरिम्या अहोकामस्यसामर्थ्यंद्रष्टव्योसौ
महायशाः इतिसंकल्प्यमनसावनंद्रष्टुंगतोमुनिः २२ कामंचसुमहातेजाः त्वरयापरयायुषः तंदृष्ट्वामुनिमाया
तंकामदेवोविमोहितः २३ उवाचमुनिशार्दूलहास्यकुर्वन्मदोद्धतः प्रमदाकटाक्षविशिखैर्विहितोभीमनभवेदि
हंचविफलोभवः २४ किलतस्यमोहितधियः असभंविफलंह्यवैरिभुविपर्यरतां निखिलंभुवंकिमितिपर्यद्दसि
प्रचुरंहिदुखमधिगम्यपुनः २५ प्रमदागणेनविधुरोजडधीरितिमेमतिः किंमुनेरकमुने इतितस्यलंपठधि
योहिवचनंपरिगम्यशापमदात्कमुनिः २६ किलसप्तरात्रपरतोयदिवैनिवसोफिरो सहित्त्वपरोमरणंस
मेष्यतिनिजैर्निखिलैः सहजेतरैः रितिदृढंवचनं २७ शापंदत्वाथकामायमुनिः कण्वोययौपुनः कामोपिशा
पसंविग्नः पुत्रदारैः समावृतः २८ गत्वाकुरुतुसरांश्चसुखंतिष्ठतिनिर्भयः कामालयमिदंतस्मात्जातं
कामनिवासतः २९ कल्पांतरेथराजर्षिपद्मनाममहाबलः धर्मशीलोजितक्रोधः क्षत्रियाणांकुलोद्भवः ॥३०

286

ज्ञात्वागिरिवरंरम्यंकामदेवेनवर्जितं प्रविश्यसहसातत्रब्राह्मणैरनुमोदितः ३१ कल्पमेकंपुरातस्थौमुदयापरयायु
तः तद्राज्येनैवदृंज्योतिनापराधपरः क्वचित् ३२ धर्मेणवर्तमानस्यकल्पमेकंगतंततः अथतस्यमहाकालोयती
तोधर्मसंचयैः ३३ व्यतीतसमयंपूर्णेपंचत्वंप्रापसुव्रतः शिवलोकंगतोराजाशिवस्यगणतांगतः ३४ अतः
पद्मालयंनामजातंक्षेत्रस्यपावनं नारदउवाच कल्पांतरेमहाराजन्नन्यत्कार्यांतरंत्वभूत् ३५ पत्नीहिमवतः
साध्वीमेनानामेतिविश्रुता उवाचदुहितातस्यायादसापरमेष्ठिने ३६ तयोर्विवादः संजातोमातृपुत्र्योः परस्प
रं एकावदतिमेभर्तापर्वताग्र्योगुणोत्तमः अन्यावदतिलोकेस्मिन्ममभर्ताजगद्गुरुः उवाचाहपुनर्मातामेनादे
वीसुरेश्वरी तवभर्तादुराचारोनानारूपधरस्तथा ४० लोकोविद्विष्टकर्माचकपालकृतशेखरः कथंनलज्जसे
दृष्ट्वादृशास्तेपतिर्यतः ४१ मात्रानिर्भर्त्सिताप्येवंदेवीसाभुवनेश्वरी प्रत्युवाचमृडानीसारुदंतीशोकसंभृता ४२
निर्भर्त्सयतियेक्रूरामातरंपितरंगुरुं तेयांतिनरकंघोरंप्रभूतंचित्रयातनं धर्मविचार्यमनसासुधियाभाषमेनति

मनोविरुधे शिवमस्तकेकुशलतांहिगतानहितेगृहेस्थितिमुपेम्यधुना ४४ अपर्णानिर्गतातस्मात्पितृगेमान्म
हाधनात् पर्वतस्यैकदेशेनुसखिभिः परिवारितं ४५ उमादूताः सर्वेप्रकुपितधियोरोषसहितेक्षणादेहंतुंगंतुं
हिमनिचयंजातवेगाः सवेगाः ४६ दृष्ट्वातीव्रान्हिभूतान्हिमगिरितनयावारयामाससर्वान्नैवेतद्युक्तंचरित्रं
ममदुहितुरितिप्रापशांतिंचतूष्णीं ४६ निराकृतेपुदुहितेत्वरयापरयायुतः गणानामग्रणीर्यातोयत्रशंभुर्जग
द्गुरुः ४७ इत्यादिकरुणानिधिंप्रभुतरंकैलासचूडामणिं प्रोद्यन्मौलिविधुंप्रचंडपरिषत्संतुष्टमुग्रंरुधीः ४८ पा
दांतपरिभ्रमद्भ्रमरवक्त्रांभोजनामाश्रुवे मूर्ध्नाभक्तिविभक्तिसकलितयामस्तानतः ससया ४९ प्रणिपत्यमहेशानं
दूतः प्राहगिरीमहान् देवीमृडानीसाचैवत्यवज्ञातागृहेपितुः ४९ पर्वतस्यैकदेशेनुसातिष्ठतिगणावृता नायाति
नवसांनिध्यंलज्जमानामनस्विनी ५० इतितस्यवचः श्रुत्वामृडः क्रोधकृतस्वरः अहोगणाः समायांतुशीघ्रमि
त्याहतेअपी ५१ रुद्राज्ञांपरिपठ्यंतोगणास्तत्राशुनिर्यु ययुः अनेकैर्विविधैश्शूरैः कीदृशास्यपराक्रमे ५२ ययुस्त

स्मात्ततंदेशंमहादेवः समाययौ महावीरवलैर्घोरैःसंग्रामेभृशदारुणैः ५३ अतिप्रतापविख्यातोमहाघोषणवीर्य
वान् गणैरनेकैः परिवारितोमहत्तगजाननः शीघ्रतरंपुरस्तात् वरावरोहः परिभीषयन्नरीन्संध्यामयन्नायुधव
र्यमंकुशं अन्यैश्चविविधैश्शस्त्रैर्भ्राजमानोमहाबलः ययौकोपाग्निसंदीप्तोविघ्नसंघनिवारणः निजायुधपरिभ्रा
जन्निर्ययौभैरवस्ततः विविधैः परिवृतोदूतैस्फारयन्निजविक्रमं षण्मुखश्चमहावीरोवीरणामग्रणीस्ततः ती
व्रसंरंभसंदीप्तोमहाकालइवापरः ६० विविधास्त्रप्रस्फुरणैः कुर्वन्दीप्ताश्चहरितः स्वयं अष्टादशभुजादं
डभ्रामणैः त्रासयन्नरीन् ६१ शास्त्रतेजः प्रपूरेणार्चंडरश्मितिरस्कृतः एवंत्वनेकंविविधंप्रकीर्णसैन्यंभवा
नीप्रतिसंप्रबोदितं ६२ इतस्ततोयातिविलम्बदोजसांचरंमहतेरिपुहृदुहाभिधं श्रुत्वारवंत्यद्भुतमंबरेभृशं
क्ष्मादयोदेववराभियावृताः किमेदतदाश्चर्यकरंहिजायतेनूनंगिरीशस्यबलंभवेदिदं ६४ इतिज्ञात्वागिरी
शस्यचेष्टितंकादयोबुधाः स्वस्वयानंसमारुह्ययातास्तेविस्मयाकुलाः ६५ कुत्रायंनिर्गतोरुद्रोनायंदेशांतना

.०२

कर॰ म॰

शनः कालहस्त्याह भगवान्हंसवाहंस्फुटंवचः ६६ परस्परंदेवगणाः समासन्नैरसंगम्यशंभोपरिलक्ष्यमा
णाः चिकीर्षितंदेववारस्यपक्षयसः संज्ञात्ववानादिभवोहिकंजभूः ६७ ज्ञात्वातस्यचिकीर्षितंभगवतोरुद्र
स्यनिर्गच्छतो ब्रह्माद्याः सुरपुंगवागणवृतास्तस्थुस्थिरंस्वयंवरे ६८ किंस्यात्तत्रगिरौगतेगिरिसुताकांतेस्व
नंतेचिरं द्रक्ष्येष्ठेकिलकौतुकंमहदिदंजातंकचिंतामराः ६९ एवंस्थितेषुदेवेषुकौतुकेच्छामनीषया नानानी
कुर्वतोयातोमहेशः कंपयन्मही ७० आस्फालयन्कराग्रेपात्रिशूलंलोकविश्रुतं दृष्ट्वातिघोरमायांतबलंत्रा
शौर्महायशाः ७१ विमवान्प्रेषयामासचारंसंचारकोविदं हिमवानउवाच भोचारगच्छत्वंशीघ्रंकोपया
तिबलान्वितः ७२ देवोवाराक्षसोवापिदैत्योवाकोपिविश्रुतः राजावाकोपिवीराग्र्याः कंपयंभूतलंमहत्
७३ कस्यान्वयेसमुत्पन्नः कस्मिन्द्देश्येव्यवस्थितः इतिसर्वंविचार्याशुहिभोजानकोविदं ७४ अधिगम्य
नियोगमाहितंप्रतिगृह्याशुगिरस्सुपाययौ सतदागिरिवर्यशेखरोयतयातितेलसत्तःपुरः ७५ परिग

255

म्यभवस्यचेष्टितंप्रतियातोहिमवान्गिरंप्रति निखिलंपरिशीलितंयथोकथयामासहिमाद्रयेसुधीः चारउ॰
अद्रिराजसमायातिशंभुः कोपोज्वलोमहान् अनेकवीरविख्यातेः संहरान्निवतेजसां ७७ जगद्व्याप्तंमहा
सैन्यसंरंभाग्निप्रतापितं प्रचंडवधमानेनतेनत्रस्तादिवौकसः ७८ किमुमुद्दिश्यसमायातिनविघ्नस्तस्य
चेष्टितं विधेयोहिप्रतीकारोनात्रकालंप्रतीक्षितुं ७९ शृणुष्वधर्ममहाराजन्मतिर्मेइतिनिश्चिता इतिसंकथयि
त्वाभूधराग्र्यांमहीयानधिगतपरतत्त्वश्चारवर्योहिमाद्रिं ८० समधिगतानियोगोनिर्ययौस्वंसुधामप्रचुरगु
णसुपूर्णवेगतस्तापहेतुः चारेगतेहिमाद्रिर्वैचिंतामायद्दुरत्ययां मयिकोपप्रविष्टोयंरुद्रोह्यद्भुतविक्रमः ८१
किमस्यकारणंचैवजानीमोचयमित्रवै चिंतयन्त्वेतितत्सर्वंममासंभवविह्वलः ८२ । अवाद्दाकारयामासनि
श्चयार्थंमनीषया तत्क्षणादागतस्तत्रमंत्रिवर्योमहायशाः ८३ पुरतोदंडवत्सत्यप्रणाचविनतः सुधीः आ
ज्ञामहामनाः शुद्धोमंत्रार्थोहिमवद्गिरिं ८४ आमात्यवा॰ किंकार्योहिमहाप्राज्ञमयातत्परिशांसतु भवा

भवानमोघविज्ञानसर्वशास्त्रेषुकोविदः वचनंत्वधिगम्यमंत्रिणोजितरांतोषमवापभूधरः प्रतिवक्तुमुपक्रम्य
ह्यथोगिरिराजः कुरुतेस्मविह्वलः ८५ हिमवा० मंत्रिवर्यमहाराजजायताकोपकारणं कैलासवासिनःशंभो
राजनीपतिमौलिनः ८७ नाहमपरिभातिधूर्जटेर्यत्प्रतिपद्यमहेतुरप्रतिष्ठे त्रिभुवनभुवनादिसंविधातुर्गल
धृतलक्ष्मणईशितुः शिवस्य ८८ इतिहिमवतउच्चैर्भाषणंनिशम्यप्रकृतिगुणवरिष्ठश्चिंतयित्वानिकामं
गिरिशपुरुषहेतुंज्ञापयामाससर्वपरिहतनिजवंद्यस्त्यद्रिराजायमंत्री ८९ मंत्र्युवाच अद्रिराजमयाज्ञातं
शंभोः कोपस्यकारणं भवानीहित्यवज्ञातागेहेतवनमेश्वर ९० अधुनासागतागेहात्किंचिद्देशेगणावृता
तयत्वाप्रतिघंप्राप्तोधूर्जटिर्नात्रसंशयः ९१ इतिश्रुत्वावचस्तस्यराजाद्रिः परिशंकितः किंकर्तव्यमयात्र
मंत्रिणंपुनरब्रवीत् ९२ हिमवान० कोपशांतिर्विधेयास्तुमयाचंद्रार्धमौलिनः केनोपायेनतद्ब्रूहिमंत्रिवर्य
महायशाः ९३ मंत्र्युवाच शरणागतवज्रपंजरेकरुणाश्चावहिकंकणोज्वले मककोटिविभूषणोल्वणोक

टिसंभावितचर्मणीश्वरे परिपूर्णनिशाकरमुखोभसितालुप्रविचित्रभूषणेगललंबितनिजमशीर्षणेशरण
व्रज ९४ इतितद्वचनंहिमभूधरः परिपाल्याशुसमुद्यमंदधौविविधैरुपचारहेतुभिः परिपूर्णोगिरिशाय
तस्ततः ९५ जगाममहिमानंहिजानन्शंभोर्महायशाः त्वरयापरयायुक्तोरुद्रदर्शनकांक्षया १००
९. ९. इतिश्रीपाद्मेमहापुराणेकरवीरमहात्म्येत्रिषष्ठितमोध्यायः ६३ ९. युधिष्ठिरउवाच
आगतेहिमहादेवेदेवीलज्जान्वितासती किंतत्रैवस्थिताब्रह्मन्गतवान्स्वस्थलांतरं १ एतत्कथयभो
स्वामिन्गिरिजायत्रसंस्थिता किंचकारनगोब्रह्मन्शंभुश्चपरिकोपितः २ तत्त्वः कथयविप्राग्र्याकृपया
परयाभवान् पिबतस्त्वन्मुखांभोजमकरंदमतृप्तः ३ ममाखिन्नरुचेर्भूमन्सर्वान्सर्वार्थकोविदः
नारदः प्रथमाद्दिगणावृतेहरेपरियातेभुविशंकरेसति ४ परिलज्ज्यस्वचेतसाच्युतानगिरिजासुरभू
न्नगात्सजाभुविसंप्रेषयामासभवानीलोकभावनी ५ दूतंपरमकल्याणंशीघ्रंस्वगणाग्रणीः शीघ्रमागच्छ

कम॰ भोद्भूतस्थानंदृष्ट्वामनोरमं ८ यत्राहंसततंवासंकरिष्येशंभुलज्जया अवज्ञाताह्यहंनैवशंभोर्दृष्टिपथंपरं ९
व्रजामिमहतीभूयोनिर्लज्जेवयथापरा अपर्णाख्याहूतोभुविविखिलक्ष्मीलट्भुवोव्रजनरम्याः काम्याः सम
धिगततत्त्वः समयशो विनिश्चित्यस्थानंनिवसतिनिर्धारम्यमथतांव्रजंपूज्यादेव्यासमधिगतयोरम्यइतिचः
अज्ञालब्ध्वात्वपर्णायाहूतः संहर्षपूरितः मत्याः पर्यटनंकुर्वन्गिरिवर्यान्विचारयन् १० पश्चालयेसमाया
लोद्दृष्ट्वाभस्थामनोरमं अंबिकावासयोग्यंहिस्थानमेतन्नभवेत्भुवि ११ इतिनिश्चित्यमनसात्वंबिकासं
न्निधौगतः प्रवक्तामाचचक्षेतत्स्थानंनिर्जरदुर्लभं १२ तच्छ्रुत्वापरमप्रीतादुर्गादुर्गतिनाशिनी ययौ
पश्चगिरिंरम्यंचित्रद्रुमविचित्रितं १३ दृष्ट्वास्थानंहिपञ्चस्पतत्रस्थातुंमनोदधे तत्रस्थित्वाभवानीसाम
मनः खेदंजहौक्षणात् १४ विविधंसेवकसेवितपंकजागिरिशासंभृतशीघ्रमनोजवा ललितहासविला
सचेष्टितैः समयमाशुविहायपर्यंकिका १५ शिवायागमनंप्रोक्तुंयत्स्थहितयानघ अथान्येरपियत्र

290

शेवदिष्येगेंद्रचेष्टितं १६ आगतंहिमहेशानंश्रुत्वानिकटवर्तिनं हिमवान्हिमहाराजः पूजाद्रव्यान्वितः
सुधीः मंत्रिभिर्निजवृंदैश्चपरिवृतोमहेश्वरं आराधितंमहारुद्रंश्मोशंकासमाकुलः १८ तत्क्षणात्प्राप
तत्स्थानंयत्ररुद्रोव्यवस्थितः दृष्टवान्स्तापिताकुकोटिमसृणंरोपानलोत्थज्वलं ज्वालामालमहात्रिशूल
विलसद्धाकुंत्रिनेत्रंसुधीः पारशांतविसर्पणप्रणयिनारंप्रासरोपाद्रमोरंडस्येवतिपालवत्समपतत्श्री
चंद्रमौलीश्वरं २० प्रणिपत्यमहेशानंपूजयामासकुध्रराट् विविधैरुपचारैश्चदर्शनाकुतुकांक्षिकः
२१ तुष्टावचमहादेवंभक्त्यासंभृतयापरं नमः शिवायशांतायनिर्गुणायगुणात्मने २२ जटिलाय
परेशायजगद्रूपायशालिने अंबिकापतयेनित्यंनमः सोमार्धधारिणे २३ नमः कर्पूरगौरायधीरा
यपरमेष्ठिने नमोवेदांतवेद्यायकामरूपायतेनमः २४ नमः कंदर्पसंहर्त्रेकैलासपतयेनमः विश्वो

२०५

क.र. म. ञ्जुवाञ्छितिध्वंसकारिणेपरमात्मने २५ नमोब्रह्मादिवंद्यायविद्यानांपतयेनमः नमः पिनाककोदंडभ्रा
जमाननमोस्तुते २६ कपालमालिनेतुभ्यंवृषयानायशंभवे नमः स्त्रिपुरसंहर्त्रेनमः खट्वांगधारिणे
२७ नमः प्रमथनाथायचंद्रार्धकृतमौमौलिने निरंजनायपूर्णायगुणपूर्णायतेनमः नमः स्थूलाय
सूक्ष्मायसर्वाधिपतयेनमः २८ फणींद्रकृतसौदंडवल्लभायस्थिरात्मने जटाजूटांतेविलसतियदीपे
शिवतरामुनेर्जह्नोःकन्यात्यसिलमणिहारेजवजवाल् तथाकंठेकैरवाप्रभुरतरभासापरिहठानमस्त
स्मैभस्मेकलितकंठायमहते २९ यदग्रेस्थिततीव्ररुद्रसगुणप्रोयत्प्रचंडस्फुरत्सोमोद्भूतस्फुरदंडचंडवि
हतिन्त्यास्थिरोभूषणाः तेजोभूषणभूषितामरवराब्रह्मादयः किंकराजायंतेशरणागतप्रणयनेतस्
स्मैनमः शंभवे ३१ नत्राहंस्तोतुंत्वांगिरिवरशिरोभूषणमपोह्यपारेशः शर्वस्त्वांगणपतिवेदोपिनिखि

२९।

लं यतोवाचान्नोचेंनभवतिकृगण्याः गुणगणाः प्रभोशंभोधेहिस्फुटतरकृपादीनवदने ३२ नतेजातेभू
मंस्तवचरितमाश्चर्यजनिवहंनतेकार्यंशांतंजनयितुमलंनेवभवतः तथापीहत्वांवैविविधभवसंतापिततनोः
कृपाभागिरथ्यांशमयपरितापंजडधियः ३३ अयत्वत्पदपंकजप्रविलसत्प्रोद्यद्विरेफस्फुटं यतोनिर्वृतिमा
धुभूरिजनितेघेतद्भवानीपते ३४ गतस्तापज्वालावलिपरिदृढस्तीव्रदहनोयतोभक्त्यानौमिप्रवरगुणपूर्णो
प्रभुवरं ३५ इतिहिमवतउच्चैर्वाक्यमाकर्ण्यतत्पौगिरिवरहिमपुंजेचंद्रमौलिः कृपालुः निजकरकलि
तोत्स्फारमौलिंहिमाद्रिंविविधवचनवृंदैः स्तोषयामासशंभुः ३६ श्रीशंभुः नास्यदंममसंरभकृष्म
वर्त्मनउच्चकैः भवान्मान्योहिमेभूध्रत्वादृशेषुनहिस्फुटं ३७ कोपरत्वादृभगवान्प्रसहंत्रिपुरांतकः
नतेत्यागोमयाज्ञातोत्यगस्कृद्भवान्नहि ३७ इतिसंभाष्यतंमान्यंनयसाधेयतः सती आत्वाशंभोर्महे
शस्यवांछितंचंद्रमौलिनः ३८ निनायमहतीयत्नाद्यपर्णारोपरूपिता ततः शंभुर्जगामाशुभवानीयत्र

२८५

कर॰म॰रूपिता ३९ नाम्नापञ्चगिरीशेसर्वगणवृंदनिषेविता योगिनावृंदसंसेव्यपादपद्मामहासती ४० गिरि
शागमनंश्रुत्वापरंतोषमवापसा प्रत्युज्जगामगिरिजाम्मृडायपरमेष्ठिने ४१ भृंगश्रोणिविडंबकुंतल
लसत्त्रश्रीमच्छिरोभूषणा पूर्णेंदुःप्रविडंचसुंदरसुंदरमुखीप्रोत्तुंगवक्षोरुहा ४२ ईषद्गुञ्जितरम्यवि
ग्रहलताहारोरुभूषावली यातीसास्मरशोषणंपतिवरंशंभुंमृडंधूर्जटिं ४३ दुकूलवसनास्फुरस्फुरि
तसूत्ररत्नावलीप्रफुल्लकुचकुंभयोः स्फुटितरिवम्यपक्षछटा लसत्पदसरोरुहसवलितयादभूषास
ती जगामभवसन्निधिंकलितचारुहाराबलिः ४४ आगतांहिसमासाद्यदेवोदेवीम्मृडस्स्वयं वृषभादव
तीर्याशुदेवीम्प्रत्यागतस्स्वयं ४५ देवींधृत्वाकराग्रेणाल्यालिलिंगाशिवस्स्वयं तदंगस्पर्शसंभूतहर्षलविल
कंटकः ४६ संपूजितस्तयादेव्यारुपचारैरनेकधा उवाचाथमहादेवीचारुवाक्यंमहासति ४७ महा
देवः अपित्वास्मिन्समायातास्थानेकेनजगज्जनि तद्वदाशुवचस्तथ्यंशुश्रूषामपिवर्तते ४९ एवंस्था

२९२

णुवचः श्रुत्वारुद्राणीप्राब्रवीद्वचः यच्छ्रुत्वातुमहादेवोमुदमापमहीपते देव्युवाच अवज्ञानसमाक्रांताकथंत्वद्दूरतो
भवेत् इतिक्रीडापरिश्रान्त्यास्थानेस्मिन्नागताः प्रभो ५० मनोरमंहिपञ्चस्यगिरिवीक्ष्यमहाद्भुतं अवज्ञानप
रीत्यात्वशोकरूपश्चोमथाचिसात् ५१ शिवायावचनंश्रुत्वामहादेवोजगादह गच्छावस्थानकंस्वंहिकैलासंव
रपर्वतं ५१ नत्वत्रास्थानतः किंचिद्दृश्यतेह्यधिकंप्रिये इतिरुद्रवचः श्रुत्वाह्यपर्णाविमनाभ्भवत् ५२ मृडंप्र
त्यवदद्वाक्यंचत्वनुमानप्रदंमहत् प्रमथाधिपतेभूमन्नाहंस्प्रष्टुंगिरिप्रभो उत्सहेधूर्जटेयास्मिन्लोलुपंमान
संमम इहचसतिसतृष्णामानसंत्वद्विवर्येभवन्नहितत्सुभूध्रे यस्मिंश्चित्तस्यकष्टं उपचितमुपभ्रंगैरुतमंसं
उषित्वास्थ्यामिवलवमम्येत्यद्विराजवरिष्ठं ५४ भवानीवाक्यमाकर्ण्यमृडः प्रेमसमाकुलः तथेतिपरि
गृह्याशुवासंचक्रेचिरंविभुः ५५ क्रीडार्थेनिर्मितंतेनरम्यंपुष्करणीत्रयं तत्रक्रीडंस्तयासार्धंप्रेमोत्फुल्लेन
चेतसा ५६ चकारवासंह्येकस्मिंकल्योद्यंचापतिस्वयं तत्तीर्थत्रयकंदिव्यंसर्वपापहरंपरं ५७ शिवस्योः

·७

कर· म· क्रीडनावासंतत्तुल्यंनैवकिंचन शिवावासंतथाप्येतत् कथितंहिशिवाचुयं ५८ भुवितीर्थशतेलोकेतीर्थेघे
कंहिकाशिका साम्येतत्करवीरस्यकलांनार्हतिषोडशी ५९ माहात्म्यंनैवजानंतिशिवभूधस्यनिर्जराः कुतः
पुनर्मनुष्याणांराजन्स्याज्ञानमस्यवै ६० कल्पांतरेव्यतीतेतुभवस्तस्मान्निजंपदं उमयासहसंप्राप्तः परमप्री
तिसंभवः ६१ शिवालयंमहाक्षेत्रंभुक्तिमुक्तिशिवप्रदं सेवनीयंप्रयत्नेनतस्मिन्नविघ्नसंभवः ६२ तवरा
जमयाप्रोक्तंशिवालयकथानकं अपरंपरिपृष्टस्यकथयामितवानघ ६३ युधिष्ठिरउवाच धात्पुत्रमहायो
गीनपिबंस्त्वन्मुखांबुजात् कथंरसाम्रतंब्रह्मन्नतापैस्तप्यतेमनः ६४ नानाविधेषुविषयेषुविषक्तबुद्धे
स्तृष्णामहाग्निकरदुखसमाकुलस्य दीरनस्यदीनपरिचारंपरिपुतस्यक्षेमायदर्शनमभून्मुनिकोविदस्य
६५ नारदउवाच कल्पांतरेव्यतीतेतुयातेचंद्रार्धमौलिनी कैलासशिखरंरम्यंप्रतिराजन्युधिष्ठिर ६६
ज्ञात्वाशिवालयंरम्यंसर्वकामप्रदंमहत् सिध्यष्टकप्रदंलोकेनान्यत्तुल्ययासुतं ६७ अब्जयोनिश्चचा

२९३

चारात्रंतपश्चोग्रंधृतव्रतः प्राप्त्यर्थंद्यणिमादीनांऋषीणांविस्मयावहं ६८ यत्रस्थितामहादेवीमाराध्ययदमेदधीः
उग्रेणातपसादेवीब्रह्मणाः परितोषिता ६९ तुष्टादेवीवरंकाम्यंअलभ्यंदेवदानवैः देव्युवाच वरंप्रार्थयमेधातः
तुष्टाहंचतुराननः ७० त्वत्तपः स्तस्मयातुल्यंनान्यदृष्टंतपोमया प्रसन्नास्मिमहाबाहोवरदानंतवानघ ७१ म
त्प्रसादाद्धिदुर्लभ्यास्त्विंद्रादीनामपिस्फुटं देवीवरप्रसादष्टालक्ष्मीब्रह्ममहातपाः ७२ वरंसंप्रार्थयामासमहाभो
गोजगज्जनिः ब्रह्मोवाच यदिदेविप्रसन्नोसिसिद्धिदेहिममाखिला ७३ देवित्वंचचलानित्यंख्यातासिनिगमेलि
खें।। अजस्रंतिष्ठभोदेवीस्थानेस्मिन्गिरेध्रुवं ७४ तथेतिप्रतिज्ञायवरंदत्वतीविभोः स्थिरीभूतागिराव
स्मिन्निरूपापरमेश्वरी ७५ अणिमादिसमेतोहिब्रह्मलोकपितामहः तिष्ठतीतिसमाज्ञायदेवाश्चऋषयोययुः
ब्रह्मापरिवृतोदेवैगिरावस्मिंस्थितोध्रुवं राज्यंचकारनिर्व्यूढंकल्पमेकंमहाध्रुवं अश्वमेधादियज्ञाश्चचका
रनिगमोदितान् ७८ धर्मसंस्थापयामाससत्यसंधोत्यचिंत्यधीः तीर्थानांशतकंचापिकृतंतेनमहात्मना ७९

२८

क्र. म. तेषुतीर्थेषुयः स्नातिमर्त्यः श्रद्धासमन्वितः सायुज्यंब्रह्मणोगत्वामुक्तिंयातिनसंशयः ८० ब्रह्मतीर्थशतं
यद्धिवेदेसारमितीरितं वेदानांसारमादायनिर्ममेत्यजअभ्यर्थतः ८१ नत्यस्यजानंतिमहर्षयोवैतथासुरा
वासुरयूथपाश्चं तत्वंरहस्यंपरमंहियस्मात्तन्नामाघौघप्रहरणंप्रकीर्तितं ८२ व्यतीतेकल्पकेतस्मिन्नज
गामभुवनंस्वकं ब्रह्मादेवगणैः सार्धंसत्यलोकंमहर्धिमत् ८३ युधिष्ठिरः अत्याश्चर्यकरंह्येतत्त्वकथितं
ममसुव्रत तीर्थमाहात्म्यमत्यर्थं सर्वाघध्वंसकंपरं ८४ यक्षाद्रिरभवत्केनतद्ब्रूहिमुनिपुंगव नारदउवाच
यक्षेश्वरोमहायोगीपूजांचक्रेहिधूर्जटेः ८५ नित्यंस्नात्वामहेशानंश्रद्धाभक्तिसमन्वितः अनन्यभक्त्यासभवं
विविधैरुपचारकैः ८६ प्रेमप्रवणचित्तेनत्वर्चयामासधूर्जटिं रुद्रानुवाकैस्तोनित्यंत्वभिषेकैर्निरंतरं ८७
कारयामासयक्षेंद्रोविरपयासक्तचेतनः कर्पूरकस्तूरीयुक्तकुंकुमाक्तसुचंदनं ८८ शिवप्रियसुधान्यानांलक्षैः
श्चैवमहायशाः करवीरजपुष्पाणांलक्षणाथाप्यपूजयत् ८९ सुवर्णपुष्पलक्षेणपत्राणांबिल्वसंभवैः फलैरपि

२९४

तथादिव्यैश्चकारलक्षपूजनं ९० स्वर्णपंकजानांतुकोटिपूजांचकारसः प्रत्येकंरत्नलक्षैश्चसदाशिवमतोषयत्
९१ शिवप्रीतिमनाः प्रीत्यापूजयामासवैद्विजान् दानानिप्रीतयेशंभोश्चकारसुपयामुदा ९२ महेशंप्रार्थया
मासशिवलोकेसनातनं उवाचवरदंशंभुर्वरंसुखमतंद्रितः ९३ देहिशंभोमहेशानयदिमेवरदोभवान् गणा
नामगणपतित्वंमेत्यचलंहिपदंतव ९४ ममदेहिमहेशानइतोयंवरईदृशः महादेवः विविधविषयाश्चाप्यत्र
स्यांतकोयोभवतिजगतिनित्यंनैवयोग्योहिलोकः ९५ ममनिखिलविरक्तोयातिकालंमहात्मन्नमरवरसुकाम्य
नैवयस्मान्निवृत्तिः तस्मात्त्वंयक्षराजेंद्रयाहिब्रह्मालयंप्रति तत्रराज्यंमहायोगीन्कुरुष्वत्वंयथोचितं ९७ राज्य
धर्मपालोकांस्त्वंपालयाशुमहीतले विषयानुपभुज्याथविरक्तोभवसुव्रत ९८ विरक्तोज्ञानलाभेनपश्चाल्लब्ध्वा
पदंमम इतिज्ञात्वावरंदेवस्तत्रैवांतर्दधेभवः ९९ यक्षोपिरुद्रवरतः प्राप्तः साम्राज्यएकराट् यथोगिरि
वरंरम्यंयक्षराड्ब्रह्मशासनात् चिरंजीवितमासाद्यकल्पमेकंसमाहितः वरासनेसमारोहंचकारकिलयक्ष

राट् २ ततोदेवगणाः सर्वेसंतोषाहृष्टमानसाः ववृषुःपुष्पधाराभिः नेदुर्दुंदुभयःस्फुटं ४ गायंत्याप्सरसां
संघः ननृतुःस्तत्रवैश्रवं विविधानेकभूषाणिवस्त्रैः सूक्ष्मैर्महायशाः ५ तोषयामाससंतुष्टोयक्षराजोम
हामनाः तस्मिन्महागिरौरम्यंतडाकंखनितंमहत् ६ स्थापितंलिंगमेकंतुनाम्नायक्षेश्वरःस्मृतः तत्समा
राधनेनित्यंकृतसंकल्पमानसः विविधैरुपचारैश्चपूजयामासयक्षराट् १०७ ७ ७ ७ ७
॥ इतिश्रीपद्मपुराणेकरवीरमहात्म्येनारदमार्कंडेयमहामुनिसंवादेयक्षवरप्रदानंनामचतुःषष्टितमोध्या
यः ६४ ॥७॥ युधिष्ठिरउवाच कथंचकारधर्मिष्ठोराज्यंयक्षेश्वरोमुने तत्सर्वंवदकल्याणत्वंमेधर्मक
थानकं १ नारदउवाच चतुरंगकसैन्यश्चयुक्तःशास्त्रविशारदः यशोवितानेयक्षेंद्रोमहातेजाहिभूपतिः २
तस्मिन्राजनियक्षेंद्रेपापंनैवास्तिकुत्रचित् सर्वेपुण्यपराराजन्पवित्रेभुविमंडले ३ देवछंदस्कनिर्गीत
कर्मछंदनिषेवणः मंत्रजाज्ञाननिष्ठाश्चतपोनिष्ठास्तथापरे ४ केचिद्द्विजैकनिष्ठाश्चकेचिद्देवपरायणाः

जपनिष्ठास्तथैवान्येकेचित्पूर्तादितत्पराः ५ विष्णुभक्तिसमाक्रांताः केचिच्छैवामहाधिपः अपरेत्युभयो
रूपाविष्णुभक्तास्तथापरे ६ तपः स्वंजयुताः केचित्तस्मिन्राजन्निशाम्पति अथासौपालयामासनिखि
लेचनिमंडले ७ ॥ राजधानीगिराचक्रेमत्ताज्ञामधिगम्यसः द्विजान्संस्थापयामासधर्मनिष्ठःपरंतपः
८ नगरीरचयामासनवीनांस्वर्गदूषणीं प्रोतुंगरत्नैर्युक्तांउच्चः प्राकारभूषितां रथ्याचतुष्पथोपेतांवी
थिभिः परिवारितां नभस्पृशिमहातुंगगोपुरोपस्कृतांचिरं १० विविधापणकोपेतहट्टवीथीविभूषितां
मार्गेमार्गेचरुस्तंभनिर्मितोत्तुंगगोपुरां ११ तोरणाक्रांतवीथीभिः भ्राजमानीपुरीस्वकां विचित्रत
रुराजिभिराजमानापर्यातथा १२ चित्रध्वजपताकाभिर्भूषितांसुमनोरमां मलयाद्रिसमुद्भूतश्रीखंड
कणासंकुलैः १३ अट्टैराट्टीकृतोत्तुंगराजमार्गमलंकृतां यस्यांसिंहासनंदिव्यंमहामणिविभूषितं १४
चकारसुमहावीर्योयज्ञमिंद्रादिदैवतं चातुर्वर्ण्यमवस्थानंमाश्रमाणांतथैवच १५ निगमैर्लोचितैस्त

क॰र॰म॰ अथापरकल्पहिजातुकृत् यक्षेंद्रेण निजेपदेस्य विरतं संपाल्यमानोचिरं कोपाविस्मयसंकुलेन मनसानंदन्महत्
प्राप्तवान् १६ सोवाकोपिमहायशाः समभवत्साम्राज्यमातन्वतः श्रीमद्धूर्जटिशासनोभगवतः संप्राप्तवा
नंजसा १७ धर्मं विपोषयति तोषयति प्रजानां वृंदं विभूषयति यक्षबलं महद्धन् तस्मिन्महायशसि भूमि
धरे महेशशिक्षात्तदा समधिगम्य न कोपि दोषः १८ एवं पालयतस्तस्य यक्षराजस्य वैभवं व्यतीतोथमहान्
कालो नानाधर्मरतस्य हि १९ रावणादिनिशाचारगणस्य महतीं श्रियं शिवप्रसादजां दृष्ट्वा हेतिश्चक्रे तपो
महत् २० महेशतोषणं युगं वर्षाणां दशपंचच सहस्रं घोरसंकल्पः कालरूप्यविलोमहत् २१ महेश्व
रप्रसादेन बलं लब्ध्वा महामतिः निशाचरगणैर्गुप्त ओजस्वी कोपसंभृतः २२ रक्तजिह्वं स्वकं भृत्यं प्रेषया
मास सर्वतः मत्तोधिकः कोपि लोके वर्तते यत्र कुत्रचित् २३ त्वं ज्ञात्वायाहि तूर्णं त्वं तेन योत्स्येह्यहं चिरं
इत्याज्ञां मूर्ध्नि संभृत्य चचार रक्तधा चिरं २४ ज्ञात्वा यक्षगिरीयत्र तत्र रक्ष समागतः निशाचरं प्रति महत्

यक्षराजस्य चेष्टितं २५ रक्तजिह्व उवाच स्वामी तिष्ठति यक्षेंद्रः स्वलोभ्यात्त्वलेनवै चतुरंगेण सैन्येनाहितस्त्वं
दृष्टः क्वचित् २६ हेतिरुवाच कस्मिं स्थाने स राजेंद्र तिष्ठति प्रचुरं बलैः कस्यान्वये समुत्पन्नो जात्यावांपिरि
कीर्तितः २७ रक्तजिह्व॰ नाम्ना यक्षगिरिः प्रोक्तः स्थानं तस्य महात्मनः जन्म यक्षकुले जातं जातिः सैव
निशाचर २८ इति दूतवचः श्रुत्वा हेतिर्हासं चकार ह सकथं हि बलैर्घोरान्मत्तस्याद्धिकोजडः २९ सं
ग्रामभूरान्सोवीरानाहूयामर्षसंयुतः प्राह सर्वे भवंतस्तु निर्गच्छंतु बलैर्वृताः ३० ततो निशामुखे वीरा
धीरा यक्षगिरिं प्रति निर्दृष्टाशिरसादाय सर्वे ते च निशाचराः ३१ स्वांस्वान्धर्मैःसमासाद्य कवचादिवलः
पृथक् केचिन्नागैः प्रयांतिस्म केचित्तुंगैः स्तुरंगमैः अन्यैः स्वरैः रथैरश्वरथैरन्ये महाबलाः करभा
रूढास्तोड्राः प्रोत्तुंगमदृनिः स्वनाः अन्येर्यानैर्विचित्रैश्च मयेनानिर्मितैर्ययुः केचित्प्रासत्रिशूलायाः
केचित्खेअस्तिपायणः ३४ अन्येशरासनाक्रांताः खड्गचर्मधरापरे भिंडिपालक्षुरंसस्तः पाणयोहि महा

कर॰ म॰ बलाः ३५ गदामुधम्यवे केचिच्च केचिन्मुसलपार्यणेः शक्तितोमरयुक्ताश्च मल्लादिभिर्वहैः परे ॥३६ म
घध्वानिवरैकेकध्वनिनागगनंमहत् पूरितंत्यभवत्तस्मिन् गिरिंगच्छतिराक्षसे ३७ संरंभेणसमाश्रांत
चेतसंख्येयसत्वरं द्रुमानुत्पाटयामासुकरद्भिश्चापिमहाशिलाः ३८ निरुण्यांतंगिरिंयांतोराक्षसानांपतिः
स्वयं एककेशरीत्यतितेजस्वीपुत्राभ्यांपरिवारितः ३९ हेतिप्रहेतिसंज्ञाभ्यांत्यपरैश्चबलैर्वृतः तत्रागत्यम
हायोगीवेष्टयामासपर्वतं ४० सयक्षंसबलंशीघ्रंलंघयन्निखिलंजगत् अंतरिक्षसमुत्पेतुभटास्तस्यम
हात्मनः ४१ ग्रहणीदीपयामासुः कोपाग्निज्वलितांभृशं लंकेशूायक्षराट् सर्वंनिजंबलमुपानयन् ४२
ससंन्नद्धबलोपेतः श्चक्रेयुद्धंसुदारुणं कोटयस्तुपदातीनांदशपंचचकीर्तिताः ४३ पंचाशाङ्कजसाह
स्त्रंहयानांकोटिरेवच अयुतद्वयमानेनरथास्तेनमुदीरिताः ४४ चतुरंगबलोपेतसंग्रामंचक्रुवांश्चपुः
विविधगणसमाजेभ्राजमानोभ्राजमानोरुवाद्यप्रचुररवविपूर्णंत्यंबरंजायतेस्म निखिलविविधवारो

२९७

दंडसंरंभभोग्याभुजपरिस्फुरेशंप्रस्फुरेत्सर्वतोहि ४५ सेनाद्वयसमाजेतुयोधानांधावतांपुरा भारेणमह
तोराजन्चकंपेहीमहामही ४६ हयानांचरथानांचगजानांचपदातिभां परस्परोपरिजवाधावननमहत्
रा ४७ उद्भूतहिरजोभौमंखंरुरोधक्षणात्स्खलं चंद्ररश्मिसहस्रानूनंतिरोधानमवापह ४८ ततः प्रवृत्ते
